

॥ ब्रह्मसूत्रविमर्शः ॥

[सानुबन्धः]

अहोबिलमठास्थानविदुषा अनेकबिरुदावलीभूषितेन

श्रीचक्रवर्त्याचार्येण

विरचितः ।

SRI BRAHMASUTRAVIMARSHA and ANUBANDHA

By

P. M. CHAKRAVARTHYACHARYA

Nyaya Vedanthavidwan, Siromani, Sarasarakjna,
Vidwadupanyasakarathna, Sri Ramayana Amrutavarshi,
Sri Bhagavathasudhahswadee, Tiruppavai Kesari, Brahma
Vidhya Vachaspathi, Sathsampradhaya dhurandhara Sadhvavaduka,
Sri Ahobila Mutt Asthana Vidwan.

1990

Price Rs. 40

ग्रन्थकर्तुः विज्ञप्तिः

अहोबिलेशं जगतामधीशं प्रणौमि देवं त्रिदशैः निषेव्यम् ।
आचार्यरत्नैः परिपूजितांघ्रि स्रवन्मधु स्वाद्यसुपादपद्मम् ।।
यतिराजो भाष्यसूक्तिः श्रीमन्नारायणो हरिः ।
प्रमाता च प्रमाण च प्रमेयश्च प्रसीदताम् ।।

सुविदितमेवेदं तत्र भवतां विपश्चिदपश्चिमानां निखिलविबुधानन्दनीयगुणानां, यत् सस्कृत द्राविड आन्ध्र कर्णाट गूर्जरी, आङ्गिलादिभाषाः नानाविधा लोके सन्ति इति. तत्र भाषाज्ञानादेव लोकव्यवहारादिकं सर्वं संपद्यते इति तत्रापि संस्कृतभाषायाः गौर्वाण्या एव सर्वोत्कृष्टत्वमिति, तत्रापि च एकः शब्दः सुष्ठु प्रयुक्तः स्वर्गे लोके कामधुक् भवति, इति सस्कृतसुष्ठुशब्दप्रयोगे फलवत्ता इति च ।

संस्कृतभाषायाः यादृशं माहात्म्यं, न तादृशमन्यासां इत्यपि जानन्त्येव सर्वेपि । इतिहासभूतरामायणभारतादिः अष्टादशपुराणानि भगवद्गीताप्रभृतीनि सर्वाण्यपि संस्कृतमयान्येव । यदनुदिनं पारायणं प्रवर्त्यमान निखिलनि श्रेयससाधनं भवति । श्रुतिः स्मृतिश्च हि जनानां नेत्रद्वयमिति कीर्त्यते । यदभावे लोकस्यान्ध्यमेव भवति । एकेन हीनः काणस्स्यात् द्वाभ्यामन्धः प्रकीर्तितः इति हि श्रूयते । इदं सर्वमपि संस्कृतमयमित्यत्र न कोपि विप्रतिपद्येत । जातमात्र एव शिशुरपि 'क्व, क्व' इति रुदन् सस्कृतभाषायाः एव सर्वेषां मातृभाषात्वं प्रकटीकरोति ।

एवं निखिलनिःश्रेयससाधनभूतायाः गौर्वाण्या. प्राधान्येस्थितेऽपि केचित् दुराग्रहवशात् अमृतभाषामिमां मृतभाषां वदन्तः निन्दन्तः संस्कृतभाषाज्ञान् द्विषन्तश्च पशुप्रायाः वर्तन्ते इत्यहो ।

एतेन संस्कृतभाषापरिज्ञानवतां दौर्भाग्यमेवापतितम् । कति कति वृत्तिकर्शिताः संस्कृतभाषाप्रवीणाः कुलकषपाण्डित्यबन्तः खिद्यन्ति । वस्तुतो लोकस्यैवेद दौर्भाग्यम्--यत् संस्कृतभाषानादरणम्। पूर्वकाले मनुस्मृत्यादिकमेवावेक्ष्य भूपाः राज्यमकारयन् । संप्रति तु अपूर्वमपूर्वं तदा तदा कञ्चन नियम परिकल्प्य अधिकारपदवीमधिरूढाः स्वमत्यनुगुणं राजधर्मान् प्रवर्तयन्ति । अधर्ममपि धर्मं कुर्वन्ति धर्ममप्यधर्मम् । अहो एतेषा मतिविपर्ययः एवमुदभूत् । किमत्र कारण ? गौर्वाणीभाषापरिज्ञानाभाव एव ।

संस्कृतभाषामयश्रुतिस्मृत्यादिपरित्यागिनः भगवदाज्ञाच्छेदिन एवेति सर्वशासितुर्भगवतो द्वेषिण इति अनिघोरे नरके अवश्य पतेयुः ।

एव स्थिते सम्प्रति काले [नव डिल्लो भारतसरकार] भारतराष्ट्र महामन्त्रिसमितिः अति विशालमनस्कासुविदितधर्माधर्मा सस्कृत भाषापरिरक्षणार्थं महायत्नेन विविधोपाय विरचितवती । यथा अद्यत्वे भाषायाः शास्त्रज्ञानस्य चाभिवृद्धिः नूतनीकृता । सा हि समितिः श्रीनिवासस्य भगवतः कटाक्षविषयभूतायां श्रीपदपुर्यां (तिरुपति) केन्द्रविद्यापीठमिति किञ्चित् स्थान परिकल्प्य तत्र विपश्चिदपश्चिमाना केषाचित् त्रिसहस्राधिकमपि वेतन प्रदाय सस्कृताभिज्ञान् पोषयति ।

अह हि नाम—श्रीपदपुर्यां श्रीवेङ्कटेश्वरकलाशालाया 1944 तमे वत्सरे न्यायशिरामणि कक्ष्यायामधीत्य प्रथमश्रेण्या (उत्तमकक्ष्याया) उत्तीर्णः । सम्प्रति मदरास्नगरे विराजमानाना अभिनवदेशिकेत्यादिबिरुदभूषिताना अनेकतर्कवेदान्तग्रन्थनिर्माणेन सुप्रसिद्धवैभवानां अतिसरलं सुग्रहं च पाठप्रवचने चतुराणां अस्मन्मातुलपादानां श्री उवे उत्तमूर वीरराघवाचार्यस्वामिनां उत्तमगुरुणां सन्निधौ शुकवदधीतः । तदीयपरमकृपया दुरवबोधन्यायशास्त्रज्ञश्चाभवम्।

पश्चात् प्रसिद्धाहोबिलमठास्थाने प्रसिद्धवैभवैः विविधच्छात्रश्रेणीमनोरथसारथिभिः उत्तरदक्षिणादिदेशसचारेण भुवनमेव पवित्र-

यद्भि: पराजित प्रसिद्ध सर्वपण्डितै: श्रीभाष्यादि सर्वग्रन्थप्रवचनेन प्रतिष्ठितोत्तमपण्डितै: अद्यत्वेपि भूमौ नानाशास्त्राधिकारि सद्भाव-प्रतिष्ठापनेन दिगन्त प्रसृमरयशस्कै: सर्वशुभगुणभूषितै: वेदान्तशास्त्रेषु बहुधाशिक्षित: अभ्यस्तवेदान्तश्च अनुगृहीतसारसारज्ञबिरुद: तदीयकृपा पात्र चाभवम् ।

अपि चैतेषामेवानुग्रहवशात् श्रीभाष्य द्वितीयकालक्षेपावसरे प्रतिदिनमधीतस्य परिचितगहनस्य श्रीभगवद्रामानुजमुनिभि: सर्वशास्त्र कूलंकषपाण्डित्यै: विरचितस्य श्रीभाष्यग्रन्थस्य अतिसरलरूपा बुध-मनोज्ञा श्रीभाष्यतात्पर्यचन्द्रिकाख्या व्याख्या दासेन मया विरचिता सर्वप्रसिद्धपण्डितै कटाक्षविषयीकृता सर्वश्लाघ्या पत्रेषु विराजमाना [मुद्रण विना] वर्तते ।

तत्र तत्र सभायां मदीय विमर्शन कौतूहलं श्रीभाष्यव्याख्यानभूतां चन्द्रिका चावेक्ष्य सन्तुष्टहृदया: विद्वत्सु अतीव पक्षपातिन:, अय मदीय अय त्वन्यदीय इति अन्तरधि अप्रदर्शितवैषम्या: सर्वपण्डितानामप्यानु-कूल्यकरणे एव बद्धश्रद्धा: शरीरसिद्धि विशिष्टाद्वैतसिद्धि बहुविधग्रन्थ-प्रबन्धार: सभासुवाक्यार्थवेलायां माध्यस्थ्यमूढ्वा तत्तत्पण्डितोक्तार्थानु-वादे अतिनिपुणा: सदस्यानां विषयसमर्पणचतुरा: पण्डितराजेत्यादि-बिरुदालकृता: सप्रति मद्रास्नगरे देशिकविद्याभवने श्रीभाष्यादिग्रन्थ-कालक्षेप बोधनव्यग्रचित्ता: श्रीमन्त: **D.T.** श्रीतातार्यस्वामिवर्या. परमकृपया शारीरकब्रह्मसूत्रविमर्शकरणे मा न्ययूयुजन् । तदर्थं भारत राष्ट्रमहामन्त्रि समिति नियमित विमर्शकपदवीमपि मम सपाद्य ददु: । दासस्य मम विमर्शलेखने तत्रतत्रापूर्वविषयमुपदिश्य परमोपकारम-कुर्वन् । इद सर्वं न कदापि विस्मरणार्हम् ।

एवं प्रबलपण्डितानां प्रबलसाहाय्यात् अयं विमर्शग्रन्थ: परि-निष्पन्न: । एतत्कृत्य भगवद्भागवताचार्य नियमनमिति मनसिकृत्य परमनि:श्रेयसविधायिपरमाचार्य कटाक्षलेशपातात् इम विमर्शनग्रन्थ-मकरवम ।

मितमतिरहं अस्मिन् विमर्शनरत्नाकरे अवतरितुमप्यक्षमः। तर्कपाण्डित्येन सर्वमपि साधयितु प्रवीणाः श्रीमद्वेदान्तदेशिका एव 'गम्भीरे ब्रह्मभागे गणयितुमखिलं कः प्रवीणः प्रमेयं, इत्युक्तवन्तश्चेत् मन्दबुद्धे मम का कथा। ईश्वरानुग्रहवशात् सजाते अत्र ग्रन्थे यथावत् स्थित विमर्शनमवेक्ष्य सहृदयाः अनसूयवः पण्डितवरेण्याः श्रेष्ठाः शिरः कम्पिनो भवेयुरितिमन्ये।

इयं च भूमिका, अय विमर्शनग्रन्थ तदनुवन्धश्च विशति संवत्सरेभ्यः पूर्वमेव व्यरचि। 16–10–70 तमे वर्षे। बहुधनव्ययेन मुद्रण कर्तुमशक्त· मनोरथमात्रविषयममुं मत्वा तूष्णीमेवासम्। 'चक्रारपक्तिरिव गच्छतिभाग्यपंक्तिः' इति महाकविप्रोक्तं मनसि निधाय मुद्रणानुकूलकालोपि भविता इति मनसि आस्थां विधाय जनोऽय वर्तते स्म। विंशति वत्सराण्यासन्। श्रीमतो भगवतः कृपाचोदभूत्। मदीयः यादृच्छिकभागधेयातिशयश्च संपतितो मयि। निरवग्रहमेधमानेन भगवतः कृपाकटाक्षविशेषेणाधुना सयक् मुद्रित. प्रचारपथमानीतश्च इति विस्मीयते श्रीभगवद्रामानुजमुनिविरचित श्रीभाष्यग्रन्थोपि अस्मदीयव्याख्यया सह मुद्रणीयः इति आशापरमस्ति। अयमपि मनोरथः भगवतैव श्रीमता प्रपूरणीयः।

नोट्बुक् पुस्तके तत्र तत्र कोणेषु विलिखितं अक्षरसंयोजन कर्तृणा दुरवबोधमिद अतः किं कुर्यां इत्यालोचनासमये-बगलूर्नगरे अस्मन्निकट एव ससेवित रहस्यत्रयसार, वेदान्तदीप, वेदार्थसग्रह श्रीभाष्यादिग्रन्थेषु अतिचतुरेषु बहुषु अन्यतम· वेदवारिधिः मेधावी लौकिकभाषायामिव संस्कृतभाषायामपि अतिचतुर कम्प्यूटर्तंत्रे समर्थ· तदर्थमेव सप्रति पूना नगरे लब्धोद्योगविशेष; मयि सगौरवाभिमानः शोकत्तूर रामानुजाचार्यः मुद्रणोपयुक्तं ग्रन्थमिम चकार। यतोऽय ग्रन्थः मुद्रणे सुकरः समपद्यत। अतस्तस्मिन्कृतज्ञताविष्कारपूर्वकं आयुरारोग्यैश्वर्यादिसमृद्धिमाशास्महे।

अन्यदपि सौभाग्य दासस्य देवानुग्रहवशादापतितम्। अस्मत् सहपाठिनः प्रियसुहृदः न्यायवेदान्तविशारदाः सरलकविसार्वभौमाः

दायप्राप्तकवितावन्तः सेवास्वामिन इति विरुदभाजः विल्लिवाक्कं लक्ष्मीनगरे प्रतिष्ठापितमुद्रणागाराः श्री उवे नल्लूर् श्रीनिवास-राघवाचार्याः प्रूफ़शोधनं मुद्रणं प्रचारप्रापणादिभरं सर्वमपि, दासजने अस्मिन् अभिमानेन उत्साहवशात् स्वीकृतवन्त इति । अतः सदयेषु सोत्साहिषु विमर्शनग्रन्थ कुतूहलिषु न्यस्तसर्वभरः उरसि हस्तं निक्षिप्य स्थितोऽहम् । तदा तदा संजातं श्रमाधिक्यं च सोढ्वा मयि कृपां चक्रुः अतस्तेषामपि निकटे प्रणततिपूर्वकं कृतज्ञतां बहुकृत्वः प्रत्युपकाराक्षमाः आविष्कुर्मः ।

ते अपि भगवदाज्ञारूपं वेदान्तग्रन्थादिमुद्रणादिकैंकर्यं पुनः आरचयन्तु, अरोगाः दृढगात्राः सायुष्काः सकुटुम्बाः शतमानं वत्सराणि जीवन्तु इति भगवन्तमेव लक्ष्मीपतिमभ्यर्थये ।

ग्रन्थेऽस्मिन् वाक्ये पदे अक्षरे त्रुटयः दैववशादपतिताः भवेयुः । सहृदयाः दयालवः पण्डितवराः दोषतत्वांशं परित्यज्य केवलदयां मयि कुर्युः इति क्रियासमभिव्याहारेण अभ्यर्थयामि ।

विमर्शोऽयं ग्रन्थः बहुसरलवाक्यैः विरचितः
सुधावत् संस्वाद्यो विबुधजनबृन्दैः विजयतात् ।
विशेषज्ञानेच्छा जगति च बुधानां भवति चेत्
अवश्यं द्रष्टव्यो मम भवति दासस्य फलिता ॥

इति भागवतजनविधेयः
पेरुक्कारणै चक्रवर्तिदासः ।

विषयानुक्रमणिका

	पृष्ठ
1. मङ्गलश्लोकाः	1
2. उपोद्घात	3
3. वेदापौरुषेयत्व	4
4. वेदप्रामाण्य	6
5. वेदस्याध्येयता	8
6. अर्थज्ञानावश्यकता	9
7. अर्थनिश्चये उपकारकनिरूपणं	10
8. चतुर्दशविद्यास्थानानि	11
9. स्मृतिः	12
10. पुराणानि	13
11. व्यासार्टाः	16
12. उपनिषत्	21
13. मीमांसाकालनिर्णय	23
14. ऐकशास्त्र्यम्	26
15. ब्रह्मसूत्रे बादरायणनामनिर्देशौचित्यम्	27
16. काण्डत्रयविचार·	30
17. ब्रह्मसूत्रस्य नामभेदः	32
18. मीमासाशब्दार्थविचार.	35
19. सूत्रशब्दविमर्शनं	37
20. ब्रह्मसूत्रसमाख्या	38
21. काण्डत्रयप्रतिपाद्यसंग्रहः	41
22. द्विकादिविभागकरणम्	44
23. पादनामक्रमनिर्देशः	51
24. मतद्वयपादसंग्रहः	56
25. पेटिकाविभागः	58
26. संगतिविभागः	65
27. अधिकरणलक्षणं	66

	पृष्ठं
28. सूत्रसख्या प्रतिपादमधिकरणसख्या च	67
29. औपनिषदविद्या:	69
30. पादभेद, अधिकरणभेदादि	71
31. अधिकरणनामधेयकल्पन	73
32. मतत्रयेऽपि प्रतिपादं सूत्र-अधिकरणसंख्याभेद	74
33. मतत्रयेऽपि पाठभेदप्रदर्शन	76
34 विषयसंशयाद्यूहनम्	83
35. सद्विद्याप्राधान्यम्	83
36. उपनिषत्प्रत्यभिज्ञापनं	84
37. न्यायनिबन्धनरूपत्वम्	85
38. सूत्रशैली	86
39. शास्त्रान्तरपरिचय:	87
40. अत्र कीर्तिताना ऋषीणां नामग्रहणं	91
41. जैमिनिसमीरिता वेदान्तसिद्धान्ता:	93
42. व्यासजैमिन्यो: अभिप्रायभेदस्थलप्रदर्शनं	95
43. मधुविद्याविचार	99
44. अत्र स्पृष्टा: पूर्वमीमांसाविषया:	106
45. प्रायश एकाकाराणि सूत्राणि	
46. पूर्वसूत्रव्याख्यानबाहुल्यं	111
47. अद्वैतिमते प्रत्यधिकरणविषया:	112
48. द्वैतिमते प्रत्यधिकरणविषया	141
49. विशिष्टाद्वैतमतानुयायि सूत्रजातं	174
50. सर्वमतसिद्धान्तसंग्रह	191
51. द्वैतविशिष्टाद्वैतमतयो विषयवैलक्षण्यप्रदर्शन	196
52. अद्वैतवादिमतरहस्यप्रदर्शन	200
53. द्वैतवादिनां आशयस्याविष्करणम्	203

	पुटं
54. अनुबन्धः	
ब्रह्मसूत्राधिकरणविचारः	215
55. जिज्ञासाधिकरणे–	215
ईश्वरानुमानविचारा	219
56. अन्तरधिकरणे	222
57. इन्द्रप्राणाधिकरणे	222
58. सर्वत्र प्रसिद्धयधिकरणे	223
59. आनुमानिकाधिकरणे	224
60. विलक्षणत्वाधिकरणे	225
61. शरीरवादः	226
62. प्रधानप्रतितन्त्रविचारः	227
63. न विलक्षणत्वाधिकरणे	232
64. उपसहारदर्शनाधिकरणे	233
65. कृत्स्नप्रसक्त्यधिकरणे	234
66 महद्दीर्घाधिकरणे	235
67. जातिवादः	236
68. तेजोऽधिकरणे	237
69. आत्माधिकरणे	241
70. ज्ञाधिकरणे	243
71. परायत्ताधिकरणे	244
72. अंशाधिकरणे	244
73. प्राणोत्यधिकरणे, सर्वगत्यधिकरणे, ज्योतिराद्यधिष्ठानाधिकरणे	246
74. संज्ञामूर्तिक्लृप्त्यधिकरणे	247
अनेन जीवेनात्मनेतिश्रुत्यर्थविचारः	248
75. तदन्तरप्रतिपत्यधिकरणे	258

	पुट
76. सन्ध्याधिकरणे	259
77. तदभावाधिकरणे	259
78. उभयलिङ्गाधिकरणे	260
79. पराधिकरणे फलाधिकरणे	261
80. आनन्दाद्यधिकरणे	262
81. हान्यधिकरणे	265
82. अक्षरध्यधिकरणे, अन्तरत्वाधिकरणे	267
83. कामाद्यधिकरणे	268
84. प्रदानाधिकरणे	269
85. लिङ्गभूयस्त्वाधिकरणे	272
86. शरीरेभावाधिकरणे	272
87. विकल्पाधिकरणे	273
88. सर्वान्नानुमत्यधिकरणे	275
89. आवृत्यधिकरणे	276
90. आत्मत्वोपासनविचारः	276
91. तदधिगमाधिकरणे	280
92. अविभागाधिकरणे, अर्चिराद्यधिकरणे कार्याधिकरणे	281
93. संपद्याविर्भावाधिकरणे, ब्रह्माधिकरणे	282
94. सकल्पाधिकरणे	283
95. अभावाधिकरणे	283
96. मंगलश्लोकाः	284

श्रीः

श्रीलक्ष्मीनृसिंहपरब्रह्मणे नमः

श्रीमद्वेदमार्गप्रतिष्ठापनाचार्य, परमहंसपरिव्राजकाचार्येत्यादि
बिरुदावलीभूषितैः श्रीमदहोबिलमठीये चतुश्चत्वारिंशेदिव्यास्थाने
दीव्यद्भिः श्रीवण्शठकोपश्रीवेदान्तदेशिकयतीन्द्रमहादेशिकैः अनुगृहीता



मंगलाशासनश्रीमुखपत्रिका

सारसारविशेषज्ञचक्रवर्त्यार्यधीमतः ।
ब्रह्मसूत्रविमर्शोऽयं मालोल मोदयेत्सदा ।।

विदितमेवेदं सर्वेषां विपश्चितां यत श्रीमदुभयवेदान्तप्रवीणाः सारसारज्ञादि बिरुदावलीभूषणाः श्रीचक्रवर्त्याचार्या अस्मत्प्रियभाजनं, गतपञ्चत्रिंशद्वत्सरेभ्य अस्मद्वितीर्णाभ्यां आस्थानविद्वान्-चिन्तनाचार्य इति द्वाभ्यां बिरुदाभ्यां तत्र तत्र श्रीवैष्णवाना सकाशे सप्रदायग्रन्थानां सविमर्शप्रवचनैः सदाचारनिष्ठया, तत्प्रचारैश्च सर्वान् श्रोतॄन् कृत-कृत्यान् वितन्वन्त इति ।

एतेच विद्वत्तल्लजाः-पूर्वाचार्येभ्यः सञ्चितं अतुलं ज्ञानं सर्वोपयोगि चिकीर्षवः श्रीमद्रामायणसुधा, त्रिमतसारः इत्यादि विमर्शात्मकग्रन्थै शाश्वतीं काञ्चन प्रतिष्ठां विन्दन्ते ।

अधुना च महान्त कञ्चन ब्रह्मसूत्रविमर्शाख्यं ग्रन्थं विरचय्य, स्वकीयं श्रीभाष्यादिमग्रन्थेषु चिरपरिचयालोडनादिनिष्पन्न ज्ञान सुधासदृशं एकीकृत्य भगवदाचार्यमुखोल्लासाय समर्पयन्ति । अनेन विदुषा श्रीमालोलस्य पूर्वाचार्याणां च पादपंकजेषु समर्प्यमाणः कुसुम अयं सर्वैर्विद्वद्भिः शिरसाभिनन्दनीयो भवेदित्याशास्महे । अत्र च ग्रन्थे अभिन्ननिमित्तोपादानत्वं. अनेन जीवेनात्मनानुप्रविश्येति. वाक्येऽर्थ-विशेषविचारः मधुविद्याविचार इत्यादि. विषयः स्वरसः रसिकानां विदुषामारुरुक्षूणां च मोदप्रदोभवेन्नूनम् । अस्मै प्रियभाजनाय विदुषे मालोलः दयासागरः सर्वश्रेयांसि वितन्यादिति चाशास्महे ।

श्रीशठकोपश्रीः

H. H. The Jeer & Sri Ahobila Mutt



श्रीमत्परमहंसेत्यादि (पौण्डरीकपुरं आश्रम)

श्रीमदाण्डवन् गोपालदेशिकमहादेशिकैरनुगृहीता

आशासनपत्रिका

वेदप्रसिद्ध पाराशर्य लोकानुजिघृक्षया ब्रह्मसूत्राणि प्रणिनाय। इमानि उपनिषत्सारार्थप्रतिपादकानि। तत्र प्राप्यं ब्रह्म, प्राप्ता जीवः, प्रापकः उपायः फलं, एषां स्वरूपं इत्यादिज्ञातव्याः विषयाः प्रतिपाद्यन्ते। प्रमाणप्रतिपन्नप्रमेयनिर्णयाय बहव आचार्याः प्रावर्तन्त। केचन जीवब्रह्मणोः भेदं, केचन अभेदं, केचन भेदाभेदं च प्रावदन्। भगवद्रामानुजाचार्यास्तु शरीरात्मभावसम्बन्ध आश्रित्य चिदचिच्छरीरक ब्रह्मैव ब्रह्मसूत्रप्रतिपाद्यमिति श्रीभाष्ये स्वनिर्णय प्राचीकशन्। अयमेव (विशिष्टाद्वैत) सिद्धान्तः ब्रह्मसूत्रेषु स्वरसलभ्यः इति ब्रह्मसूत्रविमर्शाख्येऽस्मिन् ग्रन्थे सुदृढं प्रतिपादितस्यादिति मन्ये।

आबाल्यात् अस्मत्प्रियसुहृदः पेरुक्कारणै चक्रवर्त्याचार्याः पण्डिततल्लजाः। एते ग्रन्थविमर्शोपयुक्त कुशाग्रबुद्धयः सूक्ष्मार्थ विवेचनचणाः। एते एवमेव उत्तरोत्तरं सदर्थविवेचने, सत्सम्प्रदाय प्रकाशोपयुक्तग्रन्थनिर्मितौ बद्धोत्साहाः भवेयुः धनिकाश्च एषां ग्रन्थनिर्माणे, निर्मितानां प्रकाशने च विशेषतः उपकृत्य स्वकीयं धनं सद्धनं कुर्युः, तथा ग्रन्थनिर्मातारः उपकर्तारश्च अरोगदृढगात्राः दीर्घायुष्मन्तः सर्वाभीष्टसिद्धिमन्तश्च भूयासुरिति अस्मदाचार्यसन्ततिं श्रीरङ्गदिव्यदम्पती च सम्प्रार्थ्य नारायणस्मरणपूर्वकं शुभानि मङ्गलानि पौनः पुन्येन आशास्महे।

नारायण नारायण

Srimad Andavan Poundarikapuram Swamy Asramam
43-A/13, Asramam Road, Srirangam-620 006

अभिनन्दनम् ।

गंभीरा रसवत्तमा शुभमयी प्रज्ञोपमर्दक्षमा
भोग्या ब्रह्मवशंवदा बहुविदामानन्ददा सर्वदा ।
सामञ्जस्यसमर्थिका बहुगुणा मातेव पुष्टिप्रदा
श्रीभाष्याख्यसरस्वती यतिपते राराजते शाश्वती ।।

रामानुजः कलियनागमुग्रं ह्रदाद्विनिष्कासयति स्म पूर्वम् ।
तथैव सूत्रह्रदतः कुदृष्टीन् उत्सारयामास पुनस्स एव ।।

'सन्तोषार्थं विमृशति मुहु सद्भिरध्यात्मविद्यां' इति श्रीदेशिकादेशः । 'विमृशेत्' इति बोधिनी । प्रोवाचेत्यत्र प्रब्रूयादिति भाषितम् । तथेदमनुशासनं आचार्यसार्वभौमस्य । श्रीभाष्याध्ययनप्रवचने एव परं तप इति यतीन्द्राः । एवं हि प्रपन्नाना स्वरूपं समीहितम् ।

ततो विमर्शः कैङ्कर्यतामेति । अनुज्ञातत्वात् अनुज्ञारूपता अश्नुते । विमर्शः-परामर्श. । सहस्रशो विमृष्टा इति पादुकासहस्रे । तत इय प्रवृत्तिः सम्यग्व्यवसायसन्धुक्षिता ।

विविधं पश्यति । विपश्चित्व ब्रह्मणः । तदुक्तं–ब्रह्मणा विपश्चितेति । ब्रह्मविचारपरोऽपि भवति विपश्चित् । 'कश्चिद्विपश्चित्तम' इत्याचार्याः । विविधं दर्शनमेव-विमर्शः । विद्वानमृत इह भवतीत्याचक्षते । वैदुष्य अदूष्यं अमृतत्वाय ।

गंभीरे ब्रह्मभागे गणयितुं अखिलं कः प्रवीणः प्रमेयं इत्यभिमन्वते । ततो ब्रह्मभाग· अतिगहनः । यथावदध्ययनं, अवगम अचला शेमुषी-उत्तरोत्तरं उत्तमतां कल्पयति वर्धयति च । त्रिंशद्वारं श्रावितशारीरकभाष्याः त्रय्यन्तार्याः । श्रुतं प्रकाशयन्तः श्रुतप्रकाशिकाश्च परिरक्षन्तः नवनवान् अर्थान् सग्रथ्नन्त स्वसमय सार्थकमातन्वन्तश्च विरेजिरे । यतिप्रवरभारतीरसभरेण नीत वय इति सामिमानं सबहुमानञ्च आवेदयामासुः ।

अय हि विदुषां घण्टापथः । अय हि वैष्णवाध्वा । अस्मिन्यध्वन्यभिरामे अध्वन्या बहवो महान्तः अधिगतपरमार्थाः अन्वभूवन् अमन्दमानन्दमिति वेत्येव सुजनलोकः ।

भाग्यानि पूर्वकलितानि फलन्ति इत्याशसन्ते अभिज्ञाः । सत्यं । अन्तरा सुकृतपरिपाकं कथमिव घटतां आभिजात्यं ! कथन्तरां च वेदाधीनौ, वेदान्ताध्ययने, दुरवबोधार्थावबोधने बोधने च सपद्यमानं पाण्डित्यम् !! कश्चिन् मां वेत्ति तत्वतः इति ह्यगीयत ।

जन्तुषु मानवाः, मानवेषु वैष्णवा·, वैष्णवेषु प्रपन्नाः, प्रपन्नेषु विद्वासः, विद्वत्सु वेदान्तिनः, वेदान्तिषु विचारदक्षा इत्युत्तरोत्तरा समग्रसाक्षिका परिस्थिति अतिशेते । सन्तु कामं आत्मावलोकनव्यग्राः, आत्मविद्याप्रदर्शन प्रदानपराः तान् ध्रुव अतिशेरत इति नापिहितं तत्वम् ।

श्रीभाष्यं मन्त्रसमितमाचक्ष्महे । प्रणवे, श्रीभाष्ये च परतत्वं प्रतिष्ठितमिति प्राज्ञपरिभाषा । अविस्तृताः सुगंभीराः रामानुजमुनेर्गिर इति ब्रह्मसूत्र गंभीर्यं सूपबृंहितमिव यतिपतिवचस्सुधायाम् । सूत्राक्षराणि व्याख्यास्यन्त इति प्रतिजज्ञे । अक्षरमप्यननुकूलं इतरेषामिति प्रदर्शने कियती निष्ठा यतीश्वराणाम् ! अक्षरशो व्याख्यानमेव हि विमर्शः । तत् इदं अतिगहन श्रीभाष्यं विमर्शात्मकमेवेति निश्चीयते ।

श्रीभाष्येषु तत्र तत्र कॉश्चित् विषयानधिकृत्य पृथक् पृथक् विचाराः संप्रवर्तिताः। बहवो ग्रन्थाश्च तदा तदा प्रादूरभूवन् । वादचातुरी, व्याख्यानचातुरी विमर्शनचातुरी च तदा तदा प्रदर्शिता बहुभिः विद्वद्वरेण्यैः । कथाहवकुतूहलिनः अधुनापि सन्नद्धा· संरब्धाश्च, परं विरलाः इति सर्वे सप्रतिपद्यन्त एव ।

श्रीभाष्य अधीयते अध्याप्यते । वैदुष्यस्य सत्ता श्रीभाष्याध्ययनादेवेति निरणायि । एकस्याधिकरणस्य उत समग्रस्य श्रीभाष्यस्य पारायणं-आवृत्तिः अशीतिकृच्छ्रसमतामेतीति सप्रदायः । आलयेषु मन्त्रपुष्प प्रकरणे श्रीभाष्य अनुसन्दधत इत्यपि ज्ञातचरमेव ।

अतिगंभीर भगवद्रामानुजमुनि प्रणीत श्रीमद्भाष्यम् । भगवत् प्रभूतं श्रीमत् । श्रीमत्वान्महत्वम् । एतादृशं श्रीमत्व विमृश्यते प्रकृते प्रबन्धे सानुबन्ध । श्रीभाष्यशैली सुमनसा समाराधिका । सर्वसामञ्जस्याय इयमेकैव प्रगल्भते। आपादचूड अतिरमणीयेऽनपायिनि च श्रीभाष्ये एकैकमप्यक्षरं आनन्दाय । पूर्वपक्षो विशद विज्ञायते, विशदतर च सिद्धान्तः । मधुमय्यः फणितयो भाष्यकृता श्रीमताम् । यतीश्वरसरस्वती विमलरसावहा प्रवहति, निर्वहति च स्वान्तमन्तेवासिनाम् । यथाकथञ्चित् सगमनीयमिति नेयं दुरवस्था आपतिता कदापि भाष्यकृतः । नौपचारिको निर्वाहः कुत्रापि पदमधत्त ।

गांभीर्यं च श्रीभाष्यस्य न केवलं विषयवैलक्षण्योपनिबन्धनम्, न वा वक्तृवैलक्षण्यैकोपलक्षितम्, परन्तु, अवाङ्मनसगोचरा वचनविन्यासवैखरी आवर्जयति भावुकानां स्वान्तानीति सत्यं प्रतिजानीमहे । उदाहृतिरिय स्थालीपुलाकनयेन प्रदर्श्यते । प्रथमेऽध्याये, प्रथमपादे अस्पष्टतर विषयवाक्ये साधु समर्थिते, नैसर्गिक उत्साहः यतीश्वराणां अतिशोभनः । द्वितीयपादोपक्रमे-सगृह्णन्तः प्रथमपादार्थं गांभीर्यं अन्यादृशं व्यञ्जयन्ति । यथा, अभ्यधाम, अब्रूम, उपापीपदाम, समार्थितामहि उदैरिराम, समगरिष्महि, आतिष्ठामहि, अब्रूमहि, इत्यादि । पश्यत प्रयोगवैखरीम् । प्रचक्ष्महे, ब्रूमः इति सर्वसाधारणः प्रयोगः प्रत्यधिकरणं परिदृश्यते । श्रीभाष्योपलक्षितेय शैली भव्यतमा भोग्यतमा च केवल वारं बारं आवर्तनं बाणस्येव मुदमुदञ्चयति ।

अवहितमनाः श्रुणु इत्यादर प्रदर्श्यते । अनभिज्ञो भवान् शारीरक विज्ञानस्य इति प्रतिबोध्यते । प्रचक्ष्महे इति गांभीर्यं सिद्धान्तप्रदर्शने अनितरसाधारणम् । अखिलं श्रीभाष्य अमलं अतुलञ्च । सन्तु नाम सूत्राणां व्याख्यातारः, सन्तु नाम भाष्यकृतः, सन्तु नाम दर्शनसूत्रभाष्याणि । किं तुलना महंन्ति श्रीभाष्येण !

ब्रह्मसूत्रविमर्शनामा प्रकृतः प्रबन्धस्सानुबन्धो जरीजृभते । विलक्षणोऽयं विमर्शग्रन्थः । ब्रह्मसूत्राण्यधिकृत्य प्रवृत्तो विमर्श इति

अन्वर्थमभिधानम् । ब्रह्मसूत्राण्येव विमृश्यन्ते । सूत्राणां संख्या, सूत्रेषु भेदाः, मतान्तरेषु सूत्राणा स्थितिः पूर्वपक्षसूत्राणि सिद्धान्तसूत्राणि इत्यादि विवेचनं, एकसूत्रत्वं पृथक्सूत्रत्व, अध्याये पादे अधिकरणे सूत्राणां परिसख्यान इत्यादि अधिकृत्य शोभनतमो विचारः; अद्वैतिनां तथा द्वैतिनां च व्यवस्थाया भेदा, विशिष्टाद्वैतिमतमेव श्रीमतां व्याम्नार्याणा अत्यन्तमभिमत इति सहेतुकं प्रदर्शन, आग्रहं आटोपं, आरोपं अन्तरेण ताटस्थ्यमवलम्ब्य समीचीनतर्कसञ्चार, स्वाशया-विष्करणे अप्रकम्प्यत्व, विचारे स्वातन्त्र्य, दृष्टान्तप्रदर्शनप्रगल्भता मतान्तरावलोकन गवेषणादि श्रमदूरीकरणं इत्यादि एकैकमपि प्रतिपुट स्फुटमवगमयत् विमर्शनिबन्धनं सुवर्णानि सूत्राणि व्यञ्जयतीति महदिदं भागधेयं वेदान्तिनाम् । इतः किमन्यदवशिष्यते आशासनीयम् ।

पञ्चाशत्सख्यातेषु शार्षकेषु विमर्शः पदमधत्त । जिज्ञासानुगुणं उत्तरोत्तर विचारः शोभनतमः सरब्ध. षिपठिषून् प्रवर्तयति प्रवर्धयति च कौतूहलम् । नाङ्गुलिगणेया विषयाः । परन्तु कतिचन निर्दिश्यन्ते — मधुविद्याविचारः शोभनतमः । विचार सरणिरियं विलक्षणा विबुधहृद्यतमा च विद्योतते । अनुबन्धेऽपि पञ्चाशच्छीर्ष काणीति महदिदं प्रमोदस्थानम् ! अनेन जीवेनात्मनेति श्रुत्यर्थविचारः कस्य वा विदुषः स्वान्तं न समुल्लासयेत् ! विशिष्टाद्वैतिमते इमे अर्थ विशेषाः प्रधानभूताः इति (174 पुटे) प्रतिपादनं स्वमतोपन्यासदक्षतां प्रतिपादयति । प्रदानाधिकरणे श्री उ. वे. नाबल्पाक्कं विदुषां देव-नाथतातार्याणां विमर्शं तथैव स्वीकृत्य संयोजयन्ति इति आमोद-मन्य अधिगच्छति विमर्शकस्वान्तम् । विस्तरभयात् विरम्यते ।

एते च सुगृहीतनामधेयाः चक्रवर्त्याचार्याः विमर्शकधुरीणाः विपश्चिदधश्चिमाः बिबुधचक्रवर्तिनः विशिष्टाद्वैतसिद्धान्तभाग्य परि-पाकाः बिख्यातात् अभिनवदेशिकात् उत्तमूर् वीरराघवाचार्या दधिगत

सत्तर्का, सहृदय सार्वभौमाणा पण्डितसार्वभौमानां डि. टि. तातार्य स्वामिनां कृपापात्रभूता, श्रीमदहोबिलमठास्थाने द्वाचत्वारिशं आस्थान अलंकृतवतां, पण्डितलोकशिरश्लाघनीयशेमुषीणां, विद्वत्पक्षपातिनां, सकलविद्यावाहिनीजन्मशैलाना श्रीवण् इत्यादि श्रीरङ्गशठकोप-यतीन्द्रमहादेशिकानां अन्तेवासितामस्थाय सकलवेदान्तग्रन्था ध्ययनेन लब्धवर्णाः सुविदितसप्रदायरहस्याः वादगोष्ठीषु अग्रिमश्रेणी अधि-तिष्ठन्तः तत्कृपालब्धसारसारज्ञ इत्यादिबिरुदाः विरचितनैकप्रौढ-प्रबन्धा आलङ्कापुरात् आचपर्वतवरात् आचार्यवैभव प्रगुणयन्त उपन्यास ग्रन्थनिर्माण कालक्षेपादिभिः प्रचारयन्तः विराजन्ते इति विदितचरमेव ।

अनन्त बिरुदबृहिता एते अन्वर्थयन्ति च तान् स्वीयैः वाग्विस्तरैः । अन्वर्थयामीत्यन्वभाषि सर्वज्ञैः सर्वतन्त्रस्वतन्त्रैः । असारसारज्ञा अप्येते सारसारज्ञा । सारे सार जानन्ति, सार सार जानन्तीति वा । तत्वं निरूपयति प्रकृतो विमर्शः ।

ब्रह्मविद्यावाचस्पतिः सुचारुवाका एते न चार्वाकाः । न तत् प्रवर्तको वाचस्पतिर्वा । ब्रह्मविद्यासु वाचस्पतिता सुन्यरूपि अस्मिन् विमर्शे । चक्रवर्तिसुतोऽपि उपमितो वाचस्पतिना कवीश्वरेण । चक्रवर्त्याचार्यः तथैव सभाव्यते भावुकै ॥

न्यायवेदान्तविद्वान् न्याये परिशुद्धे वेदान्ते च विशिष्टे आव हन्ति वैदुष्यमद्वैष्यं अनर्घं च विशिष्टाद्वैते । न्यायवेदान्तधिषणा निकषायते विमर्शः ।

शिरोमणिः । शिरोमणिता शोभना । शिरोमणि शिरोभूषणतां अन्वश्नुवन्ति, शिरांसि च कपयन्ति च ।

विद्वदुपन्यासकरत्नं प्रायशः विद्वांसो विरलाः । उपन्यासकाश्च सरलाः सख्यया बहवः । वैदुषी उपन्यसनकला च प्रायशः असमानाधि-

करणेव दृश्यते। विद्वदुपन्यासकाः मृग्या एव। तेषु रत्नायन्ते चक्रवर्त्या चार्याः इमे इति सूच्यत इव।

श्रीरामायणामृतवर्षी। रामचरित अमृतसागरः। अतृप्त प्राचेतसः सततं पिबन् अपि। तच्चामृतं परिवेषयामास कोऽपि मुनिः वाग्विदां वरः तस्मै प्राचेतसे मुनये। प्रगुणितं तच्च विश्वोपजीव्यं रामायणामृत कांक्षाधिकं वर्षति चक्रवर्त्याचार्य· इति ज्ञाप्यत इव।

भागवतसुधास्वादी। भागवतसुधां पिबन्तीव। पिबन्तं त्वन्मुखां भोजच्युत हरिकथामृतमिति हि परीक्षितोऽनुभवः। भागवतसुधां पाययन्नपि स्वयमपि पिबतीति नून अमृतवर्षणादप्यतिशेते। रामायणानुभवादपि अतिशयितोऽनुभवः श्रीभागवते इति ज्ञापयतीव।

सत्सप्रदायधुरन्धरः। धुरन्धरेष्वन्यतमाः। विमर्शग्रन्थः अन्ये च प्रमाणयन्ति।

सद्वावदूकाः सन्तः एते वावदूका.। वावदूकाः किमपि वदेयु. अर्थसमथनचुञ्चवः। परन्तु एते सन्तः वावदूकाः इत्यभिमन्यन्ते। वयं तु सद्विद्यावावदूक मन्यामहे अन्वर्था बिरुदावलिः इति स्थूलतः पर्यालोचितम्।

एतेषा बिमर्शधोरणी सतां सदा धारणीया। मालोलविभूतयः एते प्रकर्षेण ह्लादयन्त· स्वान्तानि सुमनसां नित्यतृप्ताः आबध्नन्तु निबन्धनानि शताधिकानि, जीवन्तु च शरदां शत सपरिवाराः इति विज्ञाप्य, बैदुष्याय घनिष्ठाय अञ्जलि समर्प्य च धन्यो बुभूषामि। एतादृशान् उत्तमान् विदुषः सहाध्यायिनः प्राप्तवानिति सामिमान अत्यन्त मुदमावहामि च।

श्रीभाष्यचन्द्रिका

भगवतो रामानुजस्य भाष्यं श्रीभाष्यं अभिधीयते । सर्वतोमुख श्रीमत्वं उपलभ्यमान सुमनसा समाराधनाय कल्पमान अज्ञानध्वान्त रुणद्धि । अघानि परिहरति आन्दोलयति च स्वान्तानि मनीषिणा इति सभाव्यते ।

सुलभावगाहस्य अस्य श्रीमतो भाष्यस्य व्याख्यानापेक्षापि वर्तत एव । श्रुतप्रकाशिका प्राथम्य आवहति, निर्वहति च वेदान्त-बृन्दम् । स्वरूपसत्तायै वैदुष्यस्य पुष्टयै शुद्धयै च भावप्रकाशिकादीनि व्याख्यानानि सप्रवृत्तानि सद्भि सभावितानि समादृतानि च । दशाधिकव्याख्यानसद्भावेऽपि अद्यत्वे अभिनवदेशिकैः उत्तमूर् वीरराघवार्यमहादेशिकैः अनुगृहीता दर्पणसमाख्या व्याख्या । परकालमठास्थानी अलंकृतवद्भिः परमहंसेत्यादि श्रीरङ्गनाथपरकालयतीन्द्रमहादेशिकै. अनुगृहीता विबुधानन्दनी गूढार्थसंग्रहाभिधाना सुविपुला विद्योतते ।

एव बह्वीषु व्याख्यासु सतीष्वपि पेरुक्कारणै चक्रवर्त्याचार्या इमे स्वाशय आविष्कर्तु चन्द्रिकानाम्नी व्याख्यां व्यलिखन् इति श्रुत्वा वैदान्तिनां लोकः विस्मयमन्यादृश आवहति । गीताभाष्यतात्पर्य चन्द्रिकायां मुदितान्तरङ्गा वयं भाष्यचन्द्रिकामपि स्पृहयामहे ।

चन्द्रिकेय अचिरात् प्रकाशयिष्यते इति च श्रुत्वा मालोल-विभूतिः उत्कंठिता अवतिष्ठते । कृष्ण(रामानुज)भावं पोषयन्ती अकृष्णपक्षीया चन्द्रिका विलसतुतरामिति अभिनन्द्यते ।

कुजान्धतम उत्सार्य सुजाता चन्द्रिका ध्रुवम् ।
तन्वाना कुमुदानन्दं उल्लासयतु धीरसम् ॥

मालोलसहितो वाजिवदनो मम दैवतम् ।
अनुबन्धानुबन्धेन प्रीणातु सह देशिकैः ॥


इति

विल्लिवाक्कम्
मद्रास

विद्वत्सेवासक्तः
सेवा. श्रीनिवासराघवदासः



न्याये वेदान्ततन्त्रे विबुधवरमथ ब्रह्मविद्यागुरुं तं
सारज्ञं सारशास्त्रे प्रवचननिपुण धूर्वह संप्रदाये ।
वर्षन्तं रामगाथामृतमथ शुकवाक्सत्सुधास्वादशीलं
गोदाश्रीसूक्तिसिंहं गरुडगिरिमठास्थानविद्वांसमीडे ।।



भजामि सद्गुणनिधिं न्यायवेदान्तवारिधिम् ।
दक्षं प्रवचने श्रीमच्चक्रवर्त्यार्यमुज्वलम् ।।

श्रीः । श्रीमते श्रीलक्ष्मीनृसिंहपरब्रह्मणे नमः । श्रीः ।
श्रीमते रामानुजाय नमः ।
श्रीमते निगमान्तमहादेशिकाय नमः ।
श्रीमदादिवण् शठकोपयतीन्द्रमहादेशिकाय नमः ।
श्रीमते श्रीवण्शठकोपश्रीश्रीरङ्गशठकोपयतीन्द्रमहादेशिकाय नमः ।

॥ ब्रह्मसूत्रविमर्शः ॥

शिरोमणि श्रीचक्रवर्त्याचार्यकृतः

1. मङ्गलश्लोकाः

श्रियः श्रियं सर्वजगन्निदानं समस्तकल्याणगुणांबुराशिम् ।
अशेषतापच्छिदमाश्रितानां परावरेशं प्रणमाम्यभीक्ष्णम् ॥

स्वाधीनाशेषवस्तु श्रितनिखिलजनत्राणबद्धैकदीक्ष
विश्वस्याधारभूत विधिशिवसनकाद्यर्चितं ब्रह्म सत्यम् ।
मुक्ताद्यानन्ददातृ त्रिविधचिदचिद्वस्तुसंधान्तरस्थ
नित्यं शुद्धं पर तत् भवतु च जगतां श्रेयसे भूयसे नः ॥

सर्वं वस्तु स्वशेषं कथमपि रचयन् विश्वसर्गैककर्ता
निर्बाधानन्तनित्यश्रुतिशतविदितानन्तमाहात्म्यभूमिः ।
सर्वेषामाश्रितानामभिमतफलदः प्राप्यरूपः स्वय चे-
त्येव शारीरकेऽस्मिन् कथितगुणगणः पातु सर्वेश्वरो नः ॥

प्रणम्य लक्ष्मीशमनन्तहेयप्रध्वंसि कल्याणगुणैकतानम् ।
गुरूँश्च सर्वानमितप्रभावान् वितन्यते सूत्रविमर्श एषः ॥

सहि जयतु वेदराशिः जयतुतरां वेदविवरणात्मिका स्मृतिः ।
श्रीमान् पराशरसूनुः जयतु जयन्तु तत्कृतानि सूत्राणि ॥

नमोरामानुजार्याय निस्सीमगुणशालिने ।
चिदचित्ब्रह्मतत्त्वाख्यत्रिदण्डोद्भासिने नमः ।।

श्रीमद्वेङ्कटनाथं श्रुतिमकुटगुरुं नमामि सद्वृत्तम् ।
अन्वांश्च लब्धविभवान् तत्पदकोटीरयोगतो धन्यान् ।।

ऋषिं सेवे रमासिंहतृष्णातत्त्वमिवोदितम् ।
अहोबिलमठाधीशं आद्यं वण्शठमाथिनम् ।।

वाधूलस्वर्णकृष्णार्यसूरिपादसमाश्रितम् ।
श्रीमद्वगशठारातियोगीशगुरुमाश्रये ।।

आराध्य मालोलमहोबिलेशमानम्य रामानुजपादपद्मम् ।
तोषाय मोदात् विदुषां विधत्ते विमर्शमेतं बुधचक्रवर्ती ।।

प्रथितगुरुवराणां सन्ततिं तां प्रणम्य
प्रथितगुणगणानां ज्ञानवैराग्यभाजाम् ।
स्फुरति हृदि समग्रं यच्च यस्याः प्रसादात्
तमिह विबुधतुष्टयै विस्तृणोमो विमर्शम् ।।

श्रीशैलतातार्यमहाशयानां अनुग्रहात्सम्प्रति पण्डितानाम् ।
शारीरकब्रह्मविचारसूत्रं विमृश्य सन्तोषमुदन्वयामि ।।

अस्तु श्रीनरसिंहस्य पदयोः प्रणतिर्मम ।
यन्नमस्यामहिमतो न भजन्त्यापदः प्रजाः ।।

द्वैताद्वैतमतानुयायिमनसा श्रीभाष्यदृष्ट्या तथा
तत्तत्सूत्रविधाप्रभेदमधिकृत्यादेः विमर्शक्रमम् ।
सर्वेषां प्रकटं विधातु मतुलं ग्रन्थं मयाऽविष्कृतं
सारासारविभागहृष्टमनसो दृष्ट्वा दयन्तामिह ।।

2. उपोद्घातः

श्रियः पतिः निखिलहेयप्रत्यनीककल्याणैकतानः निखिलजगत्कारणभूतः स्वाधीनत्रिविधचेतनाचेतनस्वरूपस्थितिप्रवृत्तिभेदः उभयविभूतिनाथो नारायणः "वैकुण्ठे तु परे लोके श्रिया सार्धं जगत्पतिः। आस्ते विष्णुरचिन्त्यात्मा भक्तैर्भगवतैः सह॥" इति प्रमाणोक्तरीत्या विराजमानः प्रलयावसानसमये, हन्त! इमे जीवाः चेतना अपि अचिदविशिष्टाः, इमांश्च सृष्ट्वा कृत्याकृत्यविवेकयुक्तान् करोमि' इत्यनुकम्पावान् निखिलं जगत् सृजति।

अत्र खलु सृष्टा अपि जनाः देहेन्द्रियबुध्याद्युपकरणवन्तोऽपि अपथेषु बुद्धिं प्रसार्य संसारार्णवमग्नाः नानाविधदुःखभाजश्च खिद्यन्ति। सर्वेऽपि स्वदुःखमपहाय अनवधिकातिशयसुखभाजः कदा भवामः इत्यभिसन्धिमन्तश्च। निरस्तातिशयानन्दभाक् कदाऽहं भवेयमित्येव एकैकोऽपि मन्यमानः तदनुगुणेषु कर्मसु प्रवर्तत इति चानुभवसिद्धम्।

स च भगवान् अनादिमायया सुप्तानां गाढान्धकारावृतप्रकृतिमण्डले जनिभाजां सर्वथा विवेकशून्यानां बोधमुत्पाद्य अनवधिकातिशयानन्दप्रापणाय वेदरूपं प्रदीपमदिशत्। प्राहुश्चेममर्थं 'हर्तुं तमस्सदसतो च विवेक्तुमीशमानं प्रदीपमिव कारुणिको ददाति' इति पराशरभट्टार्याः॥

सोऽपि वेदः प्रमाणमूर्धन्यभूतः अनितरसाधारणं सार्वभौमं प्रामाण्यमाबिभर्ति, यदाज्ञावशवर्तिन्यः सर्वा अपि प्रजाः स्वं स्वं कर्म कुर्वन्त्यः इह परत्र च शर्म विन्दन्ते। नहि कश्चिदप्यास्तिकजनः वेदस्य प्रामाण्यमनङ्गीकुर्वाणः परिदृश्यते। मूढः खलु स पुरुषः, यः परमपुरुषेण दयया दत्तमपि वेदमुपेक्ष्य तदर्थं चाविज्ञाय कृत्याकृत्यमजानन् स्वैष्टप्रकारेण लोके वर्तमानः सर्वदा निषिद्धं कर्म कुर्वाणः नरकेऽतिघोरे पतति॥

3. वेदापौरुषेयत्वं

वेदोह्यपौरुषेय पुरुषविरचितप्रबन्ध इव निखिलदोषसंभावनाऽभूमिः लोकानुजिघृक्षया जनानुकूलमेव कर्म ब्रूते। न हि पुरुषकृतप्रबन्धेष्विव उपेक्षाहेतुभ्रमप्रमादादिदोषसभावना वेदेषु वरीवर्ति। येन वेदेष्वपि केषुचित्कालेषु उपेक्षाबुद्धि. जनाना जायेत। लौकिकप्रबन्धकर्ता हि मनुष्यः भ्रमप्रमादविप्रलम्भसभावनार्हविषयः। नहि वेदस्य कर्ता कश्चित् दरीदृश्यते। वेदोह्यपौरुषेयः। अनादिनिधनः अविच्छिन्नसंप्रदायागतः अनन्तः स्वरवर्णादिभिरेकरूपेणाध्येयश्च निरीक्ष्यते जनैः सर्वैः। अत एव वेदमम् 'अनादि निधन, अविच्छिन्न संप्रदाय, असंभाव्यमानदोषगन्धावकाश, अनन्तवेदशास्त्र'मिति आदरातिशयेन प्राञ्चः प्रोचु. ॥

अत्र कश्चिन्नास्तिकः एवं मन्येतापि। सर्वमपि वस्तुजातं केनचित्कृतमेव दृश्यते। रथगोपुरप्रासादादि केनचित्कृतमित्यत्र च न विवदन्ते जनाः। रामायण महाभारतं रघुवशादिकाव्यमपि केनचित् बुद्धिमता विरचितं दृष्टम्। एवमेव वेदरूपशब्दराशिरपि विलक्षणेन मेधाविना विरचितः इत्यत्र नैव विवादस्यावकाशोऽस्ति। एव स्थिते कथमत्र कर्ता नास्तीति।

अयं वैदिकसंप्रदायबाह्यानामाक्षेपः। माणवको हि आचार्यमुखादधीत्य वेदमधिगच्छतीति अमुं विषयं वयं अद्यत्वे पश्यामः। एवमेव पूर्वकालेऽपि। अस्य प्रबन्धस्यायं कर्ता, काव्यमिदमय चकार इति यथा लौकिकप्रबन्धेषु दृश्यते, न तथा वेदभागमिमं अयं चकार इति जना वदन्ति। नापि कर्तृनिर्देशः वेदपुस्तकेषु अद्यापि दृश्यते। अतो मनसापि न कश्चित्कर्तृत्वेनालोच्यः ॥

ननु काठकमिति कस्यचिद्वेदभागस्य नाम। कालापकमित्यपरस्य। अत्र कठादिकृतत्वनिबन्धनो हि तद्व्यवहारः। 'नम ऋषिभ्यो मन्त्रकृद्भ्यः', अयँ सो अग्निरिति विश्वामित्रस्य सूक्तं भवति इति स्पष्टमेव च वसिष्ठविश्वामित्रादिकर्तारः निर्दिश्यन्ते। अतो वेदस्य कर्ता कुतो न भवतीति।

उच्यते—नात्र कठादिकर्तृत्वनिबन्धनोऽयं व्यवहारः। परन्तु कठादिप्रवचननिबन्धनः तथा व्यवहारः। वेदविभागानन्तरकालिकः आद्यप्रवचनकारित्वेन कठादे 'काठकं' 'कालापकं' इति समाख्या जाता। 'आख्या प्रवचनात्' इति सूत्रितं च पूर्वमीमांसायाम्। अतो वेदस्य कर्ता नैव सिध्यति ॥

अपि च शब्दनित्यत्ववादिनां मीमासकानामत्र सुलभः समाधिः। ये तु वेदस्य पौरुषेयत्वं वदन्ति नैयायिकाः तन्मतेऽपि परमपुरुषेणेश्वरेणोच्चरिताः वेदाः इति प्रमाण्यं सूपपादम्। सर्वज्ञो हीश्वरः वेदभागं दयया जनानां ददातीति तस्य सामान्यपुरुषस्येव भ्रमादिदोषसंभावनाभावात् तत्कृतस्य वेदस्य निर्दुष्टता च।

वेदान्तिनस्तु वेदस्य नित्यत्व अपौरुषेयत्वमेव चाशेरते। यद्यपि कालप्रकृतिजीवस्वरूपस्येव शब्दस्वरूपस्य नित्यत्वं नेच्छन्ति। यथा अनित्य वस्तुजात देवः सृजति तथा शब्दमपि। घटादिवत् शब्दोऽपि अनित्य इत्यत्र विवादोऽपि न वर्तते। भूताद्यहङ्कारपरिणामरूपो हि शब्दः। शब्दात्मकवेदराशेः नित्यत्वं पौरुषेयत्वाभावश्च सर्वथा न संभवतः। अथापि वेदस्यास्य नित्यत्वमपौरुषेयत्वं च सम्यगेवोपपादयन्ति वेदान्तविदः। अस्मिन् शारीरकनये देवताधिकरणे सूत्रकार एवामुमर्थ सयगुपपादितवान्। 'अत एव च नित्यत्व' 'समाननामरूपत्वाच्चावृत्तावप्यविरोधः दर्शनात्स्मृतेश्च' इति सूत्रद्वयमेतमर्थं सुष्ठु उपपादयति। तथा हि—

भगवान् पुरुषोत्तमः प्रलयावसानसमये पूर्वसस्थानं जगत्स्मरति स्वस्मिन् च प्रलीन भोक्तृ भोग्यजातं विभजते। महदादि ब्रह्माण्डं च हिरण्यगर्भपर्यन्त स्वय सृजति यथापूर्वम्। तस्मै हिरण्यगर्भाय पूर्वानुपूर्वीविशेषसस्थितान् वेदाश्चाविष्करोति। देवाद्याकार जगत्सर्गे च तं नियोजयति इति वेदान्तप्रक्रिया ॥

शब्दस्य सर्वस्यापि पूर्वं लीनत्वेऽपि सर्गकाले शब्दादीन् संसृज्य पूर्वं यादृश स्वरवर्णश्रानुपूर्वीविशिष्टतया वेदराशिस्थितः तादृश-

स्वरवर्णानुपूर्वीविशिष्टतया स्मृत्वा स्वसृष्टप्रजापतये उपदिशति इति यत् तदेव नित्यत्वं अपौरुषेयत्वं च वेदस्य। न हि स्वरूपतो वेदस्य नित्यत्व वदन्ति, येन पूर्वोक्ताः शङ्काः प्रादुष्युः। प्रवाहतो नित्यत्वमेव वेदानामुशन्ति। यथा भगवदवताराणां प्रवाहतो नित्यत्वम। स्पष्टमिदमुक्तं सङ्कल्पसूर्योदयनाटके श्रीमद्भि वेङ्कटनाथैः–"त्रातु जगन्ति कृपया कल्पे कल्पे भवन्ति दिव्यानि। चरितानि चक्रपाणेः प्रवाहवृत्त्या परस्परप्राञ्चि" इति।

अद्यत्वे यादृशानुपूर्व्यादिविशिष्टतया वेदाः उच्चार्यन्ते, तादृशानुपूर्वीविशेषविशिष्टतया वेदान् हिरण्यगर्भाय भगवानुपदिशति। तादृशानुपूर्वीस्वरवर्णादिविशिष्टतया वेदस्मरण भगवतः कथं जात इति न मन्तव्यम्। ततः प्राक्सर्गे तादृशवेदाना सस्कारानपेक्षमेव भगवतः स्मरणसभवात्। यथा चोपाध्यायः रात्रौ सुप्तान् प्रातः प्रबोध्य पूर्वसंस्थानसंस्थितमेव वेदमध्यापयति तथा भगवानपि हिरण्यगर्भमिति न दोषः। तदुक्तं श्रीरङ्गराजस्तवे उत्तरशतके—

सस्कारं प्रतिसञ्चरेषु निदधत्सर्गेषु तत्स्मारित
रूपं नाम च तत्तदर्हनिवहे व्याकृत्य रङ्गास्पद!।
सुप्तोद्बुद्धविरिञ्चपूर्वजनतामध्याप्य तत्तद्धितं
शासन्नस्मृतकर्तृकान् वहसि यद्वेदाः प्रमाणं ततः॥ इति।

अतः स्वरवर्ण आनुपूर्वीप्रभृतिषु एकरोत्यैवोच्चार्यमाणत्वात् सर्वेषु देशेषु स्खालित्य विना एकरीत्या अध्यापनाच्च सर्वेषा वेदेषु विद्यमानः आदरातिशयः सुसमीचीन एव। उक्तं च श्रीमति भाष्ये–"अतो वेदस्य नित्यत्वमपौरुषेयत्वं च नाम-पूर्वपूर्वोच्चारणक्रमजनित संस्कारेण तमेव क्रमविशेषं स्मृत्वा तेनैव क्रमेणोच्चार्यमाणत्वम्। तदस्मासु सर्वेश्वरे च समानम्। इयांस्तु विशेषः—संस्कारानपेक्षमेव स्वयमेवानुमन्धत्ते पुरुषोत्तमः" इति॥

4. वेदप्रमाण्यम्।

ननु वेदस्य पुरुषकृतत्व मास्तु, मास्तु च भ्रमप्रमादविप्रलम्भाधीनत्वम्। तथापि तदुक्तस्यार्थस्य सर्वस्यापि यथार्थत्वं कथम्? बहवः

अतीन्द्रियार्था हृच्युच्यन्ते । कथं च तेषु अस्माकं विश्वासः । न हि कश्चित् यागकृत् स्वर्गमनुभूय पुनरत्रागत्य "मया यागाद्यनुष्ठित तत एव स्वर्गश्चानुभूतः इति वदति । अतः अतीन्द्रियबह्वर्थप्रतिपादनेन तद्विषये कथं याथार्थ्यं कथन्तरा च वेदस्य प्रमाण्यम् ?

उच्यते । — देशान्तरादागत्य बहवः बहूनर्थान् वदन्ति । कथं तेषु विश्वासोऽस्माकं जायते ? कथं च तेषु वाक्येषु प्रामाण्यमभ्युपगच्छामः । न हि कश्चिद्देशान्तरादागतेनोक्तं वाक्यजातं श्रुत्वा तत्क्षणे एव देशान्तरं गत्वा तत्र चावेक्ष्य तदुक्तं वास्तवमिति निश्चिनोति । न वा अन्यस्मै ब्रूते । यागादिकमनुष्ठाय पुनः कर्मभूमौ जनित्वा न मया स्वर्गोऽनुभूत इत्यपि न कश्चित् ब्रूते । अतः केषुचिदर्थेषु लोकानुभूतेषु प्रामाण्यदृष्टौ सत्या तुल्यन्यायतया सर्वेषु यथार्थत्वबुद्धिः विश्वासश्च जायते । इद च सर्वत्र लोकानुभवसिद्धम् । न हि वेदः अतीन्द्रियार्थमेव ब्रूते । यथा परलोकसाधकयज्ञादिबोधकवेदभागाः श्रूयन्ते तथा ऐहिकफलजनकेष्टचादिबोधकभागा अपि समुल्लसन्ति । 'कारीर्या वृष्टिकामो यजेत' इति वृष्टचर्थकारीरीष्टिः उक्ता । पुत्रार्थं पुत्रकामेष्टिरपि । एतस्याः करणात् फलं च लभन्ते । दशरथो हि पुत्रकामेष्टि कृत्वा इहैव पुत्रचतुष्टयं प्रापेति श्रीरामायणे प्रसिद्धम् । एवमिहैव दृष्टान्यन्यान्यपि फलानि ते तेऽलभन्त इति महाभारते सुव्यक्तम् । एतन्न्यायेन स्वर्गादिविषयेऽपि विश्वासः तत्साधकयागबोधकवेदभागे प्रामाण्यमपि सिध्यत्येव ।

यस्तु निष्करुणमेव अतीन्द्रियार्थबोधकवेदभागे अविश्वासं मन्यते, तस्य चित्ते निष्कण्टकमेव विश्वासोत्पादनार्थं अभिचारश्रुतिः जागर्ति । यदि सोऽपि 'श्येनेनाभिचरन् यजेत' इत्युक्त शत्रुवधजनकं अभिचारयागमनुतिष्ठेत् अवश्यं सोऽपि शत्रुजयं प्राप्नुयात् । तदुक्त—

"आज्ञा ते सनिमित्तनित्यविधयः स्वर्गादि काम्यद्विधिः
सोऽनुज्ञा शठचित्त शास्त्रवशतोपायोऽभिचारश्रुतिः ।
सर्वीयस्य समस्तशासितुरहो श्रीरङ्गसर्वस्व ते
रक्षाकूतनिवेदिनी श्रुतिरसौ त्वन्निस्यशास्ति स्ततः ।।" इति ।।

5. वेदस्याध्येयता

अयं च वेदः अवश्यं अध्येतव्यः। "श्रावण्यां प्रौष्ठपद्यां वा उपाकृत्य यथाविधि। युक्तश्छन्दास्यधीयीत मासान्विप्रोऽर्धपञ्चमान्।।" इति हेतो, "स्वाध्यायोऽध्येतव्यः" इत्यस्माच्च। अन्यथा 'अनधीयाना व्रात्या भवन्ति' इति व्रात्यत्वमेवापतेत्। यस्तु वेदं नाधीतवान् त लोकः पूर्वकाले अनिन्दच्च। सर्वोऽपि द्विजन्मा पूर्वकाले भीतस्सन् वेदाध्ययनं कुर्वन्नेवावर्तत। 'तस्मात् स्वाध्यायोऽध्येतव्यः' इति च श्रुतिः सम्यगेवामुमर्थं प्राह। मनुरपि "योऽनधीत्य द्विजो वेदान् अन्यत्र कुरुते श्रमम्। स जीवन्नेव शूद्रत्वं आशु गच्छति सान्वयः" इति निष्करुणमनधीयानस्य द्विजन्मनोऽपि शूद्रत्वमगदत्।

तत्र च आचार्यमुखादेव स्वरवर्णविपर्यासादिकं विना वेदाध्ययनं अवश्यं कार्यम्। स्वरादिविपर्यासेनाध्ययने तत्कर्मानुष्ठाने च फलेऽपि विपर्यासो भवेत्। अत एव पुस्तकनिरीक्षणादिना अध्ययनमपि निषिद्धम्। महाननर्थ आपतेदिति भिया जागरूका एव जनाः पूर्वमधीतवन्तः। मन्त्रोऽपि हि आचार्यमुखेनैवोपदेष्टव्य इति सम्प्रदायः। "यदृच्छया श्रुतो मन्त्रः छन्नेनाथ च्छलेन वा। पत्रेक्षितो वा व्यर्थस्स्यात् प्रत्युतानर्थदो भवेत्" इति हि वदन्ति। "मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह। वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् इति पाणिनीयशिक्षायां विस्पष्टमिदमुक्तम्।।

अष्टवर्षस्य ब्रह्मणस्योपनयनानन्तरं श्रावण्यां अध्यायोपकर्म विधीयते। तदा स्वशाखाध्ययनप्रारम्भो भवति। सार्धान् चतुरो दक्षिणायनमासान् स्वपितृपितामहपरम्परया प्राप्तान् वेदान् अयं माणवकः अधीयीतेति विधिः। एष्वपि मासेषु शुक्लपक्षेषु वेदाध्ययनम्। कृष्णपक्षेषु तदङ्गाध्ययनमिति शास्त्रमर्यादा। मनुस्मृतौ च—

"श्रावण्यां प्रौष्ठपद्यां वा उपाकृत्य यथाविधि।
युक्तश्छन्दांस्यधीयीत मासान् विप्रोऽर्धपञ्चमान्।।" इति।
"अत ऊर्ध्वं तु छन्दांसि शुक्लेषु नियतः पठेत्।
वेदाङ्गानि च सर्वाणि कृष्णपक्षेषु संपठेत्।।" इति च।।

६. अर्थज्ञानावश्यकता

एवं साङ्गस्य वेदस्याध्ययनात् अर्थज्ञानमपि कथञ्चिद्भवति। अर्थज्ञानं विना केवलस्य वेदस्य योऽध्ययन करोति स गर्दभसाम्यमेव लभत इति महान्तः प्रोचुः। "स्थाणुरयं भारवाहः किलाभूदधीत्य वेदान्न विजानाति योऽर्थ। योऽर्थज्ञ इत्सकल भद्रमश्नुते स नाकमेति ज्ञानविधूतपाप्मा" इति अर्थज्ञानं विना अधीयानस्य स्थाणुतुल्यतां अर्थज्ञानेन सह अध्ययनशीलस्य सकलभद्रप्राप्तिं च प्रमाणं प्राह।

वेदस्याध्येयत्वे तदर्थज्ञानस्य सम्पाद्यत्वे च बहूनि प्रमाणानि सन्ति। तत्र वैदार्थज्ञानसपादनं तु नातीव सुलभम्। अनन्ता हि वेदाः। अल्पमतीनामस्माकं दुर्ज्ञेय एव वेदार्थः। बाह्याः केचन वर्तन्ते ते तावत् वेदमेव नाभ्युपगच्छन्ति। कुदृष्टय इति परे विद्यन्ते। ते तु वेदमभ्युपगच्छन्ति। अर्थं तु अन्यथा वर्णयन्ति। अत· एते वेदाभ्युपगमेऽपि अन्यथाऽर्थकथनात् वेदबाह्यतुल्यास्सन्त क्षेमं न प्राप्नुवन्ति। द्वौ पुरुषौ वनं जग्मतुः। तौ श्रमेणातीव पिपासातुरौ आस्ताम्। कश्चित् मृगतृष्णिका जलमिति मन्यमान तदादानार्थं जगाम। अन्ततः तदलाभेन काननमृगेण भक्षित मृतोऽभवत्। अन्यस्तु तटाके वास्तव जलमपश्यत्। तदादानाय समीचीनं तोर न जगाम। तटाकतीर्थे कुमार्गेण गतवान्। तत्र च जले विद्यमानेन प्राणिना निहतः। एव चोभावपि मृतौ। तथैव वेदमभ्युपगम्य वर्तमानोऽपि अपार्थं यदि वदेत् सोऽपि वेदबाह्य तुल्य एवेति नोभौ भद्रमश्नुतः। तदुक्त—"बाह्याः कुदृष्टय इति द्वितयेऽप्यपारं घोरं तमस्तमुपयान्ति न हीक्षसे तान्। जग्धस्य काननमृगै. मृगतृष्णिकेप्सोः कासार सत्वनिहतस्य च को विशेषः?।।" इति। अतो यथा सनियमं वेदः अध्येयः तथा समीचीनमर्थज्ञानमपि प्राप्यं इति।

वेदस्य यथावस्थितार्थज्ञानमपि स्मृत्याद्युपबृहणेनैव संपाद्यम्। तत्रापि स्मृतिरेव प्रथमं स्थानमधिरोहति। पराशरसूनुः सूत्रकारोऽपि 'स्मृतेश्च', 'स्मर्यतेऽपि च लोके' इत्येव वेदार्थविवरणे स्मृतिमेवाधिकं प्रमाणयति। 'आदौ वेदाः प्रमाण स्मृतिरुपकुरुते सेतिहासैः पुराणैः" इति स्मृतेः प्राथम्य उपवृहणविषये आचार्या वदन्ति। "आर्ष धर्मोप-

देशं च वेदशास्त्राविरोधिना। यस्तर्केणानुसन्धत्ते स धर्म वेद नेतरः।।" इति तर्कस्याप्यवश्यापेक्षाऽस्ति। यदि च निखिलचराचरात्मनि भगवति श्रीमति नारायणे पुरुषोत्तमे समीचीना भक्ति. नाभविष्यत् तदा स्मृत्याद्युपबृहणैरपि वेदानां सामीचीन्येनार्थज्ञानसंपादन नाशक्ष्यत। "शुद्धभाव गतो भक्त्या शास्त्राद्वेद्मि जनार्दन" इति सञ्जयः शास्त्रेभ्यः यथावदर्थज्ञाने भक्तिरेव मुख्यकारणमिति न्यगदत्। प्राहुश्च श्रीवत्साङ्कमिश्रा — "न्यायस्मृतिप्रभृतिभिः भवता निसृष्टः वेदोपबृहणविधौ उचितैरुपायैः। श्रुत्यर्थमर्थमिव भानुकरैः विभेजु त्वद्भक्ति भावितविकलमषशेमुषीकाः।।" इति।

ये तु ब्रह्मैकमेव सत्यं, जगन्मिथ्या, ब्रह्मणि गुणा अपि कल्पिता अयमेवार्थ वेदान्तैरुच्यते इति वदन्ति, तेऽपि यथावस्थित वेदार्थ न जानन्त्येव। किमत्र कारण ? सगुणे अनवधिकातिशयानन्दे ब्रह्मणि भक्त्यभाव एव। अमुमर्थ श्रीभाष्यकारः महासिद्धान्तावसरे स्वयमेव वदति — "तदिदं औपनिषदपरमपुरुषवरणीयताहेतुगुणविशेषविरहिणा अनादिपापवासनादूषिताशेषशेमुषीकाणा .. . याथात्म्यविद्भिरनादरणीयं" इति।

7. अर्थनिश्चये उपकारकनिरूपणम्

अत्र वेदानामर्थनिश्चये उपकारकाणि दश। शीक्षा, व्याकरणं, छन्द., निरुक्त, ज्यौतिषं कल्पसूत्राणि, पुराणं, धर्मशास्त्र, न्याय-विस्तरः, मीमांसा च इतीमानि वेदेन धर्मे प्रमीयमाणे उपकारं जनयन्ति। तत्र शीक्षाव्याकरणछन्दो निरुक्तज्यौतिषकल्पसूत्राणि अङ्गानि। अवशिष्टानि उपाङ्गानि। पूजितपदार्थविचारे मोमासाशब्दः प्रयुज्यते। मीमासापदार्थ च उपरिष्टात् सविस्तर विमृशामः। "शीक्षाव्याकरण छन्दो निरुक्त ज्यौतिष तथा। कल्पश्चेति षडङ्गानि वेदस्याहुर्मनीषिणः।।" इति केषाञ्चित् अङ्गत्व, अन्येषां उपाङ्गत्वं च स्पष्टम्। वेदस्य स्वरूपपरिज्ञाने तदर्थप्रमितौ च यदुपयुज्यते तदङ्ग, इति सामान्यतः उच्यते। वैदिकवर्णपदवृत्तपरिच्छेदपराणि शीक्षाव्याकरणछन्दशशास्त्राणि। पदार्थतद्विशेषप्रयोगव्युत्पादनप्रयोजनानि

निरुक्तज्यौतिषकल्पसूत्राणि । एतानि अङ्गानि । पुराणधर्मशास्त्र मायविस्तरा. आपाततः प्रतीयमान वेदार्थव्यक्ति जनयन्ति । एतानि वेदोपाङ्गानि इति ज्ञेयम् ।

शीक्षादीना उपयोगप्रकार श्रीपराशरभट्टार्याः सम्यगन्वगृह्णन्—

'शीक्षाया वर्णशिक्षा पदसमधिगमो व्याक्रियानिर्वचोभ्या
छन्दश्छन्दश्चितौ स्यात् गमयति समय ज्यौतिषं रङ्गनाथ ।
कल्पेऽनुष्ठानमुक्तं हृचुचितगमितयोः न्यायभीमासयोः स्यात्
अर्थव्यक्तिः पुराणस्मृतिषु तदनुगाः त्वां विचिन्वन्ति वेदाः ।।" इति

8. चतुर्दश विद्यास्थानानि

विद्यास्थानानि चतुर्दश गण्यन्ते शास्त्रेषु । वेदचतुष्टयं, अङ्गषड्क उपाङ्गचतुष्टयं चेत्याहृत्य चतुर्दश । "अङ्गानि वेदाश्चत्वारः मीमासा न्यायविस्तरः । पुराणं धर्मशास्त्र च विद्याह्येताश्चतुर्दश ।।" इत्यस्मिन् विषये प्रमाणमुदाहरन्ति । विभीषण. रावणं प्रति सीताप्रत्यर्पणोपदेशसमये एवं प्राह—"विद्याश्चतुर्दश चतुर्षु निजाननेषु संबाधदु.स्थितवतीरवलोक्य वेधाः । तेभ्योऽपराणि नियतं दश ते मुखानि स्वस्य प्रणन्तुरकरोत्स कथ जडोऽसि ?" इत्येवं कविः विद्यास्थानानि चतुर्दश इतीममर्थं भङ्ग्यन्तरेणावोचत् । एवं नैषधेऽपि—अधीति बोधाचरणप्रचारणैः दशा श्चतस्रः प्रणयन्नुपाधिभि. । चतुर्दशत्वं कृतवान् कुतः स्वय न वेद्मि विद्यासु चतुर्दशस्वयम् ।। इति ।। इमानि च विद्यास्थानानि वेदः स्वयमेवोवाच—"तत्रापरा ऋग्वेदो यजुर्वेदस्सामवेदोऽथर्ववेदः शीक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति" इति मुण्डकोपनिषदि (प्र.ख.), तस्यैतस्य महतो भूतस्य नि श्वसित यदृग्वेदो यजुर्वेदः सामवेद· शिक्षाकल्पो व्याकरण निरुक्त छन्दोविचित ज्योतिषामयनं न्यायो मीमांसा धर्मशास्त्राणि व्याख्यानान्युपव्याख्यानानि इति सुबालोपनिषदि (द्वि.ख), "सहोवाच ऋग्वेदं भगवोऽध्येमि यजुर्वेदं...सर्व देवजनविद्या एतद्भगवोऽध्येमीति" छान्दोग्ये (स.प्र.) । अतो वेद-वेदाङ्गादीनां स्वरूपं वेद एवोक्तं स्पष्टमिति नात्र इतरमतस्थानां विचारस्यावकाशो विद्यते ।।

ब्राह्म पुराणानि राजसानि । मात्स्य, कौर्म, लिङ्ग, शैव, स्कान्द, आग्नेय पुराणानि तामसानि ।

"नारायण परं यान्ति वदन्ति जगदीश्वरम् ।
तानि सर्वाणि शास्त्राणि सात्विकानि मतानि वै ।।"

इति सात्विकपुराणाना लक्षणं प्रतिपादितम् ।

"चतुर्मुखं कृशानु तु तथा देवी सरस्वतीम् ।
परत्वेन वदेत् शास्त्रं राजसं सप्रचक्षते ।।"
"मल्लिङ्गदुर्गविघ्नेशकुमारप्रमुखान्सुरान् ।
प्रशसन्ति च यच्छास्त्रं तत्तामसमुदाहृतम् ।। इति राजस तामसयोश्च लक्षण उक्तम् ।। अत्र सात्विकपुराणस्यैव श्रैष्ठ्यं, अन्ययोः जघन्यत्वञ्च, "तामसं दुर्गति दत्ते राजस स्वर्गद भवेत् । सात्विक मोक्षसाम्राज्यधौरन्धर्य ददात्यहो ।।" इत्यनेन प्रत्यपादि ।

पराशरसुतो व्यासः किमर्थमेवं विभज्य अष्टादशपुराणानि चक्रे? सात्विकपुराणमात्र किमर्थं नाकार्षीत् ? एवं मतिभेदजनक पुराण प्रकल्प्य किमिति वा जनान् व्यामोहयति ? इति न शङ्क्यम् । अनन्तेषु वेदेषु क्वचिदिन्द्रस्य प्राधान्यमुच्यते, क्वचिच्च शिवस्य, अन्यत्र विष्णोश्च । स्वर्गादिजनकं कर्म च क्वचिदुच्यते अन्यत्र कर्तुरनिष्टजनक आभिचारिक कर्मापि । मातापितृ सहस्रेभ्योऽपि वत्सलतर शास्त्रमेवमुपदिश्य नरान् किमर्थ प्रलोभयति । तस्य तस्य जन्मान्तराधीन पुण्यपापवशेन तत्र तत्र प्रवृत्त्यर्थमिति चेत्स समाधिः तुल्यः अत्रापि । "यावानर्थ उदपाने सर्वतस्संप्लुतोदके । तावान सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ।।" इति रीत्या तत्तदपेक्षितकर्मसु स्वाभीष्टदेवेषु प्रवृत्त्यर्थ तथातथोच्यते । बुद्धिमान् हि जनः समीचीनमर्थ आचार्यमुखात्प्राप्य महद्भिः गते पथि गन्तु प्रवर्तते । यस्तु न समचीनमर्थ जानाति ज्ञात्वापि कुपथाभिलाषी, स अनिष्ट कर्म कृत्वा भ्रश्यति । न परलोक विन्दति ।

वस्तुतस्तु—लोके एकैकस्यापि सत्वरजस्तमोरूपगुणत्रयं विद्यते। यदा सत्वाभिवृद्धि, तदा सत्कार्यं करोति। अन्यदा असत्कर्म। पुराणकृदपि सत्वगुणाभिवृद्धिसमये सात्विकपुराणान्यकरोत्। अन्यदा अन्यपुराणानि। "सात्विकेषु च कल्पेषु माहात्म्यमधिकं हरेः। तेष्वेव योगससिद्धाः गमिष्यन्ति परां गतिम्॥" इत्ययमर्थः सम्यगेव प्रतिपादितः।

श्रीमद्रहस्यत्रयसारे वेदान्ताचार्यैः परदेवतापारमार्थ्याधिकारे अयमर्थः सम्यगनुगृहीतः।

"यस्मिन्कल्पे तु यत्प्रोक्तं पुराणं ब्रह्मणा पुरा। तस्य तस्य च माहात्म्य तत्स्वरूपेण वर्ण्यते" इति। तत्स्वरूपेण-तत्तत्कल्पोद्भूत सात्विकत्वराजसत्वादिस्वभावेन। अत्र 'ब्रह्मणा' इत्यस्य 'तत्तद्गुण-मयेन ब्रह्मणा' इति श्रुतप्रकाशिकायां व्याख्यानं कृतम्। ततश्च सात्विककल्पेषु ब्रह्मणः सत्वगुणाधिक्यात् तादृशाभिवृद्धसत्वगुणविशि-ष्टेन चतुर्मुखेन कृतानां सात्विकपुराणानां हरिमाहात्म्यप्रतिपादकानां श्रैष्ठ्य, इति तादृशपुराणनिष्ठाः परां गति प्राप्नुवन्तीत्युक्त भवति।

"अष्टादशपुराणानां कर्ता सत्यवतीसुत." इति सर्वपुराणानां अपि पाराशर्य कर्ता इति प्रतीयते। "पुराणं ब्रह्मणा पुरा" इति वचनेन तु प्रजापतिः कर्ता इति ज्ञायते। कथमिदं वचनद्वयं अविरोधि सङ्गच्छते? प्रसिद्धाष्टादशपुराणव्यतिरिक्तानि बहूनि पुराणान्यासन्। सम्प्रति तु तानि लुप्तानि। तान्येव पुराणानि भगवान् प्रजापतिः चकारेति केचिद्वदन्ति। अन्ये तु अष्टादशपुराणव्यतिरिक्तपुराणानां सर्वथा अप्रसिद्धेः सर्वेषामप्यविशेषेण लुप्तत्वोक्तेः साहसत्वाच्च प्रसिद्ध-पुराणान्येव ब्रह्मणा कृतानि तान्येव च प्रवचनविधौ व्यासेनानीतानि। 'कर्ता सत्यवतीसुतः' इत्यत्र कर्ता—प्रवचनकर्ता इत्युक्तौ अविरोधश्चेति वदन्ति।

वयं तु ब्रूमः — सृष्टिकाले सर्वाणि पुराणानि प्रजापतिनैव सृष्टानि। परन्तु योगमाहात्म्यात् पराशरसुतः सर्वाणि ददर्श। अनेन दृष्टत्वमुपजीव्यैवास्य कर्तृत्वव्यवहारः। स्थितामेव गायत्री विश्वामित्रः ददर्श। दृष्टमन्त्रकाणा ऋषीणां मन्त्रकृत्वव्यपदेशः बहुलं वेदेषु दृश्यते "नम ऋषिभ्यो मन्त्रकृद्भ्यः" इति। द्राविडदिव्यप्रबन्धाः अपि पूर्व स्थिता एव दिव्यसूरिभिः योगमहिम्ना दृष्टा इति हेतो. दिव्यसूरय एव तत्कर्तारः इति व्यपदिशामः। तदुक्तमेवमेव महद्भिः "ऋषि जुषामहे कृष्णतृष्णातत्वमिवोदित्तम्। सहस्रशाखा योऽद्राक्षीत् द्रामिडी ब्रह्मसंहिताम्॥" इति, तथात्रापि। अतो व्यासः परब्रह्मयोगमहिम्ना पूर्व प्रजापतिनोक्त, लुप्तमषि साक्षात्कृत्य पुराणं जनानामाविश्चकारेति निरवद्यम्।

11. व्यासार्याः

एते च पराशरपुत्रा. शक्ते. पौत्रा, वसिष्ठनप्तारः शुकब्रह्मर्षेः पितृभूता., "यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्" इति प्रसिद्धमहाभारतनिर्मातारः, "कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्रभुम्। को ह्यन्यो भुवि मैत्रेय महाभारतकृद्भवेत्" इति नारायणावतारभूताः, "महर्षेः कीर्तनात्तस्य भीष्म प्राञ्जलिरब्रवीत्" इति कुरुवृद्ध पितामहाना भीष्माचार्याणां भगवत्सङ्कल्पमप्यन्यथयितु समर्थानां अमोघसङ्कल्पाना पूजाविषयभूताः 'वेदव्यासः' इति विरुदभाज कृष्णद्वैपायनादिशब्दै व्यवह्रियमाणाः वेदान्तसप्रदायप्रवर्तकाः अनितरसाधारणशेमुषीभाजः संसाराग्निविदीपनव्यपगतप्राणात्मसञ्जीविनीभूतस्य उपनिषद्दुग्धाब्धिमध्योद्धृतवचोऽमृतस्य वर्षुकाः, "स होवाच व्यास. पाराशर्यः" इति श्रुतिप्रसिद्धवैभवाः, विद्वद्भिः पामरैश्चातिश्लाघनीयावतारविशेषाश्च। 'श्रुतिर्विभिन्ना स्मृतयोऽपिभिन्ना तथा ऋषीणां मतयोऽपि भिन्नाः। नैको ऋषिर्यस्य मत प्रमाणं महाजनो येन गतस्स पन्थाः'॥ इति स्थितेऽपि सर्वा अपि श्रुतीः सम्यक् परामृश्य इदमेव परतत्व इति निर्धारणे चतुराः स्वपितर इव। एतेषां पितृपादाः

पराशरा· "देवतापरमार्थ्यं च यथावद् वेत्स्यते भवान्। पुलस्त्येन यदुक्तं ते सत्यमेतद्भविष्यति ।।" इति पुलस्त्यवसिष्ठ वरप्रदानलब्ध-पारमार्थ्यज्ञानवन्तः, "तत्वेन यः ..... पराशराय" इति व्यवह्रिय-माणैः यामुनार्यैः स्तोत्ररत्ने प्रशसिताः श्रीवेदान्तार्यैः स्वकीये रहस्य-त्रयसारे श्लाघिताश्च ।

अपि चेमे व्यासार्याः श्रुत्यादिभिरवधृतं परतत्वं सुनिश्चित्य मनसि बहुप्रकारेणालोच्य निर्भयं निर्लज्जं च करद्वयमुपर्युद्धृत्य श्रीमन्नारायण एव परतत्वभूतः इति उच्चैः उद्घोषितवन्तः। तैः घोषितोऽयं श्लोकः—

"सत्यं सत्यं पुनस्सत्य उद्धृत्य भुजमुच्यते ।
वेदशास्त्रात्पर नास्ति न दैव केशवात्परम ।।" इति ।

श्लोकमिमं मनसि निधाय श्रीमान्वेङ्कटनाथः स्वकृतसङ्कल्पसूर्योदयनाटके प्रथमाङ्के एव प्राह

"शास्त्राण्यालोड्य सर्वाण्यशिथिलगतिभिः युक्तिवर्त्मैः विचार्य
स्वान्तर्निर्धार्य तत्वं स्वभुजमपि महत्युद्धरन् सूरिसङ्घे ।
सत्यं सत्यं च सत्यं पुनरिति कथयन् सादरं वेदवादी
पाराशर्यः प्रमाण यदि क इह परः केशवादिरस्ति ।। इति ।

अपि चैते विशकलितान्यनन्तानि वेदवाक्यानि दृष्ट्वा जनोप-कारार्थमनुकम्पया स्वयोगमाहात्म्येन यथावत्सङ्कलय्य विभक्तान् चक्रुः सर्वानपि वेदान् । अत एव 'वेदव्यासः' इति बिरुदमभजन् । यथोक्त—

"दुर्भगाश्च जनान वीक्ष्य मुनिर्दिव्येन चक्षुषा ।
सर्ववर्णाश्रमाणा यत् दध्यौ हितममोघकृत् ।।
चातुर्होत्र कर्म शुद्ध प्रजाना वीक्ष्य वैदिकम् ।
व्यदधात् यज्ञसन्तत्यै वेदमेक चतुर्विधम् ।।

ऋग्यजुस्सामाथर्वाख्याः वेदाश्चत्वार उद्धृताः ।
इतिहासपुराणं च पञ्चमो वेद उच्यते ।।
एव चकार भगवान् व्यासः कृपणवत्सल. ।।
विव्यास वेदान् यस्मात्सः तस्मात् व्यास इति स्मृतः ।
वेदव्यास इति प्रोक्तः पुराणे च स्वयंभुवा ।। इति ।।

अगाधहृदयानामेतेषां कृतयोऽप्यगाधहृदयाः परिचितगहनाश्च यथा समुद्रे निमज्ज निमज्य रत्नानि गृह्णीयु. तथा एतत्कृतिसागरं निमज्य विलक्षणार्थरत्नजातानि बुधः आददीत । आपाततो निरीक्षणे अतिसरला इव कृतयः परिदृश्येयुः । सूक्ष्मेक्षिकया मनोऽवधार्य अर्थपरिशीलने वाङ्मनसागोचराणि अर्थजातानि बहूनि लभ्येरन्। एतच्च अनुदिन एतत्कृतसूत्रपारायणं कुर्वद्भिः स्पष्टमनुभूयेत । आपाततः एतत्कृतौ प्रवेशे सुलभतोऽर्थज्ञानसंभवमुपजीव्यैव सर्वेऽपि मतस्थाः एतद्विरचितब्रह्मसूत्रव्याख्यानकरणे प्रावर्तन्त । केचिदेव तु एतदाशयं यथावस्थितं यथावत् ज्ञातुं शक्ता भवन्ति । महाभारते विदुषामपि दुर्ग्रहाशयाः बहवः श्लोकाः सन्तीति अद्यापि वृद्धाः विदामासुः । 'व्यासगुड्डु' इति सुप्रसिद्धं च भाषान्तरे । अत. एतेषां ग्रन्थकरणशैली अन्यादृशी, अतीव सग्रहेण सुगूढश्च स्वाशयमाविष्कुर्वन्त्येते, संक्षेपेण च तत्तद्वेदार्थान् परिशीलयन्ति ।

अपि चैतेषा जन्मरहस्यमत्यद्भुतमत्र किञ्चिदनुसन्धीयते । यदनुसन्धीयमानं सर्वानपि जनान् पुनीते ।

उपरिचरो नाम राजा वसुः अत्यद्भूत अतिघोरं तपश्चचार । भीताः शक्रपुरोगाः देवाः त सान्त्ववाचा सन्निवर्त्य वरं च ददुः । अत्याश्चर्य राज्य आकाशगं च विमानं इन्द्रः प्रीतस्सन् तस्मै अदात् । सः सर्वानपि भूमिपतीनतिशय्य अतिबलवान् रराज । स्वपुरोपवाहिनी शुक्तिमती नदी कोलाहलो नाम गिरिः अरौत्सीदिति कुपितः कोलाहलेन तं गिरिं पादेन प्रताड्य तत्र जातेन प्रहारविवरेण नदी जगाम । स च

पतिः तस्यां नद्या एक कुमार एकां कन्या च जनयित्वा तस्मै प्रत्यदिशत् । राजा च कुमारं सेनापति चकार । गिरिकाञ्चना कन्यां स्वयं उपयेमे । कदाचित्स्वपत्नीऋतुकाले मृगयार्थगमनमापतितम् । अथ कामपीडितेन स्वपत्नीसक्तमनसाऽनेन खिन्नेन स्कन्नमात्रं स्वरेतः वृक्षपत्रे प्रच्छाद्य सद्यः आगताय श्येनाय पक्षिणे, यथेदं वीर्यममोघं भवेत्तथा त्वया कार्य, शीघ्रं च गत्वा मद्भार्यायै देय इत्युक्त्वा प्रदिष्टम्। स च श्येनः अन्येन श्येनेन मासबुध्या अभिहतः ताडितश्च यमुनायां सवीर्यं पत्रं प्रःक्षिपत्। श्येनपादपरिभ्रष्ट वसुसंबन्धितद्वीर्यं मत्स्यरूपिणी अद्रिका नाम अप्सराः अभक्षयत् । कदाचित् मत्स्यजीविभिः गृहीता एक पुमांसं एकां तरुणी च प्रासूत । विदितोदन्तः उपरिचरवसुर्नाम राजा पुत्र स्वीकृत्य कन्या दाशायैव कन्यात्वेनादात् । तस्य 'सत्यवती'ति नाम चकार दाशः । अस्याः मत्स्यगन्धी वासवी इति च नामाभूत् ।

स्वपितुर्दाशस्य नाव वाहयन्ती इमां रम्भोरुं दिव्यां कन्या तीर्थयात्रया पर्यटन् पराशरश्चकमे । तस्या वशकरं सुत च ययाचे । तयाऽनुमतः पराशरः मत्स्यगन्धा योजनगन्धा चकार । पार्श्वस्थैरनुपलंभार्थं सलज्जायाः अस्याः कामपूर्त्यर्थं च तमः सृष्ट्वा तस्यां गर्भमदधात् । जज्ञे च पाराशर्यः । यमधिकृत्येमे श्लोकाः प्रवृत्ताः ।

"पराशरेण सयुक्ता सद्यो गर्भं सुषाव सा ।
जज्ञे च यमुनाद्वीपे पाराशर्यः स वीर्यवान् ।।

स मातरमनुज्ञाप्य तपस्येव मनो दधे ।
स्मृतोऽहं दर्शयिष्यामि कृत्येष्विति च सोऽब्रवीत् ।।

न्यस्तो द्वीपे स यद्बाल तस्मात् द्वैपायनः स्मृतः ।।" इति ।

"अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः ।
अकाललोचनः शम्भु. भगवान् बादरायणः ।।" इति च ।

अथ तया प्रार्थितः पराशरः तां योजनगन्धी पुनः कन्यां चकार। यदस्या शन्तनोः चित्राङ्गदचित्रवीर्यौ जातौ। एवं समुत्पन्नस्य व्यासार्यस्य माहात्म्य वाचामगोचरम्। एतेषामुत्पत्तिप्रकारस्त्वन्यथा न चिन्त्य.। "मृगीणां पक्षिणां चैव अप्सराणां तथैव च। शूद्रयोन्यां च जायन्ते मुनयो वेदपारगाः। ऋष्यश्रृङ्गो मृगीपुत्र; कण्वो बर्हिसुतस्तथा। अगस्त्यश्च वसिष्ठश्च उर्वश्या जनितावुभौ॥ सोमश्रवास्तु सध्र्या तु अश्विनावश्विसंभवौ। स्कन्दः स्कन्नेन शुक्लेन जातः शरवणे पुरा। एवमेव च देवाना ऋषीणां चैव संभवः। लोकवेदप्रवृत्तिर्हि न मीमांस्या बुधैस्सदा॥ इति हीमान् स्तुवन्ति।

भगवन्तमिमं वेदव्यास बादरायणमित्यनुस्मरन्ति। "लक्ष्मी वक्षसि मस्तके च मकुट रम्यं जटामण्डलं (कल्पित) चिन्मुद्रामपि पुस्तक च करयोः चक्रं शिरस्युज्वलम्। बिभ्राणः पुरतः कमण्डलुयुतः कूर्मस्थपद्मासनः वेदव्यासमुनिः प्रसन्नवदनः चित्ते विधत्तां पदम्॥" इति॥

एतेषां व्यासार्याणां पुत्रः श्रीशुकः। यमधिकृत्यामु श्लोक पठन्ति—

"य प्रव्रजन्तमनुपेतमपेतकृत्यं द्वैपायनो विरहकातर आजुहाव।
पुत्रेति तन्मतया तरवो विनेदुः त सर्वभूतसुहृदं मुनिमानतोऽस्मि"॥इति।

मेरुश्रृङ्गे कर्णिकाकारवने पार्वत्या विहरन्तं परमशिवमुद्दिश्य पुत्रार्थं तपश्चरतः तत्प्रसादेन शुकीभूता घृताचीमप्सरस अवेक्ष्य कामातुरस्य व्यासस्यारणिमन्थनकाले देहाद् विमुक्तादरण्या पतितात् वीर्यात् श्रीशुक प्रादुर्भूतः इति पुराणकथा। अतिमेधाविनः सर्वविषयमपि जानतोऽपि स्त्रीपुरुषभेदानभिज्ञस्य अस्य पुत्रस्य वियोगादतीव खिन्नो बभूव एतत्पिता व्यासः। पुत्रशोक सर्वात्मना असहमान. "छायां स्वपुत्रसदृशी सर्वतोऽनपगां सदा। द्रक्ष्यसे त्वञ्च लोकेऽस्मिन् मत्प्रसादान् महामुने॥" इति परमेश्वरप्रसादात् लब्धछायाशुकः परमां मुदं लेभे।

एवं मनुष्यसजातीयतया अवतीर्णस्य तथैव कर्म कुर्वाणस्यापि वेदविभागकरण पुराणेतिहासनिर्माण वेदान्तार्थोपबृंहणरूपसूत्रग्रथनाद्यनेकविधातिमानुषकृत्यदर्शनेन के वा न प्रशसेयुः इममाचार्यवर्यम् । "सूत्रकृद्वावदूकः" इति सूत्रप्रणयने अस्य सामर्थ्यमवेक्ष्य श्रीवेङ्कटनाथः अश्लाघत ।।

12. उपनिषत्

वेदवेदान्तभेदेन सर्वा अपि श्रुतीः द्विविधाः विभजन्ते । ऋग्वेदः, यजुर्वेदः सामवेदः अथर्वणवेदः इति वेदा चत्वारो भवन्ति । वेदचरम भागरूपा वेदान्तास्तु उपनिषच्छब्देनाभिधीयन्ते । अष्टोत्तरशत सख्याकाः उपनिषदः । अष्टाविंशति संख्याका इत्यपि केचिद्वदन्ति । दशैवोपनिषद. प्रसिद्धा सर्वत्रोदाह्रियन्ते । यद्यप्युपनिषदां संख्या अष्टोत्तरशतमेव । अथापि अष्टोत्तरशतसंख्याभ्यः उपनिषद्भ्य अष्टाविंशति सख्याका उपनिषदः मुख्यभूताः । ताभ्योऽप्युपनिषद्भ्यो दशसख्याका उपनिषदः अत्यन्तं मुख्यभूता गण्यन्ते । अत एव दशोपनिषद एव सर्वत्राधिक उदाहरणता भजन्ते । ताश्चोपनिषद "ईशकेनकठप्रश्नमुण्डमाण्डूक्यतित्तिरि । एतेरेय च छान्दोग्य बृहदारण्यक दश।।" इति प्रसिद्धाः । एकैकस्यापि वेदस्य शाखाः सन्ति । ऋग्वेदस्य—ऐतरेयब्राह्मणान्तर्गत ऐतरेय, यजुर्वेदस्य—शुक्लयजुस्संहितायाः चत्वारिशदध्यायात्मिकायाः चरमोऽध्यायः ईशावास्योपनिषत्, शुक्लयजुर्वेदीयस्यकाण्वमाध्यन्दिनभेदेन द्विविधस्य शतपथब्राह्मणचरमभागः बृहदारण्यकोपनिषत्, कृष्णयजुर्वेदीयकठशाखान्तर्गता कठोपनिषत्, कृष्णयजुर्वेदीय तैत्तिरीयशाखायाः ब्राह्मणचरमभागरूपा तैत्तिरीयोपनिषत् ; सामवेदस्य छान्दोग्य, केनोपनिषच्च ; अथर्वणवेदस्य तु प्रश्नोपनिषत्, मुण्डकोपनिषत्, माण्डूक्योपनिषच्च ।

उप निषीदति—अव्यवधानेन नित्यं समन्वेतीत्युपनिषत् । अद्वारक भगवत्प्रतिपादकवेदभागः उपनिषच्छब्दार्थः । पूर्वोत्तरभागद्वयात्मके

वेदे पूर्वभाग न साक्षात् ब्रह्म प्रतिपादयति । तदेवाग्निस्तद्वायु. तत् सूर्यस्तदु चन्द्रमा" इत्यादौ अग्न्यादिशब्दाः न साक्षात् परमात्मान बोधयितु प्रवृत्ताः । वेदान्तभागरूपोत्तरभागस्तु साक्षात्परब्रह्मण एव बुबोधयिषया प्रवृत्तः इति विवेकः । यद्वा उपनिषच्छन्दः रहस्यपर्यायः । अतिरहस्येऽर्थे उपनिषच्छब्दः प्रयुज्यते वेदे । बृहदारण्यके (7-4-2) 'सत्यं ब्रह्म' इत्युपक्रम्य आदित्यमण्डले व्याहृतिशरीरत्वेन सत्यस्य ब्रह्मण: उपास्यत्वमुक्त्वा "तस्योपनिषदहरित्यधिदैवतं" इत्युक्तम् । तथा अक्षिणि व्याहृतिशरीरत्वेन सत्यस्य ब्रह्मण: उपास्यत्वमुक्त्वा "तस्योपनिषदहमित्यध्यात्मं" इति चोक्तम् । तत्र "द्वे उपनिषदौ– रहस्यनामनी इति श्रीमद्भाष्यम् । अत उपनिषच्छब्दः रहस्यार्थ बोधयतीति सिद्धम् । एवं चातिरहस्यभूतब्रह्मविद्यारूपार्थबोधक उपनिषच्छब्दः इति निश्चीयते । उप, नि, सत् इति पदत्रयघटितोऽय शब्दः । तत्र उप, नि इत्युपसर्गद्वयम् । षड्लृधातुः विशरणगत्यवसादनार्थकः । क्विप् प्रत्ययान्तोऽय शब्दः । ब्रह्मविद्या पुरुषविशेषं प्राप्य तद्गतपापानां विशरणकर्त्री, अवसादयित्री च । यद्वा इय पुरुष प्राप्य तस्य ब्रह्म गमयित्री । समस्तपापानि नाशयति इयम् । तन्नाशद्वारा ब्रह्मप्रापिका च भवति । अत. एवभूतब्रह्मविद्यैवोपनिषत् । एतादृशब्रह्मविद्याप्रतिपादकवेदभागे उपनिषच्छब्दः गौण्या वृत्त्या वर्तत इति निरवद्यम् ॥

अथ कस्मादुपनिषत् ? उप=समीपे निषद्य=उपविश्य शिष्येण आचार्यात् गृह्यमाणत्वात् उपनिषत् इति केचित् । यद्यपि सर्वस्मिन् वेदे विद्यास्थाने च सर्वत्राविशिष्टमिद, अथापि परमरहस्यत्वात् वेदान्तभाग एव शिष्येणात्यन्तसमीपे उपविश्य गृह्यते इति वेदान्तभाग एव उपनिषच्छब्दवाच्यः इत्यवसेयम् ॥

शाङ्करे चोपनिषद्भाष्ये — षड्लृ विशरणगत्यवसादनेष्विति विशरणार्थकोऽयं धातुः, अय च उप, नि पूर्वकः निश्शेषतापत्रय-

विशरणज्ञानपद· तत्संपादकवेदभागपरश्च इत्युक्तम् । श्रुतप्रकाशिकायां तु प्राचीन सांप्रदायिकोऽर्थः प्रदर्शितः । 'ब्रह्मण्युपनिषण्णेति उपनिषत् । उपनिषण्णत्वाद्वा उपनिषत्' इति हि वाक्यम् । 'गहने हीय विद्या सन्निविष्टा' इति तद्विषयं द्रमिडभाष्यम् । 'गहने ब्रह्मणि उपनिषण्णा' इति भाष्यविषया वामनटीका । अद्वारकभगवत्प्रतिपादकत्वमुपनिषण्णत्वं इति ।। यं वाकेष्वनुवाकेषु निषत्सूपनिषत्सु च । गृणन्ति सत्यकर्माणं इति महाभारतवचनम् । वाकेषु=मन्त्रेषु । अनुवाकेषु=तदर्थदर्शिषु ब्राह्मणेषु निषत्सु=देवता भागप्रतिपादकेषु भागेषु । तथा उपनिषत्सु च इत्यर्थः । सत्यकर्माणं=सर्वकर्मसमाराध्यं सृष्टिस्थितिसहाराख्य सत्यक्रियं नित्यविभूतिविहारावतारादिसत्यक्रियं वा परमपुरुषम् । अत्र निषत्पदाभिधेयो देवतान्तरप्रतिपादकभागोपि परमात्मविषये निषत् भवति । उपेत्युपसर्गबलात् साक्षात् भगवत्प्रतिपादकवेदान्तः उपनिषत् भवतीत्यवगम्यते । अतः अद्वारकभगवत्प्रतिपादकत्वमुपनिषदाम् । 'श्रुतिशिरसि विदीप्ते ब्रह्मणि' इत्येतदपि एतादृशार्थविभागबोधकमिति 'ब्रह्म श्रुतौ दीप्त श्रुतिशिरसि विशेषेण दीप्तं–इति व्याचख्युः ।।

निषीदति अस्यां देवता इति निषत् इति केचित् । निषीदतीयं देवतायां इति निषत् इत्यपि केचित् । सर्वथापि उपनिषत्पदं अद्वारकभगवत्प्रतिपादकवेदान्तभागपरमेव ।।

13. मीमांसाकालनिर्णयः

भागद्वयात्मको वेदः इति पूर्वमवोचाम । स एव काण्डद्वयशब्देनापि व्यवह्रियते । तत्र पूर्वकाण्डं विमृशन् जैमिनिः सूत्ररूपेण मीमांसते स्म । उत्तरभागविमर्शार्थं बादरायणो वेदव्यासः मीमांसारूपाणि सूत्राणि चकार ।

चतुर्दशविद्यास्थान निर्देशप्रकरणे मीमांसा शब्दोऽपि पठितो विराजते । सुबालोपनिषदि अन्यत्र महाभारते पुराणेषु तैत्तिरीय

प्रातिशाख्यादिषु च मीमासाशब्द पठ्यमानो दृश्यते। यथा वेदानां प्रवाहनित्यत्व, यथा च विद्यास्थानान्तराणां तथैव मीमांसाया अपि प्रवाहतो नित्यत्वमुशन्ति। पूजितपदार्थविचारो मीमांसेति वृद्धा विदन्ति। तत्र वेद एवार्थः अस्माक पूजित इति तु निश्चप्रचम्। अतो वेदार्थविचारं प्रति प्रवृत्त विद्यास्थानं मीमांसाशब्दाभिलप्यं भवति। तत्र पूर्वकाण्डरूपवेदार्थविचारात्मक मीमांसाशास्त्र जैमिनिना कृतं, उत्तरकाण्डरूपवेदार्थविचारात्मक तु मीमांसाशास्त्रं बादरायणेन।

ननु वेदेष्वेव मीमासाशब्दस्य प्रयोगात् तदर्थविचारात्मकस्य मीमांसाशास्त्रस्य ततः पश्चाद्भावि जैमिनिव्यासरचितत्व कथं योयुज्यते इति मावोच.। यतः अस्य शास्त्रस्य प्रवाहनित्यत्वमभ्युपगच्छामः। एकैकस्मिन्नपि कल्पे एकको जीवः तपसा वसिष्ठादिपदमिव जैमिनिव्यासादि स्थानमस्थाय तत्तत्काण्डविचारात्मकं मीमासाशास्त्र करोति। यश्च वेदविभजनपूवकं पुराणादि तनोति तस्य व्यास इति नाम, स एव ब्रह्मकाण्डमामासाशास्त्रं करोति। एवमेव कश्चिज्जैमिनिर्भूत्वा पूवकाण्डमीमांसाशास्त्रम्। न हि डित्थडवित्थदेवदत्तादि संज्ञावत् एकस्मिन्नेव व्यक्तिविशेषे जमिनि व्यासादिसज्ञेति वदाम। कश्चिदुपचितपुण्यविशेषस्सन् जैमिनि व्यासादिवां भूत्वा तत्तच्छास्त्र निर्मिमीते इति निरवद्यम्। तत्र पूजितपदाथावचारस्यैव मीमांसारूपत्वात् जैमिनिकृतस्य पूर्वकाण्डविचारात्मकस्य न्यायनिबन्धनस्येव व्यासकृतोत्तरकाण्डविचारात्मकस्यापि न्यायनिबन्धनस्य शास्त्रस्य मीमांसात्वमस्त्येवेति उभावपि मीमांसाशब्दोऽभिदधाति। अनयोरुभयोरपि मीमांसात्वेन व्यावृत्तिसिध्यर्थ जैमिनिकृतं शास्त्रं 'कर्म मीमासा' 'धर्ममीमांसा' 'पूर्वमीमांसा' इति व्याहरन्ति। बादरायणकृतं च शास्त्रं ब्रह्ममीमांसा, उत्तरमीमांसा इति वृद्धा व्यवहरन्ति। बादरायणकृतस्य 'वेदान्तशास्त्र' इति तु प्रायिको व्यवहारः। तथा जैमिनिकृतस्यापि केवलं=निरुपपद 'मीमांसा' इति च व्यवहारोऽनुभवसिद्धः।

अन्यदप्यत्र किञ्चिदालोच्यते—कस्यचिन्मन्दमतेः एवमप्यभिप्रायः स्यात्—जैमिनिरेव प्रथम पूर्वकाण्डविचारात्मकं निबन्धनं निबन्धेति निर्बन्धो न भवति। यत. तत्कृतेष्वेव सूत्रेषु कतिपये आचार्याः संकीर्त्यन्ते। अतस्तेषामपि जैमिनेः प्राक् एतच्छास्त्रप्रणेतृत्वं संभवति। एवमेव बादरायण सूत्रेष्वपि बहव ऋषयः संकीर्त्यमानाः दृश्यन्ते। अतस्तेऽपि बादरायणात्पूर्वमेव उत्तरकाण्डविचारात्मकनिबन्धनप्रबन्धारो भवेयुः। एवञ्च पूर्वमीमांसाशास्त्र जैमिन्युपज्ञमिति उत्तरमीमांसाशास्त्रं बादरायणोपज्ञ इति च न भवतीति।

अस्य समाधिरेवं वाच्य—"अथातो धर्मजिज्ञासा"—इत्यारभ्य-स्थितानि सूत्राणि जैमिनीयानि। "अथातो ब्रह्मजिज्ञासा" इत्युपक्रम्य "अनावृत्तिश्शब्दादनावृत्तिश्शब्दात्" इत्यन्तानि सूत्राणि च बादरायणीयानीति तु निर्विवादम्। एषु सूत्रेषु तत्तन्मतनिर्देशपूर्वकं तत्तदृषिनामसङ्कीर्तनमस्तीत्यपि न विदुषा तिरोहितम्। परन्तु तत्तदृषिनामसङ्कीर्तनमात्रमुपजोव्य जैमिनिव्यासकृतसूत्रात्मक निबन्धनाभ्यां पूर्वमेव कैश्चित् काण्डद्वयविचारात्मकप्रबन्धाः कृताः सन्तीति वा तांश्च प्रबन्धानवलोक्यैव आभ्यां सूत्राणि कृतानीति वा न वक्तुं शक्यते। यतः जैमिनेः व्यासस्य च समानकालिकाः बहवः ऋषयः स्युः। तेचैकत्र संभूताः जैमिनि व्यासेन वा मिलिताः वेदार्थविचारे स्वस्वमाशयं आविष्कृतवन्तो भवेयु। तत्तदभिसन्धि च विज्ञाय इमौ ऋषी तत्तन्नामनिर्देशपूर्वक काण्डद्वयविचारात्मकनिबन्धने चक्रतुः। बहवो विद्वासः यज्ञशालासु वादगोष्ठीषु च मिलिताः वेदार्थविचार कुर्वन्तीत्येतत् अद्याप्यनुभवसिद्धम्। देवोत्सवादिषु भगवत्सेवार्थमागतानां विदुषा भगवदनुयात्रा कुर्वतां वेदार्थविचारकरणं अद्यापि दृश्यते। अतो जैमिनेः व्यासस्य वा इतरमुनिश्रेष्ठाशयाभिज्ञानं अतिसुलभमिति स्वकृतप्रबन्धेषु तेषां मतविशेषप्रदर्शनपूर्वक तत्तन्मुनिनामकीर्तनं युक्तमित्यलं पल्लवितेन॥

14. ऐकशास्त्र्यम्

मुनिद्वयप्रणीतयोः विचारात्मकयोरनयोः मीमांसानिबन्धनयोः ऐकशास्त्र्यमभ्युपगच्छन्ति विशिष्टाद्वैतिनः। कर्तृद्वयं नैतद्विरोधि। भिन्नकर्तृकयो. निबन्धनयोरपि एकप्रबन्धत्वदर्शनात्। व्याख्यानरूपमिद द्वयमपि एकशास्त्र भवितुमर्हति। भिन्नकर्तृकाणां कथमैकशास्त्र्यं इति तु न शङ्क्यम्। ऐकशास्त्र्यस्य व्याख्येयैक्यनिबंधनत्वात्। धूर्तस्वामि कपर्दिकर्तृकस्य आपस्तम्बीयगृह्यसूत्रव्याख्यानस्य एकप्रबन्धत्वं हृचुपेयते। कर्तृभेदो हि नैकग्रन्थत्वाभावसाधकः। कादम्बर्यादौ कर्तृभेदेऽपि एकप्रबन्धत्वदर्शनात्।

अथात्रकश्चिदेव मनुते—कर्तृभेद. एकप्रबन्धत्वविरोधी न भवतीति वास्तवमेव। यत्र तु परस्परविरुद्धार्थवक्तुकर्तृभेदः तत्रैकप्रबन्धत्वं कथमभ्युपगमार्हम्। कादम्बर्यादौ कर्तारौ न विरुद्धार्थवादिनौ। अत्र जैमिनिव्यासौ तु एकव्याख्येयव्याख्यानकर्तारावपि परस्परविरुद्धार्थवादिनौ भवतः। जैमिनिर्हि देवता निराकरोति। बादरायणस्त्वभ्युपगच्छति। सिद्धपरवाक्यानां न साक्षात्प्रामाण्य क्रियाशेषतयैवेति जैमिने र्मतम्। व्यासस्य तु स्वत एव प्रामाण्यम्। एवमन्यत्र बहुल विरोधो दृश्यते। सति चैवं एकप्रबन्धत्वमनयोः निर्लज्जया जिह्वया कथं वक्तु शक्यमिति।

जैमिनिव्यासहृदयानभिज्ञस्याय पूर्वपक्षः। न हि जैमिनि. सुहृदयं क्वचिद्देवतां निराकरोति। यत्र देवतानिराकरणमिव दृश्यते तत्प्रकरण त्वन्याभिप्रायकम्। अतो देवतानिराकरणं अन्वारुह्येति ध्येयम्। तथाहि—यस्तु वेदस्यान्यस्य सर्वस्याचाप्रामाण्य ब्रूते, न तं प्रति स्वमत एव देवता साधयितु शक्यते। अतस्तन्मत एव प्रविश्य देवता माऽस्तु, वेदस्य प्रामाण्यमवश्यमङ्गीकार्य, धर्माः, कर्तव्याः इति प्रथम प्रसाध्य तदनन्तरं देवता साधनीयेति अभिप्रायेण जैमिनिः प्रवर्तते इति देवतानिराकरणे न जैमिने तात्पर्यम्। अयमर्थः—

जैमिन्युक्तं विरुद्धं यदिह बहुविधं दर्शितं सूत्रकारैः

तस्मादत्रैकशास्त्र्यं हठकृतमिति न, ब्रह्मसंवाददाढर्यात् ।
तन्नस्तात्पर्यभेदे विहतिपरिहृतिः काण्डवत् काण्डयोस्स्यात्
बाह्यक्षेपार्थगूढाशयवचनभवद्भ्रान्तिशान्त्यादिसिद्धेः ॥ इति ॥

'जैमिन्युक्तं विरुद्धं' . . ..'बाह्याक्षेपार्थ'.....इति सारावल्यां स्पष्टः। अत एव हि व्यासः, स्वरचितमीमांसायां 'सम्पत्तेरिति जैमिनिः' 'परं जैमिनिर्मुख्यत्वात्' इत्यादिषु जैमिनेः देवताङ्गीकारपक्षं व्यक्तं कथयति । जैमिनिरपि स्वं देवताङ्गीकारपक्षं 'द्रव्यदेवतामामान्ये द्रव्यं बलीयः' इत्यादिना प्रकटयति । यदि देवतैव नासीत्, तर्हि कथं बलाबलविचारः क्रियते ? अतः द्रव्यस्य प्राधान्यकथनं तु प्रत्यक्षगम्यत्वमनुसन्धाय । एवमर्थवादविशेषेष्वपि विरोधः परिहार्यः । अतः कुत्रचिदपि मुनिद्वयस्य विरोधाभावात् न केनापि कारणेन एकशास्त्रभञ्जनं सुघटम् । देवतात्वङ्गीकृता । तस्याः विशेषणपञ्चक तु न स्वीकृतम् । विग्रहो हविरादान युगपत्कर्मसन्निधिः प्रीतिः फलप्रदान च देवतानां न विद्यते' इत्यपि वदन्ति ।

ये त्वैकशास्त्र्यमनयोः नेच्छन्ति, ते तावत् पूर्वमीमांसा उत्तरमीमांसेति च न व्यवहरेयुः । मीमांसकास्तु जैमिनिकृतस्य 'अथातो धर्मजिज्ञासा' इत्यादिसूत्रस्य व्यासकृतेन निबन्धनेन एकशास्त्रत्वं नाभ्युपगच्छन्ति । अद्वैतिनस्तु व्यास निबन्धनस्य जैमिनिकृतनिबन्धनेन नैकशास्त्रत्वम् । उभयेऽपि निबन्धनद्वयमपि पृथक् पृथक् निबन्धनमित्येव वदन्ति । अतः पूर्वमीमासकान् कबन्धमीमांसाकान् अद्वैतिनश्च राहुमीमासकान् अचार्या वदन्ति । तदुक्त सारावल्यां, 'मीमांसायाः कबन्धं कतिचन जगृहूराहुकल्प शिरोऽन्ये' इति ।

15. ब्रह्मसूत्रे बादरायणनामनिर्देशौचित्यम्

अन्यदप्यत्र किञ्चिद्विमृशामः—'अथातो धर्मजिज्ञासा' इत्युपक्रमपूर्वकं दृश्यमान निबन्धनं जैमिनिकृतमिति अथातो ब्रह्म जिज्ञासा इत्यारभ्य कृतं निबन्धनं च बादरायणकृतं इति च सर्वे वदन्ति । कथमिदमुपपद्यते ? यदि ब्रह्मसूत्रस्य बादरायणः कर्ता भवेत्, तर्हि कथं

स आत्मानं तृतीयपुरुषवन्निर्दिशेत् ? 'अवस्थितेरिति काशकृत्स्नः', 'अभिव्यक्तेरित्याश्मरथ्य' 'पूर्वं तु बादरायणो हेतुव्यपदेशात्' इति काशकृत्स्नादितुल्यतया हि आत्मानं निर्दिशति। एवं जैमिनिरपि मीमांसासूत्रेषु स्वात्मनो निर्देशं करोति। अतो व्यासजैमिनी वेदविबन्धनद्वयं निबबन्धतुरिति प्रतीयते। एवमन्यदपि कारणमस्ति अनयोः मीमांसाकर्तृकत्वाभावे। जैमिनिर्हि स्वसूत्रेषु बादरायणं कीर्तयति। बादरायणोऽपि जैमिनिम्। यद्यत्र जैमिनिः स्वसूत्राण्यकार्षीत्, तदा पूर्वं बादरायणसूत्राभावेन तदाशयमजानानः तन्मतं कथं स्वसूत्रेषु निर्दिशेत् ? एवं यदि बादरायणः प्रथमं ब्रह्मसूत्राणि चकार, तदा पूर्वं जैमिन्याशयानभिज्ञ तदभिसन्धिं कथं वा सूत्रेण प्रकटयेत्? अतः इदं निश्चीयते-जैमिनिः स्वशिष्यान् स्वमतमध्यापयामास। एवं बादरायणोऽपि। ते च शिष्याः परस्परं मिलिताः मितद्वयं जानन्तोऽवर्तन्त। तेषु शिष्येषु एकेन द्वाभ्यां वा कर्मब्रह्मसूत्राणि कृतानि भवेयुरिति।

अत्र ब्रूमः—बहोः कालात्प्रभृति पूर्वमीमांसाशास्त्रं जैमिनिकृतं उत्तरमीमांसाशास्त्रं च बादरायणकृत इति च प्रथा लोके वरीवर्ति। पण्डितपामरवैलक्षण्यं विना तथैव व्यवहरन्ति च। एवं स्थिते केनचिदाभासहेतुना विषयान्यथाकरणं न हृदयङ्गमं भवति। परम्परासन्धिपरिज्ञानं निबन्धनेनैवेति नियमो न युक्तः इति पूर्वमेवावोचाम। परस्परसंभाषणादपि परस्पराभिप्रायज्ञानं सुलभम्। बादरायणशिष्यो जैमिनिरिति प्रथा तु लोकव्यापिनी। बादरायणः जैमिनेः परमात्मतत्त्वज्ञानमुपदिशतीति महाभारते हयशिर उपाख्याने च दृष्टम्। अतो जैमिनिः बहुमानपुरस्सरं स्वाचार्यं बादरायणं स्वकृतनिबन्धने कीर्तयन् तन्मतं प्रदर्शयामास। बादरायणोऽपि अतिमेधाविनं स्वशिष्यं वेदविचारनिपुणं जैमिनिं स्वनिबन्धने कीर्तयामास। अतः सूत्रद्वयस्य पौर्वापर्यविचारनिबन्धनाकर्तृत्वाक्षेपः न समीचीनः। स्वग्रन्थेषु तृतीयपुरुषवत् स्वस्वनामकीर्तनं न स्वस्याकर्तृत्वसाधकम्। वेङ्कटनाथो हि स्वग्रन्थेषु स्तोत्रेषु च स्वनाम सर्वत्र कथयति। न हि तेन तद्ग्रन्थकर्ता स न भवति। द्राविडप्रबन्धेषु सर्वत्रान्तिमगाथायां स्वस्य कर्तृ

नामधेयं प्रथमपुरुषवत् नित्यसूरिणो निर्दिशन्ति। शठकोपोक्तं इदं दशकं पठतां इह परत्र च न दुःखोपलब्धिः इति वदन शठकोपः तद्दशकस्य कर्ता किं न भवति? अतः स्वग्रन्थे स्वनामसंकीर्तन सम्प्रदायः प्राचां स्पष्टः इति। प्रायशस्सर्वेऽपि नित्यसूरयः एवंरीतिका एव। गीताचार्योऽपि स्वोपदिष्टगीतायां 'ईश्वरस्सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति' इति ईश्वरभूत एव स्वात्मानं परोक्षया निर्दिशति। बहूनि मे व्यतीतानि जन्मानि तव चार्जुन। तान्यहं वेद सर्वाणि, 'कालोऽस्मि लोक क्षयकृत्,' 'रसोऽहमप्सु' इत्यादिषु स्वं अस्मच्छब्देन विनिर्दिशन्नपि कुत्रचित् तृतीयपुरुषतया व्यपदिशति। अतः स्वनामनिर्देशनिबन्धनाकर्तृत्वाक्षेपः शोभनो न भवति। बृद्धौ च मातापितरौ सतो भार्यां सुतः शिशुः। अप्यकार्यशतं कृत्वा भर्तव्या मनुरब्रवीत्' इति, आह ऋषिः इति चात्र द्रष्टव्यम्। अत्र मनुः, ऋषिश्च (वेदः) स्वात्मान तृतीयपुरुषतया निर्दिशतः इत्यपि द्रष्टव्यम्।

बादरायणः शारीरकशास्त्रं चकारेति तु निर्विवादम्। वेदविभजनकर्ता व्यासः पुराणादि निर्ममे, न तु शारीरकशास्त्र, अयं तु बादरायणादन्यः इति केचिद्विमर्शकाः निर्मूलं विमृशन्ति। 'सुमन्तु जैमिनि वल्व शुकं चैव स्वमात्मजम्। प्रभुर्वसिष्ठो वरदो वैशम्पायनमेव च॥ वेदानध्यापयामास महाभारतपञ्चमान्' इत्यादिना जैमिनिः व्यासशिष्यः इति प्रतीयते। स एव पराशरपुत्रो व्यासः बादरायणः इति च सुस्पष्टमभिधीयते अन्यत्र। 'द्वीपे बदरिकाभिख्ये बादरायणमच्युतम्। पराशरात्सत्यवती पुत्र लेभे परन्तपम्' इति। एव व्यासबादरायणोरैक्यं स्पष्टमभिदधति प्रमाणे जागरूके को वा बादरायणादन्य व्यास ब्रूयात्प्रमाणानुयायी। अतः व्यास एव बादरायणः शास्त्रं शारीरकं निबबन्ध, जैमिनिश्च पूर्वमीमांसां, अनयोश्चैकशास्त्र्य इत्यादि सिद्धमित्यल विस्तरेण॥

16. काण्डत्रयविचारः

वेदतच्छिरोभेदेन भागद्वयात्मकं वेदस्योक्तमस्माभिः। तद्विचाररूपतया प्रवृत्तं न्यायनिबन्धनात्मक मीमासामात्रं तु काण्डत्रयात्मक त्रिंशत्यध्यायसमन्वितम्। 'संहितेयं त्रिकाण्डी'ति सेश्वरमीमांसायाम्। 'कर्मदेवताब्रह्मगोचरा सा त्रिधोद्बभौ सूत्रकारतः। जैमिने र्मुनेः काशकृत्स्नतः बादरायणादित्यतः क्रमात्॥' इति च। षोडशाध्यायात्मक धर्मविचाररूपं मीमांसाशास्त्र धर्मविचारणपरम्। ब्रह्मविचारपरं मीमांसाशास्त्र तु उत्तरभाग विचारणार्थं प्रवृत्तं चतुरध्यायात्मकम्। तत्र द्वादशाध्यायात्मकस्य कर्मकाण्डः इति तदुपरिस्थस्य चतुरध्यायस्य देवताकाण्डः, सङ्कर्षणकाण्डः इति; ततोऽपि चरमाध्याय चतुष्टयस्य ब्रह्मकाण्डः इति च नाम। प्रथमकाण्ड जैमिनिश्चकार, देवताकाण्डं काशकृत्स्नः प्रणिनाय, ब्रह्मकाण्डं तु व्यासो बादरायणः इति वदन्ति।

षोडशलक्षणमपि पूर्वमीमांसाशास्त्र जैमिनिरेव चकार इति वृत्तिकारः प्राह। सेयं वृत्तिः—'सहितमेतत् शारीरक जैमिनीयेन षोडशलक्षणेनेति' इति। 'पूर्वतनग्रन्थेषुकालविप्रकर्षात् अस्य ग्रन्थस्य अयमेव कर्ता इति निश्चयः प्रायशः दुर्निरूप एव दृश्यते। शैली अन्यं वा कञ्चनप्रकारमभिवीक्ष्य सन्दिग्धकर्तृकेषु कोशेषु कथञ्चित् कर्ता शक्योहः। क्वचित्तथापि कर्तृनिरूपणं दुर्घटमेव भवति। अतः एवं विधेषु विषयेषु वैमनस्यं विनोपपादनं कार्यमिति। जैमिनिनैवकृत देवताकाण्डं काशकृत्स्नः अध्यापयामास इति वा काशकृत्स्नेन कृतमेव तं काण्डं जैमिनिरध्यापयामास इति वा उभयोः कर्तृत्वोक्तिः इति सुदृढमभ्युपगन्तव्यमिति। तदुक्तमधिकरणसारावल्यां—'वृत्तिग्रन्थे तु जैमिन्युपरचिततया.....एक तात्पर्ययोग.' इति।

सङ्कर्षकाण्डस्यापि जैमिनिरेव कर्तेति वदतामयमाशयः। जैमिनि धर्मविचारार्थं द्वादशलक्षणात्मकं शास्त्रमकरोत्। ततः तत्र

अविचारितमेव कञ्चनांशं मनसि निधाय चतुरध्यायी सङ्कर्षणाख्यां प्रणिनाय। अतः उभावपि काण्डौ धर्मविचारपरावेव। एतदालोच्यैव 'जैमिनीयेन षोडशलक्षणेन' इति वृत्तिकारः प्राह इति।

काशकृत्स्नकृतत्ववादिनामपरेषां त्वन्योऽभिप्रायः। सङ्कर्षकाण्डे न कर्मस्वरूप विचार्यते। कर्मभिः आराधनीयदेवतानां स्वरूपमेव विचारयितुं प्रवृत्तः स काण्डः। अत एव देवताकाण्डशब्देन व्यवहियते सः काण्डः। धर्मविचारार्थं प्रवृत्तो जैमिनिः द्वादशाध्याय्यैव निवृत्त. इति।

अन्ये त्वेवमाशेरते—देवताकाण्ड इति काण्डद्वयं वर्तते। एकस्तु धर्मविचाररूपः जैमिनिकृतः। अपरस्तु देवताविचारपरः काशकृत्स्नरचित इति।

अत्र सर्वैरपि विद्वद्भिरुदासितव्यमेव भवति यतः द्वादशाध्याय्यां मीमांसायाः परभूतः उत्तरमीमांसाया चतुरध्यायाः पूर्वश्च मध्यभूतो देवताकाण्डः चतुरध्यायात्मकः सुचिरमन्वेषणेऽपि न दृष्टिगोचरो भवति। यथा द्वादशलक्षणात्मकं शास्त्रं शबरादिभिः व्याख्यातं विश्वविख्यातं प्रचारपथं प्राप्तम्। यथा च चरमभागरूपं चतुर्लक्षणात्मकं व्यासनिबन्धन शङ्कररामानुजप्रभृतिभिर्व्याख्यातं सत् प्रचारपथं नीतं, न तथा देवताकाण्डः प्रचारमार्गमानीतः केनापीति। अतो देवताकाण्डः किमेक एव, उतोभौ, तत्प्रतिपाद्यविषय कः केन वा कृतः इत्यादि तु सुदृढं निश्चेतुं न कोऽपि प्रभवति।

परन्तु यदि 'अन्ते हरौ तद्दर्शनात्' 'वचनात् सर्वेषां सहावदीयेरन्', 'तेषां सहप्रदानं अवरानैकत्वात्', 'नाना वा देवता पृथक्त्वात्', 'सविष्णुराह हि', 'तद्ब्रह्मेत्याचक्षते', 'तद्ब्रह्मेत्यचक्षते' 'आग्रयणाभ्यासः प्रकरणात्', 'दर्शपूर्णमासयोर्वान्तरालसंयोगान्नह्यन्यत्प्रत्यक्षं' इत्यादीनि शतदूषणी, अणुभाष्य, न्यायसुधोदाहृतानि सूत्राणि नोपलभामहे, नूनं देवताकाण्ड एव नासीत् इति प्रवक्तु प्रगल्भामहे। देवताकाण्डस्य सङ्कर्षेण केनाचित्

भाष्यं भाषितं, अत एव सङ्कर्षकाण्ड इति नाम्नः उपपत्तिः इति प्रवादः पर अस्ति । भाष्य तु केनाप्यद्यावधि न उपलब्धम् । द्वादशलक्षणस्य पूर्वमीमांसा निबन्धनस्य व्याख्यानानोपि शबरस्वामी देवताकाण्डे जोषमेवास्ते । भास्करमिश्रप्रणीतः 'भाट्टचन्द्रिके'ति कश्चन ग्रन्थ. अद्योपलभ्यते, यत्र देवताकाण्डे प्रत्यधिकरण आद्यसूत्र पादाक्षराणि लेशतो निर्दिश्य विषयचर्चा विद्यते । प्रपञ्चहृदयनामके ग्रन्थे देवताकाण्ड प्रत्यध्यायार्थः सग्रहेणानुसंहितः । 'तथा देवताकाण्डस्य प्रथमाध्याये सर्वेषा मन्त्रविशेषाणा देवतात्वप्रदर्शने तात्पर्यमिति प्रदर्शितम् । द्वितीयेऽध्याये विध्यर्थवाद नामधेयाना मन्त्रदेवताविषयत्वम् । तृतीयेऽध्याये देवतातत्त्वं स्वेच्छाविग्रहवत्त्वादि गुणगणालंकृतम् । चतुर्थाध्याये देवता फल सत्कर्मणा अपवर्गाधिकारिणः तादात्म्यलक्षणापवर्गफलमिति' इति ।

अधिकरणमालावलीव्याख्यानभूते चिन्तामणौ कुमारवरदाचार्य विरचिते देवताकाण्डाध्यायार्थ. सङ्ग्रहत. श्लोकरूपेण दर्शित. । स्वरूपमादौ तद्भेद तदुपायनपूर्वकम् । फलञ्च देवताकाण्डे देवताना तु कथ्यते इति । एतत्सर्व इतोऽप्यधिकञ्च पण्डितराज इत्यादि बिरुदभूषितैः विश्वप्रसिद्धैः श्रीशैलताताचार्य महाशयै विरचिते 'मीमासाभ्युदये' स्फुटं द्रष्टव्यम् ।

वस्तुतस्तु-काशकृत्स्नकृतो देवताकाण्ड लुप्त एव । कर्मविचारपर सङ्कर्षणकाण्ड. ततोऽन्य जैमिनिकृतसूत्ररूपः न्यायनिबन्धनात्मकः.....नामधेयकेन कृत व्याख्यानेन सहितः अडैयार् कोशालये विद्यत इति कर्णपरम्परया अस्मभि श्रुत इति ।।

17. ब्रह्मसूत्रस्य नामभेदः

बादरायणेन विरचितस्य सूत्ररूपस्यास्य निबन्धनस्य, 'ब्रह्ममीमांसा', 'शारीरकमीमासा', 'वेदान्तमीमासा', 'उत्तरमीमांसा', 'मीमांसायाः उत्तरभाग' इत्यादीनि नामधेयानि श्रूयन्ते । पूजित

पदार्थवाची मीमासाशब्दः इति शास्त्रज्ञा वदन्तीति पूर्वमेवाभ्यधाम। अनवधिकातिशयानन्दरूपस्य ब्रह्मण एव सर्वपूजितत्वात् तद्विचारपरमिदं शास्त्र ब्रह्ममीमासाशब्देनाभिधीयते। अतोऽस्य निबन्धनस्य 'ब्रह्ममीमांसा' इति नामोदभूत्।

एवमेतत् शास्त्रं उत्तरमीमांसाशब्देनाप्यभिधीयते। मीमांसा हि पूर्वमीमासा, उत्तरमीमासा इति द्वेधा विभज्यते। मीमांसाशास्त्र त्वेकमेव। मीमासायाः पूर्वभागः पूर्वमीमासा, उत्तरभागश्च उत्तरमीमासा। पूर्वकाय-उत्तरकायशब्दयोरिव पूर्वमीमांसाशब्द-उत्तरमीमांसा शब्दयो विग्रहः कार्यः। 'अङ्गानि वेदाः चत्वारः मीमांसा न्यायविस्तरः। पुराणं धर्मशास्त्रञ्च विद्या ह्येताः चतुर्दश' इत्यत्र 'मीमांसा' इत्येकवचनश्रवणात् मीमासाशास्त्रमेकमिति निश्चीयते।

यद्यपि 'पुराणं धर्मशास्त्रं' इत्यत्रापि एकवचनश्रवणेपि पुराणानि धर्मशास्त्राणि च नाना इत्यत्र नैव विवादः, अथापि मीमासा इत्येकवचनावगतैक्यस्य बाधकाभावेन न त्याज्यत्वमिति ब्रूमः। पुराणधर्मशास्त्राणामनेकत्वस्य दृढप्रमाणसिद्धत्वेन बाधस्तु युक्तः। अतस्तत्रैकवचनावगतैकत्वस्य त्याज्यतैव। मीमासा इत्येकवचनावगतैक्यबाधने तु न प्रमाण पश्याम.॥

वृत्तात् कर्माधिगमादनन्तरं ब्रह्मविविदिषा, इति वृत्तिकारवचनमप्यत्र प्रमाणम्। सहितमेतत् शारीरकं जैमिनीयेन षोडशलक्षणेन इत्यप्यत्र प्रमाणमनुसन्धेयम्॥

सङ्कर्षणात्मिका चतुरध्यायी च कर्ममीमांसा, अथातो ब्रह्मजिज्ञासेत्यादिना व्यासप्रणीता चतुरध्यायी शारीरकमीमांसा च' इति च। अनेन विंशतिलक्षणात्मकमिदं मीमांसाशास्त्रं एकमिति निश्चिनुमः। अत एव श्रीरामानुजमुनिवर्या अपि स्वकीये श्रीभाष्यग्रन्थे 'मीमांसा पूर्वभागज्ञातस्य कर्मणोऽल्पास्थिरफलत्वात् उपरितनभागावसेयस्य ब्रह्मज्ञानस्य' इति, 'मीमासाशास्त्र अथातो धर्मजिज्ञासा

इत्यारभ्य 'अनावृत्तिः शब्दात् अनावृत्ति शब्दात्' इत्येवमन्त सङ्गति-विशेषण विशिष्टक्रमम्' इति च निरर्गल अभाषन्त ॥

प्राचीना बोधायनटङ्कद्रमिडभाष्यकारादयोऽपि मीमांसाशास्त्रस्यैकत्वमभ्युपगच्छन्ति । बादरायणकृतस्यास्य सूत्रस्य सुसूक्ष्मपरिशीलनेऽपि अयमर्थः स्फुटं ज्ञायत एव । बादरायणो हि चतुरध्यायात्मक सूत्र व्यवहनात् । ग्रन्थकाराणा एवं शैली सर्वत्र दृश्यते । उत्तरत्र व्याख्यानकरणसमये पूर्वोक्तार्थस्य प्रमाण-वेन प्रदर्शनम । पूर्वमेवेद व्याख्यातं, इत्यादि कथनम् । अत्रापि हि सज्ञाश्चेत्तदुक्तं जीवमुख्यप्राणलिङ्गात् नेति चेत् तद् व्याख्यानम्' इति स्वकीयमिबन्धनं प्रदर्शयति । एकत्वेनाभिमतेऽस्मिन् मीमांसाशास्त्रे पूर्वमीमासोक्ता अर्था बहवः शारीरके परिदृश्यन्ते। 'सर्ववेदान्तप्रत्यय चोदनाद्यविशेषात्' 'श्रुत्यादि बलीयस्त्वाच्च न बाधः' 'द्वादशाहवदुभयविधं बादरायणोऽत' इत्यादिषु पूर्वमीमासावगतार्थपरिज्ञानापेक्षा अवश्यमस्तीति तु सर्व संप्रतिपन्नम् ॥ अतोऽत्र 'प्रदानवदेव तदुक्त, अक्षरधिया त्ववरोध सामान्यतद्भावाभ्यामौपसदवत् तदुक्तं, 'हानौ तूपायनशब्दशेषत्वात् कुशाच्छन्दस्तुत्युपगानवत् तदुक्तम्' इति वदन् बादरायणः ऐकशास्त्र्यं नाभिप्रैति इति कथ वक्तु पारयेम ॥

श्रीशकरोपि शरीरे-भावाधिकरणे स्वाभिमत एकशास्त्रत्व प्रकटीकरोति । देहव्यतिरिक्तात्मसद्भावस्थापनं न युक्तम् । शास्त्रप्रमुखे एव (एतन्मीमांसापूर्वभागे प्रथमपादे) शास्त्रफलभोगार्हस्यात्मन उक्तत्वादित्याशंक्य 'सत्यमुक्तं भाष्यकृता न तु तत्रात्मस्वरूपशोधनं कृत अत्र स्वय सूत्रकृदेवाह इति प्राह ॥ आत्मन. स्वरूपस्वभावादिकं कथयिष्यते, अतस्तत्रैव तदवसेयमिति जैमिनि आत्मस्वरूपे न सूत्र प्रणिनाय इति ॥

उपरिचैवं श्रीशाङ्करभाष्यम्—'इत एवाकृष्य आचार्येण शबरस्वामिना प्रमाणलक्षणे वर्णितम् । अत एव च भगवतोपवर्षेण प्रथमे

तन्त्रे आत्मास्तित्वाभिधानप्रसक्तौ शारीरके वक्ष्यामः इत्युद्धारः कृतः।। इहचेदं चोद्यनिरासपूर्वकमनेषु विचार्यमाणेष्वात्मास्तित्वं विचार्यते कृत्स्नशास्त्रशेषत्वप्रदर्शनाय इति।। शाङ्करभाष्यादौ अपशूद्राधिकरण शरीरे भावाधिकरणादौ पौनरुक्त्यशङ्का कृता। तत्परिहारोपि। एवं शङ्कापरिहार प्रवृत्त्यन्यथानुपपत्त्यापि ऐकशास्त्र्यं शाङ्कराभिमत इति ज्ञायते।

अतो 'मीमांसान्यायविस्तर. इति एकवचनावगतमेकत्व न प्रतिषेधार्हमिति मीमांसाशास्त्रं त्वेकमेव न तु शास्त्रद्वयम्। तच्च मीमांसापूर्वभागस्य पूर्वमीमांसा इति, उत्तरभागस्योत्तरमीमांसा इति च नामधेयम।।

18. मीमांसाशब्दार्थविचारः

'मनेर्जिज्ञासाया' इति विचारार्थे मीमांसाशब्दस्य निष्पन्नत्वात् वेदार्थविचाररूपार्थे मीमांसाशब्द. बहुलं प्रयुज्यते। धर्मस्येव ब्रह्मणोपि वेदार्थरूपत्वेन तद्विषयकविचारयोरुभयोरपि मीमांसाशास्त्रत्वमिति धर्मविचारपरं जैमिनिकृत पूर्वमीमांसाशब्दाभिधेयं, ब्रह्मविचारपरं बादरायणप्रणीत उत्तरमीमांसाशब्दाभिधेयं च भवतीति सर्वं समञ्जसम्।।

धर्मशब्दो हि वेदार्थं सामान्येन वदतीति ब्रह्मप्रतिपादकोत्तरमीमांसाया अपि अथातो धर्मजिज्ञासा' इत्यत्र क्रोडीकारः संभवति। ब्रह्मणोपि, कृष्ण धर्मं सनातनं रामोविग्रहवान् धर्मः इति धर्मत्व वदतां अत्रविषये नैव विवादस्य प्रसक्तिः।

'शारीरकमीमांसा' इत्यन्यदस्य नामधेयमस्ति। शारीरकशब्दो हि परमात्मपरः। तद्विषयविचाररूपत्वेन अस्य निबन्धनस्य तथात्वव्यवहारः। जगत्सर्वं शरीरं ते इति सर्वस्यापि परमात्मशरीरत्वात् शारीरः परमात्मा। 'तस्यैष एव शारीर तात्मा' इति परमात्मनः श्रुताबेव शारीरकत्वोक्तेः तदुपरि कप्रत्ययः। यद्वा शारीरं पर-

मात्मानं प्रतिपादयतीति शारीरक–वेदान्तशास्त्रम् । तदुक्तं श्रीमति भाष्ये–'स्वव्यतिरिक्तचेतनवस्तुजात स्वशरीरमिति स एव निरुपाधिकः शारीरः आत्मा । अत एवेदंपरं ब्रह्माधिकृत्य प्रवृत्त शास्त्र शारीरकमित्यभियुक्तैः अभिधीयते इति ।।

'सहितमेतत् शारीरकं जैमिनीयेन' इति वृत्तिकारवचनेऽपीदं स्पष्टम्'। अतः शारीरकशब्दः ब्रह्मप्रतिपादकवेदान्तशास्त्रपरः। तादृशशास्त्रविचाररूपं इद न्यायनिबन्धनात्मक बादरायणप्रणीतं शारीरकमीमांसाशब्देनोच्यते ।

प्रथमाध्याये द्वितीयपादे प्रथमाधिकरणे 'अनुपपत्तेस्तु न शारीरः इति सूत्रे केवलं शारीरशब्दः जीवपरः । तत्र जीवनिरासार्थप्रवृत्तत्वात्तत्सूत्रस्य । अनुपपत्तेस्तु नेतरः इत्यनुक्त्वा न शारीरः' इति शारीरशब्देनोपादानं तु शरीरसबन्धयोग्यस्य नानाविधदुःखभागिनः तत्प्रकरणस्वीकारायोग्यत्वप्रदर्शनायेति ध्येयम् ।

वेदान्तमीमांसा इत्यपि प्राज्ञो व्यवहरन्ति । वेदो हि पूर्वभागउत्तरभागभेदेन हि द्विविधो भवति। तत्र पूर्वभागः कर्मप्रतिपादकभागः, उत्तरस्तु ब्रह्मप्रतिपादकः । अयमेव भागः वेदान्तशब्देनाभिधीयते । उत्तरभागोप्येवमेव । 'श्रुतिशिरसि विदीप्ते' इति शिरश्शब्देनायमर्थः उक्तः। एवं वेदान्ते वेदोत्तरभागे इति पर्यवसानात् वेदान्तमीमासा इति फलितम् । कृत्स्नोपि वेदो व्याख्येयः । मीमासाशास्त्रं तु तद्व्याख्यानरूपम् । जैमिनिकृतं सूत्रं तु पूर्वभागव्याख्यानरूपम् । 'स्वाध्यायोऽध्येतव्यः' इति वेदाध्ययन विधिदृष्ट । तत्र पूर्वभागे प्रथममधीते उत्तरभागस्याध्ययनं पश्चाद्भवति, एव मध्ययनक्रमादिनैव पूर्वभागे विचारिते उत्तरभागविचारः प्रवर्तते । अनेन कर्मब्रह्मविचारक्रमोपि सिध्यति । वेदविचारानन्तरं हि तदन्तविचारप्रसक्तिरिति । अत एव विशिष्टाद्वैतिनः 'अथातो ब्रह्मजिज्ञासा' इत्यत्राथशब्दस्य कर्मविचारानन्तरार्थकत्व ब्रुवते । 'भास्कराचार्योपि सौत्रस्याथशब्दस्य प्राचीनैरुक्तं कर्म-

विचारानन्तर्यरूपमेवार्थं परिगृहीतवान् । अद्वैतिनस्तु साधनचतुष्टयानन्तर्यं रूपार्थं ब्रुवते । तच्च साधनचतुष्टयं नित्यानित्यवस्तुविवेकः शमदमादिसाधनसंपत् इहामुत्र फलभोगविरागः मुमुक्षुत्व चेति वदन्ति ।

19. अथ सूत्रशब्दं किंचिद्विमृशामः

श्रीबादरायणप्रणीतस्यास्य मीमांसाभागस्य ब्रह्मसूत्रं इति नाम ।
अल्पाक्षरमसन्दिग्धं सारवत् विश्वतोमुखम् ।
अस्तोभमनवद्याङ्ग सूत्र सूत्रविदो विदुः ॥

इति सूत्रस्य लक्षणं प्राञ्चः प्राहुः । सूचकत्वात् सूत्रत्व इति अन्ये प्राहुः । इमां रीतिं विहाय केचित्तु सूत्रशब्दः लोके तन्तुपरः । 'मयि सर्वमिद प्रोत सूत्रे मणिगणा इव' इत्यादिप्रयोगात् शास्त्रेऽपि सूत्रशब्दः तन्तुवाची दृष्ट । एव च न्यायजालात्मकमणिगणग्रथनरूपत्वात् अस्य सूत्रत्वव्यवहारः । पूर्वकाले बहवो विद्वासः पत्राद्यलाभेन तालपत्रेषु ग्रन्थान् विलिखन्ति स्म । तेषु च द्वारं किंचित्कृत्वा प्रोतेन सूत्रेण तान् बबन्धुः । अतः तेषां ग्रन्थाना सूत्रत्वव्यवहारः । अत एव जन्मादिसूत्रव्याख्यानावसरे 'तत्र वेदान्तवाक्यकुसुमग्रथनार्थत्वात् सूत्राणां' इति शङ्करभाष्यप्रवृत्ति ॥ अतो यथा लोके मणिकुसुमादिग्रथनार्थं सूत्रमुपयुज्यते तथा न्यायनिबन्धनमिदं वेदान्तवाक्यकुसुमग्रथनार्थं सूत्रयुक्तं भवतीति सूत्रमिति समाख्या प्रादुरभूत् इति वदन्ति ॥

वस्तुतस्त्विद चमत्कारभाषितमेव । शङ्करभाष्यमपि सूत्रपदप्रवृत्तिनिमत्तबोधनाय न प्रवृत्तम् ॥ तथा सति सर्वेषामपि ग्रन्थानां सूत्रमिति समाख्या प्रसज्येत ॥ पूर्वकाले सर्वेषामपि ग्रन्थानां मुद्रणाद्यभावेन शौथिल्यपरिहारार्थं सूत्रेण बन्धनकरणात् ।

अतः 'अल्पाक्षरमसन्दिग्ध' इति प्रमाणोक्तरीत्या शब्दविस्तरं विना अल्पाक्षरयुक्तः संशयपरिहारकरूपः सारार्थबोधकः सर्वशास्त्रसारग्राहकश्च शब्दराशिः यः तदेव सूत्रमित्यास्थेयम् । एकमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः । दैर्घ्यं विना लघुभूतसूत्रप्रणयने एव

नैव फलम् । तथापि निर्गुण ब्रह्मण एव विभूतिप्रदर्शनार्थमुपसंहारः । गुणवद्ब्रह्मैव निर्गुणमिति प्रदर्शनाय च ।

3-3-26 **आदराधिकरणं**—तद्यत् भक्त प्रथममागच्छेत् तद्धोमीयं स यां प्रथममाहुति जुहुयात् तां जुहुयात् प्राणाय स्वाहा (का) य एत देव विद्वान् अग्निहोत्र जुहोति (छा) इत्यादि प्राणाग्निहोत्रप्रकरणे मन्त्र पुरस्सरं होमो दृष्टः । तत्रान्नभोजनाभावे प्रतिनिधिन्यायमाश्रित्य जलेन वा अन्नेन वा द्रव्येण भोजनं स्वीकृत्य होमः कार्यः इति पूर्व-पक्षः । भोजने उपस्थित एव होमबिधानात् अन्नभोजनाभावे न होमः कार्यः । लोप एव होमस्य ।

3-3-27 **तन्निर्धारणाधिकरणं**-कर्माङ्गाश्रयोद्गीथज्ञानस्य कर्मसु नियमेनाकर्तव्यत्वम् ।

3-3-28 **प्रदानाधिकरणं**—वागादीनां प्राणः श्रेष्ठः अग्न्यादीनां वायुः प्राणो बाव सवर्ग वायुर्वाव सवर्गः इति । अत्रोक्तयो वायु-प्राणयोः विद्ययोः भेदः । आध्यात्माधिदैवभेदरूप प्रवृत्तिभेदसत्वात् ।

3-3-29 **लिङ्गभूयस्त्वाधिकरण** — मनश्चिदादीनां केवलविद्या-त्मकत्वमेव । नतु क्रियानुप्रवेशेन क्रियाशेषत्वम् ।

3-3-30 **ऐकात्म्याधिकरणं**—अत्र देहातिरिक्तात्मसद्भावः स्था-प्यते । यद्यपि पूर्वमीमासायामेवायमर्थः अर्थसिद्धः । अथापि भगवता उपवर्षेण प्रथमतन्त्रे आत्मास्तित्वाभिधानप्रसक्तौ शारीरके एव वक्ष्यामः इत्युक्तत्वात् अस्मिन् शास्त्रे रत्नपेटिकायां रत्नमिव आत्मविचारः व्यासाचार्येण क्रियते । किण्वादिभ्यो मदशक्तिवत् भूतचतुष्टयसङ्घात एव चैतन्यात्मना परिणमते । अतश्च स्थुलोऽहमिति व्यवहारः संयक् भवति । भस्मान्तमेव शरीरम् ।

त्याज्यं सुख विषयसङ्गमजन्म पुसां
दुःखोपसृष्टमिति मूर्खविचारणैषा ।
व्रीहीन् जिहासति सितोत्तमतण्डुलाढ्यान्
को नाम भोः तुषकणोपहितान् हितार्थी ।।

क्रियावन्तः श्रोत्रिया· ब्रह्मनिष्ठाः इत्यादिभिः भक्तितारतम्यात् आनन्दतारतम्यमुच्यते ।

3-2-13 प्रकृतैतावत्वाधिकरणं—विष्णोः सृष्टिसहारकर्तृत्वमात्र मेव इति न वाच्यम् । नैतावदेवापरो अन्यदस्त्युक्षा स द्यावापृथिवी बिभर्ति इति श्रुतेः । सृष्टि च पालनं चैव संहारं नियमं तथा । एक एव करोतीशः सर्वस्य जगतो हरिः । इति च ।

3-2-14 अव्यक्ताधिकरणं—यद्यपि ब्रह्म अव्यक्तस्वरूपमेव । तथापि व्यक्तमपि भवति । तत्प्रसादेन जोवानां तदपरोक्ष्यज्ञानात् ।

नित्याव्यक्तोपि भगवान् ईक्ष्यते निजशक्तितः ।
तमृते परमात्मानं कः पश्येताऽभित प्रभुम् ।।

3-2-12 अहिकुण्डलाधिकरण—अथैव परमः आनन्दः इति विष्णो. आनन्दरूपत्वमुक्तम् । आनन्दं ब्रह्मणो विद्वान् इति आनन्दस्य ब्रह्मधर्म त्वम् । एवं भेदाभेदनिर्देशः अहिकुण्डलवत् । यथा सूर्यस्य तेजोरूपत्वात् प्रकाशित्वम् । कालस्यैकत्वेपि पूर्वापरादिभेदनिर्देशो यथा । प्रकाश-वत् कालबद्वा—यथागे शयनादिकम् ।

ब्रह्मणश्चैव मुक्तानां आनन्दो भिन्न एव तु ।
आनन्देनत्वभिन्नेन व्यवहार· प्रकाशवत् ।
कालवद्वा यथा काल· स्वावच्छेदकतां व्रजेत् ।।

अभेदेपि भेदव्यवहारो भवति । शयन—अवस्थाविशेषः । अङ्गे अवस्था विशेषेण भेदः अभेदश्च भवति ।

3-2-16 पराधिकरण—सेतून्मानादिव्यपदेशेभ्यः परमात्मनोऽन्य-देव जीवज्ञानानन्दादिकम् । जीवेश्वरसबन्धज्ञापनार्थं सेतून्मानादि-व्यपदेश ।

3-2-17 स्थानविशेषाधिकरण—चतुर्मुखानन्दादयः विष्वानन्द-प्रतिबिम्बभूताः । यथा जलादिषु सूर्यस्य प्रतिबिम्बविशेष. । अत एव भगवदानन्दादीनां चतुर्मुखानन्दादीनां च तारतम्यमिति बिम्बभूत-परमानन्दे विष्णौ चतुर्मखादोनां भक्ति र्युज्यते ।

यत्नः सर्वेषामपि सूत्राणामन्ततः परमात्मपर्यवसानस्यैव दृष्टत्वात्। प्रकृतिजीवात्मबोधने प्रधान्येनतात्पर्याभावाच्च। चतुरध्यायात्मकेऽस्मिन् सूत्रग्रन्थे 'कारणत्वमबाध्यत्वमुपायत्वमुपेयता' इति एकैकेनाप्यध्यायेन परमात्मगतकारणत्वादीनामेव बोधनात् कृत्स्नमपि सूत्रजात परमात्म-परमेवेत्यत्र न विप्रतिपत्तिगन्धः ।। ब्रह्मसूत्राणि सूत्रयन् बादरायणोपि प्रथम 'अथातो ब्रह्मजिज्ञासा इति ब्रह्मणोजिज्ञास्यत्व प्रतिपाद्य 'जन्माद्यस्य यतः' इति जगत्कारणत्वेन जिज्ञास्य ब्रह्म विशिषन् स्वकृत ब्रह्म सूत्र परमात्मविषयकविचाररूपमित्यभिप्रैति। अत एवात्र सूत्रे ब्रह्म-शब्दार्थं भाषमाणैः भाष्यकृद्भिः 'ब्रह्मशब्देन न स्वभावतः अभिधीयते इत्यभाषि ।। अतः परमात्मविचारपरतयैवेदं शास्त्रं प्रवृत्तमिति अस्य ब्रह्मसूत्रमिति समाख्या प्रवृत्तेति निश्चप्रचम् ।। ननु सर्वाणि सूत्राणि कथं ब्रह्मैव प्रतिपादयन्ति। अन्यार्थप्रतिपादकान्यपि हि सूत्राणि बहूनि दृश्यन्ते। 'महद्वच्च' धर्म जैमिनिरतएव, इत्यादीनि ब्रह्मव्यतिरिक्तार्थबोधकान्यपि हि सूत्राणि सन्ति इति चेन्न, अन्ततः सर्वेषामपि ब्रह्म बोधने एव तात्पर्यमित्यदोषात्। स्पष्ट चेद 'यद्यपि संबन्धसामान्य परिग्रहेपि' इति ब्रह्मजिज्ञासापदविवरणरूप श्रीभाष्य व्याख्यानश्रुतप्रकाशिकायाम्। पूर्वपक्षसूत्राण्यपि हि अन्ततः सिद्धान्तपरसूत्रोपयुक्तानि संतिब्रह्मप्रतिपादने उपकारकारकाणि, भवंति। अत एवमाध्वमतप्रवर्तकाः सर्वाण्यपि सूत्राणि सिद्धान्तसूत्राणि व्याचक्षाणाः व्याख्यान्ति। वस्तुतः चतुरध्यायात्मकमिद व्यासप्रणीत कारणस्य अबाध्यस्य उपायस्योपेयस्य ब्रह्मणः प्रतिपादकमिति सर्वमपि सूत्रं ब्रह्मसूत्रमिति समाख्या भजति। स्वशेषाशेषार्थः निरवधिकनिर्बाधमहिमा—फलाना दाता यः फलमिति च शारीरकमितः। श्रियं तत्सध्रीची तदुपसदनत्राशमनी अभिष्टौति स्तुत्यामवितथमतिर्यामुनमुनिः ।। इत्यप्यन्वगृह्णन् आचार्याः। कारणत्वमबाध्यत्वं उपायत्वमुपेयता। इति शारीरकस्थाप्यं इह चापिव्यवस्थितं, इत्यप्यनुसन्धेयम्।

शास्त्रं त्वेतत् समन्वित्यविहृति करणप्राप्तिचिन्तप्रधानैः
अध्यायैः षोडशाधि द्विकयुगभिदुर षट्कभेदादिनीत्या।

तत्राद्यं वक्ति सिद्धं विषयमपि परं तत्प्रतिद्वन्द्वियुग्मं
स्वप्राप्ते साधन च स्वयमिति हि परं ब्रह्म तत्रापि चिन्त्यम् ।।

स्रष्टा देही स्वनिष्ठो निरवधिमहिमाऽपास्तबाधः श्रिताप्तः
खात्मादेरिन्द्रियादेः उचितजननकृत् संसृतौ तन्त्रवाही ।
निर्दोषत्वादिरम्यः बहुभजनपदं स्वार्हकर्मप्रसाद्यः
पापच्छित् ब्रह्मनाडोगतिकृदतिवहन् साम्यदश्चात्र वेद्यः ।।

इत्यादि सारबल्यामयमर्थो द्रष्टव्यः । अत्र हि पादभेदात् अर्थभेदकथनेपि सर्वेषामपि पादानां ब्रह्मविचाररूपत्वमेव, तत्तत्पादोक्तानामर्थविशेषाणां एकस्मिन्नेव ब्रह्मणि पर्यवसानादित्युक्तम् । अतस्सर्वमपि सूत्रजातं साक्षात्परंपरया वा ब्रह्मप्रतिपादकमेवेति ।।

21. काण्डत्रयप्रतिपाद्यसंग्रहः

अथैकत्वेनाभिमतेऽस्मिन् मीमांसाशास्त्रे विंशतिलक्षणात्मके प्रत्यध्यायं प्रतिपाद्यप्रमेयं संग्रहेण प्रदर्शयामः । तत्र द्वादशाध्यायीं पूर्वषट्कं उत्तरषट्कं इति द्वेधा विभजन्ति । तत्र पूर्वषट्कं उपदेशविचाररूपं उत्तरषट्कं तु अतिदेशविचाररूपम् ।

मानं भेदः शेषभावः प्रयुक्तिः पौर्वापर्य चाधिकारोऽतिदेशः ।
सामान्येनाथो विशेषातिदेशः ऊहो बाधस्तन्त्रमन्ते प्रसङ्गः ।।

इति क्रमेणैकैकोऽप्यध्यायः एकैकमर्थं वदति ।।

अध्यायचतुष्टयात्मके देवताकाण्डे चाधिकरणचिन्तामणौ

स्वरूपमादौ तद्भेदः तदुपासनपूर्वकम् ।
फल च देवताकाण्डे देवतानां तु कथ्यते ।। इति ।

कुमारवरदाचार्यैरुक्तरीत्या एकैकस्याध्यायस्य एकैकार्थप्रतिपादनपरत्वं अनुसन्धेयम् ।। मध्यमकाण्डस्य सङ्कर्षकाण्डः देवताकाण्डः इत्युभयविधव्यवहारोपि दृश्यते । वरदगुरुभिः अनुगृहीतरीत्या देवताविषयविशेषविचार एव तत्र प्रवर्तितः इति निश्चीयते । तेन देवताकाण्ड-

नामानुगुण्यमपि घटते । सङ्कर्षकाण्डे देवताविषयकविचार. लेशतोपि नास्तीति देवताकाण्डः इति व्यवहारः क्लेशेनैव निर्वाह्यः इति अप्पय्य दीक्षितादयः कथयन्ति । तत्र यूपपादः इष्टकापादः अवदानपादः होम-पादः कालपादः अग्निपाद ग्रहपादः वरणपादः सामिधेनीपादः निगम-पादः वषट्कारपाद इति पादानां विभागदर्शनात् कर्मविचारपरतैव प्रतीयते सङ्कर्षकाण्डस्य । न देवतास्वरूपप्रतिपादनपरता । अतः देवतास्वरूपप्रतिपादनैदम्पर्यं नास्तीति देवताकाण्ड इति व्यवहारः न अक्लेशेन निर्वाह्यो भवति । काशकृत्स्नकृत. सङ्कर्षकाण्ड. जैमिनिकृतात् सङ्कर्षात् अनन्य. । स एव देवताप्रतिपादकः। स च प्रकृतकर्ममीमांसोप-योगी । तत्र च तं ब्रह्मेत्याचक्षते इत्यादीनि सूत्राणि वर्तन्ते । तेषां शारीरकशास्त्रपूर्वभागत्व उपपद्यते । काशकृत्स्नबादरायणौ हि समा-नाभिप्रायौ । यत्र जीवब्रह्मणोरभेदः श्रुतिप्रतिपन्नः तत्राभेदनिर्वाहः कथं इति विचारे बादरायणः मतत्रयमुपदिशति—'प्रतिज्ञासिद्धेः लिङ्ग-माश्मरथ्य., उत्क्रमिष्यत एव भावादित्यौडुलोमिः अवस्थितेरितिकाश कृत्स्न.' इति । तत्र जीवब्रह्मैक्यमाश्मरथ्यमतम् । पार्थक्येनैव स्थितस्य जीवस्य ब्रह्मणा ऐक्यं मुक्तौ भविष्यतीति तदाशयेनैक्यव्यपदेशः इत्यौ डुलोमिमतम् । काशकृत्स्नस्य मत तु विशिष्टाद्वैतिमतम् । जीवे ब्रह्मणः अवस्थितिमात्रेण उभयोरैक्यं वदन्ति वेदान्ताः इति भेदः अभेदश्च सार्वकालिकः इति विशिष्टाद्वैतिनामाशयः । एतदेव मत काशकृत्स्नोपि अभिप्रैतीति बादरायणः "अवस्थितेरिति काशकृत्स्न' इत्यसूत्रयत् । अतः काशकृत्स्न बादरायणयो. समानाभिप्रायकत्वदर्शनात् बादरायण प्रणीतशारीरकपूर्वभागत्वं काशकृत्स्नकृतदेवताप्रतिपादकसङ्कर्षकाण्डस्य योयुज्यत एव । बादरायणो हि उपनिषद्विचारार्थं प्रवृत्तः । तत्रादौ चेतनाचेनविलक्षणब्रह्मण उपासनं उपास्यमान ब्रह्म वा प्रधानमिति निश्चित्य तस्य जिज्ञास्यत्वबोधनाय 'अथातो ब्रह्मजिज्ञासा' इति सूत्रं प्रणिनाय । स्वयं सूत्रप्रणयनकाले यावन्तो विद्वांसः ब्रह्मज्ञाननिपुणाः उपनिषदर्थविचारविशारदा वाक्यार्थकुशलाः तावतोपि ऋषीन् आहूय स्वय मिलितः सन् उपनिषदर्थविचार प्रवर्तयति स्म । तत्र येषां

ऋषीणा विचारक्षमत्वबुद्धिकुशलतावाक्यार्थनैपुण्य च तेषा मतं तैरेवोक्तं स्वसूत्रे प्राचीकशत् । अथ तैरुक्तमर्थमादौ प्रतिपाद्य स्वसिद्धान्तमन्ते प्रत्यपीपदत् ।। एवमत्र शैलीपरामर्शेन स्फुटं अयमर्थ. विज्ञायते ।।

प्रकृतमनुसरामः एवं काण्डद्वयप्रतिपाद्यार्थः उक्त । शारीरकेप्य-यमर्थः उच्यते । शारीरकशास्त्र तु चतुरध्यायात्मकं। अत्र षोडशपादाः सन्ति । प्रत्यध्यायं चत्वारः पादा इति क्रम । पूर्वमीमासायां तु प्रत्यध्याय पादचतुष्टयमिति क्रमो नादृतः । तृतीयषष्ठदशमेषु अष्टौ पादा. प्रत्येकम् । अन्यत्र सर्वत्र चत्वारः । अत्र तु एकयैव रीत्या पाद व्यवस्थापन दृश्यते ।

यथा पूर्वकाण्डः पूर्वषट्क उत्तरषट्कभेदेन द्विधा विभक्तः तथै-वोत्तरकाण्डोपि पूर्वद्विक उत्तरद्विकभेदेन द्विधा विभक्तः । तत्र पूर्वद्विकं सिद्धद्विक विषयद्विकमिति व्यवह्रियते, उत्तरद्विक तु साध्यद्विकं विषयि द्विक इति । पूर्वाध्यायद्वये सिद्धस्य, उपासनविषयस्य ब्रह्मणः प्रतिपा दनात् तस्य तथात्वव्यवहारः । उत्तराध्यायद्विकस्य, साध्यस्य ब्रह्मो-पासनस्य, तथाभूतस्य ब्रह्मानुभवस्य च प्रतिपादकत्वात् तथात्वव्यव-हार. । सर्वेषामपि जगत्कारणवादिवाक्यानां ब्रह्मणि समन्वयप्रतिपाद नात प्रथमाध्यायस्य समन्वयाध्यायः इति नाम । ब्रह्मणि प्रतिपादि तस्य कारणत्वस्य विरोधपरिहारमुखेन स्थूणाखातक्रमेण स्थाप्यमान-त्वात् द्वितीयस्याध्यायस्य अविरोधाध्याय. इति नाम । तृतीयाध्यायः भगवत्प्राप्तिरूपफलसाधनप्रतिपादनपरत्वात् साधनाध्यायशब्देन व्यव ह्रियते । चतुर्थश्च - भगवत्प्राप्तिरूपफलप्रतिपादकत्वेन फलाध्याय इति । सारवल्यां चैतदुक्तम्—

शास्त्रं त्वेतत्समन्वित्यविहितिकरणप्राप्तिचिन्ताप्रधानै·

अध्यायैः षोडशाघ्रि द्विकयुगभिदुर षट्कभेदादिनीत्या ।
तत्राद्य वक्ति सिद्ध विषयमपि परं तत्प्रतिद्वन्द्वियुग्मं

स्वप्राप्तेस्साधनं च स्वयमिति हि परं ब्रह्म तत्रापि चिन्त्यम् ।।

इति । एव काण्डत्रयेपि प्रत्यध्यायं प्रतिपाद्यार्थ. सुखग्रहणाय सक्षेपतः प्रदर्शित. ।

22 द्विकादिविभागकरणम्

अथास्मिन् शारीरकशास्त्रे द्विकाध्यायादिविभागकरणे किं नियामकं इत्यत्र किंचित् दृश निक्षिपामः। पूर्वद्विकं उत्तरद्विकं इति किमिति विभज्यते। त्रयोऽध्याया पञ्च वाऽध्यायाः इति अविभज्य चत्वार एवाध्याया इति विभाग किमर्थ इष्यते। एवमेकैकस्मिन्नध्याये चत्वार एव पादाः इति नियतिकल्पन किं निबन्धनम्। एवं पादेऽपि इय शङ्का भवति। अत्र ब्रूम –न वयं नूतनतया द्विकाध्यायादि भेद कल्पयामः पर तु वेदान्तार्थनिर्णयार्थ प्रवृत्तो भगवान् वेदव्यास एव मनसि कञ्चन कञ्चनार्थविशेष निधाय सूत्र प्रणिनाय। सूत्रेषु च तत्तच्छ्रुति वाक्यानि चासूचयत्। अत श्रुतिस्वारस्यात् सूत्रस्वारस्याच्च कश्चन विभागो विशेषज्ञैरूह्यते। 'एनेन सर्वे व्याख्याता व्याख्याताः' वैशेष्यात्तु तद्वादः तद्वादः, एव मुक्तिफलानियम. तदवस्थावधृतेः तदवस्थावधृतेः इति अन्ते पदावृत्तिश्रवणात् अध्यायविभाग. स्फुटः। शास्त्रपरिसमाप्त्यर्थः अनावृत्तिः शब्दात् इति सूत्राभ्यासः इति च स्फुटम्। पादावसानसूचकं चिह्नं तु नोपलभ्यते। अथापि प्रकरणबलात् विषयस्वारस्याच्च अत्रैव पादः परिसमाप्तः इति ज्ञायते। मुखप्रसादमालिन्यदर्शनेन हि कस्यचित् सुखदुःखे लोके अनुमीयेते। अस्य पुरुषस्यायमेवाभिप्रायः इत्यभिप्रायपरिज्ञानं तस्य वृत्तेन वाक्येन वा सुशकं भवति। अतः सूत्रकारस्य सूत्ररचनाशैली श्रुतिस्वारस्यपरिस्थितिं चावेक्ष्य एव विषयविभागः क्रियते॥ तत्रान्यूनानतिरिक्ततया यथा विषयविभागः उपपन्नो भवेत् तथाऽत्र विभागं दर्शयाम। शारीरकशासनं पूर्वोत्तरद्विकभेदभिन्नम्। तत्र प्रथमद्विकं प्रमेयत्वव्यापककार्यतानिरूपितकारणतावत्वं ब्रह्मणोलक्षण इतीममर्थंप्रतिपादयति। द्वितीयं तु द्विकं उपासनप्रवृत्तिप्रयोजकार्थनिरूपणपरं। जगत्कारणत्वमिति यत् ब्रह्मणो लक्षण तस्याव्याप्त्यतिव्याप्त्यसभवरूपदूषणत्रयराहित्यं उपपादनीयम्। तथैव हि तस्य लक्षणत्वसभवः। दूषणत्रयरहितो धर्मो हि लक्षणम्। ब्रह्मण एकस्यैव लक्ष्यत्वात् लक्ष्यैकदेशावृत्तित्वरूपव्याप्तेः प्रकृते उपपादनसभवेन लक्षणस्याव्याप्तत्वरूपदूषणं तु

न जाघटीति ।। असंभवातिव्याप्तिशङ्कापर मेव शिष्यते । सापि शङ्का द्विविधा भवति । श्रुतिविप्रतिपत्त्या वादिविप्रतिपत्त्या च । एवं च श्रुति विप्रतिपत्तिप्रयुक्तासभवशङ्का तादृशी अतिव्याप्तिशङ्का, वादि विप्रतिपत्तिप्रयुक्तासंभवशङ्का तादृशी अति व्याप्तिशङ्का चेति चतस्रः शङ्का भवन्ति। एतच्छङ्काचतुष्टयपरिहारार्थं प्रथमद्विकगत पादषङ्कं प्रवृत्तम् ।

प्रथमाध्यायगतप्रथमपादो हि श्रुतिविप्रतिपत्तिप्रयुक्तासंभवशङ्कां अपाकरोति । त्रिपादी तु तादृशातिव्याप्तिशङ्काम् । वादिविप्रतिपत्ति प्रयुक्ता असंभवातिव्याप्तिशङ्कां द्वितीयाध्यायगत प्राथमिकपादद्वयमिति विवेकः ।। यद्यपि लक्ष्ये लक्षणस्यासत्वमेवासंभव इति प्रकृते ब्रह्मरूप-लक्ष्यस्यैवाप्रसिद्धेः तत्र लक्षणासत्वशङ्कापरिहारावनुपपन्नाविव भायात्। तथापि, लक्ष्ये लक्षणस्यासत्वं एकोऽसंभवः यत्र लक्ष्यमेवाप्रसिद्धं तत्र लक्ष्यासभवप्रयुक्तलक्षणासभवः इत्यपरोऽसभवः इत्यसभवस्य द्विविधत्वात् । लक्ष्यप्रसिद्धिस्थले लक्षणासत्वे प्रथमासंभवस्य लक्ष्याप्रसिद्धिस्थले द्वितीयासभवस्य च सूत्रपादत्वात् प्रकृते द्वितीयासंभवशङ्कापरिहारार्थं प्रथमपादप्रवृत्तिः इत्यदोषः इति ध्येयम् । प्रथमपादेन चिद चिद्विलक्षणब्रह्मासिद्धिशङ्का हि परिह्रियते । एवं प्रथमेन पादेन ब्रह्मणः सिद्धौ सत्यां ब्रह्म जगत्कारणमस्तु प्रधानादिकमपि तथा स्यात् इत्यतिव्याप्तिशङ्कावारणार्थं त्रिपादी प्रवृत्ता ।।

एतादृशविभागः श्रुतिस्वारस्यात् सूत्रस्वारस्याच्चावसीयते । कारणवादिवाक्यानि सर्वासु विद्यासु वर्तन्ते । तत्र सद्विद्याकारणवादिवाक्यमेव प्रधानभूतम् । पुरोवादरूपत्वात् । तदितरकारणवाक्यानि ह वै पदघटितानि अनुवादरूपाणि भवन्ति । सूत्रकारोपि चतुस्सूत्र्या शास्त्रारंभ प्रमाध्यशास्त्रोपक्रमे 'ईक्षतेर्नाशब्द' इति सद्विद्याकारणवाक्य मेवादौ प्रस्तौति । व्यष्टिसमष्टिसृष्टित्रिवृत्करणादयोऽप्यत्र प्रदर्श्यन्ते सृष्टचुपयुक्ताः इति । सद्विद्यैव प्रधानभूता सूत्रकाराभिमता च । अतः सद्विद्याया. प्रधानपरत्वनिर्णये इतरविद्यानामपि तत्परत्वमेव स्यादिति प्रथमं सद्विद्याया प्रधानभिन्नपरमात्मपरत्वं स्थाप्यते । एवमानन्द-वल्याः जीवपरत्वे भृग्वानन्दवल्योः समानार्थकत्वेन भृगुवल्लीस्थस्य

यतो वा इमानि भूतानि जायन्ते इति लक्षणवाक्यस्यापि जीवपरत्वं स्यात् । विशेषसमर्पकतया प्रसिद्धाना आकाशप्राणज्योतिरिन्द्रादि-पदाना प्रसिद्धाकाशादिपरत्वे तत्प्रकरणस्थानामपि वाक्यानां तत्परत्व मेव सुनिश्चेय भवतीति ब्रह्मैवाप्रसिद्धं भवेत् । अतः प्रथमपादे उद्वाहृत श्रुतिवाक्याना स्वारस्यपरामर्शे सर्वात्मना ब्रह्मसद्भावमसहमानेन पूर्व पक्षिणा ब्रह्मनास्तित्वशङ्का प्रवर्तितेति ज्ञायते । अतः प्रथमपादः ब्रह्मासंभवशङ्काप्रयुक्तलक्षणासंभवशङ्कापरिहारार्थः इति निश्चीयते ।। त्रिपाद्या आनुमानिकाधिकरणे 'आनुमानिकमप्येकेषां' इति सूत्रे अपि शब्द प्रयुञ्जानः सूत्रकारोपि विभागमम् प्रकटीकरोति ।

कल्पतरुग्रन्थे आनुमानिकाधिकरणेऽप्ययमर्थः उक्तः—पूर्वत्र हि प्रधानाद्येव जगत्कारणमिति प्रत्यवस्थित परमात्मनिषधेन । इह तु तमभ्युपेत्य प्रधानाद्यपि कारणमिति प्रत्यवस्थीयते । सूत्रकारोपि अपि शब्दं प्रयुञ्जानः ब्रह्माभ्युपगमेन क्वाचित्कोऽयं विचार इति सूचया-मास" इति । प्रथमाध्यायचतुर्थपादारभे आनुमानिकाधिकरणे एव अपि शब्दश्रवणात् चतुर्थपादस्य केवल अतिव्याप्तिशङ्का परिहारपरत्व मस्तु, अवशिष्टाद्यपादत्रयस्यासभवशङ्कापरिहारपरत्वं कि नाभ्युपगम्यते इति न शङ्कचम् । प्रथमपादे – 'ईक्षतेर्नाशब्दम्' इत्यत्र नाशब्दमिति, नेतरोऽनुपपत्तेः इत्यत्र नेतरः इति, 'भेदव्यपदेशाच्चान्यः' इत्यत्रान्यः इति च पदाना श्रवणात्, द्वितीयपादे–'अत एब च स ब्रह्म' इति ब्रह्मपदस्य, तृतीये ईक्षतिकर्मव्यपदेशात्सः इत्यत्र तच्छब्दस्य चतुर्थे 'प्राज्ञो हि प्रकरणादित्यत्र प्राज्ञपदस्य च श्रवणाच्च प्रथमपाद अवशिष्टत्रिपाद्योः वैलक्षण्यावगमात् नाशब्द, नेतरः अन्यः इति पदानां स्वारस्य परी-शोलने प्रधानादिभेदसाधने एव सूत्राणा व्यग्रता प्रतीयते । तदुक्तं ईक्षतिकर्मव्यपदेशाधिकरणश्रुतप्रकाशिकायाम् । अत्र स इत्युक्तिः अस्मिन् पादे सर्वाधिकरणेषु साध्यप्रतिज्ञानुवृत्यर्था यथा प्रथमपादे भेदव्यादे शाच्चान्यः इति 'अन्यशब्दोक्तिः' यथा च द्वितीये अत एव च स ब्रह्म इति ब्रह्मशब्देक्ति । यथा चतुर्थे वदतीतिचेन्न प्राज्ञो हि प्रकरणात् इति प्राज्ञशब्दोक्तिश्च । तद्वदिति ।। अत एव श्रीभाष्ये 'इतश्च न

प्रधानं, इति, जगत्कारणवादिवाक्यं न प्रधानादिप्रतिपादनयोग्यम्, इति अशुद्धात् शुद्धाच्च प्रत्यगात्मनोऽन्यत् इति, प्रत्यगात्मनोजीवशब्दाभिलपनीयादन्यपरमात्मा अतः स एवेति, इति च व्यतिरेकमुखेन भाषितम् । अतोऽत्रेदं निश्चीयते, सर्वथापि ब्रह्मसद्भावं शङ्कमानस्य पूर्वपक्षिणः शङ्कापरिहारार्थं प्रवृत्तश्चेतनाचेतनभिन्नत्वसाधकः प्रथमपादः एव चिदचिद्विलक्षणत्वेन परब्रह्मणः सिद्धौ इतरोपनिषद्वाक्यानामपि कारणवादिनां ब्रह्मपरत्वमेव न प्रधानादिपरत्वमिति स्थापनाय त्रिपादी प्रवृत्ता । अतः तादृशवाक्यप्रतिपाद्यः परमात्मैवेति साक्षात् तादात्म्येन साध्यसमर्पकप्राज्ञादिपदैः सूत्राणि रचयामास बादरायणः । 'सर्वत्र प्रसिद्धोपदेशात्' इति द्वितीयपादस्याद्यसूत्रमेवामुमर्थविशेषं संयगभिव्यनक्ति । वेदान्तेषु, परस्मिन्नेव ब्रह्मणि प्रसिद्धस्य मनोमयत्वादेः उपदेशात् 'मनोमयः प्राणशरीरः' इति वाक्योदितगुणवान् परमात्मैव भवितुमर्हतीत्युक्तौ हि पूर्वमेव ब्रह्मणः सिद्धिरभ्युपगता भवति । अतः एतत्सूत्रपूर्वसूत्रपर्यन्तं ब्रह्मासिद्धिप्रयुक्तासंभवशङ्कापरिहारपर, एतत्सूत्र प्रभृति सूत्रजातं सर्वं अन्यस्य कारणत्वप्रतिक्षेपद्वारा अति व्याप्तिशङ्का परिहारपरमिति सुदृढ निश्चेतुं शक्यते ।।

एतेनेदमपि निर्व्यूढम्—आनुमानिकाधिकरणे अपि शब्दश्रवणात् परमात्मानमभ्युपगम्य प्रधानाद्यपि कारण इति प्रत्यवस्थीयते इति निश्चीयते इतीदं न सभवति । तत्राधिकरणे निरीश्वरसांख्यस्यैव पूर्वपक्षित्वात् परमात्माभ्युपगमस्यैवासिद्धेः । अत एव तत्र 'पुरुषान्न परं किंचित्' इति पंचविंशपुरुषातिरिक्ततत्वनिषेधपूर्वक पूर्वपक्षवर्णन युज्यते । अन्यथेश्वराभ्युपगमे अतिरिक्ततत्वनिषेधासभवात् एतत्सर्वमभिसन्धायैव श्रीमति भाष्ये प्रकृत्यधिकरणारम्भे "एवं निरीश्वर साख्यः प्रत्यवतिष्ठते इत्यभाषि । अतः ब्रह्माभ्युपगमपूर्वकानिव्याप्तिशङ्कावारण त्रिपाद्या क्रियते इतीदमनुपपन्न इति अगत्यापि शब्दस्य महदाद्यर्थत्वं स्वीकृत्य परब्रह्मसमुच्चायकत्वानभ्युपगमेपि पूर्वोक्तार्थस्य क्षतिविरहात् । अत्र श्रुतप्रकाशिका – ननु तृतीयपादेपि असंभवशङ्कापरिहारो दृश्यते । यथासुषुप्त्युत्क्रान्त्योर्भेदेन, पत्यादिशब्देभ्यः इति,

अत्र हि 'नेतरोनुपपत्ते इति वत् मुक्तातिरिक्त ब्रह्मसद्भावः स्थाप्यते। 'अथ स्यात् प्रत्यगात्मनोऽर्थान्तरभूतमात्मान्तरमेव नास्ति ऐक्योपदेशात् द्वैतप्रतिषेधाच्च' इति श्रीमद्भाष्यम्॥ एव चतुर्थपादे कारणत्व जगद्वाचित्व वाक्यान्वयाधिकरणानि प्रधान जीवव्यतिरिक्त ब्रह्मस्थापनपराणीति असंभवशङ्कापरि पराणि 'अतः अयोगव्यवच्छेदपरस्याद्यस्यैव वासभवशङ्कापरिहारपरत्वं अन्ययोगव्यवच्छेदपरायाः त्रिपाद्याः अतिव्याप्तिशङ्कापरिहारपरत्वं इति नियमो न संभवतीति, उच्यते प्रथमाध्याये प्रथमपादः अत्यन्तास्पष्टमितिजीवादिलिङ्गवाक्यविचारपरः। द्वितीयः अस्पष्टजीवादिलिङ्गकवाक्यविचारपरः। तृतीयः स्पष्टजीवादिलिङ्गकवाक्यविचारपरः चतुर्थस्तु तत्तत्प्रतिपादछायानुसारिवाक्यविचारपरः इत्यपि विभागत्व क्रियते तदुक्तम् सारावल्यां 'अस्पष्टरूपस्फुटरतचिदचिल्लिंगवद्वाक्यचिन्ता भाष्ये दीपावसानेऽप्यभाणि..... तत्राद्येत्यन्तगूढाविशदविशदसुस्पष्टजीवादिवाचः—इति॥ अतः स्पष्टजीवादिलिङ्गकवाक्यविचाराभावविशिष्टासभवशङ्कपरिहार परत्व प्रथमपादस्योज्यते। इद तु नान्यपादेषु भवतीति नक्षतिः॥ नन्वाद्यपादस्य ब्रह्मसिद्धिशङ्काप्रयुक्तासभवशङ्कापरिहारार्थत्वे 'आकाशस्तल्लिङ्गात्' अन्तस्तद्धर्मोपदेशात् इत्यादिषु कथं ब्रह्मणः तच्छब्देन निर्देश। ब्रह्मण एवाप्रसिद्धेः। ब्रह्मसिद्धौ हि तत् तच्छब्देन निर्दिश्य तदसाधारणधर्मस्य हेतुत्वकरणं युक्तम्? सत्यं—तद्धर्मादित्यस्य तस्य धर्मः तद्धर्मः। तस्मात् इति विग्रहः। सर्वं वाक्यं सावधारणमितिन्यायेन 'अब्भक्षो वायुभक्षः इत्यादाविव तस्यैव धर्मः तद्धर्मः इत्यर्थोऽवश्य अङ्गकार्यः। तच्छब्दं परमात्मपरः। तथा च परमात्मेतरावृत्ति परमात्मवृत्तिधर्मवत्वं हेतुभवति। तत्र धर्मे परमात्मवृत्तित्वविशेषणमनुपयुक्तमिति न तत् विवक्ष्यते। एवं च परमात्मेतरासंभावितधर्मस्यैव हेतुत्वमिति अनेना हेतुना अचेतनान्यत्वं साध्यते। सूत्रकारस्य बुद्धौ सर्वदा ब्रह्मणः विपरिवर्तनात् परमात्मेतेरेति व्यतिरेकमुखेन निर्देशः कृतः। अतो न दोषप्रसक्तिः। आकाशः तत् लिङ्गात् इत्यपि पदच्छेदमारचय्य प्रकरणे श्रुतानां लिङ्गानां भूताकाशेऽसंभवाद्

'आकाशशब्दवाच्यं तत् — ब्रह्म' इत्यपि सूत्रं व्याकुर्वन्ति । एवं अन्यत्रापि । एवं पादचतुष्टयात्मकस्याद्यस्याध्यायस्य गमनिका उक्ता।। द्वितीयाध्यायगतौ द्वौ पादौ बादिविप्रतिपत्तिप्रयुक्तसंभवातिव्याप्ति शङ्कां परिहरतः । तत्र हि वादी ब्रह्मैव नास्ति इति, सद्भावेपि प्रधानमेव जगत्कारण भवितुमर्हतीति च विप्रतिपद्यते स्मृतिविरोधं तर्कविरोधं चावलम्ब्य । अतस्तत्परिहारार्थं पादद्वयप्रवृत्तिरिति ।। एवं षट्पाद्याः प्रवृत्तिरुक्ता। अथ पूर्वद्विकगतान्तिमपादद्वयं, ब्रह्मलक्षणत्वेनोक्ते प्रमेयत्वव्यापककार्यतानिरूपितकारणत्वे कार्यतां प्रमेयत्वव्यापकत्वोपपादनाय प्रवर्तते ।। आकाशेन्द्रियादीना नित्यत्वमभ्युपगम्य ब्रह्मकार्यत्वानुपपादने सर्वमपि जगत् ब्रह्मकार्यं न भवितुमर्हति किल । एव च सर्वजगत्कारणत्व न ब्रह्मलक्षणं भवेत् । तदुक्तं श्रीभाष्ये— 'ब्रह्मकार्यतयाऽभिमतचिदचिदात्मकप्रपञ्चस्य कार्यताप्रकारो विशोध्यते' सारावल्यामप्येवमनुगृहीतम्—'कार्यत्व यस्य यावत् श्रुतिभिरवगतं तस्य तत्तादृश च' 'कार्यद्वारेण पादान्तरयुगमुदयत्यान्तर क्षोभशान्त्यै' इति नित्यभूतस्यापि हि जोवात्मनः उत्पत्यभावेपि कार्यत्वमुपपाद्य तन्निरूपितकारणतावत्वरूपजगत्कारणत्वलक्षणस्य ब्रह्मण्युपपत्तिः अत्रैव क्रियत इति न लक्षणदोषगन्धः ।

अथोत्तरद्विकार्थ ब्रूम । उपासनप्रवृत्ति प्रयोजकार्थं निरूपणपरं उत्तरद्विकम् । यस्तु मोक्षेच्छावान् स एव तदुपायभूतोपासने प्रवर्तते इति निर्विवादम् । मोक्षश्च निश्शेषाविद्यानिवृत्तिपूर्वकब्रह्मानुभवः । अविद्यानिवृत्तिर्नाम कर्मतत्प्रयोज्यप्रकृतिसबन्धैतदुभयरूपसंसारनिवृत्तिः। एतादृशाविद्यानिवृत्तौ, प्रतियोगिभूतसंसारे त्विष्टसाधनताज्ञान कारणम् ससारनिवृत्त्यात्मकाभावरूपफलेच्छायां प्रतियोगिनि इष्टसाधनताज्ञानस्य कारणत्वात् । अतः कर्मणि तत्प्रयोज्यप्रकृतिसबन्धे च दु.खसाधनत्वनिरूपणाय वैराग्यपादः प्रवृत्तः प्रकृतिसंबधरूपसंसारस्य दु खादि साधनरूपोऽप्यर्थ. उपासनप्रवृत्तिप्रयोजकोऽर्थः ।। एवं ब्रह्मानुभवस्यैव मोक्षत्वात् तद्विषयकेच्छायां तत्रानुकूलत्वज्ञानं कारणम् । ब्रह्मानुभवः अनुकूलः इति ज्ञाने सति हि तद्विषयकेच्छा जायेत । ब्रह्मानुभवे

अनुकूलत्वज्ञानं च विषयभूतब्रह्मण. अनुकूलत्वे सत्येव संभवति। ज्ञान गतानुकूल्यस्य विषयानुकूल्याधीनत्वात्। ब्रह्मणि अनुकूलत्वज्ञान ब्रह्मण निर्दोषत्वकल्याणगुणाकरत्वज्ञानाधीनमिति तदुभयनिरूपणाय उभयलिगपादस्य प्रवृत्तिः। अत. ब्रह्मगतनिर्दोषत्वकल्याणगुणाकरत्वज्ञानमपि उपासनप्रवृत्तिप्रयोजकम्। निर्गुणे वस्तुनि उपासनाप्रवृत्तेः सगुणस्यैवोपास्यत्वमिति तत्तद्विद्योदिततत्तद्विषयकत्वनिरूपणाय गुणोपसंहारपादः तृतीयः प्रवृत्तः। निश्शेषाविद्यानिवृत्तिपूर्वकब्रह्मानुभवरूपमोक्षं प्रति तत्तद्गुणविषयकब्रह्मोपासनमात्रं न कारणं भवति। कर्मापि हि तत्र कारणम्। विद्यां चाविद्याच यस्तद्वेदोभयं सह।

'अविद्याया मृत्युं तीर्त्वा विद्ययऽमृतमश्नुते' इति कर्मणामपि हेतुत्वबोधनात्। तत्र कर्म अङ्गभूतं सत् हेतुर्भवति विद्यावाङ्गीभूताकारणमिति तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशके न' इत्यादिश्रुतिसिद्धमिति। कर्माङ्गकोपासनस्यैव तत्र फले कारणत्वमिति तृतीयाध्यायस्य उपासनप्रवृत्ति प्रयोजकार्थनिरूपण परत्वम्॥ अथ चतुर्थाध्यायस्याप्येतदर्थनिरूपणपरत्वमुपपाद्यते। ब्रह्म प्राप्तेः मोक्षत्वं ब्रूमः। ब्रह्मप्राप्तिश्च उत्तरपूर्वाघाश्लेषविनाशपूर्वकः यः भोगाधीनप्रारब्धनाश. तदनन्तरभाविनो तत्प्रयोज्या च या उत्क्रान्तिः तदनन्तरकालीना च या अर्चिरादिगति तज्जनितदेशविशेषावच्छिन्न ब्रह्मप्राप्तिः या सैव तत्र उत्तरपूर्वाघाश्लेषविनाशपूर्वक भोगाधीनप्रारब्धनाशप्रतिपादनपरः चतुर्थाध्यायप्रथमपादः। द्वितीयस्तु प्रारब्ध नाशानन्तरभाव्युत्क्रान्तिप्रतिपादनपर। अर्चिरादिगतिप्रतिपादनपरः तृतीयः। देशविशेषावच्छिन्नब्रह्मानुभवप्रकारविशोधनपरश्चतुर्थः॥ 'तद्यथा इषीकतूलमग्नौ प्रदूयेत एवं हास्य सर्वे पाप्मानः प्रदूयन्ते, पुष्कर पलाश आपो नाश्लिष्यन्ते, 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्ये, अथ य एष संप्रसादोऽस्माच्छरीरात्समुत्थाय अर्चिषोऽहः अह्नः आपूर्यमाणपक्षं...इत्यादि श्रुतिशतसिद्धं मोक्षस्यैतद्रूपत्वम्। एतादृशब्रह्मानुभवरूपमोक्षेच्छोरेव उपासनप्रवृत्तेः इच्छाविषयभूतताद्दृशार्थस्य उपासनप्रवृत्ति प्रयोजकत्वमिति ध्येयम्। एतत्सर्व तदन्तर

प्रतिपत्त्यधिकरणारम्भश्रीभाष्यसिद्धम् । इयमत्र श्रीभाष्य श्रीसूक्तिः— उत्तरेणेदानी तत्प्राप्त्युपायैस्सह प्राप्तिप्रकारः चिन्तयितुमिष्यते । तत्र तृतीयाध्याये उपायभूतोपासनचिन्ता वर्तते । उपासनारम्भाभ्यर्हितो पायश्च प्राप्यवस्तुव्यतिरिक्तवैतृष्ण्यम् । प्राप्यतृष्णा चेति तत्सिध्यर्थं जीवस्य लोकान्तरेषु सञ्चरतो जाग्रतः सुषुप्तस्य मूर्च्छतश्च दोषाः परस्य च ब्रह्मणः तद्रहितता कल्याणगुणाकरत्व च प्रथमद्वितीययोः पादयोः प्रतिपाद्यन्त इति । एव पूर्वोत्तरद्विकभेदभिन्न शारीरकशास्त्रे 'कारणत्वमबाध्यत्वमुपायत्वमुपेयता' इति चतुर्णामप्यध्यायानां क्रमेण द्विकद्वयस्य उपपत्तिरुक्ता ।। जगत्कारणत्व तदबाध्यत्व, ब्रह्मोपायत्व, तदुपेयत्वप्रतिपादकत्वं बोध्यम् । प्रथमस्याध्यायस्य समन्वयाध्याय इत्यपि नाम । लक्षणत्वेनोक्तस्य जगत्कारणत्वस्य ब्रह्मणि समन्वयकरणात्तन्नामोपपत्तिः। पूर्वाध्यायोक्तमेवपरमात्मनो जगन्निमित्तोपादानरूपकारणत्वं स्मृति तर्कविरोधपरिहारमुखेन स्थूणाखातक्रमेण स्थापनात् अविरोधाध्यायः इति द्वितीयाध्यायो व्यवह्रियते । भगवत्प्राप्तिरूपमोक्षाख्यफलस्य साधनभूत यत् कर्माङ्गकोपासनं तत्प्रतिपादकत्वेन तृतीयस्य अध्यायस्य साधनाध्यायनामत्वम् । भगवत्प्राप्तिरूपफलस्य सविस्तारं प्रतिपादनात्, फलाध्याय इति तुर्यस्य नाम ।

23. पादनामक्रमनिर्देशः ।

अथ पादावां क्रमं नाम च निर्दिशामः—एकैकस्मिन्नप्यध्याये चत्वार एव पादाः । अतः इदं शारीरक अध्यायचतुष्टयात्मक षोडश पादात्मक च ।।

'शास्त्रं त्वेतत्समन्वित्याविहतिकरणप्राप्तिचिन्ताप्रधानैः
अध्यायैः, षोडशांघ्रि द्विकयुगभिदुरं षट्कभेदादिनीत्या
इत्यधिकरणसारावल्यां अन्वग्राहि ।। प्रथमपादस्य अयोगव्यवच्छेदपादः इति नाम । तत्र जगत्कारणत्वस्य परमात्मायोगव्यवच्छेदप्रतिपादनं हि दृश्यते । त्रिपाद्याः अन्ययोगव्यवच्छेदप्रतिपादनपरता । अस्पष्टजीवादिलिङ्गकपादः द्वितीयः स्पष्टजीवादिलिङ्गकः तृतीयः । स्पष्टतरजीवादिलिङ्गकः चतुर्थः इति त्रिपद्यामपि परस्परं वैलक्षण्यम्।

अत्र त्रिपाद्यां क्रमेण अस्पष्टजीवादिलिङ्गक वाक्यादीन्यादाय तेषां यथायथ जीवप्रधानपरत्वमुद्भाव्य जन्मादिकारणत्वस्य ब्रह्मलक्षणस्य अन्यत्राप्यतिप्रसङ्गेन अतिव्याप्तत्वं चाशङ्क्य तत्र कारणत्वायोगव्यवच्छेदः क्रियते। अतः तेषां पादाना अस्पष्टजीवादिलिङ्गकवाक्यादिविचारपरत्वमिति तत्तन्नामभिः ते ते पादा व्यपदिश्यन्ते ॥

द्वितीये प्रथमः स्मृतिपादः। द्वितीयस्तर्कपादः। वियत्पादः तृतीयः। चतुर्थः प्राणपादः। प्रथमे कपिलयोगादिस्मृतिविरोधात् वेदान्तवाक्याना ब्रह्मपरता नास्तीत्याशक्य तन्निराकरणपूर्वक आप्ततममन्वादिस्मृत्यानुकूल्यमेवास्तोति स्थापनात् स्मृतिपाद इति सज्ञा। यद्यप्यस्मिन्नेव पादे तर्कमवलम्ब्य विलक्षणत्वाधिकरणानां प्रवृत्तिरिति अस्यापि तर्कपादत्वं सभवति। अत एव 'तर्कमवलम्बमानः प्रत्यवतिष्ठते' इत्यधिकरणारंभे श्रीभाष्यकारश्चासूक्तिसामञ्जस्यमपि, अथापि तर्कमवलम्ब्यापि स्मृति विरोधे एव पूर्वपक्षिणः प्रवृत्तेः स्मृतिपादत्वमेव तस्य। एतत्सूचनायैव 'स्मृतिविरोधवादी तर्कमवलम्बमानः प्रत्यवतिष्ठते' इति तत्रैवभाषितम्। अनन्तरस्तर्कपाद.—अत्र सांख्य वैशेषिकसौगतजैनपाशुपतपक्षा प्रतिक्षिप्यन्ते। अत एव परपक्षप्रतिक्षेपपादः इत्यप्यस्य नामान्तरम्। 'अत परपक्षप्रतिक्षेपायानन्तरः पादः प्रवर्तते इति श्री रामानुजभाष्यम्। अत्र परैरुक्ततर्कानुदूष्य सत्तर्कैः स्वमतस्थापनात् तर्कपादत्वमस्य ॥ तर्कपादे' इत्यधिकरणसारावलिः। परपक्षप्रतिक्षेपः किमर्थं क्रियते ? स्वपक्षे परैरुद्भावितदोषपरिहारेणैव स्वमतस्थापनात् इति चेत्। अत्र श्रीभाष्य 'इदानी स्वपक्षरक्षणाय परपक्षाः प्रतिक्षिप्यन्ते इतरथा कस्यचित् मन्दधियस्तेषा पक्षाणां युक्त्याभासमूलतामजानतः प्रामाणिकत्वशकया वैदिकपक्षे किचित् श्रद्धावैकल्यं जायेतापि' इति ॥ तुल्यत्वभ्रान्तिसिद्धा प्रकरणसमता तर्कपादे हि वार्या' इत्यपि सारावल्या द्रष्टव्यम् ॥

यद्यप्यस्मिन् पादे उत्पत्त्यसंभवाधिकरणं दृश्यते। तत्र पञ्चरात्र तन्त्रस्य प्रामाण्यं स्थाप्यते। न तु प्रतिक्षिप्यते इति पादा सङ्गत्यं तदधिकरणस्य। अप्रामाण्यकथने तु तस्य पादसांगत्यं सभवतीति

ऐकमत्य वोपपादनीयम्। अथापि–पांचरात्रप्रामाण्यवादिपक्षस्यापि पर-पक्षत्यात् तदत्र प्रतिक्षिप्यते इति पादसांगत्य तस्य सूपपादमिति ब्रूमः।

'प्रत्यर्थित्वं विरोधभ्रममपनयता पञ्चरात्रस्य वार्यं ।
दुस्तर्काद्युत्थितोक्त्या तदितरसमयेष्वित्यनुस्यूतसिद्धिः ।।'

इति सारावल्यामयमर्थः स्फुटः ।।

तदनन्तरं वियत्पादप्राणपादौ, "न वियदश्रुतेः, तथा प्राणाः इति आरंभे वियत्प्राणपादयोः श्रवणादेवं नामधेयं सवृत्तम् ।। वियत्पादे आकाशस्योत्पत्तिः नित्यस्याप्यात्मनः उत्पत्तिप्रकारशोधन तस्य ज्ञान-रूपत्वं ज्ञातृत्वं कर्तृत्वं कर्तृत्वस्य परमात्मायत्तत्वं, आत्मनः भगवदंश-रूपत्वमित्येतेऽर्थाः सुविशदमुपन्यस्यन्ते ।।

प्राणपादे वियन्नीत्या समनस्कानां इन्द्रियाणामुत्पत्तिः तेषां सख्या परिणामविशेषः श्रेष्ठप्राणस्य स्वरूपविशेष परिमाणविशेषः देवताभोक्तृगतशरीरेन्द्रियाधिष्ठातृत्वस्य परमात्मायत्तत्वं मुख्यप्राण-व्यतिरिक्तस्य इन्द्रियत्वव्यपदेश समष्टिसृष्टौ तेजोबन्नादिशरीरकस्य परमात्मनः उत्तरोत्तरकार्यकर्तृत्वमिव व्यष्टिसृष्टावपि चतुर्मुखादि शरीरकस्य तत्कार्यकर्तृत्वमित्याद्यर्थाः स्थाप्यन्ते ।।

अष्टपादघटिते पूर्वद्विके एवमपि कश्चन विभागः — प्रथमे पादे स्वरूपेणासिद्धैः केवल वादिपरिकल्पितैः हेतुभिः पूर्वपक्षोत्थानम् । द्वितीये—स्वरूपतः सिद्धैरपि व्यभिचारिभिः हेतुभिः पूर्वपक्षकरणम् । तृतीये स्वपक्षसाधकहेतुभिरेव । चतुर्थे परसिद्धान्तानुवादप्रायैः हेतुभिः। पञ्चमषष्ठौ–कारणभूतपरब्रह्मणि वेदबाह्योक्त बाधप्रतिरोधपीडां परि-हरत । सप्तमाष्टमौ वेदान्तवाक्यान्योन्यविरोधम् इति ।

तृतीये प्रथम. वैराग्यपादः। अत्र संसाराग्निविदीपनेन भृशं तप्तानां अतिशयितानदरूपमोक्षसागरनिमज्जनार्थमुक्त्युपायप्रारंभोपयुक्त वैराग्यं प्रतिपाद्यते । शारीरकशास्त्रार्थश्रवणोपयोगिवैराग्य तु नात्रोच्यते । श्रवणारंभे एव तस्यसिद्धत्वात् । तदुक्त–

ससारोद्विग्नचेताः तनुभृदधिकरोत्यत्र शारीरकाशे
वैराग्यार्थस्तु पादः किमिति पुनरसौ सूत्रकारैर्निबद्धः ।

सत्य प्राप्यांतराणां निरयगणतुलारोपणं मुक्त्युपाय
प्रारंभेऽभ्यर्हितं स्यात् त्वरत इह खलु स्पष्टदृष्टस्वदोषः ।।

स्वर्गलोकगमनकाले स्वर्गात् पुनरागमनकाले पुनश्शरीरप्राप्तौ सर्वत्र जाग्रतो जीवस्य दोषाः कथ्यन्ते ।

अथात्र द्वितीयपादः उभयलिङ्गपादः । अत्र परस्य ब्रह्मणः न स्थानतोपि' इत्यारभ्य नित्यनिर्दोषत्वं कल्याणगुणाकरत्वं चोच्यते ।। परब्रह्मणः निर्दोषत्वसिध्यर्थं अचिद्वस्तुनः ब्रह्मरूपत्वप्रकारः, तथा अनवधिकातिशयगुणत्वसिद्धयर्थं अन्यस्य परत्वाभावः, अस्य फलप्रदत्व चोच्यते ।। यद्यप्यादौ अधिकरणचतुष्टय जीवस्य स्वाप्नदोषप्रतिपादक दृश्यते इति उभयलिङ्गपादे सांगत्य नास्तीति प्रतिभायात् । अथापि स्वाप्नार्थं स्रष्टुभाव प्रभृतिबहुविधब्रह्मगुणानामेवात्र प्रतिपादने तात्पर्यात् उभयलिगपादसङ्गतमेवेदमधिकरणचतुष्टयमिति न दोषः । अत एव 'पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ' इति सूत्रस्वारस्यमुपपद्यते । तत्र जीवगत बन्धनमोक्षकारणत्वप्रतिपादनेन ब्रह्मणः अनवधिकातिशयगुणवत्ताद्युच्यते ।

तृतीये तृतीयो गुणोपसंहारपादः—सगुणब्रह्मोपासनमेव मोक्षजनकं शाण्डिल्यदहरादिविद्याः तत्र तत्र श्रूयमाणाः किमेकविद्याः उत विभिन्नाः । भेदे अनेकशाखासु श्रूयमाणाया एव दहरादिविद्यायाः अपि किं भेदः उताभेदः । केषा केषा गुणानां कुत्र कुत्रोपसहार्यत्वं कुत्र न इत्यपि बहवो विषयाः अत्र प्रतिपाद्यन्ते । अतः विद्यैक्ये गुणानां उपसंहारः भिन्नत्वे अनुपसहारश्च कथ्यते ।। अत्र पादे उपसंहारानुपसहारयोः द्वयोरर्थयो. कथनात् विद्ययोः भेदोऽभेदश्च स्थाप्यौ। भेदे अनुपसहारः अभेदेऽनुपसंहारः इति । एव च भेदाभेदयोरुभयोः एकविषयत्वाभावात् पादानुगुण्य नास्तीति अस्य पादस्य गुणोपसंहारपादः इति नाम परित्यज्य 'वेद्यावच्छिन्नविद्यानियमकृत्पादः इति नामान्तरमन्वग्राहि श्रीदेशिकचरणैः ।

एकस्मिन्नेव पादे निपुणनयकृता न द्वयोस्तर्कणं स्यात्
भेदोऽभेदश्च नैको विषय इह भवेदन्यहानप्रसंगात् ।

तस्मादस्मिन्प्रकीर्णा नयवितितिरिति प्रेक्षितग्रन्थचोद्ये
वेद्यावच्छिन्नविद्यानियमनकृदयमित्यैदमर्थ्यं समर्थ्यम् ।।

अयमर्थः—वेद्यं भिन्नं चेत् विद्यापि भिन्ना, अभिन्नं चेत्साप्यभिन्ना ।। अतो वेद्यानुरूप विद्यानियमनमत्र पादे क्रियते, वेद्यभेदस्तु न ब्रह्मभेदनिबन्धन , परं तु गुणभेदनिबन्धनः इति ।। एवमर्थद्वयप्रतिपादनेपि तदनुगुणनामधेय एकरूपत्वेन युक्तम् । चतुर्थस्त्वंगपादः—ब्रह्मविद्यायाः कर्म अङ्गमिति स्थाप्यते, अधिकारिभेदेन कानि कर्माणि अङ्गभूतानीत्यप्युच्यते, सन्यासिनां यागाद्यंगाभावेपि तदुचिताश्रमकर्मणा अङ्गसाकल्यं, शमदमादीनां यज्ञादिप्रवृत्तिकर्मभिः न विरोधः प्राणसंशयकाले सर्वान्नानुमतिः पतितस्य विद्यायामनधिकारः इत्याद्यार्था. स्फुट परीक्ष्यन्ते ।

चतुर्थध्याये प्रथमः आवृत्तिपादः । द्वितीयः उत्क्रान्तिपादः तृतीयः गतिपादः अन्तिमः फलपादः इति । 'आवृत्तिरसकृदुपदेशात्' इत्यारंभे आवृत्तिपदश्रवणादेतादृशं नाम । अत्रापि यद्यपि फलाध्याये अधिकरणषट्कं साधनभूतोपासने विशेषप्रतिपादनार्थं प्रवृत्तमिति साधनाध्यायभूततृतीयाध्याये एवं सङ्गतं तथापि स्वर्गादिविलक्षणस्यास्योपायस्य 'सुसुख कर्तुमर्हसि' भजनसुखमेकस्य विपुल इति सुखरूपफलरूपत्वमेवेति द्योतनायात्राधिकरणषट्कस्यानुबन्धः कृतः इति ।।
तदुक्तं अधिकरणसारावल्यां
सूक्ता प्रागेव विद्या किमिति पुनरिमां वक्ति यद्यस्ति शेषं
ब्रूतामेतच्च पूर्वं नहि तदिहफले सङ्गटैतेति चेन्न ।।
मुक्तेरन्यैरसिद्धि प्रकृततदविनाभावं आसन्नसिद्धि
मुक्तावस्थासमं च स्थिरभजनरस व्यंक्तुमत्रानुबन्धः ।।

अथ द्वितीयः उत्क्रान्तिपाद । अत्र विदुषामुत्क्रान्तिप्रकारः उत्क्रान्तेः विद्वदविद्वत्साधारण्य विदुषो मूर्धन्यनाडयैव गमनं मरणकालनियमाभावः इत्यादयः कीर्त्यन्ते ।

तृतीयः गतिपादः । अर्चिरादिना तत्प्रथितेः इति प्रथमं अर्चिरादि गतिश्रवणात् एवं पादनामव्यवस्था ।। बहुधा श्रुतिषु मार्गप्रकारस्याम्नातत्वेपि एकरूपत्वं निरुह्यते । अर्चिरादीनां आतिवाहिकत्वं,

परब्रह्मोपासकगर्मायतृत्वमित्यादयः प्रोच्यन्ते अन्तिमः। फलपादः—अत्र फलस्वरूप विशोध्यते ।। स्वस्वरूपाविर्भावः, तत्र मतभेदप्रदर्शनपुरस्सरं स्वमतकीर्तनं सङ्कल्पादेवसर्वविधकैकर्यसिद्धिः स्वेष्टप्रकारेण अशरीर स शरीर नानाविध शरीरत्वेन कैकर्यंकरण, शरीरस्य स्वेनैव सृज्यत्व निबन्धनाभावः ज्ञानविकासः भगवता भोगमात्रे साम्यं जगत्कारणत्वादि भगवच्चिह्नं विना अन्यत्र साम्यमित्यादयोऽत्र वर्ण्यन्ते ।।

अष्टपादयुक्ते उत्तरद्विकेऽपि पूर्वपादद्वयं भवभयतप्तजीवानां ब्रह्मविद्याधिकारमुत्पादयति। उत्तरं पादद्वय साङ्गब्रह्मविद्यां उपदिशति।

पञ्चमः—ब्रह्मवित्सबन्धिपुण्यपापरूपकर्मनिरसनं बोधयति । षष्ठः स्थूलदेहनिवृत्ति, सप्तमः सूक्ष्मशरीरनिवृत्ति, अष्टमः निर्धूतोपाधिराशेः निरुपाधिकमहानन्दं वक्तीति विभागप्रकारोपि द्रष्टव्यः ।

24. मतद्वयपादसंग्रहः ।

एवमस्मिन् शारीरकशास्त्रे रामानुजभाष्यमवलम्ब्य विशिष्टाद्वैतिमते स्थित्वा पादार्थाः निरूपिताः । अथाद्वैतिनां द्वैतिनां मतेऽपि पादार्थान् सग्रहेण विलिखामः—प्रथममद्वैतिमतं प्रस्तौमः—

प्रथमाध्याये—प्रथमे पादे

1 जगत्कारण ब्रह्मेति प्रथमं निरूप्य अर्थान्तरप्रसिद्धाः अपि आकाशादिशब्दाः ब्रह्मपरा एव स्पष्टब्रह्मलिङ्ग सद्भावात् इति निर्णीयते।

2 द्वितीये—सविशेष ब्रह्मलिङ्गनिरूपण क्रियते, योगाख्यशक्तिमत्पदविचारो वा

3 तृतीये निर्विशेषब्रह्मलिङ्गनिरूपणम् रूढिशक्तिमत्पदविचारोपि ।

4 चतुर्थे—जगत्कारणत्वस्य प्रधानादौ व्यभिचारात् अलक्षणत्वमित्याशक्य परिहियते ।

द्वितीयाध्याये—प्रथमे पादे

1 ब्रह्मण. जगत्कारणत्वाभ्युपगमे स्मृतिन्यायविरोधः इति शङ्कामुद्भाव्य परिहारः क्रियते ।

2 प्रधानादिवादाः न्यायाभासमूलकाः इति कथ्यते ।

3 श्रुतिविप्रतिषेधपरिहारे मानान्तरानुगुणश्रुत्युपष्ठभेन भूत-भोक्तृविषयकश्रुतिविरोधपरिहारः क्रियते ।।

3 भौतिकविषयश्रुतिविप्रतिषेधपरिहारः इन्द्रियाणां तन्मते भौतिकत्वात् तद्विचारस्यात्र क्रियमाणत्वात् ।।

तृतीयाध्याये प्रथमपादे

1 वैराग्यनिष्पत्त्यर्थं ससारगतिभेदप्रदर्शनम् ।

2 महावाक्यार्थनिर्णयाय–त्वंपदतत्पदार्थविवेक· ।

3 सगुणविषयकविज्ञानभेदाभेदचिन्ता ।

4 इतिकर्तव्यतानिरूपणम् ।

चतुर्थेऽध्याये–प्रथमपादे

1 निर्गुणविद्याफलैकदेशरूपबन्धनिवृत्तिः पूर्वोत्तरकर्म विनाशाश्लेषौ ।।

2 अपरविद्यानिष्ठस्योत्क्रान्तिः ।

3 सगुणविद्याकार्यार्चिरादिगतिः ।

4 द्विविधविद्याफलम् ।

अथ द्वैतिमते पादार्थसंग्रह :—

1-1 नामसमन्वयः अन्यत्र प्रसिद्धपदानामपि समन्वयः ।
अत्र स्पष्टास्पष्टब्रह्मलिङ्गत्वादिरूपो विभागो नाभिमतः ।

2 लिङ्गानां–अन्यत्र प्रसिद्धानां वाक्यानां समन्वयः ।

3 उभयत्र प्रसिद्धलिङ्ग (वाक्य) समन्वयः ।

4 अन्यपरत्वाभावेऽनुपपन्नत्वेन संयग्बुध्यमाननां शब्दानामपि समन्वयः ।

2-1 युक्त्यविरोधः ।

2 समयाविरोधः—विरुद्धसमयनिराकरणम् ।

3 युक्तिसहित श्रुत्यविरोधः अधिभूताधिदैवतश्रुतिविरोधपरिहारः।

4 अध्यात्मविचारः । एतद्व्यतिरिक्ताधिभूतादिविचारः पूर्वं वृत्तः।

3-1 मुमुक्षुनिष्ठे मुक्तिसाधनचतुष्टये प्रथमस्य वैराग्यस्योक्तिः ।

2 माहात्म्यज्ञानपूर्वक सुदृढस्नेहस्य भक्तिवर्धनम् ।

3 तारतम्योपेतोपासननिरूपणं फलतासम्यसिध्यर्थम् ।
4 उपासनजन्यापरोक्षज्ञानरूपसाधननिरूपणम् ।
4-1 कर्मक्षयः । 2 उत्क्रान्तिः । 3 अर्चिरादिमार्गः ।
4 भोगरूपफलप्रदर्शनम् ।

अत्र सुसूक्ष्मं मतत्रयोक्तस्यार्थस्य परिशीलने क्रियमाणे प्रायशः पादार्थाः मतत्रयेऽपि एकरूपतामेव भजन्ति । वाचकशब्दाः परं भिन्नाः दृश्यन्ते । निर्गुणं सगुणं इति ब्रह्मणः द्वैविध्यं परं अद्वैतिनः कल्पयन्ति । द्वैतिनश्च उपासनानन्तर जायमानात् तद्भिन्नादपरोक्षज्ञानान्मुक्तिं उशन्ति । एतद्व्यतिरिक्ताः सर्वे अशाः एकरूपा एव प्रायः ।। अधिकरणनिरूपणप्रक्रिया अधिकरणभेदकल्पनं विषयवाक्यभेदकल्पनं इत्यादि बहुलं भिद्यते । तत्रापि द्वैतिनः अन्यदन्यदेव विषयवाक्यं निर्दिशन्ति ।

प्रायशस्तत्तन्मतप्रवर्तकाचार्याः स्वपूर्वप्रदर्शितमतसिद्धार्थविपरीतार्थकथने एव स्वस्य ख्यातिः भवेदिति आलोच्य विपरीतार्थवर्णनासक्तचित्ताः श्रुतिसूत्रस्वारस्यमप्यनालोढ्य युक्त्याभासं प्रधानत्वेनावलम्बमानाः अधिकरण सूत्रभेदादिकल्पनमपि विरचय्य अपूर्वमपूर्वं कंचन अर्थं ब्रुवन्तो दृश्यन्ते ।। सूत्राण्यपि भङ्क्त्वा परसूत्रात् तच्छेषं संयोज्यापूर्वसूत्रमपि प्रणयन्ति ।।

यथोपपादने सर्वासामपि श्रुतीनां सूत्रजालानां च सामरस्यं भवेत् तथोपपादनं श्रीरामानुजभाष्ये एवेति सर्वमतानुयायिनोऽपि ब्रुवते । पण्डितपामरसाधारण्येन सर्वैरप्ययमर्थः उररीक्रियते । देशान्तरस्था अपि श्रीभगवद्रामानुजमुनिप्रणीतं ब्रह्मसूत्रार्थविवरणरूपं श्रीमद्भाष्यं भाषान्तरेण विपरिणमय्य तदर्थ आशय च बुध्वा श्रीमद्रामानुजमुनिं प्रशंसन्ति इति कर्णपरम्परया श्रुतं सर्वैः । लोकविरोधं विनाऽर्थवर्णनं तत्रैकत्रैवेति विदुषां निश्चप्रचम् । स्तुवन्ति चेम रामानुजमुनिमभियुक्ताः—

प्रायो लोकानुसारात् निखिलनिगमवाक्यानुगुण्यात् परैर-
प्यादर्तव्याखिलार्थात् अखिलतनुभृतां रूपमुक्त्यादिसाम्यात् ।

भूतेष्वीशाङ्गतोक्तेः शरणवरणतः सर्वमोक्षार्हतोक्त्या
मुक्तावानन्दसाम्यात् यतिपतिकथित सर्वसमाननार्हम् ।।

25. पेटिकाविभागः ।

अथ पेटिकाविभागे किञ्चिदवतरामः—

1 यथा एकस्यां पेटिकायां अनेकानि वस्तूनि निक्षिप्यन्ते । एवमेवात्रापि एकस्यां पेटिकायां द्वे त्रीणि चत्वारि अधिकरणानि निक्षिप्तानि सन्ति । संभूयैकार्थप्रतिपादिका एका पेटिका भवति । तद्यथा—

व्युत्पत्त्यभावः प्रतिपत्तिदौस्थ्य मन्येनलभ्यत्वमथाफलत्वम् ।
एतानि वै सूत्रचतुष्टयेनानारम्भमूलानि निराकृतानि ।।

इत्यवान्तरैकैकार्थप्रतिपादनं एकैकस्मिन्नधिकरणे प्रथमाध्यायप्रथमपादाधिकरणचतुष्टये । अथाप्यनेनाधिकरणचतुष्टयेन शास्त्रारम्भसमर्थनरूपैकमुख्यार्थप्रतिपादनमिति तच्चतुष्टयमेकपेटिकान्तर्गतम् । अवान्तरानेकार्थप्रतिपादिका सती एकमुख्यार्थप्रतिपादिका पेटिका । अत्रेय यथासंभव मूह्या । अत्रेमं पेटिकाविभागं प्रत्यध्यायं प्रतिपादं विस्तरेणाधिकरणनामनिर्देशपूर्वकं ब्रूमःसुखग्रहणाय ।

प्रथमाध्याय प्रथमपादे प्रथममधिकरणचतुष्टय शास्त्रारम्भार्थोपोद्घातपेटिकान्तर्गतम् । तत्राप्यधिकरणद्वयं सिद्धे ब्रह्मणि प्रतीतिजननार्थपेटिकारूपं, शिष्टमधिकरणद्वय अप्राप्तत्व सफलत्वरूपतात्पर्यलिङ्गसमर्थनार्थपेटिकारूपम् । अवशिष्टान्यधिकरणान्येकपेटिका अनुमानयोग्यप्रधानपुरुषनिराकरणपरत्वात् । तत्रापि ईक्षत्यधिकरणादीनि त्रीणि सदात्मपुरुषरूप सामान्यशब्दात्मकश्रुत्या समुत्पन्नस्य पूर्वपक्षस्य ईक्षत्यादिलिङ्गबलेन प्रतिक्षेपपराणि अवान्तरपेटिकान्तर्गतानि । अकाशाधिकरणप्राणाधिकरणे अप्येकावान्तरपेटिकारूपे । रूढि हित्वा योगशक्त्या परब्रह्मप्रतिपादनपरत्वात् । एव ज्योतिरधिकरणेन्द्रप्राणाधिकरणे अपि अवान्तरपेटिकारूपे । रूढिभङ्गमन्तरेण परमात्मप्रतिपादनपरत्वात् । ज्योतिरधिकरणे दिव्यतेजोविशिष्टविग्रहयुक्तपरमपुरुषप्रतिपादनं, इन्द्रप्राणधिकरणे इन्द्रप्राणविशिष्टपरमात्मबोधनम्, पूर्वत्र

रूढ्यर्थमात्रस्वीकार; परत्र रूढ्यर्थस्वीकारेण सहापर्यवसानवृत्तिः स्वीकृतेति विशेषः। एवमुक्तप्रकारेण पेटिकासङ्गतावन्तरपेटिका-सङ्गतिरपि बोध्या ॥

द्वितीये पादे–अत्राधिकरणषट्कं विद्यते। सर्वमपि इदमधिकरणं एकपेटिकारूपम् — अत्रोदाहृतविषयवाक्येषु ब्रह्मात्मपुरुषपदश्रवणात् तेषां च शब्दानां 'ब्रह्मपरिबृढं सर्वतः, आत्मनः आकाशस्संभूतः, पुरुष एवेदं सर्वं, इति लोकवेदप्रसिद्धरूढिविशेषात् परमात्मपरत्वात् तत्प्रतिपादकत्वमिति एका पेटिका। यद्वा अत्र प्रथममधिकरणत्रयं उपासितृणां अल्पीभूतहृदयगुहाक्ष्यन्तरस्थपरब्रह्मोपासनप्रतिपादकम्। उत्तरं च जगदन्तर्यामित्वविभुत्वअभिविमानत्वगुणैः महापरिमाणविशिष्टतया परमात्मोपासनप्रतिपादकमिति पेटिकाद्वय द्रष्टव्यम्। उक्तं च सारावल्यां—

विश्वत्रोपासितृणां मितहृदयगुहाक्ष्यन्तरश्चिन्त्य उक्तः
विश्वान्तर्यामितादे विपुलपरिमित. चिन्तनीयस्त्रयेऽथ।
षट्सु ब्रह्मात्मशब्दौ पुरुषपदमपि क्षेत्रतज्ज्ञप्रपञ्च—
व्यावृत्ते विश्वहेतौ प्रकरणनियमान्नामवृत्त्या नमन्ति।

3 तृतीयपादे–अत्राद्यमधिकरणषट्कं दशमं च तत्र तत्रोदाहृत श्रुतिवाक्यानां स्पष्टजीवादिलिङ्गकानां परमात्मपरत्वस्थापनरूपत्वात् एका पेटिका, मध्यगतमधिकरणत्रयं देवताशूद्रयोः ब्रह्मोपासने अधिकारतदभावसमर्थनार्थप्रवृत्तत्वेनान्यविषयत्वात् पेटिकान्तरम् ॥

4 चतुर्थे—आद्यमधिकरणषट्कं सांख्योक्तार्थशङ्काप्रतिक्षेपपरम्। अन्तिमं अधिकरणद्वयं योगसिद्धान्तोक्तार्थप्रतिक्षेपपरं इति पेटिकाद्वय बोध्यम्। अत्रापि आद्याधिकरणद्वयेन कपिलाभिमतप्रधानप्रतिक्षेपः तृतीयेन कपिलाभिमततत्वसंख्याप्रतिक्षेपः चतुर्थेन प्रधानवाचिनः अव्याकृतशब्दस्यापि प्रकृतिद्वारवृत्त्या परमात्मपरत्वस्थापनं पञ्चमषष्ठाभ्यां बद्धमुक्तव्यावृत्तिः अवशिष्टाधिकरणद्वयेन योगादितन्त्रान्तरोक्तनिमित्तमात्रेश्वरनिरासः इत्यवान्तरपेटिकापि ऊह्या ॥

1 द्वितीयाध्यायप्रथमपादे — स्मृत्यधिकरण योगप्रत्युक्ताधिकरणे स्मृतिविरोधपरिहारपरे इत्येका पेटिका अवशिष्टमधिकरणाष्टकं न्यायविरोधपरिहारपरमित्यपरा पेटिका ।। पूर्वत्र स्मृतिमात्रविरोधपरिहारः । उत्तरत्र न्यायविरोधोद्भावनमुखेन प्रवृत्तस्मृतिविरोधस्य परिहारः ।

2 द्वितीयपादे—अत्राद्यधिकरणसप्तकं सौगतादिपरपक्षप्रतिक्षेपपरत्वात् एकपेटिकान्तर्गतम् । अष्टमं तु पञ्चरात्रतन्त्रप्रामाण्यसमर्थनपरमित्यपरा पेटिका ।।

यद्वा पञ्चरात्रतन्त्रस्याप्यप्रमाण्य ये वदन्ति, तद्वादस्यापि परपक्षत्वात् तत्प्रतिक्षेपोऽत्र क्रियते इति सर्वमप्यधिकरणं परपक्षप्रतिक्षेपपरं इत्येकैव पेटिका । तदुक्तं सारावल्यां—

प्रामाण्यं कर्मकाण्डस्मृतिनयवशतः सात्वतस्यापि सिद्धं
पादेऽस्मिन् सङ्गतिश्च प्रतिमतदमने नास्त्यमुष्येति चेन्न ।
प्रत्यर्थित्वं विरोधभ्रममपनयता पञ्चरात्रस्य वार्यं
दुस्तर्काद्युत्थितोक्त्या तदितरसमयेष्वित्यनुस्यूतसिद्धिः ।।

अयमाशयः—परमताप्रमाण्यस्थापनार्थं प्रवृत्तोऽयं पादः । अत्र प्रामाण्यस्थापनं कथं सङ्गतं इति शङ्का । अस्याः एवमत्र परिहारः । सामान्यत. कस्यचिदर्थस्य प्रतिपादनेपि तदपवादतयाप्यन्यार्थप्रतिपादनं युक्तम् । यथा भेदनिरूपणस्याध्यायस्य द्वितीयस्यान्ते शाखान्तराधिकरणे तदपवादतयाऽभेदप्रतिपादनम् । यथा वा प्रकृतिविशेषनिर्धारणार्थे अष्टमाध्याये अन्ते तदपवादतया दर्वीहोमानां प्रकृत्यभाव निरूपण तथा अप्रामाण्यापवादतया प्रामण्यनिरूपणमिह सङ्गतम् । अपवादे सति तदनुक्तौ पादस्य न्यूनतापत्तिरिति ।। अत्राप्यतृप्तेन अनुस्यूतार्थापेक्षिणा शङ्काया कृतायां अस्याप्यधिकरणस्यानुस्यूतार्थबोधने तात्पर्यमस्तीति बोधनाय सारावलिः ।।

अत्र पादे सर्वेष्वप्यधिकरणेषु सर्वाणि सूत्राणि सिद्धान्तसूत्राणि । अस्मिन् पंचरात्राधिकरणे 'उत्पत्त्यसंभवात् , न च कर्तुः करण, इति सूत्रद्वय पूर्वपक्षसूत्रं, विज्ञानादिभावे वा तदप्रतिषेधः, विप्रतिषेधाच्च;

सूत्रद्वयं सिद्धान्तसूत्रं, इति विपर्यासो वर्तते। तत्कथं एकरूपत्वमिति शङ्का। अस्यैवं परिहारः—सर्वमपि सिद्धान्तसूत्रमेव। इयमत्राधिकरण रचना—पञ्चरात्रं वैदार्थविरोधि उताविरोधीति शङ्का—विरोधीति पूर्वपक्षे उत्तर प्रथमसूत्रद्वयम्। तस्य विरोधित्वे जीवस्योत्पत्तिः जीवान्मनसश्चोत्पत्तिश्चाङ्गीकृता स्यात्। तत्तु न युक्तम्। एवं आशङ्कापरिहारे कृते जीवोत्पत्तिबोधकत्वेन जीवान्मनसश्चोत्पत्तिबोधकत्वेन च मतान्तरवत् पञ्चरात्रस्याप्यप्रामाण्यं स्यात्। पूर्वमीमांसास्मृत्यधिकरणविरोधश्च इत्याशङ्कायां उत्तरसूत्रप्रवृत्ति. इति न कोपि दोषः॥

आद्यमधिकरणद्वयं कल्पितवस्तूपादानभावप्रतिक्षेपपरमित्येकपेटिकान्तर्गतम्। यद्वा—प्रथमं रचनानुपपत्त्यधिकरणं सप्तमं पशुपत्यधिकरणं च एकपेटिकान्तर्गत प्रधानकारणत्वनिरासपरत्वात्। प्रधानकारणत्वाभ्युपगमसाम्यात् प्रथमाधिकरणानन्तरं सप्तमाधिकरणस्य कुतो न प्रवृत्तिरितिचेत् पाशुपतमतस्य सौगतार्हतमतात् अत्यन्तबेदबाह्यत्वेन न जघन्यत्वसूचनार्थमित्यवधारय। तत वैशिषिकमतनिरासकं महद्दीर्घाधिकरणं, सौगतमतनिरासार्थकाधिकरणत्रयं आर्हतमतप्रतिक्षेपक एकस्मिन्नसभवाधिकरणं परमाणुकारणवादनिरासपरत्वादेका पेटिका।

3 तृतीयपादे — पूर्वमधिकरणत्रयं उत्पत्तिविषयकविचाररूपत्वादेकपेटिकान्तर्गतम्। अवशिष्टाधिकरणचतुष्टय जीवस्वरूपतद्गत विशेषादिविचारपरत्वादन्या पेटिका॥

4 चतुर्थे — अधिकरणत्रयं इन्द्रियाणां उत्पत्तिसंख्यापरिमाणबोधनपरत्वादेका पेटिका। अथ वायुक्रियाधिकरणं, श्रेष्ठाणुत्वाधिकरणं सप्तमं इन्द्रियाधिकरण चैकपेटिकान्तर्गतम्। आद्याधिकरणत्रयेपि प्राणस्यैव विचार्यमाणत्वात् 'त इन्द्रियाणि तद्व्यपदेशात् अन्यत्रश्रेष्ठात्' इति श्रेष्ठप्राण व्यतिरिक्त सर्वेषामिन्द्रियत्वोक्तेः तस्यानिन्द्रियत्वस्थापनेन तस्यापि श्रेष्ठप्राणविषयकं विचारपरत्वमिति ध्येयम्। मध्यपतित षष्ठं ज्योतिराद्यधिष्ठानाधिकरणं तु प्रसाङ्गिक देवताद्यधिकरणमिव सज्ञामूर्तिक्लृप्त्यधिकरण तु पृथक् पेटिका।

3–1 तृतीयाध्यायप्रथमपादे अधिकरणषट्कं विद्यते । अत्र पेटिकाद्वयं, आरोहणपेटिका अवरोहणपेटिकाचेति । आरोहणावच्छेदेन जीवस्य दोषप्रतिपादिका आरोहणपेटिका, अवरोहणावच्छेदेन दोषप्रतिपादिका अवरोहणपेटिका । प्रथमं तदन्तरप्रतिपत्त्यधिकरणं आरोहणपेटिका, शिष्टमधिकरणपञ्चकं अवरोहणपेटिका । आरोहणं धूम रात्रि अपरपक्षदक्षिणायनषण्मास पितृलोक आकाशचन्द्रक्रमेण, अवरोहणं तु चन्द्रमसः स्थानात् अकाशवायुधूमाभ्रक्रमेण ।। एकस्यामपिपेटिकायां एकमपि वस्तु निक्षिप्यते । तथाऽत्रारोहणपेटिका एकाधिकरणरूपा । अत्र बहुभिस्सूत्रैः बह्वर्थप्रतिपादन त्वस्ति ।

3–2 द्वितीयपादेऽपि पेटिकाद्वयमेव—जीवस्य सर्वास्ववस्थासु न दोषवत्वप्रतिपादनमुखेन ब्रह्मणः जाग्रत्स्वप्नसुषुप्त्यादि सर्वावस्थाकर्तृत्वरूपमाहात्म्यादिगुणवत्वबोधनपरा चतुरधिकरणी एका पेटिका । अवशिष्टा ब्रह्मणः गुणवत्वबोधनपरा अपरा । तत्र पूर्वाभ्यां उभयलिङ्गाधिकरण अहिकुण्डलाधिकरणाभ्यां ब्रह्मणः दोषबद्धस्तु ससर्गमूलाः ब्रह्मप्रकृतितादात्म्याभिधानमूलाश्च दोषाः परिहियन्ते । अवशिष्टाभ्यामधिकरणाभ्यां परमात्मनः सर्वस्मात्परत्वनिरतिशयौदार्यहानी परिहियेते ।। इत्यावन्तरपेटिकाद्वय बोध्यम् । उक्तं च सारावल्यां 'संसर्गैक्यादिमूलान् परिहरति ततो दोषवर्गानुभाभ्यां हीनत्वौदार्यहानी परमपनयते नीतियुग्मेन नेतुः ।।' इति ।

3–3 तृतीयपादे — विद्याभेदाभेदनिबन्धनगुणानुपसंहारगुणोपसंहारौ विद्यानां परस्परमत्रोच्येते इति भेदसाधकाधिकरणान्येका पेटिका अभेदसाधकान्यधिकरणान्यपरा पेटिका । अभेदसाधकाधिकरणेषु मध्ये भेदसाधकाधिकरणानां भेदसाधकाधिकरणेषु मध्ये अभेदसाधकाधिकरणानां च प्रवृत्तिः सङ्गत्यतिशयादिति निष्कृष्टव्यम्। 'इदानी गुणोपसहारानुपसहारविकल्पनिर्णयाय भेदाऽभेदचिन्ता प्रस्तूयते' इति श्रीमद्भाष्यम् ।। कार्यख्यानाधिकरणं वेधाद्यधिकरणं एवं अन्यच्च प्रासङ्गिकं बोध्यम् ।

3–4 चतुर्थपादे—पुरुषार्थाधिकरणं स्तुतिमात्राधिकरणं पारिप्लवार्थाधिकरणचैका पेटिका, विद्याया फलश्रुतेः प्रतर्दनो हवै दैवोदासिः इत्यादीनां वेदान्तेषूक्तानां रसतमत्वप्रतिपादकवाक्यानां च, आख्यानानां च स्तुतिरूपत्व खण्डनात् । अत्र प्रथमाधिकरण साक्षात् सङ्गतम् । अनन्तराधिकरणद्वयं प्रासङ्गिकम् ।। ततः अग्नीन्धनाद्यधिकरण, सर्वापेक्षाधिकरण शमदमाद्यधिकरण सहकार्यन्तरविध्यधिकरण-अनाविष्काराधिकरणानि कर्मविशेषाणां ब्रह्मविद्याङ्गत्वप्रतिपादन पराणीत्यपरा पेटिका । सर्वान्नानुमत्यधिकरण प्रासङ्गिकमित्यन्या पेटिका विहितत्वाधिकरणमपि तथा । विधुरतद्भूताधिकरणद्वय विधुर पतितयोः ब्रह्मविद्याया अधिकारतदभावस्थापनपरं पेटिकान्तरम् ।। ऐहिकाधिकरणमुक्तिफलाधिकरणे अङ्गनिष्ठासिद्धिसमयनिरूपणपरे इत्येका पेटिका ।।

4–1 चतुर्थाध्याये प्रथमपादे—आवृत्त्यधिकरण आत्मत्वोपासनाधिकरणं आसीन्नाधिकरण च एकपेटिका । उपासने विशेषप्रतिपादनपरत्वात् । प्रतीकाधिकरणं आदित्यादिमत्यधिकरण च प्रासङ्गिकम् । सप्तममष्टमंचाधिकरणं उत्तरपूर्वपुण्यपापयोः अश्लेषविनाश प्रतिपादनपरत्वेन एकपेटिका । नवमं दशमं एकादशं च पृथक् पृथक् ।

द्वितीयपादे — अधिकरणान्येकादश । प्रथमाधिकरणादारभ्य अविभागाधिकरणपर्यन्तम् । विद्वदविदुषोः समानाकारोत्क्रान्तिप्रकारप्रतिपादनपरत्वादेकपेटिका । आसृत्युपक्रमाधिकरणं तु मध्ये आक्षेपतः प्राप्तम् ।। तदोकोधिकरणं रश्म्यनुसाराधिकरण च पृथक् पृथक् पेटिका । उपर्यधिकरणद्वयं निशादक्षिणायनमृतस्यापि ब्रह्मप्राप्तिप्रतिपादनपरं पेटिका ।।

4–3 तृतीयपादे — अधिकरणत्रयं अर्चिरादिमार्गप्रकारनिर्णयरूपत्वेन एकपेटिका । चतुर्थं पञ्चमं च पृथक्पृथक् ।।

4–4 चतुर्थपादे—अत्र षडधिकरणानि सन्ति, प्रथममधिकरणत्रयं एकपेटिका। परं ज्योतिरूपसंपन्नस्य स्वस्वरूपाविर्भावविचारपरम्।

द्वितीयमधिकरणत्रयं स्वच्छन्दकैकर्यभोगाभिधानपरमपरा पेटिका इति।। तदुक्त सारावल्याम्—

स्वाविर्भावोऽत्र चिन्त्यः त्रिभिरधिकरणै; छन्दवृत्तिस्त्रिभि
श्चेत्येवं द्वे पेटिके स्त. उभयमिदं नोपधेरीशनिघ्नम् ।। इति ।।

एवमत्र तत्तन्मताचार्याः विद्वांसश्च स्वस्वप्रतिभातिशयावलम्बनेन सूत्रभेदाधिकरणभेदकल्पनमिव पेटिकाविभागभेदमपि कल्पयेयुः परं तु सर्वोपि विभागः अन्ततः पूर्वोक्तविभागे एव पर्यवस्यतीति नातीव विचारविषयोऽयम्। एकाकारतया स्थितायाः उपनिषदः सूत्र जातस्य भगवद्गीतायाश्च हि स्वबुद्धिबलात् पदच्छेदमन्यथा निर्धार्य अर्थभेदं वर्णयन्ति विद्वांसः। अविभागो वचनात्' इत्येकाकारमेव सूत्रम्। अत्र हि वचनात्, इति च अवचनात् इति वा पदच्छेदः कर्तुं शक्यते। उभयथाप्यर्थे साङ्गत्यमपि भवति। तदत्र श्रीमद्भाष्यम्—

एव श्रुतिसूत्राकारभेदे च वाक्यवैलक्षण्ये च स्थितेऽर्थं वदता किमु वक्तव्यमिति ।।

26. सङ्गतिविभागः

एवमस्मिन् शारीरके नये पेटिकाविभागं पूर्वाचार्य सप्रतिपन्नया दिशा अब्रूमहि। अथ सङ्गतिविभागं सगृह्णीमः—

शास्त्र काण्ड द्विक अध्याय पाद पेटिका अधिकरणरूप सबन्धभेदेन सप्तविधा सङ्गतयः। जिज्ञासाधिकरणानन्तरं जन्माद्यधिकरणारभे इमाः सङ्गतयः एवमुपपादनीयाः ।। उभयोः वेदार्थविचार रूपत्वात् शास्त्रसगतिः। वेदान्तार्थविचाररूपत्वात् काण्डसङ्गतिः। कारणविषयत्वात् द्विकसङ्गतिः। कारणविषयकवाक्यतर्करूपत्वादध्याय सङ्गतिः। अयोगव्यवच्छेदविश्रान्तेः पादसङ्गतिः। शास्त्रार्थार्थत्वात् पेटिकासङ्गतिः। एवं तत्र तत्र सङ्गतिप्रकारः उपपादनीयः।। एकाधिकरणविचारानन्तरं अन्याधिकरणारम्भे अधिकरणसङ्गतिर्वाच्या। नासङ्गतं प्रपुञ्जीत इति न्यायात्। नैयायिकास्तु—एवं विभजन्ति—

सप्रसङ्ग उपोद्घातः हेतुताऽवसरस्तथा ।
निर्वाहकैक्यकार्यैक्ये षोढा सङ्गतिरिष्यते ।। इति ।

वेदान्तिनस्तु एवमलाशेरते—असङ्गतं किमपि न वक्तव्यमिति सर्वेषां संप्रदायः । मीमासा तु भिन्नरूपेण विभक्ता । भिन्नभिन्न प्रकरणगत भिन्नभिन्नवाक्यान्यादाय विचारार्थं प्रवृत्ताधिकरणपुञ्जरूपा । तत्र कं सङ्गतिविशेष पुरस्कृत्य एकाधिकरणानन्तरं अन्यस्याधिकरणस्य प्रवृत्तिः इत्याकांक्षा जायते—तदर्थं प्रसङ्गादि सङ्गतिः पुरस्करणीया—

प्रसङ्ग, अवसर, आक्षेप, दृष्टान्त, प्रत्युदाहरण ।
अपवाद, अतिदेश, उपोद्घातरूपेणाष्टविधा सङ्गतिः ।।

1 उपस्थितस्योपेक्षानर्हत्वं प्रसगः । संगत्यन्तराभावस्थले सुलभोपपादनेयं, अत एव प्राथम्यम् । 2 स्थानप्राप्तिरवसर. । 3 पूर्वोक्तार्थस्यान्यथाकरणसूचक भवेत् इत्यादि शब्दाभिव्यङ्ग्यः आक्षेप । 4 पूर्वाधिकरणन्यायमुपजोव्य स्थलान्तरेपि तथाविधे पूर्वपक्षे दृष्टान्त संगतिः । 5 पूर्वाधिकरणसिद्धयुक्त्यप्रसरणात् प्रकारान्तराविष्करण प्रत्युदाहरणम् । 6 पूर्वाधिकरणोपात्तविषयान्तर्गते क्वचित् सिद्धान्तस्यान्यथोक्तौ अपवादसंगतिः । 7 यत्राधिकरणे पूर्वाधिकरणोक्तपूर्वपक्ष सिद्धान्तावेव अधिकाशङ्कापरिहारपूर्वकं उच्येते तत्र अतिदेशसंगतिः । 8 प्रकृतसिद्धचर्थविचारः उपोद्घातसंगतिः इति तत्तत्स्वरूप बोध्यम्। एवं अन्या अपि काश्चित्सगतय प्रकरणवलेनानन्तर्यप्रयोजकाः तत्र-तत्रोदाहार्याः ।

27 अधिकरणलक्षणम् ।

अथ अधिकरणस्वरूपं पर्यालोचयाम.—
अधिकरणं पञ्चांगमिति वदन्ति ।
विषय. सशयश्चैव विचारो निर्णयस्तथा ।
(विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम्)
प्रयोजनं च पञ्चाङ्गं प्राञ्चोऽधिकरण विदुः । इति ।

अधिकरण दशागमित्यपि केचिदाचार्याः आशेरते—
संगतिर्विषयश्चैव संशयोत्थानकारणम्
सशयस्य प्रकारश्च तदर्था च विचारणा।
तस्याः फलफलित्वं च न्यायौ द्वौ पक्षयोः द्वयोः
निर्णयस्तत्फल चेति बोध्यानि अधिकृतौ दश ।। इति ।
उक्तं चेदं मीमांसापादुकायां श्रीमद्वेङ्कटनाथैः—
आहुश्चान्ये दशागान्यधिकरणगमे वेद्यमाद्यं तथाऽर्थे
सशीति तन्निदान विविधमपि तथा संगतेश्च प्रकारम् ।
तादर्थ्यार्थि विचार फलफलिभवनं पक्षयो न्याययुग्मं
निर्णीति तत्फलञ्चाप्ययमपि निपुणन्यायविस्संप्रदायः इति
अत्राधिकरणेषु विषयः विषयवाक्यरूपतयैव भाव्यः इति
न निर्बन्धः। सशयास्पदस्सर्वोपि विषयः ।।

28. सूत्रसंख्या प्रतिपादमधिकरण संख्या च ।

अत्र शारीरके 'अथातो ब्रह्मजिज्ञासा' इत्यारभ्य 'अनावृत्तिः शब्दात् अनावृत्तिः शब्दात्' इति सूत्रपर्यन्तं स्थितानां सूत्राणां अधिकरणानां च सख्या मतभेदेन भिद्यते अध्यायपादभेदस्तु सर्वमतेऽप्येकरूप एव। न तत्र मतस्थाः विवदन्ते। अधिकरणसंख्याभेदे सूत्रसंख्याभेदे सूत्रान्यथापाठभेदे च परं बहुलं विवादः परिदृश्यते। पूर्वकाले तालपत्रेष्वेव ग्रन्थाना विलेखनमासीत्। संप्रति पत्रादिलाभेन मुद्रणादिसौकर्यसत्वेन च मतानां प्रचारप्रचय निव्याभिवृद्धः। न तथा पूर्वकाले ग्रन्थानां प्रचारः। तालपत्रविलिखितोपि ग्रन्थः प्रचारापचयात् तालपत्रशैथिल्याच्च कालक्रमेण क्वचित् क्वचित् लुप्तोऽभवत्। वैयाकरणग्रन्था अपि क्वचित् क्वचित् अजभक्षिताः इत्यपि सप्रदायविदो वदन्ति। अक्षराणि च तत्र तत्र मलिनानि चासन्निति निर्विवादम्। तेन शोधकाना बुद्धिदौर्बल्यप्राबल्यबलेन अक्षरभेद पाठान्यथाकरणादि सवृत्तमिति शक्योहम्। केचिदेव तु मेधाविनः पदाक्षराणामावोद्वापाभ्या अयमेव पाठः समीचीनः अय तु न इति ऊहितुं कुशला. समीचीन यथावस्थितं पाठं ज्ञातुं प्रभवन्तीति साप्रत वक्तुम्।

तत्र श्रीरामानुजभाष्यरीत्या सूत्राणां अधिकराणाना संख्या प्रतिपादमधिकरणसंख्या च सारावल्यां स्पष्ट प्रत्यपादि—तद्यथा—

सौत्री सख्या शुभाशीः अधिकृतिगणना चिन्मयी ब्रह्मकाण्डे
तादर्थ्यैऽनन्तरत्वेऽप्यधिकरणभिदा नाल्पसारैः प्रकल्प्या ।
अक्षोर्म्याशाहिकाष्ठाद्विरदमुनिवसूर्म्यद्रितत्त्वातिशक्व-
र्येक्षैरक्षैः प्रयाजैः इहभवति रसैः पादनीतिप्रबन्धः ।।

पञ्चचत्वारिशदधिका पञ्चशती सूत्रसंख्या 545 ।

षट्पञ्चाशदधिकं शतं अधिकरणसख्या 156 ।

1 अक्षाण्येकादश प्रथमपादे, द्वितीये ऊर्मय षट् । तृतीये आशा—दश। चतुर्थे अहयः महासर्पाः अष्टौ। पञ्चमे काष्ठा—दश—षष्ठे काष्ठा—दश—षष्ठे द्विरदाः दिग्गजाः अष्टौ । सप्तमे—मुनयः सप्त । अष्टमे—वसवः अष्टौ । नवमे—ऊर्मयः षट् । दशमे—अहयः अष्टौ। एकादशे—तत्त्वानि षट्विंशतिसख्याकानि । द्वादशे—अतिशक्वरी पञ्चदश । त्रयोदशे—अक्षाण्येकादश । चतुर्दशे—अक्षाण्येकादश—पञ्चदशे—प्रयाजा. षट्। षोडशे—रसाः षट् । एवं प्रतिपादमधिकरणानि निबद्धानि दृश्यन्ते ।।

अथ सुखग्रहणाय केषु केषु पादेष्वधिकरणसख्यासाम्यमस्तीति एतत्प्रदर्शयामः—

प्रथमाध्याय प्रथमपादे, चतुर्था...प्रथमे द्वितीये च—11 अधिकरणानि ।
प्रथमध्याय द्वितीयपादे, तृतीयाध्याय प्रथमे
चतुर्थाध्याये चतुर्थपादे 6 अधिकरणानि ।
प्रथमाध्यायतृतीये द्वितीयप्रथमे 10 अधिकरणानि ।
प्रथमाध्याये चतुर्थपादे, द्वितीयाध्यायद्वितीये
द्वितीयचतुर्थे, तृतीयाध्यायद्वितीयपादे 8 अधिकरणानि ।

अवशिष्टपादेषु नियतैवाधिकरणसंख्या – साम्य नास्ति । तद्यथा—

द्वितीयाध्याय तृतीयपादे 7 अधिकरणानि ।
तृतीयाध्याय तृतीयपादे 26 अधिकरणानि ।

तृतीयाध्याय चतुर्थे 15 अधिकरणानि ।
चतुर्थाध्याय तृतीयपादे 5 अधिकरणानि ।।

एवमस्मिन् शारीरके सिद्धान्तसूत्रसख्या पूर्वपक्षसूत्रसंख्या गुण-सूत्रसंख्या पूर्वपक्षोपक्रमसूत्रसंख्या इतरमुनिमतप्रकाशसूत्रसख्याचेति विभागोपि यथायथं ज्ञेयः ।

29. औपनिषदविद्याः ।

शारीरकेऽस्मिन् तत्रततत्राधिकरणे औपनिषदविद्याः प्रदर्शिताः ताश्चार्वाचीनफलकाः मोक्षफलकाश्चेति द्विविधाः । सूत्रकारेणापि, कासांचित् विद्यानां मुक्तिफलकत्वं कासांचित् ऐहिकफलकत्वचेति प्रादर्शि । विकल्पोऽविशिष्टफलत्वात् काम्यास्तु यथाकामं समुच्चीयेरन् नवा पूर्वहेत्वभावात् इति सूत्रद्वयेन । एवं 'ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात् 'एव मुक्तिफलानियमः' इति सूत्राभ्यामप्ययमर्थः प्रपञ्चितः।। तत्राधिकरणक्रमेण विद्याः प्रदर्शयाम.—

1-1-5	ईक्षत्यधिकरणे–सद्विद्या	1
1-1-6	आनन्दमयाधिकरणे–आनन्दमयविद्या	2
1-1-7	अन्तरधिकरणे-उद्गीथहिरण्मयपुरुषदृष्टिः	3
1-1-8	आकाशाधिकरणे—उद्गीथाकाशदृष्टिः	4
1-1-9	प्राणाधिकरणे—प्रस्तावप्राणदृष्टिः	5
1-1 10	ज्योतिरधिकरणे—गायत्रीविद्या कौक्षेयज्योतिर्विद्या	6-7
1-1-11	इन्द्रप्राणाधिकरणे—प्रतर्दनविद्या	8
1-2-1	सर्वत्रप्रसिद्धयधिकरणे–शाण्डिल्यविद्या	9
1-2-2, 1-3-6, 1-4-1	अत्रधिकरणादौ—नाचिकेतविद्या	10
1-2-3	अन्तराधिकरणे—उपकोसलविद्या, अग्नित्रयविद्या	11-12
1-2-4	अन्तर्याम्यधिकरणे–अन्तर्यामिविद्या (ब्राह्मण)	13
1-2-5, 1-3-1, 1-3-3	अदृश्यत्वदिगुणकाधिकरणादौ— —अक्षरविद्या	14
1-2-6	वैश्वानराधिकरणे—वैश्वानरविद्या	15
1-3-2	भूमाधिकरणे—भूमाविद्या	16

1-3-3, 1-2-5	अक्षराधिकर—गार्ग्यक्षरविद्या	17
1-3-4	ईक्षतिकर्मा—त्रिमात्रप्रणवविद्या	18
1-3-5, 1-3-10	दहराधिकरणे—दहरविद्या	19
1-3-8	मध्वधिकरणे—मधुविद्या	20
1-3-9	अपशूद्रा—सवर्गविद्या, सत्यकामविद्या च	21-22
1-4-3	संख्योपसंग्रहा—ज्योतिषां ज्योतिर्विद्या	23
1-4-5	जगद्वाचित्वा—बालाकिविद्या	24
1-4-6	वाक्यान्वयाधि—मैत्रेयीविद्या	25
2-4-1	'अक्ष हा' इति शतपथब्राह्मणगा श्रुति कारण—चित्याग्नि साधननिरूपणशेषभूता	
3-1-1	पञ्चाग्निविद्या	26
3-2-1	बृहदारण्यकविद्या	27
3-2-5	उभयलिङ्गाधिकरणेऽभिप्रेता माण्डूक्यविद्या, तत्रैव 21-तमे सूत्रे मूर्तामूर्त ब्राह्मणविद्या	28-29
3-3-2	उद्गीथप्राणविद्या—उद्गातृप्राणविद्या च	30-31
3-3-3	ज्येष्ठश्रेष्ठप्राणविद्या	32
3-3-7	अहर्व्याहृतिब्रह्मविद्या, अहंव्याहृति ब्रह्मविद्या च,	33-34
3-3-9	आयुःफलकपुरुषविद्या, न्यासविद्या च	35-36
3-3-12	पर्यंकविद्या	37
3-3-15	उषस्तकहोलविद्या	38
3-3-17	उद्गीथादिविद्या	39
3-3-20	पूर्वविकल्पार्धे—अग्निविद्याः, मण्डलपुरुष मृत्युसादृश्य विद्या, लोकंपृणादृष्टिविद्या च	40, 41-42
3-3-21	जीवात्मोपासना	42
3-3526	यथाश्रयभावाधिक-दर्शनगच्चेतिसूत्रे यज्ञपवमानदृष्टिः	44
3-4-1	पुरुषार्थाधिकरणे 13 तमे सूत्रे ईशावास्यविद्या	45
3-4-7	उषस्त्युपदिष्टविद्याः (1-2-3)	46

एवमत्रोपनिषत्प्रतिपाद्यभूताः मुक्तिफलकाः अर्वाचीनफलकाश्च विद्या याः तासां सर्वासां विचारः कृतः। ब्रह्मप्राप्तिफलकविद्यानामेव विचार कार्यः इति नियमो नादृतः। ज्ञानरूपत्वात्सर्वासामपिविद्यानां निरूपणम्। तदुक्त श्रीमति भाष्ये—

उद्गीथाद्युपासनानि कर्मसमृद्धचर्थान्यपि ब्रह्मज्ञानापेक्षाणि इति इहैव चिन्तनीयानि। तान्यपि कर्मण्यनभिसंहितफलानि ब्रह्मविद्योत्पादकानीति तत्साद्गुण्यापादनान्येतानि सुतरामिहैव सगच्छानि इति ॥

30. पाठभेद अधिकरणभेदादि

मतत्रयेपि अध्यायपादौ न भिद्येते। अध्यायाश्चत्वारः। शास्त्रमिद अध्यायचतुष्टयात्मकं षोडशपादात्मकं च। पूर्वमीमांसायां प्रत्यध्याय पादसख्यानियमं नेच्छन्ति। 5-6-10 अध्यायेषु अष्टौ पादाः अपि सन्ति। अत्र सर्वमतेपि ऐकरस्यमेवैति विशेषः ॥ पादाध्यायान्तिमसूत्रे च नैव वैलक्षण्यं पश्यामः। सर्वत्रैकरूपमेव दृश्यते। पादांते पदस्यावृत्तिः न दृश्यते। अध्यायान्ते तु पदावृत्तिः। शास्त्रान्ते तु सूत्रस्यैवावृत्तिः लक्ष्यते। एव मतत्रयेपि सूत्रसंख्याभेदं अधिकरणसख्याभेद च प्रतिपादमुशन्ति। अत्र क्वचित्क्वचिदेव द्वयोस्साम्यं, त्रयाणा साम्यं नैव अधिकरणसख्यायां सूत्रसंख्यायां वा ॥

प्रथमाध्याय प्रथमपादे वैराग्यपादे विशिष्टाद्वैतिनां च मते अधिकरणसख्याचैकरूपा भवति। वैराग्यपादे सूत्रसंख्याप्येकरूपा। चतुर्थाध्याय प्रथमपादे आवृत्तिपादे चतुर्थचतुर्थे फलपादे सूत्रसख्यात्वेकरूपा। अधिकरणसख्या विभिन्ना। द्वितीयद्वितीये तर्कपादे प्रथमचतुर्थे स्पष्टतरजीवादिलिङ्गकपादे सूत्रसंख्या विभिन्ना। अधिकरणसख्यात्वेक रूपा। प्रथमप्रथमपादेपि सूत्रसख्यैव भिन्ना न त्वधिकरणसख्या। द्वितीय तृतीयपादे उभयलिङ्गपादेपि अधिकरणसख्यैवैकरूपा। चतुर्थद्वितीये उत्क्रान्तिपादेपि अधिकरणसख्यैव एकरूपा। सूत्रसख्या भिन्नैव।

एव विशिष्टाद्वैतिमते द्वैतिमते च प्रथमचतुर्थपादे तृतीय चतुर्थपादे चतुर्थप्रथमपादे च सूत्रसंख्या समाना। अधिकरणसख्यातु भिन्नैव। सर्वस्मिन्नपि पादे त्रिभिन्नैवाधिकरणसख्या। अद्वैतिद्वैतिमतयोः प्रथम-

द्वितीयपादे चतुर्थतृतीयपादे च सूत्रसख्या अधिकरणसख्याचैकरूपा। प्रथमप्रथमे प्रथमतृतीये द्वितीयद्वितीये द्वितीयतृतीये चतुर्थप्रथमे च सूत्रसख्या समाना। नत्वधिकरणसंख्या।

एव प्रतिपाद सूत्राधिकरणसंख्यायाः उक्तक्रमेणाभ्युपगमेपि अध्यायपादसख्याभेदं नैवोशन्ति मतत्रयाचार्या.। मतत्रयेपि अध्यायपादौ न भिद्येते। अध्यायपादविभागमन्यथाऽकल्पयन्तोऽप्याचार्याः अधिकरण सूत्रविभागमन्यथा कल्पयन्ति। कारणं तु जानीमः। आभासहेतुं मनसि निधाय क्वचित्क्वचित्सूत्राणि अधिकरणानि च अन्यथा कल्पयन्ति, कानिचित्सूत्राणि न दृश्यन्ते च। क्वचित् एकमेव सूत्र सूत्रद्वयरूपतां भजति। क्वचिच्च एक सूत्रघटक पदं अन्यसूत्रशेष भवति। सूत्रपाठोपि विपर्यस्तो भवति।

पूर्वकाले मुद्रणादेः प्रसक्ति नैवोदभूत्। यन्त्रादेरभावात्। तालपत्रे केवल विलिख्य रक्षणमकुर्वन्। तत्र वेदानिव सूत्राण्यपि गुरवः शिष्यानध्यापयामासुः। अतस्तालपत्रापेक्षापि नासीत् नितरा तेषाम्। वेदानां इव गीताया इव च दैनन्दिन पारायणं कुर्वन्त एवावर्तन्त पूर्वं महान्तः। अतस्सर्वेषा सूत्रणा मुखास्थीकरणमेवासीत्। यथा च वेदे गीताया च बहुलं पाठभेदः दृश्यते तथा निर्निबन्धन एवात्रापि पाठ भेदः इति वक्तव्यम्।

येचार्वाचीनाः तालपत्रमवेक्षितवन्तः, तेषां तु कालक्रमेण तालपत्र शैथिल्यात् अक्षरमालिन्यात् शोधकबुद्धिदौर्बल्याच्च अक्षरभेदपाठान्यथा करणादि जात इति वक्तुं शक्यम्। अतः उपदेशपरंपरायामेवानादिपाठभेदसत्वात् तथा तथा शिष्यानध्यापयामासुः प्राचीनाः। स्वस्वमत कल्पनायां स्वपक्षस्थापनायां च व्यग्रताप्रयुक्तः पाठभेदः कल्पित इति न वक्तुं शक्यते। तत्र तत्र परिदृश्यमानपाठभेदस्य स्वस्वमतमात्रानुकूलत्वाभावात्। एकमतादृतस्य पाठभेदस्यान्यमतानुकूलार्थवर्णनपरत्वस्यापि संभवात्। अल्पाक्षराणां सूत्राणां अनेकार्थवर्णनक्षमत्वात् स्वस्वमतकल्पितस्यार्थस्य पाठभेदकल्पनामन्तरेणापि सूपपादत्वात्। अतः उपलभ्यमानाः पाठभेदाः नाग्रहेण कल्पिताः इति तु निश्चप्रचम्।

उपदेशकाले यादृशानुपूर्वीविशिष्टतया तैस्तैराचार्यैः सूत्राणि शिक्षितानि तादृशानुपूर्वीविशिष्टतयैव शिष्यैः रक्षितानि पूर्वकाले। पश्चात्तथा तथा तालपत्रेषु लेखनात्; कालक्रमेण तालपत्रशैथिल्यादिभिश्च पाठान्यथाकरणादि संवृत्तमिति निश्चेतव्यम्।

अधिकरणभेदकल्पने तु स्वस्वाभिमतमतव्यग्रतैव प्रयोजिका। सर्वस्मिन्नपि मते सूत्रसंख्यावत् अधिकरणसख्यापि नैकरूपा। एकैकस्मिन्नप्यधिकरणेपि सूत्रसख्या विभिन्नैव लक्ष्यते। यथा एकस्मिन्नेव मते एकैकमप्यधिकरणं एतावत्संख्याविशिष्टसूत्रैरेव भाव्यं इति नियमो नापेक्षितः तथा सर्वमतेपि तत्तदधिकरण तादृशतादृशसंख्याविशिष्ट सूत्रैरेव स्थाप्यं इति निर्बन्धो नाङ्गीकृतः। एकमेवाधिकरणं क्वचिन्मते पञ्चसूत्रात्मकं तदेवान्यमतेषु षड्सूत्रात्मकं सप्तसूत्रात्मकं च भवति। अत एवाधिकरणसंख्याभेदोऽप्यापतितः। अधिकरणनामधेयभेदोऽप्यवर्जनीयोऽभवत्॥

यावद्भिः सूत्रैः अधिकरणक्लृप्तौ विषयसंशयपूर्वपक्षसमाध्यादिकं सूपपादं भवेत् तावद्भिः सूत्रैः अधिकरण व्यवस्था कार्या। एकेनाधिकरणेन विषयचारिताथ्यें तदर्थमन्याधिकरणकल्पनमपि प्रामाणिका न बहुमन्वते।

तत्र भगवद्रामानुजमुनिभिः आदृता अधिकरणकल्पना तु अतिसमीचीना इति श्रीमद्वेकटनाथः स्तौति सारावल्याम्—

अल्पसारैः अधिकरणान्तररचना इतश्मतसिद्धां निरस्यन्
तादर्थ्येऽनन्तरत्वेऽप्यधिकरणभिदा नाल्पसारैः प्रकल्प्या॥ इति।

31. अधिकरणनामधेयकल्पनम्।

अधिकरणनामधेयकल्पनं तु सौत्रपदं विषयवाक्यस्थपदं वाऽनुसृत्य प्रायशः प्रवृत्तं भवति। 'ईक्षतेर्नाशब्दं' इति सूत्रं 'ईक्षत्यधिकरणं इति तस्य नाम'। 'आनन्दमयोऽभ्यासात्' इति सूत्रं—आनन्दमयाधिकरणमिति नामधेयम्। 'प्राणस्तथाऽनुगमात्' इति सूत्रं इन्द्रप्राणाधिकरणं इति नाम। सूत्रे प्राणशब्दो विद्यते, 'मामुपास्व' इति विषयवाक्य-अस्यचेन्द्रेणोक्तत्वात्' इन्द्रप्राणाधिकरणं इति नामकृतमस्य।

अधिकरणस्य। अत्र प्राणाधिकरणमिति नाम्निकृते 'तथा प्राणः इत्यत्र विरोधः स्यात्। एवं तत्र तत्र भाव्यम्। सौत्रप्रथमपदमुपजीव्यैव नामधेयकरण इत्यपि निर्बन्धो नास्ति। समन्वयाधिकरणादौ तथा-अदर्शनात्। देवताधिकरणे पञ्चसूत्राणि विराजन्ते—

तदुपर्यपि बादरायणः संभवात् इति सूत्रप्रारंभः तत्र पञ्चसु सूत्रेष्वपि देवताशब्दो न विद्यते। अथापि देवताधिकरणं इति तस्य नाम। 'हृद्यपेक्षया तु मनुष्याधिकारत्वात् इति पूर्वाधिकरणसूत्रे मनुष्य प्रस्तावात्' तदुपरि इति देवतायाः निर्देशः कृतः इति देवताधिकरणं इति नाम कृतम्॥

एवमपशुद्राधिकरणेपि अथौचित्यपरामर्शेन नामधेयं रचितम्। एवमन्तरधिकरण-अन्तराधिकरण अन्तरत्वाधिकरणवैषम्यं च बोध्यम्।

32. मतत्रयेपि प्रतिपादं सूत्र अधिकरण संख्याभेदः

अथ विशिष्टाद्वैतिमते अद्वैतिमते च पादनाम प्रतिपादं सूत्रसंख्याऽधिकरणसंख्याभेदं प्रदर्शयामः—तत्र विशिष्टाद्वैतिमते

अथ द्वैतिमते	पादनाम	सूत्रसंख्या	अधिकरणसंख्या
1-1	अयोगव्यवच्छेदपादः	32	11
1-2	अस्पष्टजीवादिलिङ्गकपादः	33	6
1-3	स्पष्टजीवादिलिङ्गकपादः	44	10
1-4	स्पष्टतरजीवादिलिङ्गकपादः	29	8
2-1	स्मृतिपादः	36	10
2-2	तर्कपादः	42	8
2-3	वियत्पादः	52	7
2-4	प्राणपादः	19	8
3-1	वैराग्यपादः	27	6
3-2	उभयलिङ्गपादः	40	8
3-8	गुणोपसंहारपादः विद्यानियमनकृत्पादः	64	26

3-4	अङ्गपादः	51	15
4-1	आवृत्तिपादः	19	11
4-2	उत्क्रान्तिपादः	20	11
4-3	गतिपादः	15	5
4-4	फलपादः मुक्तिपादः	22	6
		545	156

अथाद्वैतिमते	पादनाम	सूत्रसंख्या	अधिसंख्या
1-1	स्पष्टब्रह्मलिंगकोपनिषद्वाक्यविचारः	31	11
1-2	अस्पष्टब्रह्मलिङ्गकोपनिषद्वाक्यविचारः	32	7
1-3	निर्विशेषपरवाक्यविचारः	43	13
1-4	छायापरवाक्यविचारः	28	7
2-1	स्मृतिविरोधपरिहारः	37	13
2-2	न्यायविरोधपरिहारः	45	8
2-3	आकाशाद्युत्पत्तिविरोधपरिहारः	53	17
2-4	प्राणाद्युत्पत्तिपादः	22	9
3-1	वैराग्यपादः	28	6
3-2	स्वप्नाद्यवस्थाविचारपरपादः	41	8
3-3	विज्ञानभेदाभेदविचारपरपादः	66	36
3-4	पुरुषार्थसाधनविचारः	52	17
4-1	ज्ञानावृत्तिपादः	19	14
4-2	उत्क्रान्तिपादः	21	11
4-3	देवयानक्रमपादः	15	6
4-4	फलपादः	22	7
		555	190

अथ द्वैतिमते	पादनाम	सूत्रसंख्या	अधिकरणसंख्या
1-1	प्रायेणान्यत्रप्रसिद्धशब्दानां परे समन्वयपादः	31	12
1-2	लिङ्गात्मकानां शब्दानां विष्णौ प्रवृत्तिदर्शनपादः	32	7
1-3	अन्यत्र प्रसिद्धशब्दाना विष्णौ समन्वयपादः	43	14
1-4	श्रुतिलिङ्गादिभिः विष्णावेव समन्वयपादः	29	7
2-1	युक्त्यविरोधः	38	11
2-2	मतान्तरनिराकरणपादः	45	12
2 3	आकाशादीनां विष्णोरुत्पत्तिः	53	19
2-4	प्राणाद्युत्पत्तिः	23	13
3-1	वैराग्यार्थं गत्यादिनिरूपण	29	20
3-2	भक्तिपादे भगवन्महिमोक्तिः	42	20
3-3	उपासनापादः	68	42
3-4	ज्ञानसामर्थ्यपादः	51	11
4-1	कर्मनाशाख्यफलपाद.	19	22
4-2	देवमोक्षदेवोत्क्रान्तिपादः	22	10
4-3	मार्गगम्यनिरूपणपादः	16	6
4-4	भोगपादः	23	11
एवं मतत्रयेपि–अनन्तरं–एव प्रतिपादमित्यादि		564	223

33. मतत्रयेपि पाठभेदप्रदर्शनम्

शाङ्करभाष्ये सूत्रपाठभेदः श्रीभाष्यविलक्षणः तत्तत् स्थलेषु प्रदर्श्यते ।

1-1-8 प्रतिज्ञाविरोधात् इति सूत्रं न विद्यते, हेयत्वाबचनाच्च इति चकारार्थत्वेन एतत्सूत्रार्थः शांकरभाष्ये प्रादर्शि मध्वभाष्येपि नेदं पृथक्सूत्रम् ॥

1-1-25 तथा चेतोर्पणनिगमादित्यत्र निगदादिति शाकरपाठः ।

1-2-15 सुखविशिष्टाभिधानादेव च इति सूत्रानन्तरं अत एव च स ब्रह्म इति सूत्रमुपेक्षितं शांकरे माध्वे ।

1-2-19 अन्तर्याम्यधिदैवधिलोकादिषु इत्यत्र अधिलोक पदं नास्ति शाङ्करे। उत्तरसूत्रस्थं शारीरश्चेति पद उभयेपिहीत्युत्तरसूत्रारंभे योजितम् । मध्वभाष्येपि इत्थमेव शब्दादिभ्योऽन्तः प्रतिष्ठानाच्च नेति इति सूत्रे प्रथमचकारो नास्ति ।

1-3 नानुमानमतच्छब्दात् इति पृथक्सूत्रं प्राणभृच्च इति च । एवं माध्वेऽपि । 'अनुकृतेस्तस्य च' इत्यनन्तरसूत्रे 'अपि स्मर्यते' इत्यत्र अपि च' इति चकारोऽधिको दृश्यते । अपशूद्राधिकरणे 'क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात् इति एक सूत्रं कृतम् ।' श्रवणाध्ययनार्थ प्रतिषेधात् स्मृतेश्च इत्यपि सूत्रद्वयमेकीकृतम्' मध्वभाष्येऽप्येवम् ॥

1-4-26 'आत्मकृतेः परिणामात्' इत्येकं सूत्र, माध्वेपि ।

2-1-11 तर्काप्रतिष्ठानादपि अन्यथाऽनुमेयमिति चेदेवमप्यनिर्मोक्ष प्रसङ्गः इति सूत्रद्वयं एकीकृतम् । माध्वेऽप्येवमेव, परं तु तर्काप्रतिष्ठानादपि इत्यपि शब्दो नास्ति ।

2-1-18 असद्व्यपदेशान्नेतिचेन्न धर्मान्तरेण वाक्यशेषात् इति पर्यन्तमेक सूत्रं । 'युक्तेः शब्दान्तराच्च' इति पृथक् माध्वेपि । न कर्माविभागातिचेन्नानादित्वात्'-इति पृथक् उपपद्यते चाप्युपलभ्यते च' इति पृथक्सूत्रम् ।

2-2-1 रचनानुपपत्तेश्च नानुमान इति पृथक्, प्रवृत्तेश्च इत्यपरं सूत्रं माध्वेपि । 'इतरेतरप्रत्ययत्वादितिचेन्नोत्पत्तिनियतत्वादिति सूत्रपाठोपि विलक्षणः । न भावोऽनुपलब्धेः इति सूत्रानन्तरं क्षणिकत्वाच्च इत्येकमधिकं सूत्रं माध्वेपि ।

2-3-3 गौण्यसंभवात् इति पृथक् शब्दाच्च इति पृथक्। प्रतिज्ञाहानिरव्यतिरेकात् शब्देभ्यः इत्येकीकृतम्। पृथिव्यधिकाररूप-शब्दान्तरेभ्यः इति चैकीकृतम्। एवं माध्वेपि। व्यतिरेको गन्धवत् इति पृथक्। तथा च दर्शयतीति पृथक् उपादानात् विहारोपदेशाच्च इति सूत्रस्थाने 'विहारोपदेशात्' 'उपादानात्' इति सूत्रद्वयं लक्ष्यते। माध्वैपि। 'मन्त्रवर्णाच्च' इति चकारः। 'अपि च स्मर्यते' इत्यत्रापि चकारः।। 'प्रकाशादिवन्नैवं परः' इति तुकारं विना शांकरे, माध्वे च ।।

2-4-2 गौण्यसभवात् इति पृथक्, तत्प्राक् श्रुतेश्च इत्यपि पृथक् माध्वेऽप्येवमेव। परं तु सूत्रद्वयमध्ये 'प्रतिज्ञानुपरोधाच्च' इति सूत्रमधिकं पठन्ति। ज्योतिराद्यधिष्ठानं तु तदामननात् इति पृथक् प्राणवता शब्दात् इति पृथक् सूत्रद्वयं कृतम्। माध्वेपि।

3-1-4 अपि च सप्त इति चकारोऽधिकः।

3-1-5 तत्रापि च तद्व्यापारादविरोधः इति अधिकः चकारः। माध्वेप्येवमत्राधिकश्चकारः। अन्याधिष्ठितेषु पूर्ववदभिलापात् इति बहुवचनपाठः।

3-2-3 मायामात्रं तु कात्स्र्येनानभिव्यक्तस्वरूपत्वात् इति सूत्रा नन्तरमेव सूचकश्च हि श्रुतेराचक्षते च तद्विदः इति सूत्र माध्वेपि।

3-2-12 न भेदादिति चेन्न प्रत्येकमतद्वचनात् इति नञ् आरंभे अधिकः। माध्वेपि।

3-2-20 वृद्धिह्रास.....एव, इति पृथक्। दर्शनाच्चेति पदं माध्वैपि।

3-2-24 अपि च संराधने इति चकारोऽधिकः।

3-3-2 भेदान्नेतिचेत् नैकस्यामपि। अत्र द्वितीयो नञ् अधिकः।

3-3-3 स्वाध्यायस्य तथात्वे हि इति सूत्रे 'तथात्वेन' इति तृतीयान्तपाठः। माध्वेपि।

3 3-24 पुरुषविद्यायामपि इत्यत्र अपिशब्दस्थाने इवशब्दः ।

3-3-31 अनियमः सर्वेषां इत्यत्र सर्वासां इति स्त्रीलिङ्गपाठः ।

3-3-25 अन्तरा भूतग्रामवत् स्वात्मनः इति पृथक्सूत्रं, अन्यथा भेदानुपपत्तिरितिचेन्नोपदेशान्तरवत् इति पृथक् । 'उपदेशवत्' इति पाठश्च ।

3-3-47 विद्यैव तु निर्धारणात् इति पृथक्, दर्शनाच्च इति पृथक् माध्वेऽपि ।

3-3-54 व्यतिरेकस्तद्भावभावित्वादित्यत्र तद्भावाभावित्वादिति पाठ. ।

3-4-24 तथाचैकवाक्योपबन्धात् इत्यत्र वाक्यतेति तल्प्रत्ययः अधिकः ।

3-4-27 शमदमेति सूत्रे तेषामपीति अपिर्नास्ति, माध्वेपि ।

3-4-45 आर्त्विज्यमित्यौडुलोमिः श्रुतेश्चेत्येकमधिकं सूत्रम् ।

4-2-2 अत एव सर्वाण्यनु इत्यत्र अत एव च इति चकारः अधिकः ।

4-2-12 प्रतिषेधात् इति चेन्न शारीरात् इत्येकं । स्पष्टोह्येकेषां इत्यपर सूत्रम् । माध्वेऽपि ।

4-2-20 अतश्चायनेपि हि दक्षिणे इत्यत्र हि शब्दोऽधिकः ।

4-3-4 आतिवाहिकास्तल्लिङ्गात् इति सूत्रानन्तर उभयव्यामोहात्तत्सिद्धेः इति सूत्रमधिकम् ।

एवं श्रीभाष्यात् शाङ्करे सूत्रपाठभेदः आदृतः । अत्र पदच्छेद, अधिकरणभेदादि विषयभेदविचारभेदः तत्र तत्र द्रष्टव्यः ।

अथ माध्वभाष्यसमतः पाठभेदः प्रदर्श्यतेऽधुना—

1-1 प्रतिज्ञाविरोधात् इति सूत्रमेव नास्ति ।

1-2 अत एव च स ब्रह्म इति सूत्रं न दृश्यते । अन्तर्यामीति सूत्रे अधिलोक इति पदं नास्ति । शारीरश्चोभयेपि हि भेदेनैनमधीयते इति सूत्राकारः शब्दादिभ्योऽन्तः प्रतिष्ठानाच्चेति सूत्रे पुरुषमिति-स्थाने पुरुषविधमिति पठ्यते ।

1-3 नानुमानमतच्छब्दात् प्राणभृच्च इति सूत्रद्वयम् । क्षत्रिय त्वगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात् इत्येकं सूत्रम् । श्रवणाध्ययनार्थ प्रतिषेधात् स्मृतेश्च इत्यन्तं एकं सूत्रम् ।

1-4 वदतीति चेन्न प्राज्ञो हि इति पृथक्, प्रकरणात् इत्यपरम् ज्योतिरुपक्रमात्तु तथाह्यधीयत एके इत्यत्र पञ्चम्यन्तं । जीवमुख्यप्राण-लिङ्गादितिचेत् इति नञ् विहीनः पाठः । न तु नेतिचेदिति । आत्म-कृतेः परिणामात् इति सूत्रद्वयमेकीकृतम् ।

2-1 न विलक्षणत्वात् ..शब्दात् इति सूत्रानन्तरमेव दृश्यते तु इति सूत्रम् । एतदनन्तर अभिमानि. .गतिभ्यां इति सूत्रम् । ततः दृश्यते च' इति सूत्रान्तरम् । तर्काप्रतिष्ठानादप्यन्यथानुमेय...प्रसङ्गः इत्येकं सूत्रं । अपिशब्दोपि नास्ति । सत्वाच्चापरस्य इत्यत्रावरस्येति विद्यते अपरस्य इति स्थाने । 'असद्व्यपदेशान्नेतिचेन्न धर्मान्तरेण-वाक्यशेषात् इति पृथक् । युक्तेः शब्दान्तराच्च इति सूत्रान्तरम् । यथा च प्राणादिः इत्यत्र चकारो नोपलभ्यते । न कर्माविभागा ..... अनादित्वात् इत्येके उपपद्यते चाप्युपलभ्यते इति च सूत्रान्तरम् ।

2-2 रचनानुपपत्तेश्चनानुमान इत्येकं सूत्रम्। प्रवृत्तेश्च इत्यपरम्। अभ्युपगमेऽप्यर्थाभावात् इति सूत्रानन्तरं, पुरुषाश्मवदितिचेत्तथापि, अङ्गित्वानुपपत्तेश्च, अन्यथाऽनुमितौ च ज्ञशक्तिवियोगात् इति सूत्राणां पाठ. । श्रीभाष्ये एतत्त्रितयानन्तर अभ्युपगमेऽप्यर्थाभावात् इति सूत्रम् । अङ्गित्वानुपपत्तेश्च इत्यत्र चकारोपि नास्ति तत्पाठे । इतरे-तरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनियतत्वात् इत्यन्यादृशः सूत्रपाठः । न भावोऽनुपलब्धेः इति सूत्रानन्तर क्षणिकत्वाच्च इति सूत्रान्तरम् । अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषात् इत्यत्र अविशेषादिति पञ्चम्यन्तम् । पत्युरसामञ्जस्यात् इति सूत्रानन्तरं, सम्बन्धानुपपत्तेश्च इति सूत्रान्तर परिदृश्यते ।

2-3 गौण्यसंभवात्, शब्दाच्च इति सूत्रद्वयम् । 'प्रतिज्ञाहानिर-व्यतिरेकात् शब्देभ्यः इत्येकं सूत्र, पृथिवी इति न पृथक्सूत्रं, पृथि-व्यधिकाररूपशब्दान्तरेभ्यः इत्येकं सूत्र, ज्ञोऽत एव इति सूत्रानन्तरं

युक्तेश्च इत्यधिकं सूत्रम् । तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् इत्यत्र तु शब्दो नास्ति । उपादानात् विहारोपदेशाच्च इति सूत्रस्थाने—बिहारोपदेशात्, उपादानात् इति सूत्रद्वितयम् । प्रकाशादिवत्तु नैवं परः इति सूत्रे तु शब्दो नास्ति । प्रदेशभेदादिति चेन्नान्तर्भावात् इत्यत्र भेदशब्दो नास्ति ।

2-4 तथा प्राणाः, गौण्यसंभवात्, प्रतिज्ञानुपरोधाच्च, तत्प्राक् श्रुतेश्च इति सूत्राणां क्रमनिर्देशः । ज्योतिराद्यधिष्ठानं तु तदामननात् प्राणवता शब्दात् इति सूत्रद्वयम् । भेदश्रुतेः वैलक्षण्याच्च इति सूत्रद्वयम् ।

3-1 कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां, यथेतमनेवं च इति सूत्रद्वयम् । तत्रापि च तद्व्यापारादविरोधः इत्यत्र चकारोऽधिकः । तृतीये शब्दावरोधः संशोकजस्य इत्यत्र तृतीये इति सप्तम्यन्तम् । एतदुपरि स्मरणाच्च इत्यधिकं सूत्रम् ।

3-2 मायामात्रं तु इति सूत्रसमनन्तरमेव सूचकश्च इति सूत्रम् । एतत्सूत्रानन्तरं, पराभिध्यानात्तु .....। देहयोगाद्वा सोपि इति सूत्रद्वयपाठ । तदभावो.....आत्मनि च इत्यत्र चकारस्थाने हकारः । स एव तु...विधिभ्यः इत्यत्र तु स्थाने चकारः । भेदादितिचेन्न प्रत्येकमतद्वचनात् इत्यत्र न भेदात् इति नञः प्रथमनिर्देशोऽधिकः । प्रकाशवच्चावैयर्थ्यात् इत्यत्र अवैयर्थ्यं इति न पञ्चम्यन्तम् । वृद्धिह्रास एवम् दर्शनाच्च इति सूत्रद्वयम् । प्रकाशवच्चावैशेष्यम् प्रकाशश्च कर्मण्यभ्यासात् इति सूत्रद्वयम् । सामान्यात्तु इति सूत्रस्थाने दर्शनाच्च इति सूत्रम् । तथाऽन्यप्रतिषेधात् इति सूत्रे अन्यत् इति पृथक्पदत्वेन श्रूयते । अनेन सर्वगतत्व मायामयशब्दादिभ्यः सूत्रनिर्देशः ।

3-3 स्वाध्यायस्य हि तथात्वे न हि इति हि शब्दद्वय तथात्वेन इति तृतीयान्तं च । सववच्च तन्नियमः इति स्थाने सलिलवच्च तन्नियम. इति पाठः । सूत्रान्तरं चेदम् । अन्यथात्वं च शब्दादिति चकारोऽधिकः । व्याप्तेश्च समञ्जस इति स्थाने प्राप्तेश्च समञ्जसं इति पठ्यते । अनियमस्सर्वेषामविरोधः शब्दानुमानाभ्यां इति सूत्रे

अविरोधादिति पञ्चम्यन्तम् । एतदुपरि यावदधिकारमवस्थितिराधिकारिकाणां इति सूत्रम् । अक्षरधियां त्ववरोधः इति सूत्रे अविरोधः इति पाठः । अन्तरा भूतग्रामवत् इति चेत् तदुक्तं इति पाठ. । अन्यथा भेदानुपपत्तिरितिचेन्नोपदेशवत् इति पृथक् । कामात् इतरत्र तत्रचायतनादिभ्यः इति सूत्राकारः । उपस्थितेऽतस्तद्वचनात् इत्यत्र उपस्थितेस्तद्वचनात् इति सूत्रम् । प्रदानवदेव हि तदुक्तं इति हि शब्दो अधिकः । विद्यैवतु निर्धारणात्, दर्शनाच्च इति सूत्रद्वयम् । अनुबन्धादिभ्यः इति पृथक्सूत्रं, प्रज्ञान्तरपृथक्त्ववत् दृष्टश्च तदुक्तं इति पृथक् । दृष्टश्च इत्यत्र दृष्टेश्च इति पाठः । भूम्नः क्रतुवत्...तथा च दर्शयति इति सूत्रपाठः हि स्थाने च शब्दप्रयोगः । न वा सहभावश्रुतेः इति पाठः, व्याख्यान तु अश्रुतेः इति पाठमवलंब्य । मुद्रणादशुद्धिर्वा ।

3-4 नियमाच्च इति चकारोऽधिकः । शमदमादीति सूत्रे तेषामवश्यानुष्ठेयत्वात् इति अपिर्विना पाठः । विशेषानुग्रहं च इति द्वितीया विभक्तिः । अतस्त्वितरत् ज्यायो लिङ्गाच्च इति सूत्रे इतरत् इति पृथक्पदत्वेन न दृश्यते । इतरज्यायः इत्यस्ति । मुद्रणाशुद्धिरित्येवनिश्चीयते । तद्भूतस्य इति सूत्रे नातद्भावः इति स्थाने तद्भावः इति पठ्यते । उपपूर्वमपीति सूत्रे भावमशनवत्तदुक्तं इति पाठ. । आर्त्विज्य सूत्रे परिक्रियते इति पाठः । व्याख्यानेपि ।

4-1 अतोऽन्यापि ह्येकेषामुभयोः इत्यत्र अतोऽन्यदपीत्येकेषामुभयोः इति श्रूयते । भोगेनत्विति सूत्रे सपद्यते इति स्थाने सपत्स्यते इति ।

4-2 तदपीतेः संसार...इति पाठः । प्रतिषेधादितिचेन्न शारीरात् स्पष्टोह्येकेषां इति सूत्रद्वयम्। निशि नेति चेन्न संबन्धात्, यावद्देहभावित्वात् दर्शयति च इति सूत्रद्वयम् । संबन्धश्च इति स्थाने संबन्धात् इति पञ्चम्यन्तम् ।

4-3 आतिवाहिकस्तल्लिङ्गात् इत्यत्र अतिवाहिकः इत्येकवचनान्तम् । एतदुपरि उभयव्यामोहात्तत्सिद्धेः इति सूत्रान्तरम् ।

4-4 संपद्याविर्भावः स्वेन शब्दात् इति पाठः। चितिमात्रेण तदात्मक...इति पाठः। सङ्कल्पादेव च तच्छ्रुतेः इति चकारोऽधिकः। भावं जैमिनिर्विकल्पाम्नानात् इति पाठो दृश्यते। जगद्व्यापारवर्जं प्रकरणादसन्नि.....इति सूत्रद्वयम्। प्रत्यक्षोपदेशान्नेति...इत्यत्र नञ् नास्ति। विकारवर्ति च तथा हि दर्शयति स्थितिमाह दर्शयतश्चैवं प्रत्यक्षानुमाने इति सूत्राकारो दृश्यते।

34. विषयसंशयाद्यूहनम्

बादरायणकृतमिदं शारीरकसूत्रमुपनिषदर्थविचाररूपम्। उपनिषद्विषयवाक्यानि समादाय तत्र संशयोद्भावनपूर्वकं पूर्वपक्षसिद्धान्तादि वर्णयित्वा तेनकस्यचित् न्यायस्य शिक्षणपूर्वकं वेदान्तार्थस्थापनमत्र क्रियते। तत्रैकैकस्मिन्नधिकरणे को विषयः कः संशयः इति तु कण्ठेन सूत्रकारः प्रायशो ब्रवीति। परं तु सूत्रस्थपदपर्यालोचनेन विषयसंशयादिकमाक्षिप्यते। एकैकाधिकरणेपि अयं विषयः अयं संशयः इत्यादि तु श्रीभाष्यतद्व्याख्यानभूतश्रुतप्रकाशिकादिषु सुविस्तरं सुस्पष्टं च प्रदर्शितम्।

न्यायसूत्रे क्वचित् क्वचित् विषयः संशयश्च कण्ठोक्तौ—

35. सद्विद्याप्राधान्यम्।

अत्र सूत्रविषयभूताः दशोपनिषदः—

ईश केन कठ प्रश्न, मुण्डक, माण्डूक्य तैत्तिरीय ऐतरेय छान्दोग्य, बृहदारण्यकाख्याः।

उपनिषदां क्रमस्त्वेवम्। तद्विचाररूपमीमांसाशास्त्रं तु अन्यादृशक्रमं आदृत्य प्रवृत्तम्। प्रथमं तावत् सूत्रकारः सद्विद्यां विचारयति। ईक्षतेर्नाशब्दं इति हि शास्त्रारंभः। अत्र सदेव सोम्येदमग्र आसीत्—तदैक्षत बहुस्यां प्रजायेय इत्यादिविषयवाक्यमुपादीयते-एतदधिकरणस्थ सूत्राणां पर्यालोचने सद्विद्याविषयकविचारमेव सूत्रकारोऽभिप्रैतीति स्पष्टं विज्ञायते। सद्विद्या च छान्दोग्यान्तर्गता। अतः ईश केन...इत्युपनिषत्क्रमं परित्यज्यैव सूत्रकारो बादरायणः बिचारं तनोति। प्रायशः

सूत्रकारः सद्विद्यायामेव दत्तदृष्टि.स्सन् तदनुगुणविषयवाक्यादिक मनसिकृत्य सूत्राणि प्रणिनाय । सर्वब्रह्मविद्यानामपि सद्विद्यैव प्रधानभूता । अतः एतदनुगुणतयैव सर्वविद्यापि नेयेति सूत्रकाराशय ।

कस्याश्चिदुपनिषदः व्याख्याया क्रियमाणायां तदुपनिषदः तात्पर्यं पर्यालोचनीयम् । उपक्रमोपसंहारौ अभ्यासोऽपूर्वता फलम् । अर्थवादोपपत्ती च लिङ्ग तात्पर्यनिर्णये इति तात्पर्यनिर्णायकानि षट्। तानि सर्वाणि अत्रैव सद्विद्याया समूय वर्तन्ते इति सद्विद्या प्रधान भूता । अन्यविद्यादिषु निर्णायकेषु केषाचिदेव सत्वमित्यादरः सूत्रकारस्य सद्विद्यायाम् । अपि च कारण तु ध्येयः इति कारणस्य वस्तुनः तापत्रयातुरैः मुमुक्षुभिः ध्येयत्वमुक्तम्। अत एव अथाऽतो ब्रह्मजिज्ञासा जन्माद्यस्य यतः इति सूत्र चकार । अतः कारण वस्तु किमिति विचारे कारणवस्तुनिर्णयार्थं कारणवस्तुबोधकवाक्यविचार. कर्तव्यो भवति । तत्र छान्दोग्यघटकसद्विद्याऽन्तर्गतकारणवाक्यमेव प्राथम्यं भजति । तद्वाक्यस्यैव पुरोवादित्वात् । अत एव सूत्रकारः बहुषु स्थलेषु छान्दोग्यश्रुतीः प्रमाणयति । इति ।

36 उपनिषत्प्रत्यभिज्ञानम्

सूत्रकारः स्वकृतेषु सूत्रेषु प्रायशः उपनिषद्गतान् शब्दानेव प्रयुङ्क्ते । क्वचिदेव उपनिषत्सूचकशब्दान् । यथा–ईक्षतेर्नाशब्दं स्वाप्ययात् अन्तस्तद्धर्मोपदेशात् अकाशस्तल्लिङ्गात्, ज्योतिश्चरणाभिधानात् सर्वत्र प्रसिद्धोपदेशात् इत्यादीनि सूत्राणि । तदैक्षत स्वमपीतो भवति, य एषोऽन्तरादित्ये । आकाशोहवै ..दिवो ज्योतिर्दीप्यते, सर्वं खल्विदं ब्रह्म इत्यादीनि च तत्तत्सूत्र विषयवाक्यानि । अत्ता चराचरग्रहणात् इति सूत्रं । एतत्सूत्र विषयवाक्ये अत्तृपदं नास्ति । यस्य ब्रह्म च क्षत्र चोभे भवत ओदनः इति विषयवाक्यम् । अत्रौदनोपसेचनसूचितोऽत्ता सूत्रे निर्दिष्टः । तत्रवाधिकरणे गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् इति सूत्रम् । अत्र गुहाहितं गह्वरेष्ठं इति विषयवाक्यस्थ शब्दघटितमेव सूत्रं रचयामास । साचप्रशासनात् इति सूत्रम् । सूर्याचन्द्रमसौ विधृतौ तिष्ठतः इति तत्रविषय-

वाक्यम् । सूत्रे साक्षाच्छब्दो नोपात्तः । परं तु विधृतौ तिष्ठतः इत्यनेन सूचितः प्रशासनशब्दः । रहति इति पर्यायशब्दः । निचाय्य त्वादेवं इत्यत्र विषयवाक्येनेदं पदं प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे इति सूत्रे तस्य प्रियमेव शिरः इत्यादिविषयवाक्यस्थ शब्दाना मेवो पादानं दृश्यते । न प्रतीके न हि सः इत्यादिषु तु मनो ब्रह्मेत्यु-पासीत...स यो नाम ब्रह्मेत्युपास्ते इत्यादि विषयवाक्यसूचितस्य प्रतीकपदस्योपादानम् । एवं तत्रतत्राबधेयम् । द्वितीयाध्यद्वितीय-पादे तर्कपादे इतरमतखण्डनपरे तत्तन्मतसूचकशब्दान् साक्षादेव प्रयुज्य सूत्रप्रणयनम् ।

37. न्यायनिबन्धनरूपत्वम् ।

सूत्रजात सर्वमपि न्यायनिबन्धनात्मक, अतस्सर्वत्र पक्षसाध्य-हेतुनिर्देशः आवश्यकः । क्वचित् पक्षसाध्यनिर्देशः । क्वचित् हेतुमात्र निर्देशः क्वचित् त्रितयनिर्देशश्च । सप्तगतेर्विशेषितत्त्वाच्च साध्य-हेतुनिर्देशः । नात्मा श्रुतेः नित्यत्वाच्च ताभ्यः इत्यादौ साध्य पक्ष हेतुना निर्देशः । उपपत्तेः श्रुतत्वाच्च प्रतिज्ञाविरोधात् इत्यादीनि हेतुमात्रनिर्देशरूपाणि । प्रायशः गुणसूत्राणि हेतुमात्रबोधकान्येव । प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् इत्यत्र साध्यहेतुनिर्देशः । अभि-ध्योपदेशात् इत्यादीनि हेतुमात्रपराणि । योनिश्च हि गीयते इति साध्यहेतुनिर्देशः । एवमेव सर्वेषु सूत्रेष्वनुसन्धेयम् । न्यायशास्त्रे पञ्चावयवत्ववाक्यप्रयोगस्थले प्रतिज्ञाहेतूदाहरणोपनयननिगमनरूपपञ्चा-वयवाक्यानां सर्वेषा प्रयोगः क्वचित् क्रियते, क्वचिच्च हेतुमात्रस्य, क्वचिच्च पक्षसाध्ययोः । तत्र सर्वेषामेव प्रयोगः कार्यः यद्वा केषांचि देवेवबेति नियमोनास्ति । अनियम एव नियमः अस्माकं मते । एवं सूत्रेष्वपि पक्षसाध्यहेतुनिर्देशे नियमो नास्ति । अपि च पक्षादि-निर्देशेपि क्रमो नादृतः । क्वचित्प्रथमं पक्षनिर्देशः, क्वचित्, आदौ साध्यनिर्देशः क्वचिच्च हेतुनिर्देशः आरंभे, इति यथायथं भवति ।। ईक्षत्यधिकरणादौ प्रथमं हेतुनिर्देशः । आनन्दमयाधिकरणादौ प्रथमं पक्षनिर्देशः । भावं तु बादरायणोऽस्ति हि इत्यादौ साध्यनिर्देशः ।

अनावृत्तिः शब्दादित्यादवपि प्रारंभे साध्यनिर्देशः। ईक्षतिकर्मव्यपदेशात् सः इत्यत्र पक्षहेतुसाध्यनिर्देशः। क्वचित् दृष्टान्तमात्रोपादानं, यथा—प्रदानवदेव तदुक्तम् इत्यादौ। अपरत्र साध्यदृष्टान्तनिर्देशः—यथाविभागः इत्यादौ। क्वचित् दृष्टान्तहेतुमात्रोपादानं—यथा—चमसवदविशेषात् इत्यादि।

38. सूत्रशैली।

एवमत्र सूत्रशैली विराजते।

अतिदेशसूत्राणि कानिचित्। पूर्वाधिकरणे कञ्चनार्थविशेषं प्रसाध्यं तेन कञ्चन न्यायमपि शिक्षयित्वा, तेनैव न्यायेनेदमप्यार्थन्तर सिद्धं इति येन सूत्रेण प्रोच्यते, तदतिदेशसूत्रम्। अत एव प्राणः एतेन योगः प्रत्युक्तः, एतेन मातरिश्वा व्याख्यातः इत्यादि। क्वचित् अत एव, एतेन इत्यादि विहाय अतिदेशाच्च इति सूत्रमेव श्रूयते। अतस्सूत्रकारस्य बादरायणस्य सूत्रप्रणयनशैली अनितरसाधारणा अतीव हृदयगमा वरीवर्ति।

सूत्रकरणे लाघवम्

तेजोतस्तथाह्याह इति एकं सूत्रम्। अत्र भगवतो बादरायणस्य सूत्रकृतः.....इत्यादि। 5-ॐ-1-2 ..अधिकाररूपशब्दान्तरेभ्यः—इत्यादौ विचारः।

एवं लघुभूतसूत्रप्रणयने चतुरोपि बादरायणः तदोकोऽग्निज्वलन इत्यादि अतिवृहत्सूत्र चकारेति तु विस्मयावहमेव।

प्रायशः सूत्रकारः पूर्वपक्षसूत्रं सिद्धान्तसूत्र च पृथक् पृथगेव करोति। अन्येषामपि सूत्रकाराणामप्यत्र विषये एकैव शैली। एतादृशी शैलीमनुरुन्धानोषि पूर्वपक्षसिद्धान्तोभयपरत्वसंभावनाभूमिभूतमेकं सूत्रं प्रतनोति। तथा प्राणाः इत्येकं सूत्रम्। अत्रेन्द्रियाणां उत्पत्तिरस्ति न वेति विचार्य निर्धारणं क्रियते। पूर्वं जीवस्यानुत्पत्तिः आकाशादीनामुत्पत्तिश्चवर्णिता। एवं वर्णयित्वा तथा प्राणाः इति वदति। अस्य सूत्रस्य पूर्वपक्षसिद्धान्तोभयपरतयापि व्याख्यानं सङ्गतं भवति। आकाशादिवत् प्राणाः इन्द्रियाणि उत्पद्यन्ते, इति, जीवात्मवत्

इन्द्रियाणि नोत्पद्यन्ते इति प्रकारद्वयपरतया व्याख्यानेपि सूत्राक्षर सांगत्यं भवति क्वचिदेवेयं रीतिः ।

अनेकसूत्रघटितेषु अधिकरणेषु प्रथमं सूत्रे पूर्वपक्षारंभः पश्चात् सिद्धांतारम्भः इति क्रमः । क्वचिरेव तु प्रथमसूत्रे सिद्धांतमेव वा पश्चात् पूर्वपक्षः सिद्धान्तश्चानन्तरैस्सूत्रैः क्रियते । यथा फलाधिकरणे पुरुषार्थाधि करणे च । क्वचित् एकस्मिन्नेव सूत्रे पूर्वपक्षः सिद्धान्तश्चोच्येते । गौणश्चेन्नात्मशब्दात् वदतीति चेन्न प्राज्ञो हि प्रकरणात् । अन्तरा-भूतग्रामवत्स्वा.....इत्यादौ ।

क्वचित् पूर्वपक्षद्वयं सूत्राभ्यां प्रदर्श्य पश्चात्सिद्धान्तः सूत्रैः प्रदर्श्यते—यथा—उभयव्यपदेशात्त्वहिकुण्डलबत् । प्रकाशाश्रयवद्वा तेज-स्त्वात् इति सूत्राभ्यां यादवप्रकाशमतं भास्करमतञ्चोपक्षिप्य, पूर्ववद्वा इति सिद्धान्तं निजं प्राह ।। ब्राह्मेण जैमिनिरुपन्यासादिभ्यः इति मुक्तौ जैमिनिमतं, चिति तन्मात्रेण तदात्मकत्वादित्यौडुलोमिः इत्यौडुलोमि-मतं च प्रतिपाद्य, एवमप्युपन्यासात्पूर्वभावाद् इति स्वमतं प्राह । एवं अभावं बादरिराह ह्येवम् । भावे जैमिनिर्विकल्पामननात् इति पक्षद्वय-मुपपाद्य द्वादशाहवदुभयविधं स्वमतं पश्चान्निर्दिशति। सन्ध्ये सृष्टि राहहि, निर्मातारंचैके, इति पूर्वपक्षः मायामात्रं तु इति सिद्धान्तः । कार्यं बादरिः इति बादरिमत, परं जैमिनिः इति जैमिनिमतं च प्रदर्श्य अप्रतीकालम्बनान्नयतीति स्वमतमुपपादयति । अतो यथायथं तत्र तत्र सूत्रशैली द्रष्टव्या । कचित् स्वमतमप्यन्यमुखेनोपपादयति । अवस्थितेरिति काशकृत्स्नः सुकृतदुष्कृत एवेति तु बादरिः इत्यादौ ।।

39. शास्त्रान्तरपरिचयः ।

उपनिषद्व्याख्यानार्थं प्रवृत्तस्य सूत्रकारस्य सर्वेष्वपि मतेषु अभिज्ञता आवश्यकी । कथमन्यथा तत्तन्मतखण्डनपूर्वकं यथावस्थितोप-निषदर्थं प्रतिपादनं शक्यं भवेत् । अत एव सूत्रकारः तत्र तत्र तत्तन्मतं प्रदर्श्य दोषांश्चोद्भाव्य स्वमत स्थापयति । सर्वेष्वपि शास्त्रेषु परिचय-सत्वेहि तत्र तत्र युक्तत्वायुक्तत्वोपपादनं कर्तुं शक्यम् । अतो न केवलं विशिष्टाद्वैतिमते प्रवीणः । नापि द्वैतिमतमात्रे न वा अद्वैतिमतमात्रे ।

यादव, भास्कर द्वैति, अद्वैति विशिष्टाद्वैतमतानि तत्र तत्र प्रदर्शयन् सूत्रकार स्वकीय विशिष्टाद्वैतिमतमपि स्वरससिद्धं प्रकटीकरोति ।

भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् उभयव्यपदेशात्वहिकुण्डल वत् इत्यादिना यादवप्रकाशमत स्वयमेव खण्डपति । प्रकाशाश्रययवद्वा तेजस्त्वादिति इत्यादिना भास्करमतम् । अंशो नानाव्यपदेशादिति सूत्रे द्वैत्यद्वैतिमतप्रदर्शनपूर्वकं विशिष्टाद्वैतिमतं अतिनिपुणं प्रकटीकरोति । तदनन्यत्वमारम्भणशब्दादिभ्य. यथा च प्रणादिः पटवच्च इत्यादीनि सूत्राण्येव पर्याप्तानि सूत्रकारस्य विशिष्टाद्वैतमतस्थापने ।

जैमिनिमतस्य तन्नामपूर्वकमेवानेकत्र प्रदर्शनात् — तदुक्तं इत्यादिना मीमांसाशास्त्रोक्तन्यायस्यात्र सूचनाच्च, जैमिनिकृतपूर्व-मीमांसाशास्त्र बेदान्तमीमांसापूर्वभागरूपं इति, तत्र स्वस्याधिकावग-मसत्ताच समस्तीति च स्वष्टमेव ज्ञापयति ।

षड् दर्शनानि सन्ति । 1 सांख्यदर्शन, 2 वैशेषिकदर्शनं, 3 बौद्धदर्शनं, 4 जैनदर्शन, 5 पाशुपतदर्शन, 6 पञ्चरात्रदर्शनमिति तेषां नाम । तत्र सांख्यदर्शनं बहुधा खण्डयति दोषोद्भावनेन । शास्त्रा-रम्भ एव तन्मतं निराकरोति ईक्षतेर्नाशब्दमित्यादिना । रचनानुप-पत्तेश्च.....अङ्गित्वानुपपत्तेः पुरुषाश्मवदितिचेत्तथापि पयोम्बुवच्चेत् तत्रापि इत्यादि सूत्राणि रचयतो बादरायणस्य तद्दर्शने अतीव नैपुण्यं ज्ञाप्यते । एतेन योगः प्रत्युक्तः इति योगमत निराकरोति । एतेन शिष्टापरिग्रहा अपि व्याख्याताः इति कणभक्ष, अक्षपाद, क्षपणक-भिक्षुपक्षाः क्षपिताः । महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्यां इति वैशे-षिकमतं निरस्यति। तत्र काणादाः वैशेषिकाः। गौतमप्रवर्तितं न्यायमत तु सूत्रकारो न खण्डयति । उभयोः परमाणुकारणवादसाम्येन वैशे-षिकमतखण्डने न्यायमतमपि खण्डितप्रायमेव । अथापि अपरिग्रहा-च्चात्यन्तमनपेक्षा इति वैशेषिकमतस्याति जघन्यत्वं अब्रवीत् सूत्रकारः। अतो न्यायमतखण्डनं न सूत्रारूढम् । वैशेषिकमतखण्डनमेव सूत्रे । समवायाभ्युपगमाच्च साम्यादनवस्थितेः इत्यादौ । अत एव न्याय-परिशुद्धौ एकतः स्वीकारः अन्यत्र बहिष्कारः इति हेतोः । न न्याय

मत खण्डित इति श्रीदेशिकचरणाः प्राहुः। यद्यपि गौतमेनाक्षपादेन कृत न्यायदर्शनमधीयानस्य गर्दभजन्मप्राप्तिरुच्यते। अधीत्य गौतमी विद्यां गार्दभी योनिमाप्नुयादिति-अथापि अन्यगौतमकृतं दर्शनमन्यत् तत्र विषयभूत.। एतेनाक्षपादेन गौतमेन कृतं न्यायदर्शन न जघन्यम्। तदुक्तब्रह्मार्थस्य वेदान्तिभिः स्वीकारात्। इति महतां प्रवादोपि सत्य एवैति वेद्यम्।

अथ बौद्धमतमपि शतशो निराकरोति। तत्र बौद्धाश्चत्वार.-वैभाषिकाः सौत्रान्तिकाः योगाचाराः माध्यमिकाः इति। तत्र समुदा याधिकरणे वैभाषिकसौत्रान्तिकयो. दूषणम्, उपलब्ध्यधिकरणे योगा चारमतरखण्डनम्, सर्वथाऽनुपपत्त्यधिकरणे माध्यमिकमतदूषणम् इत्यधिकरणत्रये चतुर्विधबौद्धमत खण्डयते सूत्रकारेण। अथ एकस्मिन्न संभवाधिकरणे जैनदर्शनदूषणम्। पशुपत्यधिकरणे पाशुपतमतं निरस्यते। एव पञ्चदर्शनानि निरस्य स्वमतं स्वदर्शन स्थापयत्युत्त-राधिकरणे। एवं सूत्रकारः तत्तन्मतेष्ववगाह्य तत्तत्सर्वशास्त्राणि-चालोढय वेदान्तिमतमेव युक्तिमत् तत्रापि च विशिष्टाद्वैतिमतमेव सर्ववेदान्तसिद्ध लोकव्यवहरानुगुणं निखिलनिःश्रेयससाधनं चेत्यगदत् सयुक्तिकम्।

प्रसङ्गादत्र किञ्चिद्विचार्यते—उत्पत्त्यसभवाधिकरणे विज्ञानादि-भावे वा तदप्रतिषेध· इत्येकं सूत्रम्। तत्र श्रीभाष्यं विज्ञानं चादि-चेति परब्रह्म विज्ञानादि इति। सर्वत्र श्रीभाष्य कोशे आदि इति क्लोबतयैव शब्दो निर्दिष्टः। यद्यप्यादि शब्द पुंल्लिङ्गः। आदीयते अस्मात्कार्यमिति आदिः कारण इति कारणवाची आदिशब्दः पुल्लिङ्गः प्रसिद्धः। अद भक्षणे इत्यतो णिनिप्रत्यये संहर्त्रर्थकं आदि इति रूप नपुसकलिङ्गम्। श्रुतप्रकाशिकायां तु आदि इति क्लीब-तयैव प्रतीकधारणं कृत्वा चैतन्यस्वरूपिणः इति मन्त्रलिङ्गात् भग-वान् वासुदेव परा प्रकृति इति वचनाच्च वासुदेवस्य ज्ञानस्वरूपत्व परमकारणत्वे प्रतिपादिते इति विवृतम्। भावप्रकाशिकायां, मूले विज्ञानं चादि च इति स्थितावपि विज्ञानं च तदादि च इति पाठ-

सद्भावाभिप्रायेण प्रतीक धृत्वा व्याख्यातम्। केचित् तु भावप्रकाशिकास्थं तदादि इति एकं पदं इति निरूप्य वर्णयन्ति। तदादीति बहुव्रीहि समासः। तच्छब्दो विज्ञानपरः। विज्ञानं च इति पृथगुक्ति तद्गुणसविज्ञानत्वद्योतनाय। ततश्च सूत्रे विज्ञानशब्दः विशिष्टज्ञान गुणकपरः, तत् आदि यस्य इति बहुव्रीहिसमासो विवक्षितः विज्ञान चेत्यादिभाष्यं विवरणमात्रम्। सर्वादीनि सर्वनामानि इत्यादौ समुदायिभूतस्यानेकस्य ग्रहणम्। जन्मादीत्यत्रानेक समुदायिघटितसमुदायस्य विवक्षा। एकस्मिन् अनेकधर्मान्वयविवक्षायामपि आदिशब्दः प्रयुज्यते। देवदत्तः श्यामो युवा समपरिमाणः इति वक्तव्ये देवदत्तः श्यामादिरित्यपि प्रयुज्यते। अत्रानेकवस्तु विवक्षा नास्ति। परं तु एकस्मिन् देवदत्ते श्यामत्व आदिशब्दविवक्षितान्याकाराणां विवक्षा। अतः विशेष्यविवक्षावत् विशेष्ये विशेषणविवक्षापि आदि शब्देन गृह्यते इत्यविवादम्। एवं च एकस्मिन् ब्रह्मणि विशिष्टज्ञानगुणकत्व, आदिशब्दग्राह्य शक्त्यादिगुणान्तर वैशिष्ट्यस्य परमकारणत्वस्याचान्वयः। तथा च परं ब्रह्म विशिष्टज्ञानगुणकं शक्त्यादिविशिष्ट परमकारण च इत्युक्त भवति। एतदर्थसूचनायैव कर्मधारयरीतिप्रदर्शन, विज्ञान च तदादिचेति षर ब्रह्म विज्ञानादीति। वस्तुत. एव क्लिष्टगतिमनाश्रित्य सहर्तर्थकादि शब्द एवात्र प्रयुक्तः। पंचरात्रतन्त्रे परब्रह्मणः संहर्तृत्वबोधकवचनसद्भावात्। तज्ज्ञापनायैव नपुंसकलिङ्गः आदिशब्दः प्रयुक्तः इति केचिदाचार्या वर्णयन्ति।

एतदुत्पत्त्यसभवाधिकरणं शक्तिपक्षदूषणपरं व्याख्यात द्वैतभाष्ये। उत्पत्त्यसंभवात्—न च पुरुषाननुगृहीतस्त्रीभ्य उत्पत्तिर्दृश्यते। न च कर्तुः करण - यदि पुरुषोङ्गीक्रियते तस्यापि कारणाभावादनुपपत्तिः। विज्ञानादिभावे वा तदप्रतिषेधः—यदि विज्ञानादिकारणं तस्याङ्गीक्रियते तदा तत एव सृष्ट्याद्युपपत्ते. ईशवादान्तर्भावः। इति मध्वभाष्यम्। अत्राधिकरणरत्नमालाविषयः सर्वमपि सूत्रं पांचरात्रप्रामाण्यनिषेधपरमिति पूर्वपक्षखण्डनम्।

40. अत्र कीर्तितानाँ ऋषीणा नाम ग्रहणम्

ब्रह्मसूत्रप्रणेता बादरायणः स्वसूत्रेषु तत्र तत्र कांश्चित् ऋषीन् नामतो निर्दिशति। पूर्वपक्षसिद्धान्तप्रतिपादनबेलायां ते ते ऋषय. स्वाभिप्रायं प्रकटितवन्तः। तत्तदभिप्राय मनसि निधाय तत्तदृषिनामनिर्देशपूर्वकं सूत्राणि प्रणिनाय। तेषु ऋषिषु गौरवबुध्या। क्रमेण तत्तदृषिनामानि सुखग्रहणाय निर्दिशामः—

प्रथमेऽध्याये प्रथमपादे—शास्त्रदृष्ट्यातूपदेशो वामदेववत्। अत्र स्वाभिप्रायवक्तृऋषिकीर्तनं न क्रियते वामदेववत् इति। परं तु उपासनप्रकारबोधनार्थं दृष्टान्ततया ऋषिकोर्तनम्।

1. साक्षादप्यविरोधं जैमिनिः। संपत्तेरिति जैमिनिस्तथा हि दर्शयति। मध्वादिष्वसभवादनधिकार जैमिनिः। अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैकमेके। धर्मं जैमिनिरत एव। शेषत्वात् पुरुषार्थवादः यथान्येष्विति जैमिनि। परामर्श जैमिनिश्चोदनाच्चापवदति हि। तद्भूतस्य तु नातद्भावः जैमिनेरपि नियमात् तद्रूपाभावेभ्यः। पर जैमिनि· मुख्यत्वात्। ब्राह्मेण ,जैमिनिरुपन्यासादिभ्यः। भावं जैमिनिः विकल्पामननात्।

2. अभिव्यक्तेरित्याश्मरथ्य· प्रतिज्ञासिद्धेः लिङ्गमाश्मरथ्यः।

3. अनुस्मृतेर्बादरिः—सुकृतदुष्कृते एवेति तु बादरिः। कार्यबादरिरस्य गत्युपपत्तेः। अभाव बादरिराह ह्येवम्।

4. उत्क्रमिष्यत एव भावादित्यौडुलोमिः आर्त्विज्यमित्यौडुलोमिः तस्मै हि परिक्रीयते चितितन्मात्रेण इत्यौडुलोमिः।

5. अवस्थितेरिति काशकृत्स्नः।

6· चरणादितिचेन्न तदुपलक्षणार्थेति कार्ष्णाजिनि.।

7. स्वामिनः फलश्रुतेरित्यात्रेयः।

एव सूत्रेषु 1 जैमिनि, 2 आश्मरथ्य, 3 बादरि, 4 औडुलोमि 5 काशकृत्स्न, 6 कार्ष्णाजिनि, 7 आत्रेय रूपसप्तर्षीणा स्वव्यतिरिक्तानां कीर्तनं दृश्यते।

1 सूत्रेषु एकादशकृत्वः जैमिनिनामग्रहणम् । 2 आश्मरथ्यस्य द्विः । 3 बादरेः स्थलचतुष्टये । 4 औडुलोमेः स्थलत्रये । 5 काशकृत्स्नस्य एकत्र । 6 कार्ष्णाजिने. एकत्र । 7 आत्रेयस्यापि एकत्र । वैश्वानराधिकरणे, पुरुषार्थाधिकरणे च जैमिनिनाम्नः द्विः कीर्तनम् । पुरुषार्थाधिकरणे स्वनाम्नः त्रिः कीर्तनम् । 9 नवस्थलेषु सूत्रे स्वनाम कीर्तनं बादरायणस्य । यथा—स्वनामकीर्तनस्थलम् —तदुपर्यपि बादरायणः संभवात् । भाव तु बादरायणोऽस्ति हि । पूर्वं तु बादरायणो हेतुव्यपदेशात् । पुरुषार्थोऽतः शब्दादिति बादरायण. । अधिकोपदेशात् तु बादरायणस्यैवं तद्दर्शनात् । अनुष्ठेयं बादरायणः साम्यश्रुते. । अप्रतीकालम्बनान्नयतीति बादरायणः उभयथा च दोषात् तत्क्रतुश्च । एवमप्युपन्यासात् अविरोधं बादरायणः । द्वादशाहवदुभयविध बादरायणोऽतः । सूत्रे बादरायण इति परोक्षनिर्देशात् बादरायणादन्य कर्तृक सूत्रमिति न भ्रमितव्यम् । वृष्णीनां वासुदेवोऽस्मीति गीताया श्रीकृष्णः स्वनाम परोक्षं निर्दिशति । न हि तेन गीतोपनिषत् अन्येन प्रोक्ता ! तथाऽत्रापीनि भाव्यम् ।

बादरिः मुनिः पूर्वमीमांसायामपि निर्दिष्टः । क्वचित्क्वचिद्विषये उक्तानां ऋषीणां संमति बादरायणः अङ्गीचकार क्वचिच्च क्वचिच्च-निराचकार ।

1 स्वतः अपरिच्छिन्नस्य परस्य ब्रह्मणः मात्रया परिच्छिन्नत्वं कथं इति शङ्कापरिहाराय प्रवृत्त उपासकबुद्धिसौकर्याय तथात्वेन कथनमित्येतद्रूप आश्मरथ्यमतं न निराचकार ।

प्रतिज्ञासिद्धेः लिङ्गमाश्मरथ्यः इत्यत्रत्वेतन्मत निराचकार । तत्र जीवात्मवाचिशब्दैः कथं परमात्माभिधानं इति शङ्कायां यादवप्रकाशपक्षमवलम्ब्य आश्मरथ्यः समाधिमाह । एकविज्ञानेन सर्वविज्ञान प्रतिज्ञात, इदं च कार्यकारणभावमन्तरा न घटते । जीवानामपि ब्रह्मणः उत्पत्तिलय श्रवणात् ब्रह्मकार्यत्व भवति । एवं च कार्यभूतजीवशब्देन कारणभूतब्रह्माभिधानं योज्यते एव । अतः एकविज्ञानेन सर्वविज्ञान प्रतिपादककार्यकारण भावकृतैक्यस्य लिङ्गमिदं जीवात्म-

वाचिशब्देन परमात्मनोऽभिधानं इति आश्मरथ्याभिप्रायः। अयमेव यादवप्रकाशपक्षः।

2. अनुस्मृतेः बादरिः सुकृतदुष्कृत एवेति तु बादरिः इति स्थलद्वये बादरिमत अङ्गीचकार। अन्यस्थलद्वये तन्मतं नानुमेने।

3. उत्क्रमिष्यत .....इत्यत्र चितितन्मात्रेण इत्यत्र चौडुलोमिमत त्यक्तवान्। आर्त्विज्यमित्यत्र स्वीचकार।

4. काशकृत्स्नमतमेकत्रोपात्तं तदङ्गीचकार। जीवात्मनः परमात्मतयाऽवस्थितेः इत्यर्थाङ्गीकारेपि सूत्रानुगुण्यम्। अथ गुहां प्रविष्टावात्मानौ इति स्वेनैव सूत्रकृता भेदनिर्देशात् शरीरात्मभावेऽवस्थितिर्विवक्षितेत्यवगम्यते।

5 काष्णाजिनिमतं नाभ्युपेतं सूत्रकारेण।

6. आत्रेयमतमपि तथैव।

7. जैमिनिस्तु बादरायण शिष्यभूतः। सपत्तेरिति जैमिनिः इत्युक्त जैमिनिमत स्वीचकार बादरायणः। अन्यार्थं तु जैमिनिः..... अपि चैवमेके इत्यपि सूत्रकारसंमत, तद्भूतस्य इति जैमिनिनोक्तं बादरायणः उररीचकार अन्यत्र जैमिन्युक्तेषु स्वाभिप्रायं सुविशदं प्रतिपादयामास सूत्रकारो व्यासः।

41. जैमिनिसमीरिता वेदान्तसिद्धान्ताः

कर्मविचारार्थं प्रवृत्तोपि जैमिनिर्मुनि. वेदान्तसिद्धार्थं बहु अभिमनुते। देवतास्वरूपं जैमिनिः निराचक्रे इति तु केषांचित्कथन अतिवाद एव। परं ब्रह्म लोकान्तरं वैकुण्ठं सर्वमङ्गीकुर्वाणो जैमिनिः कथमिव देवतास्वरूपं निराकुर्यात्। वेदान्तवाक्यविचारं कुर्वाणं वेदान्तसिद्धप्रधानार्थं मङ्गीकुर्वाणं आस्तिकाग्रेसरं जैमिनि देवतादिस्वरूपं नेच्छति जैमिनिरिति तं नास्तिकं कुर्वाणाः स्वयं नास्तिका भवन्ति। षोडशलक्षणात्मकं सूत्रजालं वेदविचाररूपं शास्त्रं प्रकुर्वाणः जैमिनिः न हि कुत्रचिदपि देवतास्वरूप निषेधक सूत्र रचयामास। कथं अन्यथा व्यासेन बादरायणेन शरीरशास्त्रप्रणेत्रा सवादकाले, परब्रह्मस्वरूप तद्गुण, तदुपासन, तज्जन्यमुक्तिफलादिविषये विवादमय मुनिः कुर्यात्।

साक्षादप्यविरोध जैमिनिरिति सूत्रम्। वैश्वानरशब्द इव अग्नि शब्द एवावयवार्थपौष्कल्येन साक्षादेव परमात्मानं वदतीति हि जैमिनि मतम्। जैमिनेः परब्रह्मस्वरूपानंगीकारे कथं एवं कथन सङ्गच्छते।

मध्वादिष्वसंभवादनधिकार जैमिनिः—वस्वादिदेवतानां ब्रह्म-विद्यायामेवाधिकारः न तु मधुविद्यायां वस्वादिफलकायां इति ब्रुवाणो जैमिनिः ब्रह्मस्वरूपतद्विद्यावस्वादिदेवताः कथं प्रतिक्षिपेत्।

अन्यार्थं तु जैमिनिः—जीवस्वरूपापेक्षया अन्यस्य ब्रह्मणः सद्भावं वदता जैमिनिना कथं ब्रह्मस्वरूपप्रतिक्षेप.। परं जैमिनि. मुख्यत्वात्-हिरण्यगर्भव्यतिरिक्त परमात्मानं अर्चिरादिकमातिवाहिकगणं तद्-गणस्य परमात्मोपासकनेतृत्वं वैकुण्ठादिलोकसद्भावं च हि जैमिनिरत्र ब्रूते। एव वादी मुनिः परमात्मानमेव नाङ्गीकरोति इति वदन्त एवा-पहास्या भवन्ति।

ब्राह्मेण जैमिनिः ब्रह्मसबन्धितया श्रुतैः अपहतपाप्मत्वादि-गुणैस्सह पर ज्योतिरुपसन्नस्य जीवात्मनः मोक्षदशायामाविर्भावः इति ह्यत्रोच्यते। अनेन ब्रह्मजीवयोर्भेदः गुणसद्भावः स्वरूपाविर्भावो मोक्ष दशायां इत्येतत्सर्व ज्ञापित भवतीति कथमेतस्य निषेधः जैमिन्यभि-मतः। भावं जैमिनिर्विकल्पामननात् इति – मुक्तस्य कर्मकृतशरीरा-भावेपि अकर्मकृतशरीरसद्भाव च वदति। एव बहुविधवेदान्तसिद्धान्तार्थ जातमभ्युपगच्छन् जैमिनिः देवतास्वरूपादि प्रतिषेधतीति कथन साहसमेव। जैमिन्यनभिमतमेवार्थ स्वबुध्या कल्पयित्वा जैमिन्युक्तमिदं सर्वमिति भगवान् बादरायणोऽब्रवीत् इति कथनं तु अतीव साहसम्। सर्वपुराणानामप्यपलापप्रसङ्गात्।

ननु—जीवातिरिक्तस्य ब्रह्मणः ब्रह्मोपासनस्य, तज्जन्यविलक्षण फलस्य च जैमिन्यभिमतत्वे, कर्मसु कर्तृभूतस्यात्मन. याथात्म्यवेदन-प्रतिपादनपरमेव वेदान्तशास्त्र कृत्स्नम्। कर्तृर्जीवस्य संस्कारद्वारेण विद्याया: क्रतुशेषत्वात् तत्र फलश्रुतिरर्थवादमात्र इति कथ जैमिनिः आक्षिपेत्? न चैवं विधाक्षेपः जैमिन्यनभिमतः इति शक्य वक्तुम्। शेषत्वात् पुरुषार्थवादो यथान्येष्विति जैमिनिः इति व्यासेनैव जैमिन्यभि

मतत्वेनोक्तेः इति चेत् ... .ब्रूमः — अस्य वादस्यान्वारुह्य वादत्वात् । तदुक्तं सारावल्यां—

पादैरत्रैवमेकादशभिरपि परं ब्रह्म वेद्यं निरूढं
भूयः किं क्षुद्रलिङ्गैः गगनलिपिनिभैः क्षोभ्यते ब्रह्मविद्या।
सत्यं तत्तादृगल्पश्रुतमतिकलहत्रासितच्छात्रडिम्भ-
स्तोमक्षेमाय जैमिन्यहृदयकथित पक्षमुत्क्षिप्य हन्ति ।।

अयमर्थः. धूर्तोक्तीनां तावत् निश्शेषनिराकरणं कर्तव्यमेव। किं च बादरायणशिष्यतल्लजस्य जैमिनेः ब्रह्मनिराकरण मत्यन्तानिष्टं इत्युक्त भवतीति चिन्तामणिरत्र – जैमिन्यहृदयकथितं इति । सूत्रे जैमिनिरित्यत्र न वक्तीत्यध्याहारः । किं तु कदाचिदवोचदिति भूते-लकारस्य । कर्माणि परित्यज्य सन्यासमेव श्लाघित्वा वाक्यजन्यज्ञाना-देव मुक्ताः स्म. इति मन्वानान् अद्वैतिनो मृषावादिनः क्षेप्तु प्रवृत्तो जैमिनिः तदुक्तवाक्यार्थज्ञान कर्मानुष्टायिकर्तृस्वरूपशोधक सत् कर्माङ्ग मेवेत्याघोषयामास । तदजानद्भिः जैमिनिहृदयमेवेदमिति भ्रान्तमिति भाव । इत्यभिनवदेशिकव्याख्या ।

42. व्यासजैमिन्योः अभिप्रायभेदस्थलप्रदर्शनम्

1. आत्मानमेव वैश्वानरमुपास्ते इत्यत्र वैश्वानरशब्दः परमात्म-वाचीति सिद्धान्तितम् । तत्र कश्चिदेव शङ्कामकरोत्—जाठराग्निरेव वैश्वानरशब्दवाच्यः । अत्र प्राणा इति बोधनात्—अग्नौ हि प्राणा-हुतिः क्रियते । अन एव उर एव वेदिः लोमानि बर्हिः हृदयं गार्हपत्यः इत्यादिना उपासकस्य उरः प्रभृतीनां बेदित्वाद्युपदेशः क्रियते इति । अत्र जैमिनि समाधानं सपत्तेरिति जैमिनिस्तथा हि दर्शयति इति बाद-रायणो ब्रवीति । अत्र वैश्वानरशब्दवाच्ये उपासकैः अहरहः क्रियमा-णायाः प्राणाहुतेः अतस्मिन् तत्कल्पनरूपाग्निहोत्रसपादनं क्रियते । तदर्थं उरः प्रभृतीनां वेदित्वाद्युपदेशः क्रियते । अत एव परमात्मोपासनो-चितफल तस्य सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वस्वात्मसु हुतं भवति, तद्यथेषीकतूलं इत्यादिनोच्यते । अतः न जाठराग्निः वैश्वानरः इति । इमं जैमिनेराशय बादरायणः अङ्गीचकार ।

2. यो वै बालाके एतेषा पुरुषाणां कर्ता, यस्यवैतत्कर्म स वै वेदितव्यः इत्यत्र वेदितव्यत्वेनोपदिष्टं पूर्वमुपक्षिप्त ब्रह्म जीवात्मेति पूर्वपक्षं कृत्वा परमात्मेति स्थापितम्। तत्र प्रतिपादित जीवलिङ्गानां कथं निर्वाह इत्यत्र जैमिन्यभिमतं सिद्धान्त अन्यार्थं तु जैमिनिः प्रश्न-व्याख्यानाभ्यामपि चैवमेके इति सूत्रकारः प्राह। प्राणादिव्यतिरिक्त जीवं कैश्चिल्लिङ्गैः प्रतिबोध्य पुन. जीवातिरिक्तब्रह्मप्रतिबोधनपरस्य प्रश्नस्य तद्व्याख्यानस्य च श्रवणेन जीवातिरिक्तपरमात्मबोधनार्थं तदुक्तिरिति जैमिन्यभिप्रायः। इद च व्यासेनाङ्गीकृतम्।

3. नैष्ठिकाद्याश्रमभ्रष्टानां विधुरादिवत् ब्रह्मविद्यायामधिकारोऽस्ति नवेति आशङ्क्य अधिकारसद्भाव जैमिन्यभिमतं व्यास. सूत्रे ब्रवीति। तद्भूतस्य तु ... ...इति। नैष्ठिकादीनामाश्रमिणा ये ये वेषाः तेषामभावोऽनुपपन्नः इति ब्रह्मचार्याचार्यकुल .. ..अरण्यमियात् ततो न पुनरेयात् सन्यस्याग्नि न पुनरावर्तयेत् इति शास्त्रेभ्य. नियमनात् अनाश्रिमित्वेनावस्थानमनुपपन्नं इति जैमिनिः। इद च व्यासस्याप्यभिमतम्। अत्र श्रीमद्भाष्य—जैमिनेरपीत्यविगानं दर्शयन् उक्तं स्वाभिमतं द्रढयतीति।

उक्तेषु स्थलत्रयेषु व्यासजैमिन्योरभिप्रायभेदो नास्ति। अन्यत्र सर्वत्राभिप्रायभेदः।

साक्षादप्यविरोधं जैमिनिः। वैश्वानरविद्यायां श्रूयमाणस्य अग्निशब्दस्य परमात्मपरत्वं जैमिनिव्यासोभयसंमतम्। तत्र जैमनिः अग्रनयनव्युत्पत्त्या परमात्मपरत्वं ब्रूते। व्यासस्तु अग्निशरीरकत्वेन परमात्मपरत्वमिति भेदः।

2. मध्वादिष्वसंभवादनधिकार जैमिनिः। वस्वादिपदप्राप्तिरूप फलपूर्वकमोक्षजनकमधुविद्यायां वस्वादिदेवानामधिकाराभावं जैमिनिर्मनुते। व्यासस्तु तेषां तत्र सद्भावम्। मधुविद्यायाः वस्वादिपदप्राप्त्यर्थत्वमेव न तु तत्पूर्वकमोक्षजनकत्वमपि, अतः वस्वादिदेवताभिर्वस्वादिपदस्य पूर्वं प्राप्तत्वेन, स्वस्य स्वोत्कृष्टत्वाभावादुपास्यत्वा

सभवेन च नाधिकारस्तेषाम् इति जैमिन्यभिप्रायः। मधुविद्यायाः ब्रह्मविद्यात्वं वस्वादिपदप्राप्तिपूर्वकमोक्षजनकत्व च ब्रह्मणः उपास्यत्वं चेति अधिकार. तेषाम्। अतो न विरोधः इति व्यासाभिप्रायः।

3. यागदानहोमादिः भगवदुपासनं च स्वर्गादिफलं मोक्ष रूपं च फलं दिशतीति जैमिनेरभिप्राय.। कर्माराधितो देवः श्रीमान् नारायण एव सर्वमपि फलं ददातीति व्यासाभिप्रायः।

4. तत्वमस्यादि वाक्यसामानाधिकरण्य बलात् वेदान्तेषु उपास्य तयोक्तस्य जीवभावावगमात् परविद्यासु कर्मीभूतो जीव एव। न तु तद्विलक्षणः परमात्मा। एव च ब्रह्मविदाप्नोति परं इत्यादि वेदान्तेषु फलश्रवण अर्थवादमात्रम्। न तु फलविधिरिति विद्यापि क्रतुकर्मभूता आत्मसस्कारद्वारेण क्रत्वर्थभूतैव च। न तु पुरुषार्थभूता। अत विद्याङ्गकात् कर्मणः एव पुरुषार्थावाप्ति. इति जैमिनिमतम्।

सामानाधिकरण्यस्य घटकश्रुत्या शरीरात्मभावनिबन्धनत्वेन अन्यथासिद्धेः जीवानतिरेकानवगमकत्वात् परविद्याना न जीवकर्मकत्वम् अत एव जीवसस्कारत्वाभावात् वेदान्तविद्याफलश्रुति नार्थवादमात्रं कि तु पृथगेव फलसाधनं, अतः कर्मागकात् विद्यात एव मोक्षरूपफल प्राप्तिरिति व्यासस्याभिप्राय·।

5 ऊर्ध्वरेतसः आश्रमाः न सन्तीति जैमिन्यभिप्राय·। वीर हा वा एष देवाना योऽग्निमुद्वासयते इति निषेधादिति। ब्रह्मचर्यं समाप्य गृही भवेत्, गृहात् वनीभूत्वा प्रव्रजेत् यदिवेतरथा ब्रह्मचर्यादेव प्रव्रजेत् गृहात् वनाद्वा यदहरेव विरजेत् तदहरेव प्रव्रजेत् इत्यादि श्रुतेः। गृहस्थाश्रमतौल्याच्च सन्यासाश्रमोऽप्यस्तीति व्यासाभिप्रायः।

6· परं ब्रह्मोपासीनानेवार्चिरादिरातिवाहिको गणो नयतीति जैमिनिः। ये पर ब्रह्मोपासते ये चात्मान प्रकृतिवियुक्तं ब्रह्मात्मकमुपासते तानुभयविधान् आतिवाहिको गणा नयतीति बादरायणो मनुते। इममेवार्थ व्यासः .....अप्रतीकालंबनान्नयतीति...क्रतुश्च इत्यसूत्रयत्। तस्मादचिन्मिश्र केवलं वा चिद्वस्तु ब्रह्मादृष्टचा तद्वियोगेन च यदुपासते न तान् नयतीति श्रीमद्भाष्यम्—

ध्यायेयुर्ये च जीवान् प्रकृति शबलितान् केवलान्वा यथेष्टं

द्वेधापि ब्रह्मदृष्टचा जडनिवहमपि स्वेन यद्वाऽन्यदृष्टचा ।
ते सर्वे हि प्रतीकप्रणिहितमनसो मार्चिराद्यध्वयोग्याः

ब्रह्मोपास्तेश्च लिङ्गं गतिरियमनघा सूत्रिता पूर्वमेव ॥

इति साराबलिः । अयमर्थः. प्रतीकशब्दः शरीरवाची । अङ्गं प्रतीकोऽवयव इति कोशः । प्रतीकमात्र आलम्बनं उपास्यं येषा ते प्रतीकालम्बना. । परमात्मानं प्रति चित् अचिच्च शरीर (प्रतीकः) भवति तत्र चित् देहविशिष्टः तद्रहितश्च । एतदुभयोपासन यथा न ब्रह्मविद्या परमात्मविषयककेवलोपासनत्वात् । तथैव परमात्मदृष्टचा एतदुभयोपासनमपि न ब्रह्मविद्या । शरीरात्मभावाविषयकत्वेन अयथावस्थितत्वात् । इत्थ च देहविशिष्टजीवान् इन्द्रचन्द्रादीन् देहरहितान् स्वात्मादीन् ये ध्यायन्ति तेषां देहविशिष्टात्मध्यान शुद्धात्मध्यान च प्रतीकोपासनम् । एव द्विविधोपासनमुक्तम् । द्विविधानपि जीवान् ब्रह्मदृष्टचापि ये ध्यायन्ति तेषामप्युपासन प्रतीकोपासन, एवमुपासन चतुष्कम् । एवमचेतनमपि स्वेन रूपेण ब्रह्मदृष्टचाचोपासनं इति द्विविधमुपासनम् । आहत्योपासनषट्कमुक्त भवति । एव षड्विधाः उपासकाः प्रतीकोपासका. । एते नार्चिराद्यध्वयोग्याः इति ।

7. पर ज्योतिरुपसन्नस्य जीवात्मनो मोक्षदशायां अपहतपाप्मत्वादि गुणैस्सहाविर्भाव इति जैमिनिः । जीवात्मनः विज्ञानस्वस्वरूपत्व गुणाष्टकवत्वोभयविधार्थस्य श्रुतिसिद्धत्वादुभयरूपेणाविर्भवनीति बादरायणः ।

8. मोक्षदशाया जीवः शरीरविशिष्टतयैव वर्तते इति जैमिनि. सशरीरत्वस्याशरीरत्वस्य च श्रुतिसंमतत्वात् कदाचित् सशरीरः कदाचिदशरीरः इति बादरायणः । एवं शिष्याचार्ययोः अभिप्रायभेद । लोकेपि आचार्येणोपदेशकाले बुद्धिमान् शिष्यः काश्चित्सशयान् पृच्छति मेधावी आचार्यश्च समुचित्तं प्रत्युत्तरं ददातीति दृष्टम् । तत्र मेधाविना शिष्येण जैमिनिना पृष्टमर्थविशेषं मनसि निधाय तत्प्रतिभाविशेषेण परितुष्टः तदुक्त सूत्ररूपेण न्यबध्नात् ।

43. मधुविद्याविचारः ।

अत्र प्रसङ्गात् मधुविद्यायां किंचित् दृष्टि प्रसारयेम । त्रिभिः सूत्रैः मधुविद्यां बादरायणो विचारयति । द्वाभ्यां सूत्राभ्यां पूर्वपक्षं कृत्वा एकेन सूत्रेण समाधि ब्रूते । असौ वा आदित्यो देवमधु इत्यारभ्य –य एतां ब्रह्मोपनिषद वेद इति श्रवणेनास्याः ब्रह्मोपनिषत्वं निर्विवादम् । उपासनप्रकार. कथं किमेकमेवोपासनमत्र बिवक्षितं उत बहूनीत्यादि बहुविवादास्सन्ति । श्रीभाष्य श्रुतप्रकाशिका भावप्रकाशिकादीनां परस्परविरोधांशदर्शनात् स्वेषु पूर्वापरविरोधदर्शनाच्चार्थः दुरवगाह इति प्रतिभाति । अत्रादित्यो मधुत्वेन रूपितः । लोके मधु वंशादिषु लग्नं भवति । अपूपे च विद्यते तत्र भ्रमरबीजभूताः कीटाश्च छिद्रेषु वर्तन्ते । तथाऽत्र आदित्यरूपमधुनः वंशः द्युलोकः, अन्तरिक्षलोकः मध्वपूपम् । सूर्यकिरणाकृष्टभूमिस्थजलं भ्रमरबीजभूतकीटरूपम् ।

अत्रादित्यो मधुत्वेन रूपित. । आदित्यरश्मयो मधुनाडीत्वेन वेदाः पुष्पत्वेन वेदमन्त्राः भ्रमरत्वेन वेदविध्यन्वितद्रव्याणि पुष्परसत्त्वेन च । हूयमानद्रव्याणां रश्मिद्वारा सूर्यप्रप्तिरपि । अग्नौ प्रास्ता आहुतिः संयगादित्यमुपतिष्ठते इति प्रमाणसिद्धा । यथा मधुकराः पुष्पेभ्यः रस मधुनाडीद्वारा मधुनि निक्षिपन्ति । तथा वैदिकमन्त्राः वेदाख्यपुष्पगतं तत्तत्कर्मान्विताहुति द्रव्यात्मकरसं रश्मिद्वारा नीत्वा आदित्ये निक्षिपन्ति ।

ऋग्वेदमन्त्ररूपभ्रमरः ऋग्वेदविध्यन्वितद्रव्यात्मकपुष्परस रश्मि रूपमधुनाडीद्वारा आदित्यरूपमधुनः प्राग्भागे निक्षिपति सच रसः रोहितरूपांशात्मना अवतिष्ठते । तमंश वसुः यथावसर पश्यति । दर्शनरूपभोगमनुभवति । एवं यजुर्वेदमन्त्ररूपभ्रमर· यजुर्वेदविध्यन्वित द्रव्यात्मक पुष्परस दक्षिणभागे निक्षिपति स रसः शुक्लरूपांशात्मना । तमशं रुद्रः । सामवैदमन्त्ररूपभ्रमर. सामविध्यन्वितद्रव्यात्मकपुष्परसं प्रत्यक्भागे । सच कृष्णरूपांशात्मना । आदित्य. तमंशम् । अथर्ववेदमन्त्ररूपभ्रमर अथर्वविध्यन्वितद्रव्यात्मकपुष्परसं उत्तरभागे ।

सच अतिशयितकृष्णात्मना। तमश मरुतः अनुभवन्ति। आदेशात्मक वेदमन्त्ररूपभ्रमरः ब्रह्मभागात्मकपुष्परसं उर्ध्वभागे निक्षिपति। सच प्रस्फुरद्भागरूपाशात्मना। तमंशं साध्याः अत्र ऋग्यजुस्सामाथर्वब्रह्म भागात्मकपुष्परसाः यश इन्द्रियादिफलरूपेण परिणताः। एवमत्र वस्वादिभोग्यता आदित्यमधूपासकाना वस्वादित्वप्राप्तिपूर्वक तादृशानुभव. फलमिति चोक्तम्। मधुविद्यादिषु वस्वादीनां वस्वाद्युपासकत्व, आराधकत्व अनुग्राह्यत्वासंभवात् अनधिकार जैमिनिर्मन्यते।

एवमत्र तत्त्वस्थितिः। अत्रेदं विचार्यते। वसुरुद्र आदित्य मरुत् साध्यगणेषु पंचसु असौ वाऽऽदित्यो देवमधु इत्यादिवाक्यबलात् आदित्यस्योपास्यत्वं निर्विवादम्। वसुरुद्र मरुत् साध्यगणानां चतुर्णामुपास्यत्व नैव कण्ठोक्तम्। अत. आदित्यकर्मकोपासने कथमादित्यस्याधिकारः स्वस्य स्वोपास्यत्वासंभवादित्याक्षिप्य तावन्मात्रसमाधान कथन योयुज्यते। न तु वस्वादीनामप्यधिकारासभवतत्समाधानकथनम्।

अथादित्यविषयेऽपि कथ पूर्वपक्षोदयः। परमात्मोपासने जीवकर्तृके स्वात्मविषयकानुसन्धानस्यापि शास्त्रसंमतत्वादिति चेत् उच्यते। उपासनं हि न केवल स्मृतिसन्ततिरूपं, घटादिस्मृतिसन्ततेरपि उपासनत्वप्रसङ्गात्। अत· प्रकृष्टवस्तुविषयकस्मृतिसन्ततिरेवोपासनम्। आदित्यस्य स्वस्मादुत्कृष्टत्वाभावात् स्वापेक्षया प्रकृष्टविषयकमुपासनं स्वस्मिन् कर्तुं न शक्यम् इति कर्मकर्तृविरोधः। परमात्मोपासने जीवविषयकत्वमिष्टमेव। निरतिशयभोग्यस्य मुक्तावस्थस्य बद्धावस्थेन स्वेनोपास्यत्वात्। अत्र तु आदित्यानामेवोपास्यत्व उपासकत्वंचेति अवस्थाभेदनिबन्धनपरिहारस्य दुर्वचत्वं इति। अपिचोपासनप्रीता देवता फल दिशति फलार्थिने इति लोकदृष्टम्। यदि स्वयमेव फलप्रदानशक्तः तर्हि कथं फलप्रदस्सन् स्वयं फलार्थी भवति। अतः फलप्रदत्व फलार्थित्वरूप प्रकर्षापकर्षरूपविरोधस्य मिथस्सत्वेन कर्मकर्तृविरोधो दुष्परिहरः। अतः आदित्यविषये पूर्वपक्षोत्थान युक्त, न तु वस्वादिविषयेऽपीति।

ननु वसूनामेवैकोभूत्वा इति वसुपदप्राप्तेः फलस्य श्रवणात् तत्क्रतुन्यायेन वस्वादीनामप्युपास्यत्व सिद्धमेव । न च तत्क्रतुन्यायेनाकारान्तरनिषेधाभावात् वस्वादि पदप्राप्तिरपि भवत्येवेति वस्वादीनां उपास्यकोटौ निक्षेपः अनावश्यक एवेति वाच्यम् । प्रधानफलव्यतिरिक्तस्य फलस्योपासकविषयत्वेपि प्रधानफलस्यानुपास्यत्वे तत्संभवायोगात् । अतः प्रधानफलसिध्यर्थं वस्वादीनामुपास्यत्वमवर्जनीयमेवेति चेत् सत्यम् । एवमपि सिद्धान्ते वस्वादीनामुपास्यत्वकथनानौचित्यमेव । तत्र हि ब्रह्मप्राप्तेरेव प्रधानफलत्वं वस्वादिप्राप्तेश्चानुषंगिक फलत्वं, ज्योग्जीवति नास्यावरपुरुषाः क्षीयन्ते इत्यादिवत् वस्वादिपदप्राप्तेरपि अविषयत्वेपि संभवात् । अतो वस्वादीनामुपास्यत्वाश्रयणं निर्मूलमेव । नचेष्टापति· श्रीभाष्य तद्वचाख्यानादौ तदुक्तेः । इत्येका शङ्का ।

अपरा च-कथंचित् वस्वादीनामुपास्यकोटावन्तर्भावमिव वस्वादि शरीरकपरमात्मनः उपास्यत्वकथनं न युक्त मानाभावात् । न ह्युपनिषद्यत्र वसुशरीरकपरमात्मोपासनबोधकश्रुतिवाक्यमस्ति । असौ वा आदित्यो देवमधु य एतां ब्रह्मोपनिषदं वेद इति आदित्यस्य तच्छरीरकपरोपासनमेव हि विधीयते । तच्चकार्यकारणवस्थादित्य शरीरक परमात्मोपासनरूप इति तु स्फुट ज्ञाप्यते । तत्रादित्यस्य कारणदशा आदित्यरूपेण, सृष्टेः पूर्वं स्थिना सूक्ष्मजीवदशा, तदवस्थादित्यशरीरब्रह्मोपासन आदित्यान्तरात्मतया कारणावस्थब्रह्मोपासनम् । आदित्यः स्वदशाया उदयास्तमयकार्यं जगतो निर्वर्तयति । तद्दशापन्नादित्यशरीरकब्रह्मोपासनं कार्यावस्य ब्रह्मोपसनम् इति । केचित्तु अथ ततः ऊर्ध्व इत्यादिपदस्वारस्यात् कार्यावस्था पश्चाद्भाविमुक्तावस्थैव कारणावस्था, कार्यभिन्नावस्था सैव, इत्यर्थमङ्गीकुर्वन्ति। तदा आदित्यभावपश्चाद्भावितदीयमुक्त्यवस्था सा भवति । तदवस्थब्रह्मोपासन अत्र विधीयते इति वदन्ति । इत्थं च उभयविधोपासनस्य प्रतिपन्नत्वेपि वस्वादीनां तच्छरीरकब्रह्मणोवोपासनमत्र न प्रतिपन्नमिति ।

नतु विद्यायाः ब्रह्मोपनिषत्वस्य ब्रह्मप्राप्तिरूपफलस्य च श्रवणात् अस्याः ब्रह्मविद्यात्व अङ्गीकरणीयम्। तत्र वस्वादिभुज्यमानमधुरूप आदित्य इति। आदित्यस्य मधुभोक्तारः वस्वादयः इति चोपासन संभवति। तत्राविशेषात्। उभयेपि ब्रह्मात्मकत्वेनोपास्यन्ते इति वक्तव्यम्। यदा वस्वादीना विशेष्यत्वं तदा तच्छरीरकब्रह्मोपासन इति सिध्यतीति चेन्न। उक्तरीत्या उपासनस्याकारद्वयरूपत्वेपि वस्वादीनां विशेष्यत्वपक्षेपि ब्रह्मात्मकत्वपर्यन्तानुधावनस्यानपेक्षितत्वात्। जीवविशेष्यकपरमात्मप्रकारकोपासनस्यायङ्गीकारवत् उपपत्तेः आदित्यस्यविशेषणत्वविवक्षायामेव आदित्यशरीरकपरमात्मरूप मधुभोक्तारः वस्वादयः मधुरूपादित्यशरीरकब्रह्मभोक्तारः वस्वादयः इत्युपासनसभवेन वस्वादीनामपि ब्रह्मपर्यन्तत्वगमने मानाभावात् इति।

अत्रायं समाधिः—छान्दोग्ये तृतीयाध्याये इयं मधुविद्या श्रूयते। अत्र वसुरुद्रादीनामधिकारोऽस्ति नेति विचारः पूर्वं विस्मर्तव्यः। सद्विद्या उपकोसलविद्याऽक्षिविद्यादिवत् इयमपि काचित् ब्रह्मविद्या। तास्विव अस्यामपि मनुष्यादीनामधिकारोऽस्तीति तु निर्विवादम्। ब्रह्मविद्यात्वात् आदित्यशरीरकब्रह्मणः उपास्यत्वमवोच्यते। तथा तत्रादित्यस्य प्राक् दक्षिणा प्रत्यङ् ऊर्ध्वभागा अपि क्रमेण वसुरुद्र आदित्य मरुत् साध्यगणैः भुज्यमानाः उच्यन्ते—तद्यत्प्रथममृतं तद्वसव उपजीवन्ति। अथ यत् द्वितीयममृतं तत् रुद्रा उपजीवन्ति इत्यादिभिः। अतः वसूपभुज्यमान प्राक्भावरूपामृतविशिष्टः रुद्रोपभुज्यमानदक्षिणभागविशिष्ट इत्येवं रूपेणादित्य उपास्यः उक्तो भवति। वसुरुद्राद्युपभुज्यमानत्वस्यानुपास्यत्वे तदुक्तिवैयर्थ्यमेव स्यात्। एव च वस्वाद्युपभुज्यमानतत्तदंशविशिष्टादित्यशरीरक ब्रह्म कार्यावस्थं कारणावस्थं चोपास्यमित्युक्तं भवति। एव मस्मदादिभिः मनुष्यैः मधुविद्या उपास्या। एतादृशी मधुविद्यां वसुः कश्चित् यदि अनुतिष्ठेत् तदा, रुद्रादिभुज्यमानतत्तदंशविशिष्टमधुरूपः आदित्य इत्युपासनकरणवत् स्वोपभुज्यमान प्राक्भागविशिष्टो मधुरूप आदित्यः इति तेनोपासनं कार्यं, तत्र कर्तृकर्मविरोध। वसुभूतस्याशुद्धस्य स्वस्यापि उपासनकोटि-

निक्षिप्तत्वात् इति कथं तत्र वसोरधिकारः इति । एवं रुद्रादिष्वपि । यद्यपि वसुभूतस्वमात्रोपासनं केवल न विहितं, परं तु स्वोपभुज्यमान प्रागंशविशिष्टादित्यस्यैवेति अवस्थाभेदान्न विरोधः । स्वोपभुज्यमानांश विशिष्टमधुरुप आदित्यः इति स्वेनानुसंन्धातु शक्यत्वात् । अथापि, एवमनुसन्धानस्य वसूनामेवैको भूत्वा इति वसुषदप्राप्ते फलत्वोक्तेः तस्या स्वेन पूर्वमेव प्राप्तत्वात् फलार्थित्वं न भवतीत्यधिकारोऽनुपपन्न एवेति । अत एव श्रीमति भाष्ये—नच वस्वादीनां सतां वस्वादित्वं प्राप्य भवति प्राप्तत्वात् इति भाषितम् । अत कर्मकर्तृविरोधाभावेपि फलार्थिता न भवतीति अधिकारासंभवस्तदवस्थः । वसुरुद्र आदित्य मरुत् साध्यगणेषु पञ्चसु तृतीयस्यादित्यस्य विषये फलार्थित्वाभाववत् कर्मकर्तृविरोधोपि । तत्र स्वेनोपभुज्यमान प्रत्यङ्भागरूपामृतविशिष्टादित्यः आदित्येनैव उपास्य इति । सिद्धान्ते अस्याः ब्रह्मविद्यात्वात् मोक्षपर्यन्तं फलं इति हेतोः पुनस्त्रैलोक्यधातृत्वं प्राप्तवानिति शुश्रुम न्यायात् पुनर्वसुपद प्राप्तिपूर्वकमोक्षेच्छाया. संभवः इति । अस्यां वस्वादीनामधिकारः इत्युक्तम् । अतोऽत्र वस्वादीनां उपासकत्वं उपास्यत्व सर्वमुपपन्नमिति ।

अत्र वस्वादिशरीरकपरमात्मपर्यन्तानुधावने परं प्रमाणमन्वेष्टव्यम् । अत्र किंचित् ब्रूमः—कारणावस्थादित्यशरीरब्रह्मणः उपासनमत्र कथमवगम्यते इति चेत् ? अथ इत ऊर्ध्व उदेत्य इत्यादिभिः इति वक्तव्यम् । पूर्वमादित्यः उदयास्तमयनिर्वर्तकोभूत्वा ऊर्ध्वः पश्चात् कालावच्छिन्नः उदेत्य कार्यदशातो निष्क्रम्य उदयास्तमयौ न करोति एकाकार एव सर्वबन्धविनिर्मुक्तो भवतीत्यत्रोच्यते, प्रलये उदयास्तमयकार्यरहितो वर्तते इति चोच्यते । एवचात्र कारणावस्थ ब्रह्मोपासन उक्त भवति । एवमेतदेव वाक्य वसुरुद्रादिविषयकमपि भवति । स च एतदेव रूपमभिसंविशति एतस्मादुदेति वस्वादिषु प्रतिपर्याय उदयास्तमया वुक्त्वा अथ तत ऊर्ध्वं उदेत्य इत्युक्तेरिदमवगम्यते । एव च अस्य वाक्यस्य वस्वादिविषयकत्वस्यापि सभवात् । एतां ब्रह्मोपनिषदं वेद इत्युपर्यूक्तेश्च कारणावस्थवस्वादि

शरीर ब्रह्मोपासन सिद्धिरिति पूर्वं कार्यावस्थवसुशरीरब्रह्मोपासनमप्याक्षिप्तं भवति ।

अत्र वसूपभुज्यमान प्रागशस्यामृतविशिष्ट रुद्रोपभुज्यमान दक्षिणाशस्यामृतविशिष्टेत्येव क्रमेणादित्यशरीरकब्रह्मोपासन एकमेवविधीयते - नतु पञ्चविधान्युपासनानि । य एतामेव ब्रह्मोपनिषदं वेदेति अन्ते एव ब्रह्मोपनिषत्वश्रवणात् । तत्तदंशविशिष्टादित्योपासनानि बहूनि अत्र विवक्षितानि इति न मन्तव्यम् । तदा कृत्स्नोपासनं न स्यात्। यथा वैश्वानरविद्यायाद्युमूर्धत्वादि विशिष्टस्वीकार विशिष्टोपासनरूपत्वे एव कृत्स्नत्व, भूम्नः क्रतुवज्ज्यायस्त्व तथा हि दर्शयतीत्युक्त तथाऽत्रापीति भाव्यम् । तत्रैकैकोपासने अनर्थः उक्तः अत्र तु न इत्ययमेव विशेषः । न चोदयास्तमयस्य फलस्य पृथग्पृथगुक्तेः विद्यानेकत्वमिति मन्तव्यं, तस्या अवैयत्यानुवादरूपत्वात् । सकृद्दिवा है वास्मै भवति, इति मोक्षरूपस्य प्रधानफलस्यैकत्वोक्तेः ।

नन्वत्र वसूपभुज्यमान प्राग्भागरुपामृतविशिष्टादित्यशरीरकः परमात्मा रुद्रोपभुज्यमानभागरूपामृतविशिष्टमधुरूपादित्यशरीरकः पर. इत्येव क्रमेण पञ्चोपासनानि विधीयन्ते इत्यवश्यमभ्युपगमनीयम्। न तु सर्वविशिष्टमेकमुपासनमिति । अन्यथा केनचिन्मनुष्येन एतत् फलेच्छया मधुविद्यानुष्ठाने वसुरुद्रादित्यमरुत्साध्यरूपत्तद्देवपदप्राप्तिपूर्वकमोक्षप्रसङ्गात्तदनुष्ठानुः । नचैवमनुष्ठातु वस्वादिषु पंचसु अन्यतम एकपदप्राप्तिपूर्वकमोक्ष एव फलमिति वक्तु शक्यते नियामकाभावात् । वसूनामेवैको भूत्वा रुद्राणामेवैको भूत्वा इति तत्र फलश्रवणात् सर्वेषामप्यविशेषेणैव प्रसङ्गात् । न ह्यत्रान्यतमप्राप्तिरूपफलमेवानुषङ्गिकं सिध्यतीति नियन्ता कश्चिदस्ति । एकोपासने एव वस्वादीनां सर्वेषा विषयत्वेन तत्क्रतुन्यायेन तत्तत्पदप्राप्तेरवर्जनीयत्वाच्च । प्रतर्दनविद्यायां हि इन्द्रशरीरकपरमात्मनः उपास्यत्वोक्त्या तद्विद्यानिष्ठस्येन्द्रलोकप्राप्तिः किञ्चित्कालं ततो मोक्षः इत्यानुषंगिकफलमंगीक्रियते । तथा अत्रादित्यशरीरकब्रह्मणः उपास्यत्वात् एतद्विद्यानिष्ठस्यादित्यलोकप्राप्तेः अङ्गीकारवत् वस्वादिशरीरकब्रह्मणः

उपास्यत्वोक्त्या वस्वादिलोकस्थितिः तत्रापि वसूनामेव रुद्राणामेव इत्याद्युक्त्वा वस्वादिपदप्राप्तिः ततो मोक्षः इत्यङ्गीकरणीयम् ।

नच वसूनामेवैको भूत्वा, रुद्राणामेवैको भूत्वा इत्यादि श्रुतिबलात् मधुविद्यानिष्ठस्य वसुरुद्रादिस्थानपञ्चकप्राप्त्यनन्तरं क्रमेण मोक्षः इत्यापादनमिष्टमेवेति वाच्यम् । तथा सत्यस्य पुरुषस्य बहुकल्पविलंबेन मोक्षप्रसङ्गात् । एकस्मिन् कल्पे एतद्विद्यानिष्ठस्य कल्पान्तरे हि वसुपदप्राप्तिः । तत्कल्पानन्तर प्रलये भगवच्छरीरतया स्थितस्य तदन्यकल्पे रुद्रप्राप्तिः, एवमुपर्यपि इति अनेककल्पप्रलयादिविलंबेन मोक्षफलकल्पन हि न प्रामाणिकं भवति । तदा तदा प्रलयकाले एवं भक्तिनिष्ठस्य अचिदविशिष्टावस्थायाः अङ्गीकारानौचित्याच्च ।

वस्तुत' वसुरुद्रआदित्यमरुत् साध्यगणानामुत्तरोत्तरोत्कर्षः शास्त्रसमत । यदि वस्वादिषु अन्यतमेन वसुना एतद्विद्यानुष्ठानेऽोचित्यसत्वेपि रुद्रेण कथ एतद्विद्यानुष्ठानसंभवः । स्वापेक्षया अपकृष्ट वसूपभुज्यमानत्वानुसन्धानायोगात् । स्वापकृष्टफलार्थित्वासंभवाच्च । नहयुत्कृष्टस्थानस्थितस्यापकृष्टफलप्राप्तिः आनुषङ्गिकतयाऽप्यभ्युपगमार्हा । एवमुत्तरत्रापि । अतोपि एकरूपमेवोपासनमिति वक्तुमपि न शक्यते । उपासनस्य पञ्चविधत्वे तु स्वस्वोपासने स्वस्यस्वस्याधिकारः, स्वोत्कृष्टविषयकोपासनेऽप्यधिकारः इति नियन्तु शक्यं इति ।

अत्र ब्रूमः उपक्रमोपसंहारादिसर्वपर्यालोचनायां एकैव मधुविद्येति प्रतीयते। यदि कश्चिन् मनुष्यो मधुविद्यायामधिकरोति स अनेककल्पव्यवधानेन मोक्षं प्राप्नोति इत्यदि न । स्वादि सर्वपदप्राप्तावपि तत्तत्स्थाने किञ्चित्किञ्चित्काल स्थित्वा भोगाश्चानुभूय तत्कल्पावसाने एव मोक्षप्राप्तिस्तस्येत्यपि शक्यत्वात् । एकैककल्पेपि एकैकं स्थानं प्राप्यावसाने एव मोक्षं प्राप्नोतीति नियामकवचनाभावात्। नहि प्रतर्दनविद्यानुष्ठातुः इन्द्रस्थाने भोगोक्तावपि इन्द्रावासने एव तस्य मोक्षः इत्युच्यते । एवमेव हि दक्षिणायनोत्तरायण मृतयोरपि चन्द्रादित्यलोकः अधिकभोगः इष्यते, न तु चन्द्रादित्यावसाने इति ।

वसूनामेवैको भूत्वा इत्युक्त्या वसुबहुत्वप्रतीतेः अयमपि कश्चिद्वसुस्सन्, पश्चात् रुद्रादिश्च सन् मोक्ष प्राप्नोति । नच वस्वादीनामेकैककल्पावसानायुष्कत्वात् कथमेककल्पे एव सर्वपदप्राप्तिपूर्वकमोक्षसभव. इति वाच्यम् । देवेषु आजानदेवत्व कर्मदेवत्वविभागवदत्रापि उभयविधवस्वादिसभवात् । पुण्यविशेषेण वस्वादिजन्मान केचित्, एवं मधुविद्योपासनेन प्राप्तवसुत्वभावा केचित् । उत्तरेपि वसुत्वसाजात्यात् वसव एव । उभयेषामपि भोगे कालकृतवैषम्येपि देशादिवैषम्यं नास्ति इति कस्यचिदपि दोषस्य नावकाशः । वस्वादिस्थानेषु उत्कर्षापकर्षविभोगोऽप्यप्रामाणिक न तत्प्रयुक्तदोषोपीति ।

अनो वसुरुद्रादित्य मरुत्साध्यगणावस्थब्रह्मोपजीव्यरोहितादिपञ्चरूपात्मकपंचामृताश्रयादित्यावस्थ ब्रह्मोपासनं मधुविद्या । अत्र ब्रह्मणः उपजीवकत्वं विशेषणीभूतवस्वादिद्वारकम् । कार्यावस्थस्य कारणवस्थस्य चोपास्यत्वं पूर्वमेवोक्तम् । कारणावस्थत्वमपि द्विप्रकारमिति पूर्वमवोचाम ।

44. अत्र स्पृष्टाः पूर्वमीमांसाविषयाः ।

1. अथातो ब्रह्मजिज्ञासा – कर्मविचारस्य वृत्तत्वरूपहेतुवाची अनश्शब्द इति सूत्रकार कर्ममीमांसामनिर्दिशत् व्यास । अत्र प्राभाकरः पूर्वपक्षवादी—यद्यपि प्राभाकर. सूत्रकारानन्तरभावी, अथापि सूत्रकारस्य भविष्यद्दर्शनवेदित्वात् तदाशङ्का पूर्वमेव प्रदर्शयति ।

ब्रह्मविचार कर्मविचारानन्तरकालीनकर्तव्यताकः कर्मणोऽल्पास्थिरफलत्वनिर्णयविशिष्टानन्तस्थिरफलापातप्रतीतिविषयत्वात् इत्यनुमान विवक्षितम् । कार्यवस्तुन्येव शब्दस्य बोधकत्वं प्रामाण्य च, सिद्धवस्तुनि शब्दस्य बोधकत्वमेव नास्ति । अतः सिद्धरूपब्रह्मबोधकत्वाभावात् शब्दस्य, अनन्तस्थिरफलापातप्रतीतिरेव नास्तीति हेतोरसिद्धेः कथ ब्रह्मविचारस्यारम्भणीयत्वमिति प्राभाकाराशयः । यद्वा जैमिनेरप्ययमाशयो भवितुमर्हति—चोदनालक्षणोऽर्थो धर्म. इति वदतः क्रियायां प्रवर्तकस्य वचनस्यैव चोदनारूपत्वेन कार्यार्थे एव शब्दस्यबोधकत्वमित्याशयसिद्धेः । अत्र सिद्धवस्त्वपि वेदप्रातिपाद्यमिति सिद्धान्तः।

2. एवं देवताधिकरणे—देवतास्वरूपं शब्दानुपूर्वी एवेति मीमांसकमतं खण्डयति ।

3. चमसवदविशेषात् ।

4. अशुद्धमितिचेन्न शब्दात् ।

5. सूचकश्च हि—

6. धर्मं जैमिनिरत एव ।

7. सर्वं वेदान्त.....एक वा संयोगस्य चोदना—

8. सज्ञातश्चेत्तदुक्तमस्ति तु तदपि ।

9. बेधाद्यर्थभेदात् ।

10 हानौतूपायनशब्दशेषत्वात् कुशाच्छन्दस्तुत्युपगानवत् तदुक्तम् ।

11. अक्षरधियां त्ववरोधः.....औपसदवत् तदुक्तम् ।

12. तन्निर्धारणानियमः तद्दृष्टेः पृथक् हि अप्रतिबन्धः फलम् ।

13. प्रदानवदेव तदुक्तम् ।

14. लिङ्गभूयस्त्वात् तद्धि बलीयस्तदपि ।

15. पूर्वविकल्पः प्रकरणात् स्यात् क्रिया मानसवत् ।

16. श्रुत्यादिबलीयस्त्वाच्च न बाधः ।

17. अनुबन्धादिभ्यः—तदुक्तम् । वचनानित्वपूर्वत्वात् ।

18. अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ।

19. मन्त्रादिवद्वाऽविरोधः ।

20. नाना शब्दादिभेदात् ।

21. अङ्गेषु यथाश्रयभावः ।

22. शेषत्वात्पुरुषार्थवादः...जैमिनिः ।

23. बिधिर्वा धारणवत् ।

24. अत एव चाग्नीन्धनाद्यनपेक्षा ।

25. सर्वथापि त एवोभयलिङ्गात् ।

26. स्वामिनः फलश्रुतेरित्यात्रेयः ।

27. आर्त्विज्यं इत्यौडुलोमिः ।

28. द्वादशाहवत उभयविधम् ।

45. प्रायश एकाकाराणि सूत्राणि ।

1-1-6	भेदव्यपदेशाच्च	18
1-1-7	भेदव्यपदेशाच्चान्यः	22
1-3-1	भेदव्यपदेशात्	69
1-2-1	स्मृतेश्च	38
1-3-9	स्मृतेश्च	104
4-3-5	स्मृतेश्च	518
1-3-5	अपि स्मर्यते	87
2-3-7	अपि स्मर्यते	260
3-4-7	अपि स्मर्यते	448
3-4 9	अपि स्मर्यते	445
3-2-5	दर्शयति चाथो अपि स्मर्यते	331
4-2-5	स्मर्यते च	501
3-1-3	स्मर्यतेऽपि लोके	306
4-1-5	स्मरन्ति च	479
3-1-3	स्मरन्ति च	301
2-3-6	स्मरन्ति च	262
1 2-2	प्रकरणाच्च	42
1-3-1	प्रकरणात्	72
1-4-1	वदतीतिचेन्न प्राज्ञो हि प्रकरणात्	114
4-4-1	आत्मा प्रकरणात्	526
1-2-3	अन्तर उपपत्तेः	45
1-3-2	धर्मोपपत्तेश्च	73
2-1-10	सर्वधर्मोपपत्तेश्च उपपत्तेश्च	174
3-2-8	फलमत उपपत्ते	351
4-1-4	आदित्यादिमतयश्चोपपत्तेः	475

4-4-5	तत्वभावे सन्ध्यवदुपपत्तेः	536
3-1-4	तत्स्वाभाव्यापत्तिरुपपत्तेः	309
2-2-2	उभयथा च दोषात्	189
2-2-3	उभयथा च दोषात्	196
2-2-1	विप्रतिषेधाच्चासमञ्जसम्	183
2-2-8	विप्रतिषेधाच्च	216
3-2-6	प्रतिषेधाच्च	343
3-2-7	तथाऽन्यप्रतिषेधात्	349
1-1-5	श्रुतत्वाच्च	12
3-2-8	श्रुतत्वाच्च	352
2-4-3	अणवश्च	274
2-4-5	अणुश्च	280
2-1-3	स्वपक्षदोषाच्च	148
2-1 9	स्वपक्षदोषाच्च	167

गौणश्चेन्नात्मशब्दात् ।, शब्देभ्य ।, शब्दाच्च ।, आत्मशब्दाच्च ।, भावशब्दाच्च ।. स्वशब्दोन्मानाभ्याम् ।

3-3-1	दर्शयति च	358
3-3-7	दर्शयति च	376
3-2-5	दर्शयति चाथो अपि स्मर्यते	331
3-1-3	दर्शनाच्च	307
3-3-26	दर्शनाच्च	418
4-3-5	दर्शनाच्च	520
1-3-10	ज्योतिर्दर्शनात्	106
3-3-20	विद्यैवतु निर्धारणात् दर्शनाच्च	400

अन्तरधिकरणं — अन्तस्तद्धर्मोपदेशात् । अन्ताधिकरणं— अन्तर उपपत्ते. । अन्तरत्वाधिकरण—अन्तरा भूतग्रामवत्स्वात्मनोप। प्राणाधिकरणं—अत एव प्राणः, प्राणोत्पत्यधिकरणं—तथा प्राणाः प्राणाणुत्वाधिकरण—अणवश्च—

किंचिद्वैषम्यभाजि स्मृतिरूपप्रमाणप्रदर्शनपराणि सूत्राणि एकाकाराणि—38 स्मृतेश्च, 87 अपि स्मर्यते, 104 स्मृतेश्च, 250 अपि स्मर्यते, 262 स्मरन्ति च, 301 स्मरन्ति च, 306 स्मर्यतेऽपि च लोके, 331 दर्शयति चाथोऽपि स्मर्यते, 448 अपि स्मर्यते, 455 अपि स्मर्यते, 479 स्मरन्ति च, 501 स्मर्यते च, 518 स्मृतेश्च ।

एवं श्रुतिप्रमाणसूचकानि-विरोधः कर्मणि-इति चेन्नानेकप्रतिपत्तेर्दर्शनात् । समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात्-शब्दविशेषात् । गुहा प्रविष्टौ तद्दर्शनात् । ज्योतिर्दर्शनात् सपत्तेरिति . दर्शयति-आनुमानिकमप्येकेषां—दर्शयति, च दृश्यते तु सर्वोपेता च तद्दर्शनात् । वैषम्य नैर्घृण्ये न...तथा हि दर्शयति । रूपादिमत्वाच्च दर्शनात्—गौण्यसंभवात् शब्दाच्च, शब्देभ्यः, व्यतिरेको गन्धवत्तथा हि दर्शयति यावदात्मभावित्व...तद्दर्शनात् । अकरणत्वाच्च न दोषस्तथा हि दर्शयति । ज्योतिराद्यधिष्ठान—शब्दात् । दर्शयति च – आत्मशब्दाच्च—विद्यैव तु निर्धारणात् दर्शनाच्च भूम्न· क्रतुवज्ज्यायस्त्व— दर्शयति । सर्वान्नानुमतिश्च तद्दर्शनात् । ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात् । अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् । वाङ्मनसि दर्शनात् शब्दाच्च । नैकस्मिन् दर्शयतो हि निशि नेतिचेन्न-सबन्ध... दर्शयति च, दर्शनाच्च विशेषं च दर्शयति-प्रदीपवदावेशस्तथाहि दर्शयति-अनावृत्तिः शब्दात् ।।

द्वैतिमते सर्वसूत्रमपि सिद्धान्तसूत्रमेव । सर्वमपि प्रणवघटितमेव वाच्यम् ।

46. ब्रह्मसूत्रव्याख्यानबाहुल्यम् ।

भगवान् बादरायण· सर्वज्ञः वेदान्तविचारणरूपं शारीरशास्त्र सूत्ररूपेण संसारिजनानुजिधृक्षया प्रणिनाय। तेन कृतानि सूत्राणि वेदान्तार्थ स्पुट प्रकाशयन्त्यपि बहुभिराचार्यैः बहुधाऽर्थवर्णनात् पुनरपि संशयमेव जनयन्ति । सूत्रवैपरीत्य पूर्वसूत्रशेषं, अपूर्वसूत्रप्रणयनं सूत्र-पदच्छदवैषम्य सूत्रव्युत्क्रमं एवमादिचान्यत्कल्पयन्तः स्वस्वबुध्यनुसारेण व्याख्यानानाः आचार्याः मतभेदं कल्पयन्ति । अत्र व्याख्यातृनाम व्याख्यानप्रकराश्च प्रदर्श्यन्ते—यथा—

ब्रह्मसूत्राणि बहुभिः व्याख्यातानि ।

1. अद्वैताचार्येण श्रीशङ्करपादेन अद्वैतपरतया
2. श्रीरामानुजाचार्येण .विशिष्टाद्वैतपरतया
3. श्रीकण्ठाचार्येण. शिवविशिष्टाद्वैतपरतया
4 श्रीवल्लभाचार्येण—शुद्धाद्वैतपरतया
5. श्रीबिम्बार्काचार्येण द्वैताद्वैतपरतया
6. श्रीमध्वाचार्येण...विष्णुद्वैतपरतया
7. श्रीभास्कराचार्येण...भेदाभेदपरतया
8. विज्ञानभिक्षुणा ..विशिष्टाद्वैतविशेषपरतया
9 श्रीबलदेवेन ..अचिन्त्याभेदपरतया
10. श्रीकराचार्येण. .शिवद्वैतपरतया
11. अभिनवशुकाचार्येण ..श्रीमद्भागवतानुसारेण च ।

एव तत्तन्मताचार्या कञ्चन कञ्चनार्थविशेष मनसि परिकल्प्य तत्तदनुसारेण सूत्राक्षराणि योजयित्वा व्याख्यानानि कुर्वन्त जनाना बुद्धिमोहमुत्पादयन्ति च । बादरायणस्त्वेकमेवाभिप्रायं मनसि निधाय सूत्राणि प्रणिनायेति तु निश्चप्रचम् । अहो कि कुर्मः ? स्वस्य स्वस्य-प्रतिभातिशयं प्रकटयन्तः मतभेद हि कल्पयन्ति । ते ते बुद्धिमन्तः स्वस्वशेमुष्यतिशयेन भगवद्गोताया अपि हि अर्थभेदमुपपाद्य अन्यथा अन्यथा निरूपयन्ति । वस्तु तत्वं त्वेकमेव । मतभेदस्तु बहुधा भिद्यते। वस्तुत एकादश्यादिव्रतस्य एकैकदिनमात्रस्थत्वेपि धर्मशास्त्रनिपुणा

स्वस्वबुद्धिसामर्थ्यात् विपर्ययेण व्रतादि कल्पयन्ति । अनुष्ठानमपि तथा दृश्यते ।

47. अद्वैतिमते प्रत्यधिकरणविषयाः ।

1. प्रथमवर्णके—जीवब्रह्मैक्यात्मविषयस्य मोक्षरूपप्रयोजनस्य च संभवात् शास्त्रमिदमारम्भणीयम् । द्वितीयवर्णके—ब्रह्ममीमांसा-शास्त्रस्य पूर्वतन्त्रेण अगतार्थत्व निरधारि । तृतीये—साधन चतुष्टय-संपत्ते. सभवात् अधिकारिसभवो निर्णीतः । चतुर्थे—ब्रह्मणः आपाततः प्रसिद्धत्वात् संबन्धसिद्धेः शास्त्रमारम्भणीयमिति ।

2. जगज्जन्मादिकारणत्व ब्रह्मलक्षणमुक्तम् ।

3. प्रथमवर्णके – वेदकर्तृत्वेन जगज्जन्मादिहेतुत्वस्य सभवेन ब्रह्मण. सर्वज्ञत्व सभवतीत्युपपादितम् । द्वितीयवर्णके—शास्त्रादेव प्रमाणात् ब्रह्माधिगम्यते इत्युक्तम् ।

4 प्रथमवर्णके—ब्रह्मणो वेदान्तेषु तात्पर्येण प्रतिपाद्यमानत्वात् तेषां नानर्थक्यं कर्तृदेवतादिप्रशंसापरत्वं वा । द्वितीये—उपासना विधिशेषत्व निराकृतम् ।

5 जगत्कारणबोधकवेदान्तवाक्यानि ब्रह्मपराणि न तु प्रधान-पराणीति ।

6. ब्रह्मपुच्छं प्रतिष्ठेति तैत्तरीयकवाक्य स्वप्रधान्येन ब्रह्म समर्प-यति न तु आनन्दमयावयवत्वेनेति स्थापितम् ।

7. छान्दोग्ये य एषोऽन्तरादित्ये इति सूर्यमण्डले चक्षुि-चोपास्यत्वेन श्रुतः परमेश्वरः इति निर्णीतम् ।

8. अस्य लोकस्य का गतिः इत्यत्र सपाद्योपास्यत्वेन श्रुतः आकाशशब्दवाच्यः परमात्मेति ।

9. कतमा सा देवता प्राण इति हो वाच, इत्यत्र प्रस्तवाख्यसाम-भक्तो उपास्यः परमात्मा न तु मुख्यप्राणः इति पूर्ववन्न्यायातिदेशः ।

10. अथ यदतः परो दिवो इत्यत्र जाठराग्नौ उपास्यत्वेन श्रूय-माण ज्योति. पर ब्रह्म ।

11. प्राणोऽस्मि प्रज्ञात्मा इत्यत्र श्रूयमाणः प्राण. ब्रह्मेति ।

द्वितीयपादः

1. मनोमयः प्राणशरीरः इत्यत्र मनोमयत्वादिभिरुपास्यः परः न तु जीव इति ।

2. यस्य ब्रह्म च...इत्यत्र श्रूयमाणोऽत्ता परः

3. गुहाप्रविष्टाधिकरणे-ऋतं पिबन्तौ, इत्यत्र गुहाप्रविष्टौ जीव पराविति ।

4. य एषोऽक्षिणि...पुरुषः परमात्मा न प्रतिबिम्ब इति ।

5. योऽन्तरो यमयतीत्यत्र अन्तर्यामी परमात्मा

6. यत्तदद्रेश्य ..इत्युक्तः परमात्मा

7. यस्त्वेतमेव...वैश्वानरः परमात्मा

तृतीयः पादः

1. यस्मिन् द्यौः...द्युभ्वाद्यायतनं निर्गुणं ब्रह्म न प्रधानम् ।

2 यत्र नान्यत्पश्यति ..श्रुतः निर्गुणः परमात्मा न प्राणः ।

3. एतद्वैतदक्षर अक्षर निर्गुणं ब्रह्म ।

4. यस्त्वेतमेव त्रिमात्रेण...परः पुरुषः निर्गुणः परमात्मा ।

5. यदिदमस्मिन् ब्रह्मपुरे ..दहराकाशः सगुणः परमात्मा ।

6. य एषोऽक्षिणि पुरुषो आविर्भूतस्वरूपः निर्गुणः परमात्मा ।

7. न तत्र सूर्यो भाति श्रूयमाणं ज्योतिः निर्गुणं ब्रह्म ।

8. अङ्गुष्ठमात्रः पुरुषः ईशानः निर्गुणं ब्रह्म ।

9. देवानां ऋषीणा च ब्रह्मविद्यायामधिकार. अस्तीति ।

10. शूद्राणा ब्रह्मविद्यासु वेदपूर्वक. अधिकारो नास्तीति ।

11. यदिदं किञ्च जगत्सर्वं प्राण एजति निस्सृत श्रुतः प्राणः निर्गुणं ब्रह्म ।

12. एष संप्रसादोऽस्मात्, श्रुतं ज्योति निर्गुण ब्रह्म ।

13. आकाशो ह वै नाम. आकाशः निर्गुणः परः

14. कतम आत्मेति योऽयं विज्ञानमयः पुरुषः इत्यत्र श्रुतः आत्मा निर्गुणः परः ।

चतुर्थपाद

1. महत परमव्यक्त अव्याव्यक्तपदं न प्रधानपर शरीरपरमेव

2. अजामेकां अजापदं तेजोबन्नलक्षणप्रकृतिपरम् ।

3 यस्मिन् पञ्च ..इत्यत्र न सांख्याभिमततत्वपरं अपि प्राणादयः प्रतिपाद्यन्ते ।

4. वेदान्तेषु सृज्यविषये क्वचित्तेज आदिका क्वचिदाकशादिका इति विभागदर्शनेपि स्रष्टरि अविगानम् ।

5. यो वै बालाके श्रुतौ वेदितव्य. परमात्मा

6. आत्मा वा अरे निर्गुणः परः

7. ब्रह्म उपादनमपीति

8. साख्यमतस्य अवैदिकत्वप्रतिपादकयुक्त्या वेशेषिकमताना अपि तत् ज्ञेय

द्वितीयाध्यायः

2-1-1 स्मृत्यधिकरण—स्वपक्ष पूर्वाध्यायोक्तस्यार्थस्य स्मृतिन्यायविरोधपरिहारः प्रधानादिवादाना न्यायाभासत्वं च निरूप्यमिति प्रथमाधिकरणे स्मृतिविरोधपरिहार । कपिलोक्तसांख्यस्मृतेः वेदान्तेषु आश्रयणीयत्वमित्याक्षिप्य मनुस्मृत्योक्तमेवोपजीव्यमित्युच्यते। कपिलस्य सगरपुत्रनाशकत्वेन प्रसिद्धिसत्वात् तादृशवासुदेवनामा कपिलः अन्य । ऋषि प्रसूत कपिल इति श्रुत्युक्तकपिलः अन्यः इति वक्तु शक्यत्वात् ।

2-1-2 योगप्रत्युक्त्यधिकरण—'अथ तत्वदर्शनोपायो योगः' इति श्रुतस्यापि योगस्मृतिरूपशास्त्रस्य न प्रामाण्यम् । योगनिष्ठाना द्वैतित्वेन आत्मैकदर्शित्वाभावात् । असङ्गो ह्ययं पुरुषः इति निर्गुणविशुद्धपुरुषैकत्वप्रतिपादकवेदान्तशास्त्रविरुद्धं हि योगशास्त्रम् । त त्वौपनिषदं पृच्छामि, नावेदविन्मनुते तं बृहन्त इत्यादिश्रुतयः पुरुषैकत्वे प्रमाणम् ।

2-1-3 विलक्षणत्वाधिकरणं—लोके मृदादेरुपादानत्वं कुलालादे निमित्तत्व च दृष्टं। अतः ब्रह्मणः चेतनाचेतनरूप प्रपञ्च प्रति निमित्तत्वमुपादानत्वं च कथम् ? वेदोक्तत्वादेव लोकविलक्षणस्योभयरूपत्व

सभव इति समाधि । विज्ञानं चा विज्ञान च, मृत् अब्रवीत् आपोऽब्रुवन्, तत्तेजो ऐक्षत जे हेमे प्राणाः अह श्रेयसे .तेह वाचमूचु. इत्यादि श्रुतिभ्यः चेतनाचेतनयो ब्रह्मानुप्रवेशमुक्त्वा अचेतनानामपि चेतनवत् प्रश्नोत्तरवत्वादिश्रवणाच्च । अतो वेदोक्तमङ्गीकार्यं । शब्दैकप्रमाणकत्वादस्मदादेः । अचिन्त्याः खलु ये भावाः, न तांस्तर्केण योजयेत् । नैषा तर्केण मति रापनेया इत्यादिभिः ब्रह्मणः अचिन्त्यशक्तिमत्वोक्तेः।

2-1-4 शिष्टापरिग्रहाधिकरण – प्रधानकारणवादि निरसनेन मनुव्यासरूपशिष्टै. अपरिगृहीताः अण्वादिकारणवादिनश्च निरस्ताः ।

2-1-5 प्रपञ्चस्य ब्रह्मोपादानत्वे भोग्यस्य भोक्तृत्वापत्तिः भोक्तुः भोग्यत्वापत्ति एकोपादानत्वात् । देवदत्तादेरेव भोक्तृत्वं ओदनादेव च भोग्यत्वमिति लोकव्यवस्था । अतो लोकदृष्टव्यवहारविरोध. इति सांख्याक्षेपे-समाधि –फेन वीची तरङ्गबुद्बदादीनां उदकात्मकसमुद्राभिन्नत्वेपि इतरेतर व्यवहार विभागादि व्यवहारवत् । एकमृदुत्पन्न घटशरावादीना विभागदर्शनाच्च ।

2-1-6 आरम्भणाधिकरणं—यथा सौम्य एकेन मृत्पिण्डेन इत्यादि श्रुति बलेन रूपनामादि विकारव्यवहारस्य केवल वाङ्मात्रत्वं मृद एव सत्यत्वं प्रतीयते। एव चेत् भोक्तृभोग्यादीनामेवाभावात् तद्व्यवहार कथ सङ्गच्छते इति प्रश्ने तेषामपि मिथ्यात्वमेव । तुष्यतु दुर्जन. इति न्यायेन लोकदृष्टप्रक्रियया पृष्टस्य तद्रीत्योत्तर दत्तम् । ब्रह्मव्यतिरेकेण सत्यरूपस्यान्यस्याभावः अत्र समर्थ्यते। अनन्यत्वं-अन्यस्याभाव —अनन्यः तस्य भाव –परब्रह्मणो व्यतिरेकेण व्यतिरेकेणाभावःतत्सादृश्य अभावश्च तदन्यत्व तदल्पता । अप्राशस्त्य विरोधश्च नञर्थाः षट्प्रकीर्तिताः इति प्रमाणबलेनात्र नञः अभावार्थकत्वम् । यथा मृगतृष्णिकोदकादीना ऊषरादिभ्यः अनन्यत्वं (अन्यस्याभावत्व) यथा फेनादीना समुद्रादनन्यत्व यथा च घटाकाशाना महाकाशादनन्यत्वम् । अस्मान्मायी सृजते विश्वमेतत् इति मायाविशिष्टं ईश्वरशब्देन व्यवहारार्ह सगुण ब्रह्म जगत्कारणम् । अविद्याविशिष्टं जीवशब्देन व्यवहारार्ह भोक्तृभोग्यभावादिना वर्तते । जीवो ब्रह्म विशुद्धा

चित् भेदस्तस्याः तयोः द्वयोः । अविद्या तच्चितोर्योगः षडस्माकमनादयः इति षण्णामनादित्वाङ्गीकारात् भोक्तृभोग्यादि व्यवस्था सुखदुःखादिव्यवस्था च । ज्ञानरूपे ब्रह्मणि अविद्यामायासङ्गः कथमिति चेत् ? जले औष्ण्यमिव अग्नौ शैत्यमिव ।

2-1-7 इतरव्यपदेशाधिकरणं—जन्मजरामरणाद्यनेकानर्थं आत्मनः कथं परमेश्वरः कुर्यात् ? कथं च ब्रह्मणः स्रष्टृत्व इति शङ्कापरिहारकम् । मायाविशिष्टब्रह्मण एव जगत्कारणत्वम् । न तु शुद्धस्य । आत्मावा अरे इति तस्यैवान्वेष्टव्यत्वं च । रज्जौ सर्पभूदलाद्यध्यासवत् ब्रह्मणि भोक्तृभोग्यादिभ्रमः । वस्तुतः तत्त्वमसीत्यादिना जीवब्रह्माभेद एव । एक एवात्मेति सिद्धान्तः । यथा पृथिवीत्वाश्रयाणां मृन्मनां केचित् वज्रवैडूर्यादयः केचित् सूर्यकान्तादयः केचित् लोष्टपाषाणादयः । यथा च पृथिव्याश्रयाणां बीजानां बहुविधं पत्रपुष्पादिवैचित्र्यं, एवमेव ब्रह्मणः अविद्यावशात्सर्वोपपत्तिः ।

2-1-8 साधनमनपेक्ष्यैव ब्रह्म जगत्सृष्टिं करोति । क्षीरादिः दृष्टान्तः । क्षीरं दध्यादिभावमाप्नोति । बलका रेतस्सेकमन्तरेण गर्भं धत्ते । पद्मिनी प्रस्थानसाधनमनपेक्ष्यैव तटाकात् तटाकान्तरं प्रतिष्ठते । इन्द्रादयः सौभरिप्रभृतयः सिद्धयोगिनश्च सचेतनाः स्वशक्त्यैव शरीरान्तरं हर्म्यादिकं देशान्तरगमनादिकं च कुर्वन्ति ।

2-1-9 कृत्स्नप्रसक्त्यधिकरणं—निरवयवस्य ब्रह्मणः कथं परिणामः जगद्रूपेण । कृत्स्नपरिणामे ब्रह्मणो नाशः । सावयवत्वाभ्युगमे निष्कलमित्यादि शब्दव्याकोपः अनित्यत्वप्रसङ्गश्चेत्याक्षेपपरिहारकम् । तावानस्य महिमा, ततो ज्यायांश्च पुरुषः, 'अचिन्त्याः खलु ये भावाः न तान् तर्केण योजयेत् । प्रकृतिभ्यः परं यच्च तदचिन्त्यस्य लक्षणम्। इति, अतीन्द्रियार्थं याथात्म्यानवगमात् एवं प्रश्नः । सावयवत्वनिरवयत्वयोः वस्तुनि विकल्पो न सभवति । अविद्याकल्पितस्वरूपभेदे ब्रह्मणि सावयवत्वम् । अतो जगत्सृष्टिः । तावतापि ब्रह्म ज्ञानरूपं शुद्धमेव । तिमिरदोषेण अनेकचन्द्रदर्शनेपि चन्द्रैकत्वनिश्चयः अबाधितः खलु ।

2-1-10 **सर्वोपेताधिकरणं**–सर्वकर्मा सर्वकामः सत्यकामः सत्यसङ्कल्पः एतस्य वाऽक्षरस्य इत्यादि श्रुतिभ्यः ब्रह्मणः सर्वशक्त्यवगतेः विचित्रविकार प्रपञ्चभावोऽप्युपपद्यते। यद्यपि, नेति नेति इत्यादिना ब्रह्मण सर्वविशेषाः प्रतिषिद्धा, अपाणिपादमिति च साधनसामग्र्यपि प्रतिषिद्धा, तथापि पूर्वोक्तश्रुतिसामर्थ्यात् सृज्यसर्गशक्तिरप्यस्तीत्यङ्गीक्रियते।

2-1-11 **प्रयोजनवत्त्वाधिकरण**–प्रयोजनाभिसन्धिरहितस्य राज्ञः राजामात्यस्य च कन्तुकादिविहारेषु लीलारूपप्रवृत्तिवत् बाह्यप्रयोजनानपेक्षयैव स्वभावादेव उच्छ्वास निश्वासादिप्रवृत्तिवच्च परमेश्वरस्य सृष्टिरुपपद्यते।

2-1-12 **अवैषम्यनैर्घृण्याधिकरणं**–समोऽह न मे द्वेष्यः इत्याद्युक्तब्रह्मणः जगद्विषमसृष्टौ पक्षपातादि दोषनिवारणपरम्। अनादि जीव गतधर्मापेक्षयैव तस्य स्रष्टृत्वात्। व्रीहियवादिसृष्टौ साधारणकारणभूतस्य मेघस्य न सृज्यवैषम्यापाद्रकत्वम्। तत्तद्बीजगतासाधारणसामर्थ्यमेव तत्र कारणम्।

2-1-13 **सर्वधर्मोपपत्त्यधिकरण**—प्रधानकारणवादे सर्वज्ञत्वादिसर्वधर्मोपपत्तिः न घटते। औपनिषदचेतनब्रह्मजगत्कारणवादे सर्वस्योपपत्ति.।

2-2-1 **रचनानुपपत्त्यधिकरणं**—चेतनानधिष्ठितप्रधानस्य जगत् कारणत्वं वदता सांख्यानां निरासपरम्। 'योऽप्सु तिष्ठन्' एतस्य वाक्षरस्य इति सर्ववस्तुषु परमेश्वरस्य सत्त्वादेव तेषा शक्तिमत्वम्।

दृष्टवदानुश्रविकः सह्यविशुद्धिक्षयातिशययुक्तः।
तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात्॥ इति

सांख्यानां सिद्धान्तः। आनुश्रविकः वेदोक्तोपायः दृष्टवत् औषधादिवत् प्रत्यक्षोपाय एव। पर तु उपायः शास्त्रनिषिद्धहिंसारूपविशुद्धियुक्त वृक्षपत्रादिच्छेदनक्षुद्रजन्तुनाशादिरूपविशुद्धियुक्तश्च। कर्मफलस्य क्षयित्वेन तदनन्तरं दु खोत्पत्तिरूपक्षयः युक्त। जात्यन्धस्य नेत्रोत्पत्तौ तन्नाशे च यथाऽतिशयितदुःखं तथा स्वर्गप्राप्तौ तत्क्षये च दुःखाति-

शयोत्पत्तिः। एतादृशक्षयातिशययुक्तश्च वेदोक्तमार्गः। अतो वैदिकमार्ग-विपरीत एव श्रेयान् भुत प्रधानपुरुषविज्ञानरूपोपाय एव आत्यन्तिक-दुःखोच्छेदसाधनम्। अत एव भारते उक्तं—

तातैतत् बहुशोऽभ्यस्तं जन्मजन्मान्तरेष्वपि।
त्रयीधर्ममधर्माढ्यं न संयक् प्रतिभाति मे॥ इति।

गीतायामप्येवमेवोक्त—

त्रैगुण्यविषयावेदाः निस्त्रैगुण्यो भवार्जन।
निर्द्वन्द्वो नित्यसत्वस्थः निर्योगक्षेम आत्मवान्॥ इति।

कर्मचितो लोकः क्षीयते इति च श्रुति। अतो वैदिकमार्गः दूष्य एवेति साख्यमतानुसारिणः। एतन्नयुक्त-तं षड्विशकमित्याहः सप्तविशमथा ऽपरे इति प्रकृते. पुरुषाच्च व्यतिरिक्तः परमेश्वरः प्रतिपाद्यते। स एव परमपुरुषः जगत्कारणम्। वेदमार्गदूषणं तु साहसमेव। सामान्यन्याये-न उत्सर्गापवादन्यायेन च निषेधशास्त्राणां विधिशत्रास्त्राणां च प्रवृत्तेः। अपिचात्र नहि भिक्षुकास्सन्तीति स्थाल्यो नाधिश्रीयन्ते। न हि मृगास्सन्तीति यवा नोप्यन्ते। इति न्यायोऽत्र ग्राह्यः। यन्न दुःखेन सभिन्न न च ग्रस्तमनन्तरम्। अभिलाषोपनीतं यत् तत्सुखं स्वः पदास्पदं इति प्रसिद्धानन्दसागररूपस्वर्गार्थं कर्म विहितम्। अत्र किञ्चित् अशुध्यादिक भावीति। एतत् दुःखाय न हि भवति। न साहसमनारुह्य नरो भद्राणि पश्यति इति हि न्यायः। कूपखाननवत् एतद्भविष्यति। तद्यथा—कूपखनकः कूप खनन् यद्यपि मृदा पासुभिश्च अवकीर्णो भवति, सः अप्सु सजातासु तत एव त गुणमासादयति येन स च दोषो निर्हण्यते। भूयसाचाभ्युदयेन योगो भवति। इति महा-भाष्यन्यायात् नायमत्र दोषः। गीताश्लोकादिक मोक्षार्थिविषयं कर्म-फलेषु विरक्ताधिकारिकं च।

2-2-2 महद्दीर्घाधिकरणं—शुक्लतन्तूत्पन्नपटे शुक्लरूपं दृश्यते। एवं परमेश्वर सृष्टजगति तन्निष्ठचैतन्यानुवृत्तिः स्यादिति शङ्का। एवमनुवृत्ति नियमो न सभवति। गोमयादे वृश्चिकोत्पत्तिदर्शनात्।

2-2-3 **परमाणुजगत्कारणत्वाधिकरणं**—अत्र परमाणुकारणवादो निरस्यते ।

2-2-4 **समुदायाधिकरणं**—सर्ववैनाशिकसिद्धान्तनिराकरणमत्र ।

2-2-5 **अभावाधिकरणं**—विज्ञानवादि बौद्धमतनिरासः ।

2-2-6 **एकस्मिन्नसंभवाधिकरणं**—दिगम्बरमतनिरासः ।

2-2-7 **पशुपतिमतनिरासः**—पत्युः ईश्वरस्य निमित्तकारणत्वं वदति । पशुपाशविमोक्षणाय कार्यं कारणं योग विधिः दुःखान्ताः पञ्च-पदार्थाः पशुपतिना उपदिष्टाः । वैशेषिकादयोपि ईश्वरं निमित्त-कारण वदन्ति । ईश्वरस्य पत्युः जगत्कारणत्वं न सभवति । तथासति रागद्वेषादि दोषप्रसक्तेः तस्यानीश्वरत्वमेव प्रसज्येत । नहि ईश्वरः करुणावान् वीतरागश्च सन् कुत्सिते कर्मणि प्राणिनः प्रवर्तयेत् । जीव-कर्मापेक्षया विषमसृष्टिः अतो न दोषप्रसङ्ग इत्यपि न साधीयः । अन्योन्याश्रयदोषप्रसङ्गात् । कर्मणा ईश्वरः प्रवर्तनीयः ईश्वरेण च कर्मेति । स्वतन्त्रोपीश्वरः कर्मभिः प्रवर्त्यते इति विरोधश्च, तथा चायमपरः गण्डस्योपरि स्फोटः इति । ईश्वरस्य स्वातन्त्र्यभङ्गोपि ।

2-2-8 **उत्पत्त्यसंभवाधिकरणं**—वेदविरुद्धार्थप्रतिपादकत्वात् पञ्च-रात्र न प्रमाणम् । आग्नेय पाञ्चरात्र तु दीक्षायुक्तं च तान्त्रिकम् । अवैदिकत्वात् तत्तन्त्र ततो वैखानसेन तु । सौम्येन वैदिकेनैव देवदेवं समर्चयेत् इति पाञ्चरात्रस्य वैदिकापरिग्राह्यत्वोक्तेः । नचेद पाञ्च-रात्रदूषण वैखानसप्रशसार्थमिति वाच्यम् । अवैदिकत्वादिति हेतूक्तेः तावतापि निराकरणाभावात् । ननु शैवादिमतेषु विरुद्धाचारादयो दृश्यन्ते न तथा पांचरात्रे। वेदविरुद्धवत् भासमानस्य वाक्यस्याविरुद्धार्थ वर्णनसंभवाच्च । एवमेव हि उपनिषत्स्वपि परस्परविरुद्धार्थप्रति-पादकतया भासमानाना वाक्यानामविरुद्धार्थ समन्वयः क्रियते । अतः प्रामाण्यं सुशकमिति चेन्न । शैवादिग्रन्थेष्वपि विरुद्धांशस्य त्याज्यत्व अविरुद्धार्थभागस्य प्रामाण्य च स्यात् । विरुद्धांशे अन्यथा तात्पर्य-वर्णनं वा स्यादिति महाननर्थः ।

अपि च—पस्पशाह्निके महाभाष्यकृता—सप्तद्वीपा वसुमती, त्रयो लोकाः, चत्वारो वेदाः, सङ्गास्सहरहस्याः बहुधा भिन्नाः एकशतमध्वर्यु शाखाः, सहस्रवर्त्मा सामवेद , एकविंशधा बाह्वृच्य नवधा अथर्वणो वेद , वाकोवाक्यं, इतिहास पुराण वैद्यकम् इत्येतावत् उक्तम् । पाञ्चरात्रस्य तु प्रस्ताव एव नास्ति । एवमेव छान्दोग्ये अधीहि भगव इति होपससाद इत्यादौ पाञ्चरात्रप्रस्तावगन्धोपि नास्ति । पाचरात्रस्य प्रामाण्ये कथं उभयत्रानुवादाभाव । अनुक्तमन्यतो ग्राह्यमिति न्यायस्य नात्र प्रसरः, तथापि शैवाद्यागमवदेवास्यापि प्रामाण्यं वाच्यम् । न साख्य न शैवं न तत् पाचरात्र न जैन न मीमासकादेः मत वा । विशिष्टानुभूत्या विशुद्धात्मकत्वात् तदेकोऽवशिष्टः शिवः केवलोऽहं ।। इति दशश्लोक्यां शङ्करपादैः उक्तं अप्रामाण्यम् ।

तृतीयपादः

2-3-1 वियदधिकरण—अत्राकाशस्योत्पत्तिरुच्यते ।

2-3-2 मातरिश्वाधिकरणं—वायुर्वाव संवर्गः इति वायोरुपासन श्रवणात् । सैषा अनस्तमिता देवता यद्वायुः इति वृहदारण्यक श्रुतेः वायुश्चान्तरिक्ष चामृत इत्यादि श्रुतेश्च वायोरुत्पत्तिर्नास्तीति पूर्वपक्ष कृत्वा उत्पत्तिः स्थाप्यते ।

2-3-3 असभवाधिकरणं—सदात्मकब्रह्मणः अन्यतः सम्भवो निषिध्यते । स कारण कारणाधिपाधिपो न चास्य कश्चित् जनिता न चाधिपः इति श्रुतेः। सर्वविकारजातस्य मूलप्रकृतिः यथा अधिष्ठानभूता, तथा ब्रह्म सर्वाधिष्ठानभूतम् । अन्यथा भ्रमाधिष्ठानस्य अनवस्थाप्रसङ्ग. । यथा भ्रमस्थले अधिष्ठानस्य पारमार्थिकत्वमभ्युपेत्य रजतादि निषिध्यते, तथा नेह नानास्ति किञ्चन इति प्रत्यक्षदृष्टप्रपञ्चनिषेधः पारमार्थिकं किञ्चित्तत्वमङ्गीकृत्य ।

2-3-4 तेजोधिकरणं—वायोरेव तेजसः उत्पत्तिः उच्यते ।

2-3-5 अबधिकरणं—अग्नेः जलोत्पत्तिः ।

2-3-6 पृथिव्यधिकरणं—ता अन्नमसृजन्त इत्यत्र अन्नशब्दवाच्या पृथिव्येव, न व्रीह्यादि, ओदन वा

2-3-7 तदभिध्यानाधिकरणं — आकाशात् वायु वायोरग्निः इत्यादिना स्वतन्त्राकाशादिकमेव तत्तदुपादाननं इति बोध्यते इति पूर्व पक्षं कृत्वा सोऽकामयत बहु स्यां प्रजायेय, सच्च त्यच्चाभवत् इत्यादि प्रमाणबलात् तत्तद्भूतादिकं अभिध्यायन्नेव सृजति इति सिद्धान्तः क्रियते ।

2-3-8 विपर्ययाधिकरणं—पूर्वं आकाशादीनां उत्पत्तिक्रमो निरूपितः । अद्य लयक्रम. । उत्पत्तिक्रमविपर्ययेण अप्ययः ।

2-3-9 अन्तरा विज्ञानाधिकरणं — भूतोत्पत्तिक्रमवत् भूतलयक्रमोपि इति विज्ञानमनसोः न क्रमान्तरमन्वेषणीयम् ।

2-3-10 चराचरव्यपाश्रयाधिकरण — जीवस्याप्युत्पत्तिप्रलयौ स्यातामित्याशङ्क्य जन्ममरणादि जीवस्य स्थूलशरीरव्यपाश्रय एव । स्थावरजङ्गमभूतान्येव जायन्ते म्रियन्ते च । स वा अयं पुरुषः जायमानः शरीरमभिसंपद्यमान इति बृहदारण्यकोक्त्या शरीरसंबध एव जीवस्य जन्म शरोरादुत्क्रमणमेव मरणं प्रतिपाद्यते ।

2-3-11 आत्माधिकरण—शरोरेन्द्रिय पञ्जराध्यक्षः कर्मफलानुभोक्ता कश्चिज्जीवोऽस्ति । सः आकाशादिवत् उत्पद्यते इति पूर्वपक्ष कृत्वा अजो नित्यः इत्यादि प्रमाणबलेनोत्पत्तिर्निषिध्यते । तत्त्वमसि अयमात्मा ब्रह्म, इति भोक्ता जीवोपि ब्रह्मैव । ब्रह्मण एवाविद्यया जीवभावापत्ति. न तु स्वतः । एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा इति ब्रह्मण एव सर्वभूतान्तर्वर्तित्वोक्तेः ।

2-3-12 ज्ञाधिकरणं—आत्मनः आगन्तुकं चैतन्य निषिध्यते । कृत्स्न· प्रज्ञानघन अत्राय पुरुष स्वय ज्योतिः विज्ञानमानन्दं ब्रह्म इति प्रामाणात् आत्मनः नित्यमेव चैतन्यम् । सुषुप्त्यादिषु विषयाभावात् चैतन्याप्रकाशः । यद्वैतन्न पश्यति, पश्यन्वा एतन्न पश्यति(बृ.4-3-23) इति सुषुप्तिविषयक श्रुत्या आत्मनः चैतन्यस्य सद्भावः एव ज्ञायते इति ।

2-3-13 उत्क्रान्त्यधिकरणं—जोवस्याणुत्वमाशङ्क्य आकाशवत् सर्वगतश्च नित्यः, स वा एष महानज आत्मा इति प्रमाणात् विभुः। अणुत्वप्रतिपादकश्रुतयः उपाधिससर्गादुपपद्यन्ते। तत्त्वमसीति ज्ञानेन सर्वाविद्यानाशे विभुत्वं च।

2-3-14 कर्त्राधिकरणं—जोवस्य कर्तृत्व स्थाप्यते।

2-3-15 तक्षाधिकरणं—जीवस्य कर्तृत्व न स्वाभाविकं, बुध्याद्युपाधिकृतं यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति इत्यादिना जोवस्य स्वाभाविक कर्तृत्वाभ्युपगमे संसारित्व प्राप्तेरभिधानात्।

2-3-16 परायत्ताधिकरणं—परमेश्वरप्रेरित एव जीव कर्ता भवति।

2-3-17 अंशाधिकरण—अग्निविष्फुलिङ्गवत् जोवः ईश्वराशः। अश इव अंशः इति आभास एव अंश। निरवयवब्रह्मणः मुख्यांशासभवात्। अश गतदुःखादिकं त्वशिनि न प्रसज्यते। सर्वव्याप्तस्यापि सूर्यप्रकाशस्य अङ्गुल्याद्युपाधिसंवन्धात् ऋजुभाव वक्रभावप्राप्तावपि न तस्य परमार्थतस्तत्प्राप्ति. एवमेवाशगत दुःखादिप्राप्तिः न परस्य। अविद्याकृतदेहसंबन्धवत्वादंशे अशे जोवे एव विधिनिषेधशास्त्राणा प्रवृत्तिः न त्वंशिनि ब्रह्मणि। यथा अग्नेः एकत्वेपि श्मशानाग्नेः परिहारः। वैदिकाग्नेः परिग्रहः। भौमत्वाविशेषेपि नरकलेवरादोना परिहारः वज्रवैडूर्यादोनां परिग्रह.। गोमूत्रपुरीषादीना पवित्रत्वेन परिग्रह। महिषादिमूत्राणा त्यागः।

चतुर्थः पादः

2-4-1 प्राणोत्पत्त्यधिकरणं—अत्र प्राणानामुत्पत्तिः प्रतिपाद्यते। उत्सूत्र पूर्वपक्षः अतिदेशसूत्रमिदम्।

2-4-2 सप्तगत्यधिकरण—इन्द्रियाणां संख्या एकादश।

2-4-3 प्राणाणुत्वाधिकरणं — प्राणाना सर्वशरीरव्यापित्व न कल्प्यम्। प्राणसूक्ष्मा परिच्छिन्नाश्च।

2-4-4 प्राणश्रेष्ठ्याधिकरणं–न मृत्युरासीदमृतं न तर्हि रात्र्या अह्न आसीत् प्रकेत । आनीदवात स्वधया तदेकं तस्माद्धान्यं न परः कि च नास इति ऋग्वेदे यजुर्वेदे च श्रूयते । अन. प्राणने इति धातोः आनीत् इति निष्पन्नम् । मुख्यप्राणवायुना सह परमात्मनः सद्भाव-बोधनात् परस्येव तस्यापि नोत्पत्तिः । परिहारस्तु-अप्राणोह्यमनाः इत्युक्त्या परस्य प्राणाभावबोधकस्पष्टश्रुतेः अवातमित्युक्त्या वायुं विना आनीदित्यर्थसिद्धेश्च मुख्यप्राणस्याप्युत्पत्तिरस्तीति । अस्य श्रेष्ठ त्व च प्राणो वाव ज्येष्ठः इति छान्दोग्य श्रुत्या । न वै शक्ष्याम. त्व-दृते जीवितु इति (बृ) श्रुत्याचावगम्यते ।

2-4-5 वायुक्रियाधिकरण–वायुः पञ्चविधः । प्राणापानव्यानो-दानसमानभेदात् । पृथगुत्पत्तिश्रवणात् वायुः अन्यः प्राणश्चान्यः । जीवस्योपकारं च कुरुतः । यथा अमात्यः राजपरतन्त्रस्सन् राज्यांगैः सह उपकार करोति । तथा मुख्यप्राणोपि अन्येन्द्रियैस्सह जीवाधीनः सन् जीवस्योपकरोति जीवस्य । शरीरधारणादिकरणात् श्रेष्ठत्वम् ।

2-4-6 श्रेष्ठाणुत्वाधिकरण—मुख्यप्राणस्याणुत्वम् । परमाणु-वत् नाणुत्वं पञ्चभिः वृत्तिभि. कृत्स्नशरीरव्यापित्वात् । परिच्छिन्न-त्वमात्रं उत्क्रान्त्यादिना प्राणस्य ज्ञायते ।

2-4-7 ज्योतिराद्यधिकरण – अभिमानिदेवताविष्टप्राणानामेव कार्य करणे सामर्थ्यम् । यथा वृषभाद्यधिष्ठितशकटानां कार्यकरणे सामर्थ्यं भोक्तृत्व तु जीवस्यैव ।

2-4-8 इन्द्रियाधिकरणं—एतस्माज्जायते प्राणः मनस्सर्वेन्द्रि-**याणि च** इति पृथगुत्पत्तिश्रवणात् एकादशेन्द्रियाणि मुख्यप्राणव्यति रिक्तानि तत्त्वान्तराण्येव । न तु तस्यैवेतरे प्राणाः वृत्तिभेदाः ।

2-4-9 संज्ञामूर्तिक्लृप्त्यधिकरणं–नामरूपव्याकर्तृत्वं परमेश्वरस्यै वेत्युच्यते ।

तृतीयाध्याय

3-1-1 **तदन्तरप्रतिपत्त्यधिकरणं**–भूतसूक्ष्मपरिष्वक्तस्यैव जीवस्य गत्यगती ।

3-1-2 **कृतात्ययाधिकरणं** – पुनर्जननहेतुभूताननुभुक्तेषत्कर्मविशिष्टा. सानुशया एव यथागत किञ्चिदन्यथा चावरोहन्ति ।

3-1-3 **अनिष्टादिकार्याधिकरणं**—यागादिकर्तणा तदकर्तणाचाविशेषेण चन्द्रप्राप्तिरिति पूर्वपक्षं कृत्वा पापकृता देहारभाय चन्द्रप्राप्तिर्नावश्यकी, धृष्टद्युम्नादीना सीताप्रभृतीना च पञ्चमाहुत्यपेक्षां विनैवोत्पत्तिदर्शनात् ।

3-1-4 **स्वाभाव्यापत्त्यधिकरणं**–अवरोहतो जीवस्य आकाशादिभावापत्ति तत्सादृश्यापत्तिरेव ।

3-1-5 **नातिचिराधिकरणं** — कर्मिणो जीवस्याकाशादिप्राप्तौ स्वल्पकाल स्थितिरेव, अतो वै खलु दुर्निष्प्रपततर इत्युक्तेः । ईषद्दुस्सुषु कृच्छ्राकृच्छ्रार्थेषु खल् इति व्याकरणसूत्रम् ।

3-1-6 **अन्याधिष्ठिताधिकरण**—अनुशयवतां जीवानां व्रीह्यादिभावः उक्तः । तत्र जीवान्तराधिष्ठितव्रीह्यादौ अनुप्रविश्य तद्गतसुखदुःखभाक्त्व स्यात् पशुहिंसापूर्वकयागादिकरणेन तत्फलानुभवस्यावश्यकत्वात् इति पूर्वपक्ष कृत्वा यज्ञे वध्योऽवधः इति प्रमाणात् तस्याः हिंसात्वाभावेन कर्मणः अदुष्टत्वात्, तत्र संश्लेषमात्रमेवेति सिद्धान्त ।

द्वितीयः पादः

3-2-1 स्वाप्नार्थस्य मायामात्रत्व (अपारमार्थिकत्व) स्वप्नेदृष्टस्य प्रबोधकाले कृत्स्नाभिव्यक्त्यभावात् । अतो मिथ्यात्वम् ।

3-2-2 **तदभावाधिकरणं**–नाडी, पुरीतत्, रश्मिः हृदय प्राज्ञः इत्येते जीवस्य सुषुप्तिस्थानत्वेन श्रुतेः । व्रीहियवादिवन्नात्र विकल्पः। समुच्चय एव । सप्तमीविभक्त्या भिन्नस्थानत्वेन प्रतीयमानत्वेपि

प्रासादे खट्वाया तल्पे राजा शेते इतिवत् यमुना गङ्गया सह सागरं गच्छतीति वच्चोपपत्तिसंभवात् । प्राज्ञ एव साक्षात् सुषुप्तिस्थानम् ।

3 2-3 **कर्मानुस्मृत्यधिकरणं**—सुप्त एव प्रबुद्धः इति स्थाप्यते ।

3-2-4 मुग्धाधिकरण—मरणार्धसदृशी मुग्धावस्था जाग्रत्स्वप्न-सुषुप्त्यपेक्षया विलक्षणा जीवस्यास्तीति ।

3-2-5 उभयलिङ्गाधिकरणं—अत्र ब्रह्मण. सगुणत्वनिर्गुणत्वरूपो भयलिङ्गत्वाभावः स्थाप्यते । सगुणश्रुतयः निर्गुणश्रुतयश्च सन्ति । उभयावैयर्थ्याय उभयरूपत्वं विरोधात् न स्वीकर्तुं शक्यम् । अन्यतर प्रामाण्ये अर्धजरतीयन्यायापत्तिः । अतः अविद्यारूपोपाधिविशिष्टं ब्रह्म सगुणं सकलविशेषसयुक्त प्रपञ्चरूप भवति । भूयश्चान्ते विश्वमाया-निवृत्तिः इत्यादि प्रमाणबलेन अविद्यारहितं ब्रह्म निर्गुणम् । जले जल चाञ्चल्यप्रयुक्त बहुत्वस्य चन्द्रबिम्बेषु दर्शनेपि चन्द्रे न बहुत्व, तथा उपाधिरूपशरीरेन्द्रियादिसबन्धाधीन सुखदुःखादयः उपाधिगताः न ब्रह्मगताः । अतो नोभयलिङ्गं ब्रह्म ।

3-2-6 प्रकृतैतावत्वाधिकरण—द्वे वाव ब्रह्मणो रूपे इत्यादिकं ब्रह्मणो रूपद्वयं ब्रह्म च निषेधति । परं ब्रह्मणो रूपद्वयमात्रम् । सत्यं ज्ञानमित्यादिना ब्रह्मप्रतिपादनात् । ब्रह्मणोपि निषेधे प्रक्षालनाद्धि पङ्कस्य इति न्यायेन महता प्रबन्धेन ब्रह्मसद्भाववर्णनस्य वैयर्थ्यापत्तेः। उत्तरत्र सत्यस्य सत्यमिति ब्रह्मसत्यत्वस्थापनवैयर्थ्यापत्तिश्च ।

3-2-7 पराधिकरण—परस्मात् ब्रह्मणः अन्यत् वस्तु न किञ्चि-दस्तीति । यस्मात्परं नापरमस्ति, नेह नानास्ति किञ्चन इति श्रुतेः ।

3-2-8 फलाधिकरणं—यागादे यागादिकर्मण. आराधितदेवस्य अर्थापत्तिप्रमाणसिद्धापूर्वस्य वा फलप्रदत्व इति सशय्य कर्मण एव फल-प्रदत्वमिति जैमिनिर्मनुते । विग्रहो हविरादान युगपत्कर्म सन्निधिः प्रीतिः फलप्रदान च देवताना च विद्यते इति हेतोः । अपूर्वाद्याश्रयणे क्लेशाच्च । एष ह्येव साधु कर्म - एष उ एवासाधुकर्म—लभते च ततः कामान् इति प्रमाणबलात् परमेश्वर एव फलप्रदः इति बाद-रायणमतम् ।

तृतीयपादः

3-3-1 सर्ववेदान्तप्रत्ययाधिकरण—सगुणब्रह्मविषयः प्राणादि-विषयकश्च विज्ञानभेदाभेदविचारः। सर्ववेदान्तविज्ञानमेकमेव। विधि फलदेवताऽऽख्याविशेषात्। नामरूप, धर्मविशेष पुनरुक्ति, निन्दा, अशक्ति, समाप्तिवचन प्रायश्चित्तान्यदर्शनात् शाखान्तरे कर्मभेदस्स्यात् इति मीमासा(पूर्व), पूर्वपक्षसूत्रम्। एकं वा सयोगरूपचोदनाख्याविशेषात् इति सिद्धान्त सूत्रम्। ज्ञानकाण्डेपि भिन्नशाखासु प्रतीयमानं ज्ञानमभिन्नम्। शिरोव्रताख्यव्रतस्य वेदाध्ययनाङ्गत्वमेव। न तु ब्रह्म विद्याङ्गत्वम्। ब्रह्मविद्यां वदेत इत्यत्र ब्रह्मविद्याशब्दः वेदविद्यापर एव। ब्रह्म तत्व तपो वेदे न द्वयोः पुसि वेधसि इति वेदे प्रयोगात्।

3-3-2 उपसहाराधिकरणं—सर्ववेदान्तोक्तब्रह्मज्ञानस्य समानत्वे सिद्धे गुणानामुपसंहारः। अग्निहोत्रादिकर्मण एकत्वसिद्धचै अन्यत्रोक्ताङ्गानामप्यनुष्ठानवत्।

3-3-3 अन्यथात्वाधिकरणं – बाजसनेयकच्छान्दोग्योक्तोद्गीथ-विद्ययोः भेद एव।

3-3-4 व्याप्त्यधिकरणं – छान्दोग्ये उद्गीथावयवभूतोंकार-बाहुल्यदर्शनात् स ओङ्कार एवोपास्य.। ओमित्यक्षरमुद्गीथमुपासीत इत्यत्र समानविभक्तिकत्वश्रवणात् सामानाधिकरण्य वक्तव्यम्। तच्च चतुर्धा। अध्यासः अपवादः एकत्व विशेषणमिति। अत्र विशेषणरूपसामानाधिकरण्यम्। ओ इत्यक्षरस्य सर्ववेदव्यापित्वेन अत्रापि तस्यैव ग्रहण स्यात् इति तन्निषेध अनेन सामानाधिकरण्येन सिध्यति। अत्र उद्गीथशब्दविशेषणेन विशेषितत्वात् औद्गात्र-विशेषितस्य ओकारस्यैवोपास्यत्वेन ग्रहणम्। सिहो माणवकः, नाम ब्रह्मेत्युपासीत, इत्यादिषु अध्याससामानाधिकरण्यम्। देहेन्द्रियसन्घाते आत्मबुद्धि. आत्मबुध्या निवर्तते इति देवोऽहमित्यपवादः। एवमेव तत्त्वमसीत्यादावपि। द्विजोत्तमो ब्राह्मणो भूदेवः इत्येकत्वम्। नीलं यत् उत्पलं तदानयेत्यत्र विशेषणत्वम्।

3-3 5 छान्दोग्यवाजसनेयकोक्तप्राणविद्ययोः कौषीतिकीप्राण-विद्यायाश्च अभेदस्थापनम् । कौषीतिक्यां वसिष्ठत्वाद्यनुक्तावपि उप-संहार्यत्वमेव । यथा वा शौर्यादिगुणविशिष्टदेवदत्तः देशान्तरं गतः तद्दृश्यै अज्ञातगुणकोपि सः नातद्गुणको भवितुमर्हति । तद्देशस्थैः पूर्वं तद्गुणानामज्ञातत्वेपि परिचयवशात् पश्चात् तज्ज्ञानसंभवात् ।

3-3-6 आनन्दाद्यधिकरणं — आनन्दत्वादिगुणानां ब्रह्मस्वरूप-प्रतिपादनायैव प्रवृत्तत्वात् सर्वत्रोपसहार्यत्वम् ।

3-3-7 आध्यानाधिकरणं—इन्द्रियेभ्यः पराह्यर्थाः—पुरुषान्न परं इत्यादौ सर्वेभ्यः आत्मा पर इति प्रतिपाद्यते । निचाय्य तं मृत्यु-मुखात् प्रमुच्यते इति बन्धनिवृत्ति पूर्वकप्रयोजनार्थं आध्यान पूर्वक-सयग्दर्शनोक्तेः ।

3-3-8 आत्मगृहीत्यधिकरण — आत्मा वा इदमेक एवाग्र आसीत् इत्यत्रात्मशब्दः न विरिञ्चादिपरः कि तु परमात्मपरः । ईक्षापूर्वकस्रष्टृत्ववचनात् । एतादृशसृष्टेः सर्वत्र परमात्मकर्तृकत्वेन प्रसिद्धत्वात् । अथवा—वाजसनेयके कतम आत्मा - इति प्रस्तुत्य यो यं विज्ञानमयः इत्यारभ्य स वा एष महानजः आत्मा अजरोऽमरो-ऽमृतोऽभयो ब्रह्म इति श्रूयते । छान्दोग्ये सदेव सोम्य इत्यारभ्य स आत्मा तत्त्वमसि इति च । अत्र सदात्मशब्दयो तुल्यार्थकत्व स्थाप्यते।

3-3-9 कार्याख्यानाधिकरणं – तस्माद्वा अशिष्यन्तः इत्यादौ प्राणविद्यानिष्ठस्याचमनीयाप्सु वासस्त्वानुसन्धान विधीयते ।

3-3-10 समानाधिकरणं–एकस्यां शाखाया स्थलद्वये पठितापि शाण्डिल्यविद्या एकैव । यथा भिन्नासु शाखासु पठिता विद्या उपा-स्याभेदेनैका । विप्रकृष्टपठितशाण्डिल्यविद्यामनूद्य प्राप्तांशं विहाय अप्राप्तांशेशानत्वादिगुणविधानार्थं अन्येति विद्यैक्यात् ।

3-3-11 सबन्धाधिकरणं—अक्षिविद्या आदित्यविद्ययोः भेद-स्थापनम् ।

3-3-12 संभृत्यधिकरणं — सभृत्यादिगुणाना सर्वविद्योपसंहार-निषेध ।

3-3-13 **पुरुषविद्याधिकरणं**—बहुत्र श्रुतायाः पुरुषविद्यायाः समाख्याऽभेदेपि फलकल्पनादिभेदात् भेद एव ।

3 3-14 **वेधाद्यधिकरणं**—सर्वं प्रविश्य हृदय प्रविश्य इत्यादि मन्त्राणां अर्थसामर्थ्यात् आभिचारिककर्मण्येव विनियोगः । विद्यासु नोपसंहर्तव्याः । सर्वत्र समदर्शिनः नाशान्तमानसोवापि इत्यादि प्रमाणात् मुमुक्षूणा कस्मिंश्चिदपि द्वषाभावात् वेधादिमन्त्रोच्चारणानुपपत्तेः ।

3-3-15 **हान्यधिकरण**—केवलहानिश्रुतावपि उपायनानुवृत्तिबोधनम् । रामाणि विधूय इत्यत्र न रोमहानि शक्यवचना । धूञ् कम्पने इति धातोः हानार्थकत्वाभावात् । दोधूयन्ते ध्वजाग्राणि इत्यादावपि चचलार्थकत्वस्यैव प्रतीतेः । अतोऽत्र पापहानिरूपोऽर्थो न संभवतीति पूर्वपक्षः । धातूनामनेकार्थत्वादुपपद्यते इति सिद्धान्त· । प्रभवति सभवति उद्भवति, प्रहार आहार संहार विहार परिहारवत् । अनुलापो मुहुर्भाषा विलापः परिदेवन इत्यादिप्रसिद्धे. । वि इत्युपसर्ग सहित धूञ् धातोः हान्यर्थकत्वस्वीकारो न दोषावह. ।

3-3-16 **सांपरायाधिकरण**—शरीरपात एव कृत्स्नपापहानि· अध्वनि तज्जन्यफलाभावात् इत्यशः अत्रोच्यते ।

3-3-17 **गतेरर्थवत्वाधिकरणं**—सगुणब्रह्मोपासकस्य पर्यङ्कारोहार्थं देवयानाध्वगमनम् । निर्गुणब्रह्मप्राप्तौ न देवयानगतिरर्थवती । अत्र ब्रह्म समश्नुते इत्या द श्रुतेः । यथा लोके ग्रामप्राप्तौ पन्थाः आरोग्यप्राप्तौ तु नेति ।

3-3-18 **अनियमाधिकरणं** – सगुणब्रह्मोपासकानां सर्वेषामपि कासुचिद्विद्यासु पठनाभावेपि देवयानगतिस्तुल्या । गतिचिन्तनं सर्वैः उपसंहार्यम् ।

3-3-19 **यावदधिकरणं**—ज्ञानिनां देहपातानन्तर शरीरान्तरप्राप्तिर्नभवति तस्य तावदेव-अथ संपत्स्ये इति विश्वमायानिवर्तनरूप ब्रह्मज्ञानोत्पादकशरीरपातानन्तर ब्रह्मप्राप्तिश्रवणात् । तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत् । तथर्षीणां तथा मनुष्याणां

इत्यादिना ज्ञानिनां ब्रह्माभेदश्रवणात्। सनत्कुमारादयस्तु आधिकारिका इति स्कन्दादिशरीरसबन्धयोग्या ।

3-3-20 **अक्षराद्यधिकरणं**–विधिरूपाणामिव निषेधरूपाणामप्यस्थूलत्वादीनां सर्वत्रानुसन्धेयत्वम् ।

3-3-21 **इयदधिकरणं** – द्वा सुपर्णा-तयोरन्यः पिप्पसं इत्यत्र एकस्यैव भोक्तृत्वं, ऋतं पिबन्तौ उभयोरपि भोक्तृत्वम् । अतोर्थैक्या भावात् विद्याभेदः इति पूर्वपक्ष. । उभयोरपि मन्त्रयोः परमात्म प्रकरणपाठेन जोवद्वितीयस्येश्वरस्य प्रतिकपादकत्वेन च वेद्यभेदा भाव इति विद्यैक्यमेव । ऋतं पिबन्तौ इति परमात्मनः भोक्तृत्वोक्तावपि वस्तुतो भोक्तृत्वाभावात् । छत्रिणो गच्छन्ति इति छत्रिसाहचर्यात् अच्छत्रिणोपि छत्रित्वोक्तिः । एवमेव पानकर्तृजीवसाहचर्यात् अपिबतोपि परस्य पानकर्तृत्वोक्तिः ।

3-3-22 **अन्तरत्वाधिकरणं** — उषस्तकहोलप्रश्नसमाधानद्वये विद्ययोरैक्यमेव। तत्त्वमसीति नवकृत्वः उपदेशः अथापि विद्यैक्यं तद्वत्।

3-3-23 **व्यतिहाराधिकरणं**—तद्योह सोऽसौ योऽसौ सोह, त्व वा अहमस्मि इति श्रुते· चिन्तनाय परस्पर व्यतिहार । जीवात्मनि परमात्मदृष्टेः श्रेयस्करत्वं युक्तम् । परे जीवदृष्टेः कथं श्रेयस्करत्वम् । जीवस्य निकृष्टत्वादिति चेत् वचनप्रामाण्यात् । अतो व्यतिहारेणोभयमतिरेव कार्या । अत्रोभयविधध्यानेपि ऐकात्म्यस्यैव अत्रानुचिन्त्यमानत्वात् ।

3-3 24 **सत्याद्यधिकरणं**—स यो हैतं महद्यक्षं प्रथममजं वेद, इति सत्याख्यविद्या उक्ता । अनन्तरं तद्यत् तत्सत्यमसौ स आदित्यः य एष इत्यादिना च सत्यविद्या उक्ता । अनयो. ऐक्यं स्थाप्यते ।

3-3-25 **कामाद्यधिकरणं**–एष आत्मा इत्यारभ्य छान्दोग्ये दहरविद्या सगुणा बृहदारण्यके च - स वा एष महानज· आत्मा योऽय विज्ञानमयः प्राणेषु य एषोऽन्त र्हृदय आकाशः तस्मिन् शेते इति निर्गुणविद्या पठिता । उभयत्रापि हृदायतनत्वादिसामान्यात् विद्यैक्यम् । अत एव गुणोपसंहार । यद्यपि निर्गुणविद्यायां गुणोपसंहारस्य

नैव फलम् । तथापि निर्गुण ब्रह्मण एव विभूतिप्रदर्शनार्थमुपसंहारः । गुणवद्ब्रह्मैव निर्गुणमिति प्रदर्शनाय च ।

3-3-26 **आदराधिकरणं**--तद्यत् भक्त प्रथममागच्छेत् तद्धोमीयं स यां प्रथममाहुति जुहुयात् तां जुहुयात् प्राणाय स्वाहा (का) य एत देव विद्वान् अग्निहोत्र जुहोति (छा) इत्यादि प्राणाग्निहोत्रप्रकरणे मन्त्र पुरस्सरं होमो दृष्टः । तत्रान्नभोजनाभावे प्रतिनिधिन्यायमाश्रित्य जलेन वा अन्नेन वा द्रव्येण भोजनं स्वीकृत्य होमः कार्यः इति पूर्वपक्षः । भोजने उपस्थित एव होमबिधानात् अन्नभोजनाभावे न होमः कार्यः । लोप एव होमस्य ।

3-3-27 **तन्निर्धारणाधिकरणं**-कर्माङ्गाश्रयोद्गीथज्ञानस्य कर्मसु नियमेनाकर्तव्यत्वम् ।

3-3-28 **प्रदानाधिकरणं**—वागादीनां प्राणः श्रेष्ठः अग्न्यादीनां वायुः प्राणो बाव सवर्ग वायुर्वाव सवर्गः इति । अत्रोक्तयो वायुप्राणयोः विद्ययोः भेदः । आध्यात्माधिदैवभेदरूप प्रवृत्तिभेदसत्वात् ।

3-3-29 **लिङ्गभूयस्त्वाधिकरण** — मनश्चिदादीनां केवलविद्यात्मकत्वमेव । नतु क्रियानुप्रवेशेन क्रियाशेषत्वम् ।

3-3-30 **ऐकात्म्याधिकरणं**–अत्र देहातिरिक्तात्मसद्भावः स्थाप्यते । यद्यपि पूर्वमीमासायामेवायमर्थः अर्थसिद्धः । अथापि भगवता उपवर्षेण प्रथमतन्त्रे आत्मास्तित्वाभिधानप्रसक्तौ शारीरके एव वक्ष्यामः इत्युक्तत्वात् अस्मिन् शास्त्रे रत्नपेटिकायां रत्नमिव आत्मविचारः व्यासाचार्येण क्रियते । किण्वादिभ्यो मदशक्तिवत् भूतचतुष्टयसङ्घात एव चैतन्यात्मना परिणमते । अतश्च स्थुलोऽहमिति व्यवहारः संयक् भवति । भस्मान्तमेव शरीरम् ।

त्याज्यं सुख विषयसङ्गमजन्म पुसां
दुःखोपसृष्टमिति मूर्खविचारणैषा ।
व्रीहीन् जिहासति सितोत्तमतण्डुलाढ्यान्
को नाम भोः तुषकणोपहितान् हितार्थी ।।

लौकिकसुखभूयस्त्वे अल्पश्रमसद्भावः नैव दोषाय ।

न स्वर्गो नापवर्गो वा नैवात्मा पारलौकिकः
यावज्जीवेत् सुख जीवेत् ऋणं कृत्वा घृतं पिब ।।

देह एवात्मा, देहनाशो मोक्ष. । कण्वाश्रमे एतन्मतस्थाः बहवः । जाबालिप्रभृतयः रामायणे प्रसिद्धा. चार्वाकमतनिष्ठाः । अतो वेदान्त-विचारो व्यर्थः । इति प्रथमसूत्रेण पूर्वपक्षः । व्यतिरेक इति सूत्रेण सिद्धान्तः । देहस्य नात्मत्वं देहधर्मविलक्षणत्वात् । चैतन्यं न भूतचतुष्टयसङ्घातजन्यम् । एकस्मिन्नेव शरीरे तत्सत्वात् प्रत्यणु अनेकचैतन्योपलब्धिप्रसङ्गः । स्वापाद्यनन्तरं मम शरीरं स्थूलमिति व्यतिरेकनिर्देशोपि शरीरस्यात्मत्व निषेधति ।

औत्पत्तिकस्तु शब्दस्यार्थेन इति सूत्रे यज्ञायुधो यजमानः स्वर्गं लोकमंजसा याति इति श्रुत्यर्थविचारे आत्मास्तीति उपनिषद्वारा निर्णीय शास्त्रं प्रवृत्तमिति शाबरभाष्ये उक्तम् ।

इत्याह नास्तिक्यनिराकरिष्णु आत्मास्तितां भाष्यकृदत्र सूक्त्या ।
दृढत्वमेतद्विषयस्तुबोध. प्रयाति वेदान्तनिषेवणेन ।।

इत्युक्तमभिज्ञैः ।

न भूमिः न तोयं न तेजो न वायुः न खं नेन्द्रियं वा न तेषां समूहः।
अनैकान्तिकत्वात् सुमत्यैकसिद्धः तदेकोऽवशिष्ट. शिवः केवलोऽहम् ।।

इनि श्रीशाङ्करश्लोकोऽनुसन्धेयः ।

3-3-31 अङ्गावबद्धाधिकरणं—कर्माङ्गावबद्धोद्गीथोपासनादीनां सर्वशाखास्वनुवृत्तिः । वेदान्तरोत्पन्नकर्मणां गुणानां मन्त्राणां च वेदान्तरेषु यथाऽभ्युपगमः ।

3-3-32 भूमज्यायस्त्वाधिकरण—वैश्वानरविद्यायां समस्तस्यैव उपासनम् । व्यस्तोपासनफलश्रवणं सांगप्रधानोपास्तिफलान्तर्भूतम् ।

3-3-33 शब्दादिभेदाधिकरण—विद्यात्वनानात्वस्थापनम् ।

3-3-34 विकल्पाधिकरणं—ब्रह्मविद्यानिष्ठस्य एकैव विद्या न समुच्चयः । फलस्यैकरूपत्वात् ।

3-3-35 **काम्याधिकरणं**–स य एतमेवं वायु दिशां वत्सं वेद न पुत्ररोद रोदिति। स यो नाम ब्रह्मेत्युपास्ते यावन्नाम्नो गतं तत्रास्य यथा कामचारो भवति, इत्यादि काम्यविद्यासु एकरूपफलाभावात् यथाकामम्।

3-3-36 **यथाश्रयभावाधिकरणं**–उद्गीथाश्रयाः उपासनाः वेदत्रयविहिताः। तेषां एकस्मिन्कर्मणि समुच्चयः उत यथाकाम इति संशयः। उपासनाना पुरुषार्थत्वात् एकेन ऋत्विजा कृतमपि कर्म सफलं भवतीति शास्त्रोक्तत्वाच्च यथाकामं समुच्चयो विकल्पो वा।

चतुर्थः पादः

3-4-1 **पुरुषार्थाधिकरणं**–वेदान्तविहितमात्मज्ञानं स्वतन्त्रं सत् मोक्षकारण, न तु कर्मद्वारा। कर्मकर्ता आत्मा संसारी। ज्ञानोत्वन्य.। यागादेः पुत्रपश्वादिफलं सासारिकम्। कर्मरहितानामपि सन्यासिनाम्। एतमेव प्रव्राजिनो लोकमिच्छन्तः इत्यादिभिः मोक्षोक्तेः न कर्म साधनम्।

3-4-2 **परामर्शाधिकरण**-सन्यासाश्रमस्थापनपरम्। ब्रह्मसस्थो अमृतत्वमेति सन्यासाश्रमोक्ते। प्रजातन्तुं मा व्यवच्छेत्सीः इत्यादि गृहस्थाश्रमस्तुत्यर्थकम्।

3-4-3 **स्तुतिमात्राधिकरणं**—स वा एष रसानां, इत्यादयः उद्गीथोपक्षनाविध्यर्था. न तु स्तुत्यर्था।

पारिप्लवाधिकरण–अथ ह याज्ञवल्क्यस्य द्वे भार्ये। प्रतर्तनो ह वै दैवोदासि.। जानश्रुतिर्हि पौत्रायणः इत्याद्युपनिषत्सु उक्तान्याख्यानानि आत्मा वा अरे द्रष्टव्य· इत्यादि ब्रह्मविद्याविधानार्थाः न पारिप्लवार्थाः। सर्वाण्याख्यानानि पारिप्लवे शंसन्तीत्येतत् न उपनिषद्गतकथाविषयकम्। सर्वे ब्राह्मणा भोजयितव्या इत्युक्तिर्हि निमन्त्रित सर्वब्राह्मणविषया। नतु सामान्य सर्वब्राह्मणविषया। तथा पारिप्लवप्रकरणे एव मनु वैवस्वतो राजा इत्यादि विशेष कथाशंसनात्। तेषामेव ग्रहणम्। राजा श्वमेधे राज्ञः कालक्षेपार्थं पारिप्लवमाचक्षीत, सर्वाण्याख्यानानि शंसन्ति इत्युक्त्वा तत्रैव प्रथमेऽहनि मनुर्वैवस्वतो

राजा, द्वितीयेऽहनि यमो वैवस्वतो राजा इत्याद्युक्तेः सर्वशब्दः प्रकृत-पारिप्लवरूप कथाविशेषविषयकः इति ज्ञायते ।

3-4-5 **अग्नीन्धानाधिकरण** — विद्यया स्वफलब्रह्मप्राप्तौ अग्नीन्धानाद्याश्रमकर्मापेक्षा न विद्यते ।

3-4-6 **सर्वापेक्षाधिकरण**—तमेतं वेदानुवचनेन, कषाये कर्मभिः पक्वे इत्याद्याश्रमकर्मणां न साक्षान्मोक्षसाधनत्वं अथापि विद्योत्पत्ति सिद्धये तेषामपेक्षा । अश्वस्य रथचर्यायामेव हृचुपयोगः न तु लाङ्ग-लाकर्षणे । योग्यतावशात् । शान्तो दान्त इति शमादीनामेव साधन-त्वात् ते एवानुष्ठेयाः ।

3-4-7 **सर्वान्नानुमत्यधिकरणं**—प्राणविद्यानिष्ठस्य सर्वान्नानु-मतिः आपत्काले एव, नतु तस्य सर्वान्नविधानम्। लिङ लोट तव्यप्रत्य-याभावात् । अतो भोज्याभोज्यविभागशास्त्रस्य सामान्यस्य न बाधः । वामदेव विद्यानिष्ठे तु गम्यागम्यविभागशास्त्रस्य तु बाधः । तत्र न काचनपरिहरेत् सर्वयोषिदपरिहारवचनात् । ब्रह्मविद्यानिष्ठे उषस्तौ प्राणात्यये एव निषिद्धभोजनानुमतेः दर्शनात् प्राणविद्यानिष्ठे किंपुन-र्न्याय सिद्धमिदम् ।

3-4-8 **आश्रमकर्माधिकरण** — आश्रमकर्माणि मुमुक्षुणा अमु-मुक्षुणाचानुष्ठेयानि । विद्योत्पत्तौ सहकारित्वेन विधानात् मुमुक्षुणा-प्यनुष्ठेयानि ।

3-4-9 **विधुराधिकरणं**—रैक्व वाचक्नवी-भीष्मादीनां ब्रह्म-विद्यायामधिकारः ।

4-4-10 **तद्भूताधिकरण**—वानप्रस्थ सन्यासाश्रमं प्राप्तवतां पुन प्रच्युत्यभाव एव ततो न पुनरेयात् इति निषेधात् ।

3-4-11 **आधिकारिकाधिकरणं** — नैष्ठिकब्रह्मचारिणः प्रच्युतौ आरूढो नैष्ठिक इत्युक्तेः पतित एव सः । केचित्तु प्रच्यवनमुपपातक-मिति वदन्ति । यथा ब्रह्मचारिण. मधुमासाशने व्रतलोपः पुनः संस्कारश्च । ब्रह्मचार्यवकोर्णी नैऋत गर्दभमालभेत इति प्रायश्चित्त-

विधानात् । वानप्रस्थो दीक्षाभेदे कृच्छ्र द्वादशरात्रं चरित्वा महाकक्षं वर्धयेत् । भिक्षुर्वानप्रस्थवत् सोमबलिवर्जं स्वशास्त्रसंस्कारश्च इति भिक्षुवैखानसयोरपि प्रायश्चित्त स्मर्यते ।

3-5-12 बहिरधिकरणं—स्वाश्रमप्रच्युता. प्रायश्चित्तेन शुद्धा अपि बहिष्कार्या एव । विशुद्धानपि धर्मतो न संपिबेत् कामत. अव्यव हार्यस्तु इत्यादिवचनात् ।

3-4-13 स्वाम्यधिकरणं—अङ्गोपासनाः ऋत्विग्भिरेव कार्या. । यां वै कांचन यज्ञे ऋत्विज आशिषमाशासते इति यजमानायैव तामा शासत इति होवाच, तस्मादु हैवंविदुद्गाता ब्रूयात् कं ते काममगायानि इत्यादिना ऋत्विग्गत फलस्य यजमानफलत्वोक्तेः ।

3-4-14 सहकार्यन्तराधिकरणं—तस्मात् ब्राह्मणः पाण्डित्ये—अथ मुनिः इत्यत्र विद्यासहकारि मौनं विधेय बाल्यपाण्डित्यवत् ।

3-4-15 अनाविष्काराधिकरणं—बाल्येन तिष्ठासेत् इत्यत्रोक्त बाल्ये ज्ञानाग्नि. सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन इतिप्र माणेन ब्रह्मनिष्ठस्य कामचारवादभक्षणादीनां अकार्यकरत्वात् कामचारादिरूपं इति पूर्वपक्ष कृत्वा डम्भादिराहित्यमेव तत् ज्ञानिना अनुष्ठेयमित्युच्यते।

यं न सन्तं नचासन्त नाश्रुतं न बहुश्रुतम्
न सुवृत्त न दुर्वृत्त वेद कश्चित्, स ब्राह्मणः ।
गूढधर्माश्रितो विद्वान् अज्ञानचरितं चरेत्
अन्धवत् जडवच्चापि मूकवच्च महीं चरेत् ।। इति ।

अव्यक्तलिङ्गोऽव्यकाचारः इति च । नाविरत इत्यादिना कामचारादि निषिद्धं च ।

ब्रह्मचारी गृहस्थश्च वानप्रस्थश्च भिक्षुकः ।
चत्वार आश्रमा. प्रोक्ता एकैकश्च चतुर्विधः ।।

ब्रह्मचारिणो वृत्तिभेदा.—गायत्र. ब्राह्मः प्राजापत्य. बृहन्निति । गृहस्थ वृत्तिभेदाः—वार्तावृत्तयः शालीनवृत्तयः यायावराः घोरसन्यासिकाश्च । वानप्रस्थवृत्तिभेदाः – वैखानसाः औदुम्बराः वालखिल्याः

फेनापाश्च। यतिवृत्तिभेदाः कुटीचकाः बहूदकाः हंसाः परमहसाः इति। एतेषा स्वीयशास्त्राविरुद्धकर्मकारित्वे, एव ब्रह्मज्ञानित्वमित्युक्तम् ।

3-4-16 ऐहिकाधिकरण — विद्यासिद्धिः प्रारब्धप्रतिबन्धाभावे इहैव प्रतिबन्धे अमुत्रापीति । अतो विद्याफलं ऐहिकामुष्मिकं वेति ।

3-4-17 विद्याफलभूतमुक्तिविषये तु ऐहिकामुष्मिक विशेषप्रतिपत्तिनियमो नास्ति । सगुणविद्यासु तथा नियमः । निर्गुण विद्यायां ब्रह्मण एव मुक्त्यवस्थात्वात् संयक् ज्ञान यदा तदैव मुक्तिः इति निश्चयात् ।

चतुर्थाध्यायः

4-1-1 आवृत्त्यधिकरणं—ज्ञानावृत्तिः कार्या निदिध्यासितव्यः इति ज्ञानावृत्तेः प्रतीतेः । तण्डुलादिनिष्पत्तिपर्यन्त अवघातादेरिव । तत्त्वमसि इत्यादिवास्यजन्य ज्ञानमेव केषांचित् साक्षात्कारजनकं भवेत् तेषां तदा ज्ञानावृत्तिर्नास्ति । मन्दप्रज्ञानामेवाधिकत्वात् बहूनामुपकाराय शास्त्रस्य प्रवृत्तत्वाच्च आवृत्ति विधानमत्राधिकरण ।

4-1-2 आत्मत्वोपासनाधिकरणं—मत्तः अन्यः परमात्मा इति न चिन्त्यम् । त्वं वा अहमस्मि इत्यादि प्रमाणबसात् अहमात्मेत्येव ।

4-1-3 प्रतीकाधिकरण — प्रतीकेषु आत्मदृष्टिः न कार्या । नामादीना ब्रह्मविकारत्वेन ब्रह्मत्वमेवेति न मन्तव्यम् । तेषां ब्रह्मविकारत्वे प्रतीकाभावप्रसङ्गात् ।

4-1-4 ब्रह्मदृष्टयधिकरणं — आदित्यो ब्रह्मेत्यादेशः इत्यादौ आदित्यादौ ब्रह्मदृष्टिः । उत्कृष्टदृष्टि. निकृष्टे इनि न्यायात् । प्रतीकोपासकस्य फलदाता ईश्वर एव ।

4-1-5 आदित्यादिमत्यधिकरणं—य एवासौ तपति तमुद्गीथमुपासीत इत्यादौ आदित्यादिषु उद्गोथादिदृष्टिर्वा उद्गीथादौ आदित्यादिदृष्टिर्वा इति संशय्य उत्कर्षनिकर्षाभावात् उभयथापि उपासनं भवतीति पूर्वपक्षः । आदित्यादेः देवतारूपत्वेनोत्कृष्टत्वात् उद्गीथादिषु आदित्यादिदृष्टय एव । कर्मसमृद्धि फलकोपासनेष्वेवं

स्वीकारेपि स्वतन्त्रोपासनेषु कथ इति न शंक्य तत्रापि तथैव द्वितीया-निर्देशसाम्यात् ।

4-1-6 आसीनाधिकरण—सयक्दर्शनव्यतिरिक्तोपासनेषु आसीन एवोपासनं कुर्यात् । ध्यायति बकः इतिवत् ध्यायीत इत्युक्तेः निश्च-लत्व प्रतीयते । शुचौ देशे इति गीता । पद्मकाद्यासननिष्ठस्यैवोपसन-मिति योगशास्त्रम् ।

स्वस्तिक गोमुख पद्मं वीरसिहासने यथा
भद्र मुक्तासन चैव मयूरासनमेव च
सुखासनसमाख्य च नवम मुनिपुङ्गव ।।

इति नवविधासनानि तल्लक्षणानि च जाबालदर्शनोपनिषदि ।।

4-1 7 एकाग्रताधिकरणं – यागादिकरणे प्रचीनवश करोति वसन्ते ज्योतिषा यजेत इति दिक्देशकालादिनियमोऽस्ति उपासने तु न । मनोऽनुकूले इति चित्तस्य ऐकाग्रच यत्र यदा तदा तत्रोपासनम् ।

4-1-8 तदधिगमाधिकरणं–विद्याधिगमे दुरितक्षयः बोध्यते ।

4-1-9 इतरासंश्लेषाधिकरणं—विद्यानिष्ठस्य पुण्यक्षय । पुण्य स्यापि पाप्मशब्देन ग्रहणात् ।

4-1-10 अनारब्धकार्याधिकरणं — पुण्यपापविनाशः अप्रवृत्त फलयोरेव (सञ्चितयो.) नत्वारब्धकार्ययोः । प्रारब्धं भोगतो नश्येत्, तस्य तावदेव इति शास्त्रात्। प्रारब्धशरीरान्त एव मोक्ष इति प्रतीतेः।

4-1-11 अग्निहोत्राधिकरणं–विद्यानिष्ठस्य सर्वपुण्यविनाशोक्तौ सत्यामपि नित्याग्निहात्रादेः सन्ध्यावन्दनादेश्च स्वाश्रमकर्मण. कर्तव्यत्व-मेवेति प्रतिपाद्यते । तमेतं वेदानुवचनेन इति यज्ञदानादेः विद्यासिद्धये कर्तव्यत्वोक्तेः । तर्हि पुण्यापुण्याश्लेषविनाशयोः कथमुपपत्ति । नित्यकर्मव्यतिरिक्त, ऐहिकामुष्मिकप्रयोजनकः, अनारब्धफल अनन्त-साधुकृत्याविषयकौ अश्लेषविनाशौ इत्यदोषात् ।

4-1 12 विद्याज्ञानसाधनत्वधिकरणं--अग्निहोत्रादि विद्याविहीन स्यापि कर्तव्यम् । तदेव वीर्यवत्तरमिति विद्यासहितकर्मणः वीर्यवत्तर-त्वोक्ते विद्याविहीनेनाप्यनुष्ठेयत्वावगमात् ।

4-1-13 इतरक्षपणाधिकरणं — आरब्धफले पुण्यपापे भोगेन विनाश्य ब्रह्मैव सन् ज्ञानी ब्रह्म सपद्यते ।

द्वितीयः पाद.

4-2-1 वागधिकरणं—अस्य सोम्य पुरुषस्य-वाङ्मनसि संपद्यते इत्यत्र वाग्वृत्तिरेव मनसि संपद्यते । अविभागो वचनात् इति उत्तरत्र विभागाभावोक्ते अत्रोक्ता संपत्तिः वृत्तिसंपत्तिरेव । न तु लयः ।

4-2-2 मनोधिकरण—मनः प्राणे इत्यत्रापि मनोवृत्तिः प्राणे सपद्यते प्राणस्य मनः प्रकृतित्वाभावात् । मनसः आहंकारिकत्वात् ।

4-2-3 अध्यक्षाधिकरणं—प्रकृतः प्राणः विज्ञानात्मनि अवतिष्ठते । एवमेवेमं आत्मान अन्तकाले सर्वे प्राणा अभिसमायन्ति इति जीवात्मन्येव प्राणसंपत्तिबोधनात् ।

4-2-4 आसृत्युपक्रमाधिकरण—ज्ञानिनः कर्मिणश्च उत्क्रान्तिस्तुल्या । विदुषः मूर्धन्यनाडीप्रवेशमारभ्य देवयानेन गमनम् । अविद्वान् तस्मादुपशान्ततेजाः पुनर्भवमिन्द्रियैः इति प्रमाणेन भूतसूक्ष्म विशिष्टः पुन. देह प्राप्तुं ससारे वर्तते ।

4-2-5 ससारव्यपदेशाधिकरणं—मृतस्य पुसः सप्राणं सकरण ग्रामं भूतान्तरसहित साध्यक्ष तेजः परस्यां देवतायां सपद्यते । इयं च संपत्ति नात्यन्तिकलयः । संसारमोक्षपर्यन्त अविभागेनावस्थानमेव । यो निमन्ये प्रपद्यन्ते शरीरत्वाय देहिन. । स्थाणुमन्ये प्रपद्यन्ते यथाकर्म यथाश्रुतम् ।। इति । सूक्ष्मत्वात् तदा तेज आदेरनुपलब्धिः। सूक्ष्मशरीर ज्ञापक तु 'उष्ण एव जीविष्यन् शीतो मरिष्यन्' इत्यादिश्रुतिः ।

4-2-० प्रतिषेधाधिकरण — परब्रह्मविदोपि शरीरात्प्राणानां उत्क्रान्तिरस्त्येव । आत्मनस्तु नोत्क्रान्तिः । सर्वभूतात्मभूतस्य संयग् भूतानि पश्यतः । देवा अपि मार्गे मुह्यन्ति अपदस्य पदैषिण. इति आत्मनः गत्युत्क्रान्ती न भवतः । अपदस्य-ब्रह्मविदः । पदैषिणः-ब्रह्म प्राप्ति साधन ज्ञानेच्छवो मुह्यन्ति। शुकस्य गत्युत्क्रान्तिश्रवणम् । दर्शयित्वा प्रभावं स्व सर्वभूतगतोऽभवत् इति स्वयोगप्रभावप्रदर्शनाय ।

4-2-7 वागादिलयाधिकरण—एवमेवास्याः परिद्रष्टुः षोडशकलाः पुरुषायणाः पुरुषं प्राप्यास्त गच्छन्ति। बाह्येन्द्रियाणि दशभूतानि पञ्च मन एक इति षोडशकलाः। क्वचित् पञ्चदशकला इत्यपि श्रूयते। प्राणमनसोः एकप्रकृतित्वविवक्षया। एते च विद्वन् निष्टाः परस्मिन् लीयन्ते। षोडशकलानां नामरूपे भित्वा विद्वान् अमृतो भवति, ब्रह्मवित् ब्रह्मैव भवति। तथा विद्वान् नामरूपे विहाय इत्यादि श्रुतिरत्र प्रमाणम्।

4-2-8 अविभागाधिकरण—विदुष षोडशकलाप्रलयः ब्रह्मण्युक्तः स निरवशेष एव नतु सावशेषः। भिद्यते तासां नामरूपे पुरुष इत्येव प्रोच्यते स एषोऽकलः अमृतो भवति इति श्रुते। अविभाग एव लयः।

4-2-9 तदोकोधिकरणं—अपरविद्याविषयः। विद्वान् हार्द्रानुग्रहात शताधिकया एकशततम्या नाड्या निष्क्रामति। अविद्वान् अन्यस्थानात्।

4-2-10 रश्म्यधिकरणं – रात्रि दिव सूर्यरश्मिसत्वात् रात्रौ मृतोपिविद्वान् रश्मिद्वारैव गच्छति। स यावत् क्षिप्येत् मन तावदादित्यं गच्छति। आभ्यो नाडीभ्य प्रतायन्ते तेऽमुष्मिन् आदित्ये सृप्ताः इति नाडीरश्मीना सर्वदा संबन्धदर्शनात्।

4-2-11 दक्षिणायनाधिकरण—दक्षिणायनमरणेपि विदषो विद्याफलमस्त्येव। भीष्मस्योत्तरायणप्रतीक्षा पितृप्रसादलब्ध स्वच्छन्दमरणख्यापनाय। यत्र काले त्वनावृत्ति इति गीतावचन तु सांख्ययोगनिष्ठ प्राशस्त्यपरम्। इद च स्मार्तं दक्षिणायन राज्यादौ मृतस्य विदुष. विद्याफलबोधक श्रुत्युक्तार्थबाधक न भवति। उपासकस्य देवयानपितृयाणस्मरणार्थत्वाच्च।

तृतीयः पादः

4-3-1 अर्चिराद्यधिकरणं—अर्चिरादिः एक एव मार्गः।

4-3-2 वाखधिकरणं—देवयानमार्गे क्रमः अवश्यमङ्गीकार्यः—उत्तरायणानन्तर संवत्सर। तदनन्तरं वायुः। स एव देवलोकशब्देनोच्यते। तदनन्तरमादित्यः।

4-3-3 तटिदधिकरणं–विद्युतः उपरि वरुणः तदुपरि इन्द्रः तदुपरि प्रजापति । तेजो वावाद्भ्यो भूय. तद्वा एतद्वायुम् इत्यारभ्य तस्मादाहुर्विद्योतते स्तनयति वर्षिष्यति वा तेज एव तत्पूर्वं दर्शयित्वाऽथापः सृजते तेज उपास्वेति । इति ब्राह्मणम् । जलाधिपतिः वरुणः इति च प्रसिद्धम् । अनयोस्संबन्धश्च—'चत्वारि वा अपां रूपाणि मेघो विद्युत् स्तनयित्नु वृष्टिः इति ।

4-3-4 **आतिवाहिकाधिकरणं**—अचिरादयः गमयितृत्वश्रवणात् अतिवाहिकाः । अग्निलोक प्राप्तः अयं ज्ञानी अग्निना अतिवाह्यते वायुलोकं प्राप्त. वायुना इत्येवम् ।

4-3-5 **कार्याधिकरण**–सगुणमपरं ब्रह्मैव अमानवः गमयति इति बादरिः जैमिनिस्तु परं ब्रह्मैव । बादरिमतमेव स्वमतम् ।

4-3-6 **अप्रतीकालम्बनाधिकरण** — अमानवः नामाद्युपासकान् वर्जयित्वा विकारालम्बनान् प्रापयति ।

चतुर्थः पादः

4-4-1 **संपद्याविर्भावाधिकरण** – एष संप्रसादः–अभिनिष्पद्यते इत्यत्रोक्ता अभिनिष्पत्ति आत्ममात्रेण न तु केनचिदागन्तुकेना यथा रोगनिवृत्तौ अरोगः अभिनिष्पद्यते इत्यत्र ।

4-4-2 **अविभागेन दृष्टत्वाधिकरणं**—स्वेन रूपेणाभिनिष्पद्यते इत्युक्ता आत्मप्राप्तिः परस्मादात्मनः अविभागेन, तत्त्वमसि अहं ब्राह्मास्मि ततोऽन्यत् 'नतु तत्द्वितोयमस्ति ततोऽन्यत् विभक्तं यत् पश्येत् । 'यथोदकं शुद्धे शुद्धं आसिक्तं तादृगेव भवति । एवं मुनेर्विजाननत आत्मा भवति गौतम, इत्यादि श्रुते. । भेदनिर्देशः आत्मरति आत्मक्रीडः, स्वे महिम्नि प्रतिष्ठितः इत्यादिवत् अभेदेपि गौणः।

4-4-3 **ब्राह्माधिकरण** —य आत्मा अपहतमाप्मा कृत्स्नः प्रज्ञान धन एव इत्युभयश्रुत्यविरोधाय व्यवहारापेक्षया सगुणब्रह्मप्राप्तिः वस्तुतो निर्गुणब्रह्मैक्यमेव मुक्तिः इति बादरायणः ।

4-4-4 **सङ्कल्पाधिकरणं**–मुक्तः स्वसङ्कल्पादेव निमित्तान्तरानपेक्षस्सन् सर्वान् सृष्ट्वा अनुभवति । यथा अगस्त्यः स्वयोगमहिम्ना

समुद्रमपिबत् । दण्डकारण्यं हि शुक्रस्य शापात् प्रथम प्राणिना निवासानर्हमासीत् । वासार्ह अगस्त्यः कारयामास तथा ।

4-4-5 अभावाधिकरणं — सगुणब्रह्मप्राप्तविदुषः मोक्षे शरीरेन्द्रियादीना सद्भावः असद्भावश्च । सत्यसङ्कल्पोऽय स्वेच्छानुगुण्येन सृष्ट्वा विहरति अन्यथा वा ।

4-4-6 प्रदीपाधिकरणं--मुक्तस्य शरीरेन्द्रियादीनि सन्तीत्युक्तम् । तथापि आत्मनः मनसश्चैकत्वात् सृष्टेषु शरीरेषु एकेनैवात्ममनसोरस योगसभवात् शरीरान्तराणि निरात्मकानि दारुयन्त्राणीव । इति शङ्का । विद्यासामर्थ्यरूपैश्वर्ययोगात् सर्वाणि शरीराणि अनुप्रविश्यानु भवति । इद सगुणब्रह्मविषयम् । न प्रेत्यसंज्ञाऽस्ति । यत्र त्वस्य सर्व इत्यादिश्रुत्या मुक्तस्य चैतन्यमात्रावगते । सलिल एको द्रष्टाऽद्वैतो भवतीति अद्वैतमेव तत्त्वम् ।

4-4-7 जगद्व्यापारवर्जाधिकरणं--सगुणब्रह्मविद्यानिष्ठानां ब्रह्म प्राप्तौ आप्नोति स्वाराज्यं इति निरङ्कुशैश्वर्यमुक्तम् । इद च जगद्व्यापार बिना । ब्रह्मण· सगुण निर्गुणं इति रूपद्वयमस्ति । सगुणब्रह्मप्राप्तवत सावग्रहैश्वर्यमेव । सगुणब्रह्मभोगसाम्यमेव । 'तयोर्ध्वमायन् अमृतत्वमेति, तेषा न पुनरावृत्तिः एतेन प्रतिपद्यमाना नावर्तन्ते न च पुनरावर्तते इत्यादिषु उक्ता अनावृत्ति. सगुणब्रह्मनिष्ठस्य, इय च ब्रह्मणा सह ते सर्वे...प्रविशन्ति पर पद-इति प्रमाणमनुसृत्य कार्यात्यये सति तदध्यक्षेण साकं पुनरावर्त्यभावाभिप्रायेण । निर्गुणब्रह्मैक्यरूपा मुक्तिर्भवतीत्याशयः । सगुणब्रह्मशरणानामपि तत्त्वमसीति वाक्यजन्यसंयक्दर्शनाश्रयणेनैवानावृत्तिस्साधनीया । न तु साक्षात् । सयक् दर्शिनां आवृत्तिशङ्कैव नास्ति । निर्गुणब्रह्मनिष्ठानां स्वतस्सिद्धा । दहरादिविद्यानिष्ठानामेव अनावृत्ति. श्रुतिषु सूत्रेषु च वर्णिता । तेषामेव हि कल्पान्तरेपि आवृत्तिशङ्का भवत्येव । तत्त्वमसीति अपरोक्षज्ञानवता ऐक्यसिद्धेः नैवावृत्तिशङ्का । सगुणब्रह्मनिष्ठः कल्याण गुणविशिष्टं ब्रह्मैवानुभवति । तथापि तत्र ज्ञातृत्वभोक्तृत्वादिसत्वात् हेयमिश्रसगुणब्रह्मानुभवस्तस्य । अविद्यामिश्रितात्मन एव प्रपञ्चात्मना

अवभासमानत्वात् अविद्यानिवृत्तेरेवमुक्तित्वात् तन्निवृत्तौ स्वयं प्रकाशं ज्ञानमेवशिष्यते तत्पर्यायात्मैक्यमेव मोक्षः। तच्च ज्ञानमसंवेद्यम्। वेद्यत्वाभ्युपगमे मन इन्द्रियविशिष्टदेहसद्भावाभ्युपगमप्रसङ्गेन न ह वै सशरीरस्य इत्यादि श्रुतिविरोधस्स्यात्। अतो अशरीरत्वमेव मोक्षः।

श्रीः

अथ द्वैतमते प्रत्यधिकरणविषया

प्रथमाध्यायः

1-11 जिज्ञासाधिकरणं—विष्णुभक्तिरूपाधिकारसिध्यनन्तर तत एव हेतोः विष्णु, तद्गुण विभूत्यादिचिन्ता कर्तव्या।

1-1-2 जन्माद्यधिकरणं–विष्णोः जत्माद्यष्टक लक्षणम्–

उत्पत्ति स्थिति सहारा· नियतिः ज्ञान मावृत्ति ।
बन्धमोक्षौ च पुरुषात् यस्मात्सहरिरेकराट् ।।

1-1-3 शास्त्रयोनित्वाधिकरणं—पूर्वोक्तं लक्षणं शास्त्रैकवेद्यम्। अत एव विष्णोः शास्त्रवेद्यत्वम्।

ऋग्यजुस्सामाथर्वाश्च भारत पञ्चरात्रकम्।
मूलरामायणं चैव शास्त्रमित्यभिधीयते ।।

यच्चानुकुलमेतस्य तच्च शास्त्रं प्रकीर्तितम्।
अतोऽन्यो ग्रन्थविस्तारः नैवशास्त्र कुवर्त्म तत् ।।

1-1-4 सयन्वयाधिकरणं–विष्णोरेव शास्त्रवेद्यत्वं रुद्रादोनां क्वचिदेव, सर्वश्रुतीनां तात्पर्यं विष्णावेव। वेदान्तवाक्येषु उपक्रमादि-षड्विधतात्पर्यनिर्णायकलिङ्ग विष्णुविषये।

1-1-5 ईक्षत्यधिकरणं–यतो वाचो निवर्तन्ते इत्यादिना विष्णोः वाच्यत्वादिनिषेधो न भवति, पुरिशयं पुरुषमीक्षते इति ईक्षणीय-त्वोक्तेः। अशब्दत्ववादिश्रुते दूर्निरूपत्वे तात्पर्यम्। पश्यन्तोपि न पश्यन्ति शतिवत् इति वत्।

न तत् ईदृगिति ज्ञेय न वाच्यं न च तर्क्यते ।
पश्यन्तोपि न पश्यन्ति मेरोः रूपं विपश्चित ।।
सदेवेत्यादिश्रुतिः विष्णो जगन्निदानत्वं वदति ।।

1-1-6 आनन्दमयाधिकरणं — आनन्दमयः विष्णुरेव न ब्रह्मा, न रुद्रः न प्रकृतिः । पुच्छः सकर्षण प्रोक्तः एक एव तु पञ्चधा । पुच्छ शब्दवाच्यः सकर्षण. अन्नमयादिशब्दवाच्यः आनन्दमयो विष्णुः ।

1-1-7 अन्तस्थत्वाधिकरणं — अन्तस्समुद्रे मनसा चरन्तं, अत्रान्तः श्रूयमाणो विष्णुः ।

1-1-8 आकाशाधिकरण—आकाशशब्दवाच्य· विष्णु· । परो मात्रया तन्वा वृधान स एष परो वरीयान् इत्यादिश्रुतेः । परो वरीयान्—उत्तमभूत रुद्रादि भारत्यन्नापेक्षया उत्तमो वायुः तदपेक्षयोत्तमा लक्ष्मीः तदपेक्षयोत्तमो विष्णुः ।

1-1-9 प्राणाधिकरणं — तद्वै त्वं प्राणो अभव । महान्भोगः प्रजापते । हिरण्यगर्भस्यापि महानन्ददायित्वात् प्राणः विष्णुः ।

1-1-10 ज्योतिरधिकरण—यो वेद निहितं गुहाया ज्योतिः हृदय आहित इत्यत्र ज्योतिशशब्दवाच्यः विष्णुः ।

1-1-11 गायत्र्यधिकरण—अथ यदतः परो ज्योतिदीप्यते इत्यत्र ज्योतिः विष्णुः ।

1-1-12 अन्तिमप्राणाधिकरणं—त देवाः प्राणयन्तः स एषोसुः स एष प्राणः प्राणऋच इत्येव विद्यात् तदयं प्राणोऽधितिष्ठति इत्यत्र प्राणशब्दवाच्यो विष्णुः ।

द्वितीयः पादः

1-2-1 सर्वगत्वाधिकरणं—स यश्चायमशरीरः प्रज्ञात्मा इत्यादिना सर्वत्रोच्यमानः विष्णुरेव । स हि न ते विष्णो जायमानः इत्यादिगुणस्यापि तस्मिन्नेवोपपत्तेः ।

सर्वेन्द्रियमयो विष्णुः सर्वप्राणिषु च स्थितः ।
स्वातन्त्र्यपारतन्त्र्याभ्यां संभोगो नेशजीवयो. ।।
इति जीवपरयोः एकशरीरसत्वेपि न समानभोगप्राप्तिः ।

1-2-2 अत्तृत्वाधिकरणं—स यद्यदेवासृजत तत्तदत्तुमध्रियत सर्वं वाऽत्ति इति तददितेरदितित्व इति अदितिदेवतायाः अत्तृत्वमिति पूर्व पक्षे चराचरात्तृत्वं विष्णोरेव । अदितेरसभवात् ।

स्रष्टा पाता तथैवात्ता निखिलस्यैक एव तु ।
वासुदेवः परः पुसां इतरेऽल्पस्य वा न वा ।।
एकः पुस्तात् य इदं बभूव भुवनस्य गोपा. । यमप्येति भुवन सपराये स नो हरि. घृतमिहायुषेत्तु देवः इत्यादिप्रमाणात् ।

यद्यत् ब्रह्मासृजत्पूर्वं तत्तदत्ति जनार्दनः
अदितिर्नाम तेनासौ भगवान् पुरुषोत्तमः ।
उपास्ते यः पर देव एवमत्तीति सर्वदा
स योग्यतानुसारेण सर्वात्तासौ भवत्युत ।।

1-2-3 गुहाधिकरणं—ऋतं पिबन्तौ इत्यत्र पिबन्तौ हरिरेव, स एव आत्मा अन्तरात्मा इति द्विधा वर्तते । आत्माऽन्तरात्मेति हरिः एक एव द्विधा स्थितः । शुभं पिबत्यसौ नित्य ना शुभं स हरिः पिबेत् ।

1-2-4 अन्तराधिकरणं—य एषाऽन्तरक्षिणि पुरुषो दृश्यते इत्यत्र अक्ष्यन्तर्वर्ती विष्णुः ।

1-2 5 अन्तर्याम्यधिकरणं—यः पृथिव्यां तिष्ठन् इत्यत्रान्तर्यामी-विष्णुः ।

पृथु नारायणं वाति समादायैव पक्षिराट् ।
अतस्स पृथिवीत्युक्तः त्वन्तरिक्ष हरस्स्मृत ।।

इति पृथिव्यभिमानिभूतो गरुड पृथिवीशब्दवाच्यः । अत्र तदधी नत्वमेव तच्छरीरत्व, पृथिव्याद्या देवतास्तु देहवत् यद्वशत्वत. । शरीर मिति चोच्यन्ते यस्य विष्णोर्महात्मन इत्युक्तेः ।

1-2-6 अदृश्यत्वाधिकरण—अक्षरात्सभवतीहविश्वं । अक्षरशब्द-वाच्यो विष्णुः । अक्षरात् परतः पर—प्रकृतेः परतः लक्ष्म्याः पर विष्णु ।

अपर त्वक्षरं या सा प्रकृतिर्जडरूपिका।
श्रीः परा प्रकृतिः प्रोक्ता चेतना विष्णुसंश्रया।
तामक्षरं परं प्राहु. परतः परमक्षरम्।
हरिमेवाखिलगुण अक्षरत्रयमीरितम्॥

1-2-7 वैश्वानराधिकरणं—आत्मान वैश्वानरमुपास्ते इत्यत्र अग्नौ विष्णौ च प्रयुक्तो साधारण वैश्वानरशब्द. विष्णुवाचकः। न रीयते-नश्यति इति नरः—गुणः। विश्वश्चासौ नरश्च। अन्येषामपि दृश्यते इति सूत्रात् वैश्वानरः इति दीर्घ। विश्वगुणपूर्ण इत्यर्थः।

अत्र ऋषीणां कथ परस्परविरोधाभिप्रायकत्वं इति न मन्तव्यम्। सर्वेषां व्यासचित्तानुवर्तनत्वात्। व्यासचित्तस्थिताकाशात् अवच्छिन्नानि कानिचित्। अन्ये व्यवहरन्त्येतानि नरीकृत्य गृहादिवत्।

तृतीयः पादः

1-3-1 द्युभ्वाद्यधिकरणं—यस्मिन् द्यौः, प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तक., प्राणेश्वरः कृत्तिवासाः पिनाकी; स एषोऽन्तश्चरते बहुधा जायमान इत्यादौ श्रुतः द्युभ्वाद्याश्रयः विष्णुरेव। अत्र रुद्रवाचकाः शब्दा विष्णुमेव वदन्ति।

आत्मब्रह्मादयशब्दाः तमृते विष्णुमव्ययम्।
न सभवन्ति तस्मान्तै नैवाप्ता गुणपूर्णता॥
रुजं द्रावयते यस्मात् रुद्रस्तस्माज्जनार्दन
पिबन्ति ये नरा नाक मुक्तास्संसारसागरात्।
तदाधारो यतो विष्णुः पिनाकीति ततः स्मृतः॥
कृत्यात्मकमिदं देह यतो वस्ते प्रवर्तयन्।
कृत्तिवासा. ततो देवः विरिञ्चश्च विरेचनात्॥

न संभवन्ति—मुख्यवाचकत्वेन। तैः चतुर्मुखादिभिः। रुजं—जन्मादिक द्रावयते—निवर्तयति विष्णुः। विरेचनात् जगत्सर्जनात्

1-3-2 भूमाधिकरणं—यो वै भूमा तत्सुखं-अत्र-भूमा-विष्णुः।

1-3-3 अक्षराधिकरणं—एतस्मिन्नक्षरे गार्गि आकाशः ओतश्च प्रोतश्च। अत्राक्षरशब्दोविष्णुवाची। पृथिव्यादिप्रकृत्यन्तं भूतं भव्यं

भवच्च यत् । विष्णुरेको बिभर्तीदं नान्यस्तस्मात् क्षमो भृतौ । विष्णोः प्रसिद्धस्थौल्याद्यभावेपि सर्वाधारत्वानुगुणाप्राकृतस्थौल्यगुणसंभवे न दोषः । सर्वत्र विष्णोः ईश्वरत्वमेव नियामकम् ।

1-3-4 सदधिकरणं–सोम्येदमग्र इत्यत्र स्रष्टा विष्णुः सच्छब्दवाच्यः, तदैक्षत इति ईक्षतिकर्मव्यपदेशात् नन्योऽतोऽस्ति द्रष्टा इत्यादिना अयस्य ईक्षति कर्मव्यपदेशाभावात् । बहुस्यां प्रजायेय इति बहुत्व परिणामित्वं च कथमिति न शंक्यं अजायमानो बहुधा विजायते इतिवत् बहुत्वादि संभवति। इदं परिदृश्यमान जगत् सदेव ब्रह्मैवावर्तत एकमेव–स्वगतभेदाभेदवर्जितम् ।

एकमेवाद्वितीयं यत् समाभ्यधिकवर्जनात् ।
स्वगतानां च भेदानां अभावात् ब्रह्म शाश्वतम् ।।
भेदाभेदनिवृत्यर्थं एवशब्दोवधारकः ।
समाधिकनिवृत्यर्थं अद्वितीयपदं तथा ।।
भेदाभेदेऽप्येकशब्दः यतोऽवयविनि स्थितः ।
एकमेवेष्यतः प्राह नारायणमियं श्रुतिः ।
समे द्वितोयशब्दः स्यात् अद्वितीयोऽसमत्वत. ।।

1-3-5 दहराधिकरणं-अथ यदिद दहर पुण्डरीकं...अन्तर आकाशः कि तदत्र विद्यते । विद्युन्नक्षत्राणि इत्यत्राकाशस्य चन्द्रादित्याद्याधारत्वश्रवणात् आकाशः विष्णुः । य आत्मा अपहतपाप्मा इत्यादि श्रुतेश्च । परिदृश्यमानदेहातरवस्थितः अल्पपरिमाणपुण्डरीकवेश्मनि वर्तमानः अल्पपरिमाणः दहराकाशः भूताकाश एतदन्तर्वर्ती विष्णु. अन्वेष्टव्यः ।

1-3-6 अनुकृत्यधिकरण–अनिर्देश्यसुखस्वरूपः परमात्मा तमेव भान्तं इति जगद्भानप्रयोजकभानाश्रयत्वश्रवणात् । तस्य भासा सर्व मिद विभातीति श्रुतेश्च ।

1-3-7 वामनाधिकरण–ऊर्ध्वं प्राणमुन्नयति अपानं प्रत्यगस्यति मध्ये वामनमासीनं विश्वे देवा उपासते । अत्र प्रमितः विष्णुरेव सर्व देवोपास्य. मध्ये वामनमासीनमिति श्रुतेः। व्यापकमपि ब्रह्म वेदविद्या-

धिकारिमनुष्य हृदयापेक्षया अङ्गुष्ठमात्रमपि । वामाः—सुन्दर्यः तासां नेतारं वामनम् ।

1-3-8 देवताधिकरण—अत्र देवादीनां तिरश्चां चाधिकारः समर्थ्यते। जरितार्यादीना तिरश्चां ज्ञानवत्व ब्रह्मोपासनत्वादिदर्शनात् । वालि जटायुप्रभृतय सन्ध्यावन्दनाद्याचरितवन्तो दृष्टा । और्ध्वदेहिक कर्म च रामेणानुष्ठितम् । यज्ञेन यज्ञमयजन्त देवाः, तानि धर्माणि प्रथमान्यासन्... सन्ति देवा· इत्यादिश्रुतेः । देवत्वयोग्या मनुष्या हि ज्ञानात्मकयज्ञेन यज्ञं विष्णुमपूजयन् । ते च पूजनादि धर्माः लोकसाधका आसन् । ते च देवाः स्वाधिकारान्ते मोक्षमाप्नुवन् । यत्र मोक्षे पूर्वकल्पीयमुक्ताः साध्यनामकदेवास्सन्ति । मधुविद्यायां वस्वादीनामधिकाराभावः जैमिनेर्मतः प्रकाशाधिक्यफलान्तरसत्वेनाधिकारः बादरायणेर्मत· ।

1-3-9 अपशूद्राधिकरणं — शुद्रस्य ब्रह्मविद्यायां नाधिकारः । यत्र वेदो रथः तत्र न वेदो यत्र नोरथः इति प्रमाणात् जानश्रुतेर्वेदवत्वदर्शनात् न शूद्रत्वं जानश्रुतेः । राजा पौत्रायण शोकात् शूद्रेति मुनिनोदितः । प्राणं विद्यामवाप्यास्मात् पर धर्ममवाप्तवान् इति पाद्मे सपत्नी मे पराधमा इत्यादिमन्त्रलिङ्गात् उत्तमस्त्रीणां ब्रह्मविद्यायामधिकार यथा इन्द्राण्यादेः । शुद्रवत् निषेधाभावाच्च ।

1-3-10 कम्पनाधिकरण—यदिदं किञ्च जगत्सर्वं प्राण एजति निस्सृतम् इत्यत्र प्राणशब्दवाच्यः परमात्मा । न नभस्वान् । नभस्वतोपि सर्वाः स्यु चेष्टा भगवतो हरेः । किमुतान्यस्य जगतो यस्य चेष्टा नभस्वतः । को ह्येवान्यात् ।

1-3-11 ज्योतिरधिकरणं—योऽयं विज्ञानमयः प्राणेषु हृद्यन्त ज्योतिः पुरुषः । अत्र ज्योति पुरुषो विष्णुः । ज्योतिः जीवस्य बुध्यादिप्रकाशः । पुरुष पूर्णषट्कगुण. ।

भावेऽभावेपि सूर्यादे जीवानां विष्णुरेव हि ।
ज्योतिस्तथाप्यभावेतु तज्ज्ञेयं हि विशेषतः ।।

अस्वातन्त्र्यात्तु जीवस्य द्योतयन् बुद्धिमस्य सः ।
प्रवर्तयति सर्वेशः तमस्यपि जनार्दन ॥

1-3-12 अकाशाधिकरण—आकाशो ह वै । आकाशः विष्णुः । नामरूपराहित्याख्यविलक्षणार्थव्यपदेशात् । कथं तर्हि विष्णुव्यपदेशः ? 'अवर्णमगोत्र अकायमव्रणं, यतो वाचो निवर्तन्ते' अनामा सः असिद्धत्वात् अरूपो भूतवर्जनात् इति । प्राकृतरूपनामरहितः ॥

चतुर्थः पादः

1-4-1 आनुमानिक्राधिकरणं—इन्द्रियेभ्यः परा ह्यर्थाः—परमव्यक्त अव्यक्तात्पुरुषः परः इत्यादिषु अव्यक्तशब्दादयः विष्णुवाचकाः । यथा भक्षणसाधन प्रसिद्धचमसशब्दस्य 'यथेद तच्छिरः' इति वाक्य शेषात् शिरोवाचकत्वं, एव नामानि सर्वाणि यमाविशन्ति तं वै विष्णु परममुदाहरन्ति इति श्रुतेः विष्णुवाचकत्वम् ।

इन्द्रियेभ्य -तदभिमानिदेवताभ्यः सोमवित्तपादिभ्यः अर्थाभिमानिदेवताः पराः । ताभ्यः सुपणो वारुर्णी उमादिभ्यः मनोभिमानिदेवताः रुद्रवीन्द्रशेषाः पराः । ताभ्यः बुद्धे सरस्वती । तस्याः ब्रह्मा महानात्मा इति चतुर्मुखः । तस्मात् अव्यक्ताभिधा रमा । तस्याः पुरुषो विष्णुः इति तात्पर्यम् ।

1-4-2 ज्योतिरधिकरण—वसन्ते वसन्ते ज्योतिषा यजेत इत्यादौ ज्योतिष्टोमादौ प्रसिद्धोपि ज्योतिश्शब्दः विष्णावेव प्रसिद्धः । तावा एतास्सर्वाः ऋचः सर्वे वेदाः सर्वे घोषाः इति प्रमाणात् । ज्योतिश्शब्दस्य यागादौ प्रसिद्धिरपि मधुविद्यायामिव कल्पनया ।

1-4-3 न सख्योपसंग्रहाधिकरणं—यस्मिन् पञ्च पञ्चजनाः आकाशश्च इत्यत्र पञ्चजन आकाशशब्दवाच्यः विष्णु । यस्मिन्निति आधाराधेयभावविरोधोपि न भवति । विष्णोः नानारूपत्वान् एकरूपत्वाच्च । विष्णोः विशेषशक्तिमत्वाच्च ।

1-4-4 कारणत्वे न चाकाशाधिकरण—आकाशे तिष्ठन् इत्यादौ आकाशेऽवान्तरकारणत्वेन विष्णुरेव तिष्ठति । आकाशादेव समुत्पद्यन्ते

इत्यत्र आकाशशब्दो विष्णुवाचकः। आकाशादिकारणत्वेन कार्यस्वरूपत्वेन च स्थितः।

1-4-5 समाकर्षाधिकरण — विष्णुवाचकानामपि सर्वशब्दानां आकृष्य जगत्यपि व्यवहारः। परस्य वाचकाः शब्दा समाकृष्येतरेष्वपि व्यवह्रियन्ते सततं लोकवेदानुसारतः। अतः सर्वलौकिकवैदिकशब्दवाच्य विष्णु.। अमुख्यया वृत्त्या अन्यत्र व्यवहारः।

1-4-6 प्रकृत्यधिकरण–वेदे प्रयुक्त स्त्रीलिङ्गः प्रकृतिशब्द. विष्णुवाचकः एषः स्त्री, एष पुरुषः एष प्रकृतिः इति विष्णोः प्रकृति पुरुषवाचकत्वोभयाम्नानात् प्रकृतौ अनुप्रविश्य प्रकृति परिणम्य प्रकृतौ स्वयं स्थित्वा बहुधाकारणात् अस्याव्यवधानेन प्रकृतित्व, प्रकृतिद्वारा उत्पत्तिद्वारत्व इत्याद्युक्तेश्च प्रकृतिशब्दवाच्यो विष्णुः। प्रकृष्टा कृतिर्यस्य प्रकर्षेण करोति इति वा।

1 4-9 सर्वव्याख्यानाधिकरण–निरकर्थत्वेन प्रसिद्धाना तुच्छशून्यादि शब्दानामपि विष्णुवाचकतैव। एष ह्येव शून्य। एष ह्येव तुच्छः एष ह्येवाभावः इति श्रुते। अप्रसिद्धार्थकत्वेन श्रुता· सर्वे शून्यादिशब्दाः व्याख्याता इत्यर्थः।

द्वितीयोऽध्यायः

2-1-1 स्मृत्यधिकरणं-सर्वज्ञरुद्रादिकृताना स्मृतीनां न प्रामाण्यम्। विष्णवादिकृतानामेव प्रामाण्यम्। इतरकृतस्मृत्युक्तफलस्यानुपलब्धे। यागस्मृतिरपि न प्रमाणम्।

2-1-2 न विलक्षणत्वाधिकरणं—वेदानां मन्वादिस्मृतीनां च इतरकृतस्मृति वैलक्षण्यम्। तेष्विव न दोषाः कल्प्याः। अत्र तु फला व्यभिचारः। अतः सांगाः वेदा· प्रमाणम्।

2-1-3 अभिमान्यधिकरणं–मृदब्रवीत् आपोऽब्रुवन् इत्यादौ तत्तदभिमानिदेवताः ब्रुवन्ति इति तात्पर्यम्। मृदादीना भगवद्दत्तविशेषसामर्थ्यं मस्ति। अचिन्त्याः शक्तयस्तासां दृश्यन्ते मुनिभिश्च ताः।

ताश्च सर्वगता नित्य वासुदेवैकसंश्रयाः॥

2-1-4 असदधिकरणं—नासदासीन्नो सदासीत् तदानी नासीद्रजो नो व्योमा परोयत् । असदेववेदमग्र आसीत् । असतः सदजायत इत्यादौ असच्छब्दवाच्यविष्णोः उत्पत्तिरुच्यते । प्रलये वाय्वन्तरिक्षरूपं भूत पृथिव्यप्तेजोरूप भूत वाय्वादिकं कार्यं कारणभूत वाय्वादिकं च चेष्टमान नासीत् । परमात्मैवासीरितिभाव ।

2-1-5 भोक्त्रधिकरणं—कर्माणि विज्ञानमयश्चात्मा परेऽव्यये सर्व एकीभवन्तीति श्रुत्या मुक्तस्य परमात्मापत्तिरुक्ता इति न मन्तव्यम् । यथोदक शुद्धे शुद्धमासिक्तं तादृगेव भवति इति जलान्तरसबन्धे जलाश्रियरूपभेदस्योक्ते मुक्तावपि जीवपरयो भेद एव । मुक्त्यवस्थायामपि न जोवस्य विष्णुमहिमसभवः ।

2-1-6 आरम्भणाधिकरणं—किं स्विदासीदधिष्ठान आरम्भणं कतमस्वित् कथाऽसीत् इति ब्रह्मणः साधनाधिष्ठानाभवेपि जगत्सृष्टृत्व मुपपद्यते । कुलालस्य परतन्त्रत्वात् अपेक्षा । विष्णुर्हि स्वतन्त्रः । साधनानां साधनत्वं यतः किं तस्य साधनैः इति । प्रकृति पुरुष चैव प्रविश्य पुरुषोत्तमः । क्षोभयामास भगवान् सृष्टयर्थं जगतो विभुः । शरीरेन्द्रियसाधनवानेव भगवान् ।।

2-1-7 इतरव्यपदेशाधिकरणं—जीवस्य न कारणत्व हिताहितादिकरणदोषप्रसक्तेः । विष्णोस्सर्वशक्तिमत्वेन जगत्स्रष्टृत्वे न कोपि दोषः । जोवस्य चेतनत्वेपि अश्मादिवत् न कर्तृत्वम् । अन्न रसादिरूपेण प्राणः परिणयत्यसौ इति प्रमाणात् । गवि प्राण एवं क्षीरात्मना परिणामं जनयति । अयमपि कार्योपसंहारः विष्णुगत एव । सामान्य पिशाचादीनामेव अन्यशरीरप्रवेशपूर्वककार्यकतृत्वदर्शनात् अधिकशक्तिमतो विष्णोः विषये वा कथा ।

2-1-8 श्रुतिशब्दमूलत्वाधिकरणं—अपाणिपादो जवनो गृहीता इति विष्णोः विचित्रशक्तिमत्वोक्तेः विष्णुरेव कर्ता । निरवयवस्य सुखिनो दुःखिनः ज्ञातुः अज्ञातुश्च जीवस्य न कर्तृत्वोपपत्ति ।

2-1 9 प्रयोजनवत्वाधिकरण—कृतकृत्यस्य विष्णोः न प्रयोजन मुद्दिश्य सृष्टिकर्तृत्वं, अथ य एष एव परमानन्द. इत्युक्तेः। सृष्टयादिकं

हरिः नैव प्रयोजनमपेक्ष्य तु । कुरुते केवलानन्दात् यथा मत्तस्य नर्तनम् । लीलयैव सृजतीत्यर्थ ।

2-1-10 वैषम्यनैर्घृण्याधिकरण–जीवगतपुण्यापुण्यापेक्षयैव जगत् सृष्टेः न हरे· वैषम्यनैर्घृण्यादिदोषः । कर्म चानादि । द्रव्यं कर्म च कालश्च स्वभावो जीव एव च । यदनुग्रहतस्सन्ति न सन्ति यदपेक्षया । अतः कर्मापेक्षत्वेपि विष्णोः न स्वातन्त्र्यभङ्ग ।

स कारयेत् पुण्यमथापि पापं न तावता दोषवानीशितापि ।

ईशो यतो गुणदोषादिसत्त्वे स्वय परोऽनादिरादिः प्रजानाम् । अतः कारयितृत्वेपि न स्वानन्द्यं अपगच्छति ।

द्वितीयः पादः

2-2-1 रचनानुपपत्त्यधिकरणं—अचेतनप्रधानस्य कारणत्व-निरासः । अक्षरप्रशासनेनैव सर्वेषा प्रवृत्ति· । एतेन हवाव पयो भवति इति पयसः दध्यादिभावेपि विष्णुशक्तिरेव प्रयोजिका ।

2-2-2 अन्यत्राभावाधिकरणं – ब्रह्मण्येवेदमाविरासीत् ब्रह्मणि लयमभ्युपैति इति श्रुतेः स एव भूयो निजवीर्यचोदिता स्वजीवमाया प्रकृति सिसृक्षति इति स्मृतेश्च प्रकृतिरूपा जीवमायामनुप्रविश्य सृजति।

2-2-3 अभ्युपगमाधिकरणं–लोकायतिकपक्षोऽनुपपन्न । धर्मा-धर्मयोः अभावात् ।

2-2-4 पुरुषाश्माधिकरणं – अचेतनायाः प्रकृते. पुरुषसंबन्धात् प्रवृत्तिः इत्याक्षेपोऽत्र परिह्रियते । विष्णोः स्थित्या विष्णुप्रेरणादेव इति न त्वत्पक्षसभव. ।

2-2-5 अन्यथाऽनुमित्यधिकरणं — शरीरसबन्धात् पुरुषप्रवृत्तिः इत्यापि न पुरुषस्यासामर्थ्यात् शरीरसबन्ध एवायुक्त. । अनीश्वरमत सकलप्रमाणविरुद्धम् । तत्सबन्धस्यापि विष्णुकर्तृकत्वमेव ।

2-2-6 वैशेषिकाधिकरणं — परमाणुकारणवादितार्किकमत-निरासः ।

2-2-7 समुदायाधिकरणं—परमाणपञ्ज (समुदाय) स्य न जगद्धे तुत्वम् ।

2-2-8 शून्याधिकरणं—शून्यवादनिराकरणम् । असतः कारणत्व न भवति । गगनकुसुमादीनामप्युत्पत्तिप्रसङ्गात् । सर्वैः दृष्टत्वेन जगत शून्यत्व न भवति । अयं मया दृष्टः स्वप्नः इत्यनुभवात् आत्मनः स्थिरत्वमेव ।

2-2-9 अनुपलब्ध्यधिकरणं—ज्ञानमात्रमेव जगत् । तच्च क्षणिकं इति विज्ञानवादः श्रुतिस्मृतिन्यायविरुद्धः ।

2-2-10 नैकस्मिन्नधिकरणं—एकस्मिन्वस्तु सत्वमसत्व, सदसत्वमित्यादि विरुद्धम् । लोकदृष्टया शरीरपरिमित एव जीवः इति वादोऽयुक्तः पिपीलिकादिशरीरस्थजीवस्य गजादिशरीरप्रवेशे अकात्स्न्यं प्रसक्तेः विकारित्वानित्यत्वादिप्रसक्तेश्च ।

2-2-11 पाशुपतनिराकरणाधिकरणं—पशुपते. न जगत्कारणत्वम् । अहं रुद्रस्य धनुरातनोमि ब्रह्मद्विषे शरवेऽहं तव 3; एकोनारायण आसीत् न ब्रह्मा नेशानः इत्यादिना रुद्रस्यावरत्वं परतन्त्रत्वं च ।

2-2-12 उत्पत्त्यधिकरणं—शक्तिपक्षदूषणम् । केवलस्त्रीभ्यः न प्रजोत्पत्तिः । तदर्थं पुरुषानुग्रह. । तत्रापि करणाभावात्तदनुपपत्तिः विज्ञानादिकरणस्वीकारे तेनैव सृष्टयाद्युपपत्तिरिति ईश्वरवादेऽन्तर्भावः।

तृतीय पादः

2-3-1 वियदधिकरणं—आकाशस्य विष्णोरुत्पत्तिः । अनादिर्वा अयमाकाशः इति श्रुति गौणी । यथाऽन्यत्र ब्रह्मशब्दश्रुतिरमुख्या । तथैव आकाशोत्पत्तिश्रुतिरपि । विष्णुरेव अविभागी, ततो विकारशून्यः विकारी तु विभक्त· ।

तद्विभागेन जायन्ते आकाशाद्याः पृथक् पृथक् ।
यो विभागी विकारस्सः सोऽविकारः परो हरि· ।।

2-3-2 मातरिश्वाधिकरणं — वायुर्वाचेतनः । वायुना हि सर्वाणि भूतानि विज्ञायन्ते । वायुर्वाव नित्यः वायुना हि सर्वाणि भूतानि नीयन्ते इति श्रुतिः न वायोर्नित्यत्वबोधिका । तत्र अमुख्यनित्यत्वस्यैवोक्तेः ।

प्रतिव्यूह्य व्यूह्य चासौ अतीत्य च जनार्दनः ।
धारयत्यनिश देवो नित्यानन्दैकलक्षणः ।।

इति परमात्मन्येव मुख्यनित्यत्वमुक्तम् ।

2-3-3 असंभवाधिकरणं—असद्वा इदमग्र आसीत् ततो वै सदजायत इति श्रुत्या सतोऽप्युत्पत्तिरस्तीति न वाच्यम् । तन्नासच्छब्दस्य ब्रह्मवाचित्वात् । तद्वा एतत्परमाहु परतो हि तदुदीक्ष्यते इति श्रुतेः । ब्रह्म वा असत् सद्वाव प्राणः प्रति ब्रह्मण. असच्छब्दवाच्यत्वप्रतीतेः ।

2-3-4 तेजोधिकरणं—वायोरग्निः इति वायुजन्यत्वं तेजस एव तत्तेजोऽसृजत । विष्णुसृज्यत्वं च । नैतावता विरोध शङ्क्यः । साक्षादुत्पत्तिस्थानत्वस्य विष्णावेवाङ्गीकारात् । अन्यत्रामुख्यत्वाभिप्रायात्।

2-3-5 अबधिकरण—अपां ब्रह्मणः सृष्टिः ।

2-3-6 पृथिव्यधिकरणं—ता अन्नमसृजन्त इत्यन्नस्य जलजन्यत्वम् । अद्भ्यः पृथिवी इत्यत्र पृथिव्या जलजन्यत्वमिति परस्परविरोधः । मैवं अन्नशब्देन पृथिव्या एवोक्तेः । भूतप्रकरणात् । भूमेः कृष्णवर्णत्वाच्च ।

2-3-7 तदभिध्यानाधिकरण — प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकः इति विष्णुभिन्नस्य सहर्तृत्व प्रतीयते । मैवम् । तस्याभिध्यानात् योजनात्तत्वभावादिति विष्णोरेव सहर्तृत्वोक्ते. । स्रष्टा पाता च संहर्ता स एको हरिरीश्वरः ।

2-3-8 विपर्ययाधिकरणं—सृष्टिक्रमप्रतिरूपो लयक्रमः । कर्ता प्राणादिकस्यास्य हन्ता भूम्यादिकस्य च । य. क्रमात् व्युत्क्रमाच्चैव स हरिः पर उच्यते । इति श्रुते. ।

2-3-9 अन्तरा विज्ञानाधिकरण—प्राणान्मनो मनसश्च विज्ञानं यच्छेत् वाङ्मनसी प्राज्ञः तद्यच्छेत् ज्ञान आत्मनि इति श्रुत्या मध्ये विज्ञानमनसोः विपरीतक्रमः इति न वाच्यम् । विज्ञानतत्त्वात्तु मन· मनस्तत्त्वात्तु खादिक इति प्रमाणात् चराचरव्यपेक्षया स विपरीतक्रमः । न मुख्यक्रमः ।

2-3-10 आत्माधिकरणं–विष्णोरपि लयः इत्याशक्य परिहियते। तुच्छेनाभ्वपिहित यदासीत् । इति तुच्छे न लयः प्रतिपाद्यते । स एतस्मिन् तमसि निलीनः प्रकृतिं पुरुष कालं चानुपश्यति नैनं पश्यति कथंचन । इति पैंगिश्रुतिः विष्णोः तमसि छन्नत्व हि प्रतिपादयति । अतो न लयः ।

2-3-11 ज्ञाधिकरणं–सर्वे एते चिदात्मनो व्युच्चरन्ति इति जीवस्योत्पत्तिः विष्णोरुक्ता इति शङ्का । उपाध्यपेक्षयोत्पत्तिः । मातृ देहान्निसृत्य जाताः । अनुत्पन्ना. अविनष्टाः पर ज्योतिर्निविशन्ति इत्यादि श्रुतेः ।

2-3-12 उत्क्रान्त्यधिकरणं–जीवाणुत्वबोधकम्—स गर्भी भवति स प्रसूयते स कर्म कुरुते, सोऽस्मात् शरीरात् उत्क्रम्यामु लोकं इत्युक्तेः अणुत्वम् । स एतेनैव स्वात्मना परेण इमं गर्भमनुप्रविशतीत्युक्तेः अस्वतन्त्रश्च । विष्णुप्रविष्टस्यैव कर्तृत्वोत्पत्यादिकम् । अणुत्वेपि जीवस्य सर्वशरीरव्याप्तिः हरिचन्दनबिन्दुवत् । चिद्गुणेन सर्वशरीरव्याप्तिरपि ।

सूत्रे ज्ञ· इति जात्यभिप्रायकम् । असख्याकाः गणशोप्यनन्ताः । मुक्तियोग्याः नित्यससारिण· तमोयोग्याश्च । मुक्तियोग्याः पञ्चविधाः-देवा देवगन्धर्वाश्च, ऋषयः, पितर·, चक्रवर्तिनो मनुष्योत्तमांश्च, मनुष्यगन्धर्वाश्च । नित्यससारिणः नित्यं सुखदुःखमिश्राः । तमोयोग्याः चतुर्विधा –दैत्याः राक्षसाः पिशाचाः मनुष्याधमाश्च सर्वेपि परस्परं भिन्नाः परमात्मना च भिन्ना. । संसारे मुक्तौ च तारतम्योपेताः ।

अनागताः अतीताश्च यावन्त. महिता क्षणाः ।
अतीतानागताश्चैव यावन्तः परमाणवः ।।
ततोऽत्यनन्तगुणिताः जीवानां राशयः पृथक् ।
परमाणुप्रदेशेपि ह्यनन्ताः प्राणिराशयः । इति तत्वनिर्णये ।

2-3-13 व्यतिरेकाधिकरणं — शतधा सहस्रधा स गच्छति समुच्चये । इति जीवस्यैवानेकधाभावो दृश्यते । यथा पुष्पात् गन्धः

पृथक् गच्छति। एव अशिनो जीवात् अंशाः पृथक् गच्छन्ति। आत्मान बहुधा कृत्वा क्रीडते योगससदा इति ईश्वरदत्तयोगशक्त्या अनेकधाभावः।

2-3-14 पृथगधिकरणं — जीवब्रह्मणोः भेदाभेदपरिहारोऽत्र। भिन्नोऽचिन्त्यः परमो जोवसंघात् पूर्णः परो जीवसङ्घोह्यपूर्णः इति पूर्णगुणात् विष्णोः भिन्नो जीवः। ज्ञानानन्दादिगुणसाम्यादभेदोक्तिः।

2-3-15 पुंस्त्वाधिकरणं—जीवानां ज्ञानानन्दादिसत्वेपि मुक्तावेवाविर्भावः। यथा सतोपि पुंस्त्वस्य यौवनावस्थायां प्रकाश।

नित्यानन्दज्ञानबला देवाः नैवं तु दानवाः।
दु खोपलब्धिमात्रास्ते मानुषास्तूभयात्मकाः॥
तेषा यदन्यथा दृश्य तदुपाधिकृतं मतम्।
विज्ञानेनात्मयोग्येन निजरूपे व्यवस्थितिः॥

2-3-16 कर्तृत्वाधिकरण—परमात्मन एव कर्तृत्वं. विधिनिषेध शास्त्रावैयर्थ्याय परमात्मशक्त्यधीनकर्तृत्वं बद्धदशायां जीवस्योच्यते। परतन्त्रकर्तृत्वं जीवस्य। स्वतन्त्रकर्तृत्वं परस्य। मोक्षे पि हि स्त्रीभिः सह जीवानां विहारो दृश्यते।

2-3-17 अशाधिकरणं — जीवानां ब्रह्मांशत्वम्। अशत्वेपि नैकरूपता। जीवाना प्रतिबिम्बस्वरूपत्वात् न विष्णुसाम्यम्। यथा अमृत समुद्रस्य जलाशत्वम्।

2-3-18 अदृष्टाधिकरण—जीवाः प्रतिबिम्बरूपाः। अथापि जीव कर्मापेक्षया परस्परं वैचित्र्यम्। स्वर्गनरकभूमिस्थत्वहेतुना न वैचित्र्यम्। एकदेशस्थानामपि वैचित्र्यदर्शनात्। वैचित्र्ये अदृष्टमेव नियामकम्।

चतुर्थः पादः

2-4-1 प्राणोत्पत्त्यधिकरणं — प्राणादीनामुत्पत्तिः। अथ प्राणा एवानादयः प्राणा नित्या इति श्रुतिः सूक्ष्मरूपेणेन्द्रियाणा स्थितिप्रतिपादिका एतस्माज्जायते प्राणः इति प्रबलश्रुतिविरोधात्।

2-4-2 तत्प्रागधिकरण—मनसोप्युत्पत्तिः ।

2-4-3 तत्पूर्वकत्वाधिकरण–वागिन्द्रियस्योत्पत्तिः ।

2-4-4 सप्तगत्यधिकरणं—इन्द्रियाणां द्वादशसंख्याकत्वं–सप्त-प्राणास्त्ववगते: पञ्च प्राणाश्च कर्मणः । एवं प्राणद्वादशक शरीरे नित्य सस्थितम् । इति पुराणे ।

2-4-5 अण्वधिकरण — प्राणानामणुत्व-तद्यथा ह्यणुनश्चक्षस: प्रकाशो व्याततः, अणुभि. पश्यति इति प्रमाणात् । जीव स्वरूपतोऽणुः तस्य चक्षसः प्रकाश: व्याप्त: । अणुभिः ज्ञानेन्द्रियै. हि स पश्यति ।

2-4-6 श्रेष्ठाधिकरणं – श्रेष्ठप्राणस्यापि उत्पत्तिमत्वम् । आत्मन: एषः प्राणो जायते इति श्रुतेः । सूक्ष्मत्वमपि ।

2-4-7 चक्षुराद्यधिकरणं-चक्षुरादीन्द्रियाणामिव मुख्यप्राणस्यापि परमात्माधीनत्वम् । अकरणत्वप्रयुक्तोत्पत्तिनिषेधो न भवति । इतर-प्राणानां करणत्वं अस्यचाकरणत्वमिति विशेषः ।

2-4-8 पञ्चवृत्त्यधिकरणं--मुख्यप्राणस्य पञ्चधा भेदेन व्यपदेशः यथा मनसः पञ्चधा भेदेन व्यपदेशः ।

2-4-9 अण्वधिकरणं – मुख्यप्राणश्चाणुरेव । अन्तर्वाणुः बहि-र्महान् इति श्रुतेः । व्याप्तिबोधकश्रुतिः स्तुतिपरा ।

2-4-10 ज्योतिरधिकरणं — सेन्द्रियस्य जीवगणस्याधिष्ठाता विष्णु· य: प्राणे तिष्ठन् इति श्रुतेः । करेणै. कारणं ब्रह्म पुरुषापेक्षया अखिलम् । श्रोत्रादिभि: कारयति करणानीत्यतो विदु । विष्णोरेव मुख्यकारणत्वं जीवकरणत्व तु तदपेक्षया । जीवकरणसम्बन्धः अनादि नित्यः । अतो जीवकरणत्वोक्तिः ।

2-4-11 इन्द्रियाधिकरणं – इन्द्रियाणां द्वादशत्वमेव । मुख्य प्राणस्य नेन्द्रियत्वम् ।

श्रोत्रादीनि तु पचैव तथा वागादिपञ्चकम् ।
मनोबुद्धिसहायानि द्वादशैवेन्द्रियाणि तु ।।
विषयद्रवणात्तेषां इन्द्रियत्वमुदाहृतम् ।
तेषां नियामकः प्राण: स्थित एवाखिलं प्रभुः ।।

2-4-12 संज्ञाधिकरणं-नामरूपव्याकरणं त्रिवृत्कुर्वतो विष्णोरेव।
सर्वनाम्ना च रूपाणा व्यवहारेषु केशव ।
एक एव यतस्स्रष्टा ब्रह्माद्यास्तदवान्तराः ।।

2-4-13 मांसाधिकरणं—आपो वा मासमस्थि च इति श्रुत्या शरीरस्य भूतत्रयं कारण उत पृथक्पृथक् इति सशयः। आपो हीदं सर्वं इति श्रुते एकमेव जल कारण इति पूर्वपक्षः। उत्तर-समुदितमेव कारण इति समाधि । अन्नमयं तेजोमयं अन्नमयमिति व्यवहरात्। त्रिवृत्करणे यस्य भागस्याधिक्यं तेन भागन व्यवहारः। यत्कठिनं सा पृथिवी, यद्रवं तदापः यदुष्णं तत्तेजः इति श्रुत्या शरीरे दृश्यमानः मांसभागः भौम एव ।

तृतीयाध्यायः

3-1-1 तदन्तरप्रतिपत्त्यधिकरणं—देहान्तरप्रतिपत्तौ भूतसूक्ष्मपरिष्वक्तस्य गमनम्। भूतबन्धस्तु संसारः मुक्तिस्तेभ्यो विमोचनम्। भूताना विनिवृत्तिस्तु मरणं समुदाहृतम् ।

3-1-2 त्र्यात्मकाधिकरणं—आपः पुरुषवचसः इत्यत्र अप्शब्दः भूतान्तरोपलक्षकः। अण्ा भूयस्त्वात्तथा व्यवहारः।

3 1-3 प्राणगत्यधिकरण — भूतसूक्ष्मैस्सह इन्द्रियाणामपि गमनम्।

3 1-4 अग्न्यादिगत्यधिकरणं—मृतिकाले जहात्येन प्राणाभूतानि पञ्च च। भागतो भागतस्त्वेन अनुगच्छन्ति सर्वशः। इति ब्रह्माण्डपुराणे श्रूयते। अतः जोवेन सह प्राणाः भागतो गच्छन्ति भागतः अधिदैवं गच्छन्ति। अधिदैवं प्राप्नुवन्ति भागतोऽनुव्रजन्ति तम्।

3-1-5 प्रथमेऽश्रवणाधिकरण—तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति इत्यत्र श्रद्धाशब्दः अब्सहितपुरुषोपलक्षकः। अप्पदं च भूतोपलक्षकम्।

3-1-6 अश्रुतत्वाधिकरणं – अग्न्यादिगतेरिव भूतैश्चरति भूतैः विचरति इति श्रुतिबलात् यजमानेन सह भूतगमनं दृष्टम् ।

3-1 7 **भाक्ताधिकरणं**–स्वर्ग गतस्यामृतत्ववचनं गौणम्। नान्यः पन्था इति आत्मविद एवामृतत्वोक्तेः । यागादिकर्म अस्य कर्म क्षीयते नश्वरम् । ज्ञानेनामृतीभवति, कर्मणा ज्ञानमातनोति च ।

3-1-8 कृतात्ययाधिकरण–ततः शेषेण इम लोकमायाति, पुनः कर्म कुरुते इत्युक्तेः भुक्तशेषानुशयवानेव गच्छति । एव पुनः पुनः आवर्तनेषु अशेषकर्मसमाप्तिर्न भवेत् । पुन पुनः कर्मकरणात् ।

आचतुर्दशमाद्वर्षात् कर्माणि नियमेन तु ।
दशावराणां देहानां कारणानि करोत्ययम् ।
अतः कर्मक्षयान्मुक्तिः कुत एव भविष्यति ।।

3-1-9 यथेताधिकरण–जीवानां परलोकात् पुनरागमने मार्गान्तरेण किञ्चिदन्यथा च ।

3-1-10 चरणाधिकरण–रमणीयचरणाः इत्यादौ चरणःशब्दः न केवलाचारपरः । परं तु यज्ञादिकर्मपरः ।

3-1-11 अनिष्टादिकार्यधिकरणं — पुण्यकृतामिव अनिष्टादिकारिणामपि परलोकगमनागमने वर्तते । यमकृतदण्डनाद्यनुभवः तमसि निमग्नता च ।

3-1-12 सप्तनरकाधिकरणं–पापिनामपि आरोहावरोहौ ।

रौरवोऽथ महाश्चैव वह्निः वैतरणो तथा ।
कुम्भीपाक इति प्रोक्तान्यनित्यनरकाणि च ।।
तामिस्रश्चान्धतामिस्रः द्वौ नित्यौ संप्रकीर्तितौ ।
इति सप्त प्रधानानि बलीयस्तूत्तरोत्तरम् ।।

3-1 13 तत्राप्यधिकरणं—सर्वत्र विष्णोः वर्तमानत्वात् नरकेपि विष्णु अदुःखी गुणपूर्णः प्रेरितैव वर्तते ।

नरकेपि वसन्नीशः नासौ दुःखभुगुच्यते ।
नीचोच्चतैव दुःखादेः भोग इत्यभिधीयते ।।
नासौ नीचोच्चतां याति पश्यत्वेव प्रभुत्वतः ।

3-1-14 विद्याधिकरण–विद्यानिष्ठस्य देवयान सत्कर्मानुष्ठातुः पितृयानम् । तदितरसामान्यजीवानां तृतीयं स्थानम् । अथैतयोः पथो –एतत् तृतीयं स्थानम् ।

3-1-15 **न तृतीयाधिकरणं**—तिर्यक्षु नरकेचैव सुखलेशो विधीयते। नान्धे तमसि मग्नाना सुखलेशोपि कश्चन। इति प्रामाणात् जीवस्य तृतीयमार्गेण अवाक्गतौ दुःखमेव।

3-1-16 **तत्स्वाभाव्यापत्त्यधिकरणं**—भूलोकप्राप्तिकाले धूमाद्यापत्तिः न धूमाद्यैक्यम्। धूमातिगतौ एतद्गमनं धूमादिस्थितौ एवत् स्थितिः, साम्यापत्तिर्वा, इत्यभिप्रायेण धूमाद्यापत्तिकथनम्। एकदेशस्वभावेन बागभेदापि युज्यते।

यथा जीवः परं ब्रह्म ब्रह्मेदं जगदित्यपि।

3-1-17 **नातिचिराधिकरणं**—प्रत्यवरोहतो जीवस्य आकाशादि प्राप्तौ तत्र स्थितिः, कदाचित् कल्पान्तमपि स्यादिति न शंकनीयम्।

स्वर्गाल्लोकादवाक्प्राप्तः वत्सरात्पूर्वमेव तु।

मातुश्शरीरमाप्नोति पर्यटन् यत्र तत्र च॥ इति वचनात्।

3-1-18 **अन्याधिकरण** — स्थावरजन्मप्राप्तजीवान्तराधिष्ठिते जीवान्तःप्रवेशमात्रमेव। न तु तत्र भोग।

स्वर्गादवाक्गतो देही व्रीह्यादीतरदेहगः।

अभुञ्जंस्तु क्रमेणैव देहमाप्नोति कालतः॥

3-1-19 **रेतोधिकरण**—अवरोहन् मातुरुदर व्रजेत् इत्युक्तम्। रेतस्सिञ्चतीति चोक्तम्। रेतस्सिक्शरीरं प्रविश्य ततो मातुरुदरं प्रविशतीति भाव.।

3-1-20 **योनेश्शरीराधिकरणं** – अवरोहतां जीवानां स्थावर पुरुषस्त्रीशरीरादिप्राप्तिः यथाशास्त्र भवति। स्थास्नुष्वथापि पुरुषे प्रमदायामथापि वा। गर्भे वा बहिरेवाऽथ क्वचित् स्थानान्तरेषु च। इति। स्थास्नुषु शुकादयः। पुरुषे मान्धातृमुखाः, प्रमदायां आस्तिकप्रभृतयः, जरत्कार्वाद्यनुग्रहात्। केषांचित् गर्भे पूर्वं सिद्धस्यैव शरीरस्य प्राप्तिः। द्रुपदादीनां बहिः पितृमापेक्षत्व, धृष्टद्युम्नादीनां पित्रादिनिरपेक्षता।

अभ्रधूमादिभावस्तु जीवस्याभ्रादिसंस्थितिः।

अभ्राभिमानिरूपं तु ज्ञानिप्राप्य यतो भवेत्॥

इति प्रमाणात् अवरोहतां जीवानां अभ्रादिस्थितिरेव। पञ्चमाहुत्यपेक्षा निर्बन्धः प्राण्युत्पत्तेर्नास्ति। योनिद्वारेण देहं च प्राप्नोति प्रायशो नरः। विशेषकारणादेव विशेषाज्जनिरिष्यते। सामान्यजननं चैव नृणां सामान्यहेतुकः।

द्वितीयः पादः

3-2-1 सन्ध्याधिकरणं—स्वाप्नपदार्थाः—भगवादिच्छा जीवमनोगतसस्काराभ्यां निर्मिताः सत्याः। बहिरिवाप्रकाशमानत्वात्। विष्णुकर्तृक सर्वम्। अतः प्रज्ञातृमायोक्ता जैव्युपादानमेव सा। निमित्तमैश्वरी मुख्या निर्मित त्रातमेव च। इति। यद्वाव ब्रह्मणो ब्रूयात् देवतावृषभोपि वा। स्वप्नस्थ मथवा राजा तत्तथैव भविष्यति इति शुभाशुभसूचकम्।

3-2-2 पराभिध्यानाधिकरणं – जीवस्य बन्धमोक्षौ विष्णुनैव भवतः इति तदिच्छयैव स्वप्नबुद्धि स्वप्नतिरस्कारादि।

3-2-3 देहयागाधिकरण—जीवस्य देहसबन्धं स्वप्न जाग्रदवस्थां च सर्वमुत्पादयति।

3-2-4 तदभावाधिकरणं—जीवस्य स्वप्नस्थान परमात्मैव।

3-2-5 प्रबोधाधिकरणं—सुप्तिप्रबोधौ भगवतैव भवतः।

3-2-6 कर्मानुस्मृतिशब्दविध्यधिकरणं—विष्णुरेव सर्वजीवकर्म कारयिता। एष स्वप्नान् दर्शयति। एष प्रबोधयति, एष ह्येवासाधु कर्म कारयति इत्यादि कर्मानुमारिवाक्यादिभिः।

3-2-7 मुग्धाधिकरणं—यत्र एवं त्रयोऽवस्था मोहस्तु परिशेषतः अर्धप्राप्तिः इति ज्ञेयो दुःखमात्र प्रतिस्मृते. इति विष्णोरर्धप्राप्ति मोहावस्था। विष्णुसमीपस्थः स्वप्न पश्यति। हृदयवर्ती विष्णोः दूरस्थः जीवः जागर्ति। विष्णौ जीवस्य लये सति स्वपिति परिशेषात् मोहावस्था विष्णोरर्धप्राप्तिः। रुद्र, अश्वत्थाम, लक्ष्मण, बलराम, इन्द्र, अर्जुन प्रभृतीना, भीमसेन, रावणशक्ति, जरासन्ध, देवासुरयुद्ध स्वपुत्र बभ्रुवाहनप्रभृतिभिः प्रकारेण मूर्च्छा दृष्टा। तदा दु.ख-

मात्रानुभव । तत्प्रवर्तकोपि भगवान् । मूर्च्छा प्रबोधन चैव यत एव प्रवर्तते स ईशः परमो ज्ञेयः परमानन्दलक्षणः । इति ।

3 2-8 **उभयलिङ्गाधिकरणं**–विष्णोरेवानन्तरूपत्वम् । अभेदेपि स्थानभेदात् ऐश्वर्ययोगाच्च भेदव्यपदेश. । एकरूपः परो विष्णु. सर्वत्र अपि न सशय । ऐश्वर्याद् रूपमेक च सूर्यवत् बहुधेयते ।

अमृतमिदं ब्रह्मेद सर्वं अन्तर्याम्यमृत , अयं वै दश च सहस्राणि च इत्यनन्तत्वव्यपदेशः ।

3-2-9 अरूपवदधिकरणं-सर्वेभ्य उत्तमत्वात् ब्रह्मणः अरूपवत्वं । अरूपवानतः क्व तदव्यक्ततः परः । मात्स्यपुराणम्। रुक्मवर्णत्वव्यपदेश कथम् ? विलक्षणरूपवत्वात् । अप्राकृतविलक्षणरूपवत्व तस्यांगी-क्रियते । गृहादौ दोपे सत्यपि प्रकाशो न विद्यते इति व्यवह्रियते । एव रूपवत्वेपि अरूपित्वव्यपदेशः आनन्दरूपत्व तस्य । चिन्तयीत यतिर्नान्यं ज्ञानरूपादृते हरेः ।

3-2-10 सूर्यकाधिकरणं – जीवात्मानः विष्णोर्भिन्नाः विष्णु-सदृशा विष्ण्वधीनाः । रूप रूप प्रतिरूपो बभूव । बहवः सूर्यका यद्वत् सूर्यस्य सदृशा जले । एवमेवात्मका लोके परात्मसदृशा मता. ।

3-2-11 अम्बुवदधिकरणं–यमेवैष वृणुते तेन लभ्यः इति विष्णौ जीवैः भक्तिः कार्या इत्युच्यते । नित्यानन्दरूपविष्णुसादृश्यस्य नित्य-ज्ञानान्दादेश्च जीवेषु सिद्धत्वात् किमर्थं भक्तिः इति न वाच्यम् । अम्बुवत्—स्नेहेन ग्रहणात्मकज्ञानरूपभक्ति विना जीवस्य विष्णु-सादृश्याभावात् ।

महत्ववृद्धिः भक्तिस्तु स्नेहपूर्वाऽभिधीयते ।
तयैव व्यज्यते संयक्जीवरूप सुखादिकम् ।।

3 2-12 वृद्धिह्रासभाक्त्वाधिकरणं — विष्णुगतजीवभक्तिज्ञान तारतम्याधीनं मुक्तौ जीवस्य वृद्धिह्रासादितारतम्यम् । ब्रह्मादयः उत्तमाधिकारिणः पूर्णभक्तिपूर्णज्ञानवन्तः । अत उभयसामञ्जस्यम् ।

यथा भक्तिविशेषोऽत्र दृश्यते पुरुषोत्तमे ।
तथा मुक्तिविशेषोपि ज्ञानिनां लिङ्गभेदने ।।

क्रियावन्तः श्रोत्रिया· ब्रह्मनिष्ठाः इत्यादिभिः भक्तितारतम्यात् आनन्दतारतम्यमुच्यते ।

3-2-13 **प्रकृतैतावत्वाधिकरणं**—विष्णोः सृष्टिसहारकर्तृत्वमात्र मेव इति न वाच्यम् । नैतावदेवापरो अन्यदस्त्युक्षा स द्यावापृथिवी बिभर्ति इति श्रुतेः । सृष्टि च पालनं चैव संहारं नियमं तथा । एक एव करोतीशः सर्वस्य जगतो हरिः । इति च ।

3-2-14 **अव्यक्ताधिकरणं**—यद्यपि ब्रह्म अव्यक्तस्वरूपमेव । तथापि व्यक्तमपि भवति । तत्प्रसादेन जीवानां तदपरोक्ष्यज्ञानात् ।

नित्याव्यक्तोपि भगवान् ईक्ष्यते निजशक्तितः ।
तमृते परमात्मानं कः पश्येताऽभित प्रभुम् ॥

3-2-12 **अहिकुण्डलाधिकरण**—अथैव परमः आनन्दः इनि विष्णो. आनन्दरूपत्वमुक्तम् । आनन्दं ब्रह्मणो विद्वान् इति आनन्दस्य ब्रह्मधर्म त्वम् । एवं भेदाभेदनिर्देशः अहिकुण्डलवत् । यथा सूर्यस्य तेजोरूपत्वात् प्रकाशित्वम् । कालस्यैकत्वेपि पूर्वापरादिभेदनिर्देशो यथा । प्रकाश-वत् कालबद्वा—यथागे शयनादिकम् ।

ब्रह्मणश्चैव मुक्तानां आनन्दो भिन्न एव तु ।
आनन्देनत्वभिन्नेन व्यवहार· प्रकाशवत् ।
कालवद्वा यथा काल· स्वावच्छेदकतां व्रजेत् ॥

अभेदेपि भेदव्यवहारो भवति । शयन—अवस्थाविशेषः । अङ्गे अवस्था विशेषेण भेदः अभेदश्च भवति ।

3-2-16 **पराधिकरण**—सेतून्मानादिव्यपदेशेभ्यः परमात्मनोऽन्य-देव जीवज्ञानानन्दादिकम् । जीवेश्वरसबन्धज्ञापनार्थं सेतून्मानादि-व्यपदेश ।

3-2-17 **स्थानविशेषाधिकरण**—चतुर्मुखानन्दादयः विष्णवानन्द-प्रतिबिम्बभूताः । यथा जलादिषु सूर्यस्य प्रतिबिम्बविशेष. । अत एव भगवदानन्दादीनां चतुर्मुखानन्दादीनां च तारतम्यमिति बिम्बभूत-परमानन्दे विष्णौ चतुर्मखादोनां भक्ति र्युज्यते ।

ऐश्वर्यात्परमात् विष्णोः भक्त्यादीनामनादित ।
ब्रह्मादीनां सूपपन्ना ह्यानन्दादेर्विचित्रता ।।

3-2-18 तथान्यत्वाधिकरणं — ध्यानकाले विष्णो. दृश्यत्वात् कथमव्यक्तत्वम् ? दृश्यमानस्य विष्णोरन्यत्वात् । तदेव ब्रह्म त्व विद्धि नेद यदिदमुपासते । इति श्रुतेः । अव्यक्त एव हि उपासनकाले चित्ते दृश्यमानः व्यक्तो भवति । आपरोक्ष्यज्ञानजनकत्वात् उपासनस्येसि तात्पर्यम् ।

3-2-19 अनेन सर्वगतत्वाधिकरणं–सर्वत्र सर्वमेतस्मात् सर्वदा सर्ववस्तुषु । स्वरूपभूतया नित्यशक्त्या मायाख्यया यतः अतो माया-मयं विष्णु प्रवदन्ति सनातनम् । इति प्रमाणात् सर्वजगत्कर्तृत्व तस्योप पद्यते । एतेन बहूनां बहुदेशाधिपानां राज्ञां नगरसृष्ट्यादि पालनसहा-रादिदर्शनात् एकस्य विष्णोः सर्वकालसर्ववस्तुसृष्ट्यादिकर्तृत्वं न सभवतीति पूर्वपक्षो निरस्तः ।

3-2-20 फलाधिकरणं—विज्ञानमानन्द ब्रह्म रातिः दातु· परा-यणं दातुः यजमानस्य विष्णुः रातिः फलप्रदः । अतः प्रधान्येन फल प्रदत्वं विष्णोरेव ।

तृतीयः पादः

3-3-1 सर्ववेदान्तप्रत्ययाधिकरण-सर्वेश्च वेदै· परमो हि देव जिज्ञास्योऽसौ नाल्पवेदैः प्रसिध्येत् । यथा नदीनां सलिलं शक्ये सागरग भवेत्। एवं वाक्यानि सर्वाणि पुंशक्त्या ब्रह्मवित्तये इत्यादि प्रमाणबलात् ब्रह्म सर्ववेदान्तविचाराधीननिर्णयपूर्वक ज्ञानविषयो भवति । तथा च ब्रह्मज्ञान सर्ववेदान्तविचाराधीनम् । अतः सर्वा अपि शाखाः एकाधि-कारिविषया भवन्ति । नच प्रतिशाखं विज्ञानमानन्द ब्रह्म, सत्य ज्ञान-मनन्तं ब्रह्मेति वचनभेदात् सर्वशाखानैकाधिकारिविषयाः इति वाच्यम्। एकस्यामेव शाखाया आत्मेत्येवोपासोत कं ब्रह्म ख ब्रह्म इति भेद-निर्देशस्येवोपपत्तेः । स्वाध्यायोऽध्येतव्यः इति सर्ववेदानां सर्ववेदान्ताना चाध्ययनस्य विधानम् । सर्ववेदोक्तकर्माचरण इव सर्ववेदान्तोक्तात्मो-

पासनायामपि सर्वेषामधिकारसंभवात्। सर्ववेदाध्ययनस्य शक्त्यभावात् हि एकवेदाध्ययनम्। अथापि यथाशक्ति स्वस्वाधीतवेदनिर्णयजन्य-ज्ञानवतामपि ब्रह्मोपास्यं भवति।

यथा शक्त्यखिलान् वेदान् विज्ञायोपासनं भवेत्।
तत्राखिलस्य विज्ञप्तिः संयक्ब्रह्मण एव हि॥
तदन्येषां यथायोग्यं अखिलज्ञप्तिरिष्यते।
तावतोपासने योग्यः भवेदेवाखिलः पुमान्॥

3-3-2 उपसंहाराधिकरणं—यथांगभूतानां स्नानाचमनप्रयाजादीनां यागादिविधौ उपसहारः तथा सर्ववेदोक्तगुणानां उपसंहारपूर्वकं विष्णुः उपास्य., न तु सोऽरोदीत् इत्युक्तदोषाणाम्। एते गुणा नोपास्याः इति विशेषवचनाभावात्। आत्मेत्येवोपासीत इत्यत्र एवकार. अनात्मत्वनिवृत्त्यर्थः न गुणनिवृत्यर्थः। तस्मादेकः सर्वगुणैः विचिन्त्यः इति श्रुतेः।

3-3-3 प्राप्त्यधिकरणं—अत्र चतुर्मुखस्यैव सर्वगुणविशिष्टब्रह्मोपासनम्। अन्येषां यथासंभवम्। अधिकारिभेदेन गुणोपसंहारानुपसंहारयोः प्राप्तिसभवात्।

3-3-4 सर्वाभेदाधिकरणं—चतुर्मुखादीनां विष्णुध्याने बहुगुणोपसहार अधिकफलबत्वदर्शनात्। अल्पशक्तिकानां यथासंभवम्।

3-3-5 आनन्दाद्यधिकरण—प्रधानफले मोक्षे रुचिमान् विष्णुं आनन्दो ज्ञानं सदात्मा इत्युपासीत।

3-3-6 प्रियशिरस्त्वाद्यधिकरणं—फलान्तरार्थी प्रियशिरस्त्वादीन् गुणान्नोपासीत। यतस्तेषां अगुणत्वम्।

3-3-7 इतराधिकरण—सत् चित् आनन्द. आत्मा। एतद्व्यतिरिक्ताः गुणाः फलसाम्यलाभाय देवादिभिरुपास्याः।

3-3-8 आध्यानाधिकरणं—ज्ञानार्थमथ ध्यानार्थं गुणानां समुदीरणा। ज्ञातव्याश्चैव ध्यातव्या गुणास्सर्वेऽप्यतो हरेः। नान्यत्प्रयोजनं ज्ञानात् ध्यानात् कर्मकृतैरपि इति सर्वगुणाना ध्यातव्यत्वमुक्तम्।

फलं तु ज्ञानलाभ एव । न तु साक्षान्मोक्ष· । [आत्मेत्येवोपासीत, इति गुणानुपसहारेण उपासनोक्तेः ।

3-3-9 आत्मगृहीत्यधिकरण—आत्मेत्येवोपासीत इति गुणाननुप संहृत्य केवलात्मोपासन विहितम् । एव च सच्चिदादिगुणानामपि अनुपसंहारः स्यात् । मैवं-तेषां गुणानामात्मशब्देनैव ग्रहणात् । अत्र ह्येते सर्वे एकीभवन्तीत्युत्तरवाक्यात् ।

3-3-10 अन्वयाधिकरणं—यदि आनन्दादिसर्वगुणानां आत्मनि समन्वय· तर्हि आत्मशब्दाच्च इति पूर्वसूत्रविरोधः । तत्र हि आनन्दादि गुणानन्वय एव ह्युक्तः? मैवं-तत्र हि सर्वगुणानामुपसंहाररूपान्वयस्यैव विरोध उक्तः न तु सच्चिदादिगुणानाम् ।

3-3-11 कार्याख्यानाधिकरणं—अलौकिकाः तस्य गुणा ह्युपास्याः अलौकिक मुक्तिकार्य यतोऽस्य । इति वेदोक्तानां विष्णुगुणाना मुमुक्षुभिः ध्येयत्वम् । वज्रहस्तः पुरन्दरः इति इन्द्रादिगुणानामिव विष्णुगुणानामपि वेदप्रतिपाद्यत्वेनालौकिकत्वसभवः । कार्यस्य मोक्षस्याख्यानात् अपूर्वं—अलौकिक गुणजातमुपसंहृत्य विष्णुः ध्येयः ।

3-3-12 समानाधिकरण—त्रिविक्रमत्वादिगुणाः अलौकिका अपि कादाचित्काः । बाण्यपि त्रिविक्रमत्वादिगुणान्विहायैव उपास्ते । अतः चतुर्मुखव्यतिरिक्तैः स्वार्हालौकिगुणानामेवोपसहारः कार्यः ।

3-3-13 न वा विशेषाधिकरणं — सर्वेषा आत्मशब्दे न विष्णूपासनं विहितम् । आत्मशब्दस्य सर्वगुणाभिधायित्वमस्ति । अत सर्व गुणप्राप्तिः सर्वेषामविशिष्टेतिचेन्मैवम् । अधिकारितारतम्येन स्वस्वार्हसर्वगुणाभिधायकत्वमेवात्मशब्दस्येति अदोषात् ।

3-3-14 संभृत्यधिकरण—उक्षा स द्यावापृथिवी सर्वेषु लोकेषु भाति । इति श्रुत्युक्तसंभृतिद्युव्याप्तिरूपगुणौ देवादिभिरेवोपास्यौ । देवादीनामुपास्यास्तु भृतिव्याप्त्यादयो गुणाः आनन्दाद्यास्तु सर्वेषां अन्यथाऽनर्थकृद्भवेत् । सयक्भरण सभृतः । द्युव्याप्तिः दिवा कान्त्या व्याप्तिः । दिवु-क्रीडा विजिगीषा व्यवहार द्युति स्तुति मोद मद स्वप्न कान्ति गतिषु इति पाठात् कान्त्यर्थकत्वम् ।

कामभक्त्याऽप्सरस्त्रीणा अन्येषां नैव कामतः ।
उपास्यः श्वशुरत्वेन देवस्त्रीणां जनार्दनः ।।
जारत्वेनाप्सरस्त्रीणां कासांचिदिति योग्यता ।
योग्योपासां विना नैव मुक्ति. कस्यापि सेत्स्यति ।।
अयोग्योपासनाकर्तुः अनर्थश्च भविष्यति ।
तस्मात्तु योग्यतां ज्ञात्वा हरेःकार्यमुपासनम् ।।
पतित्वेन श्रियोपास्यः ब्रह्मणा मे पितेति च ।
पितामहतयाऽन्येषां त्रिदशानां जनार्दनः ।।
प्रपितामहो मे भगवान् इति जर्वजनस्य तु ।

3-3-15 पुरुषविद्याधिकरणं—पुरुषसूक्तविद्या उत्तमविद्या। तत्र केषाचिदेव गुणाः आम्नाताः। अपेक्षितेतरगुणाः अपठिता अपि उपसंहार्याः ।

3-3-16 वेधाद्यधिकरणं—भिन्धि विद्धि शृणीहीति फलभेदेन सर्वशः। यत्यादीनां तेष्वयोगात् नाधिकारैकता भवेत् । अयोग्योपासना-दीयुः अनर्थं चार्थनाशनम् । अत. अग्ने त्वं च यातुधानस्य भिन्द्धि इत्यादि गुणाः ब्रह्मनिष्ठैः अनुपसहार्या. ।

3-3-17 हान्यधिकरणं—मुक्तस्यापि उपासना स्वेच्छया भवत्येव। एतत्साम गायन्नास्ते इत्युक्ते । मुक्ता अपि हि कुर्वन्ति स्वेच्छयोपासन हरे । नियमानन्तर विप्रा कुशाद्यैरप्यधीयते । फलस्य निष्पन्नत्वेपि आनन्दरूपफलार्थं कर्तु शक्या उपासना । न प्रत्यवायश्चाकरणे ।

3-3-18 छन्दाधिकरण—प्राप्तमोक्षस्य विदुषः भक्तिः कर्म च छन्दतः इष्टतो भवति । करणे अकरणे च विधि प्रत्यवाययोरभावात् । विष्णु क्रमान् क्रमते इति यागागतया विष्णुक्रमो विहितः, तस्य यागस्य चानुष्ठानानन्तर विष्णुक्रमादिकं इच्छया कुर्वन्ति न कुर्वन्ति च ।

3-3-19 अनियमाधिकरण – ब्रह्मोपासननिष्ठाना सर्वेषामपि मोक्षः। न कश्चित् ब्रह्मवित् सृतिमनुभवति । मुक्तो ह्येव भवति इत्यादिप्रमाणात् ।

3-3-20 यावदधिकरणं–स्वयोग्यतानुसारेण मुक्तौ आनन्दतारतम्यम् । ज्ञानं चोपासन चैव मुक्तावानन्द एव च । यथाधिकारं देवानां भवत्येवोत्तरोत्तरम् ।। आचारे तारतम्याच्च आनन्दे तारतम्यता । मुक्ति ज्ञात्वापि विष्णु स्यात् शास्त्रं श्रुत्वा ततोऽधिकम् ।। मुक्तौ सुख तत्फलतः ततोऽप्यधिकमिष्यते । व्याख्यातुस्तु समं मुक्तौ सुख नान्यस्य कस्यचित् । ततोऽधिक तु देवानां मुख्या व्याख्याकृतो यत. । अक्षण्वन्त. कर्णवन्त सखायः मनोजवेष्वसमा बभुवु. । न समो ब्रह्मण. कश्चित् मुक्तावपि कथञ्चन ।

3-3-21 इयदामननाधिकरण—छान्दोग्ये नामादिभ्यः प्राणस्य उत्तमत्व प्रतिपाद्यते । प्राणशब्दवाच्यः चतुर्मुखः तदधिकस्यानुक्तत्वैपि तज्जनकः विष्णुरस्ति । अतः श्रियं विष्णु विना सर्वाधिकारिभ्य. उत्तमत्वम् ।

3-3-22 व्यतिहाराधिकरण–यस्सत्येनातिवदति इत्युक्त्या प्राणादपि हरे. उत्तमत्व उक्तम् ।

3-3-23 सत्याधिकरणं—कृतिस्त्वेव विजिज्ञासितव्या इत्युक्ताः कृत्यादयः परदेवतायाः स्वरूपभूताः गुणाः ।

3 3-24 कामाद्यधिकरण—प्राणादुपरि, लक्ष्म्याः उत्कृष्टत्वात् कथं पाठाभावः, जन्मादिश्रवण च कथम् ? उच्यते-संसारयोग्यानामेव अत्र पाठ । लक्ष्मीस्तु प्रकृतिशब्दवाच्या नित्यमुक्ता । अधिकप्रीत्या तत्समीपस्था विष्णौ अधिक उपास्ति करोति । राघवत्वेऽभवत् सीता इति रीत्या अवताराश्च करोति ।

3-3-25 तन्निर्धारणाधिकरणं – ब्रह्मापरोक्ष्यज्ञानप्रतिबन्धकनिवृत्यर्थं श्रवण मनन ध्यानं च कार्यम् । अज्ञानविपर्ययादि दर्शन प्रतिबन्धनिवृत्ति श्रवणमननयो. फलम् ।

3-3-26 प्रदानाधिकरणं–केवलश्रवणादीनां न ब्रह्मज्ञानकारणत्वम् । गुरूपदिष्टज्ञानसहितश्रवणादीनामेव ।

3-3-27 लिङ्गभूयस्त्वाधिकरणं–गुरुप्रसादस्यैव विद्यासाधनत्वम्। गुरुप्रसादो बलवान् न तस्मात् बलवत्तरम् । तथापि श्रवणादिश्च

कर्तव्यो मोक्षसिद्धये । सत्यकामो जाबालः जबालां स्वमातरमामन्त्र्य गौतमस्याचार्यस्य समीपमगात्। तेन चोपनीतः तन्नियमनेन 'नासहस्रेणावर्तय' इति निर्दिष्टः चतुश्शताः गाः अरक्षणत् । वर्षसहस्रपूर्त्यनन्तर ऋषभ, अग्नि हंस मुद्गुभिः प्रसन्नैः ब्रह्मविद्योपदेश प्राप्त. । ततः आगत्याचार्य ननाम । ब्रह्मविदिव त्वं भासि । तुभ्य कः उपदिदेश इत्याचार्येण पृष्टः, मनुष्या एव नत्वन्ये इत्याह । आचार्याद्धैव विद्या विदिता साधिष्ठं प्रापत् इति हेतोः पुनः उपदेश कुरु इति प्रार्थनया पुनरपि गौतमेनोपदिष्टब्रह्मविद्य आसीदिति कथा ।

3-3-28 **पूर्वविकल्पाधिकरणं**–गुरुपदेश प्राप्तेनापि पुनः उत्तमगुरुप्राप्तौ तस्मादपि उपेदशः स्वीकार्यः ।

3-3-29 **विद्याधिकरणं**–तमेत विदित्वा इति विद्याया एव मोक्ष साधनता । न कर्मणः । सर्वान् परो मायया३य सिनीते दृष्ट्वैतं मुच्यते नापरेण इति प्रमाणात् । आपरोक्ष्यज्ञानस्यैव मोक्षसाधनत्वम् । न केवलविद्यायाः ।

3-3-30 **श्रुत्यधिकरणं**–कर्मणैव हि संसिद्धि इति स्मृतिः । तमेव विदित्वा इति श्रुतिः । उभयत्रावधारण चास्ति । अथापि श्रुतेरेवप्राबल्यम्। कर्मणा बध्यते जन्तुः विद्ययैव विमुच्यते इति च। विशेषण विशेष्याभ्या क्रियया च समन्वित । अयोगं योगमपरैः अत्यन्तायोगमेव च । व्यवच्छिनत्ति धर्मस्य निपातो व्यतिरेकतः इति एवकारस्य त्रिविधार्थकत्वात् कर्मणैवेति एवकारः स्वायोगरूपकर्मसंबन्धभावव्यवच्छेदकः ।

3-3-31 **अनुबन्धाधिकरणं** — ब्रह्मापरोक्ष्यज्ञानस्य शमादिरपि हेतुः ।

3-3-32 **प्राज्ञाधिकरणं**–उपासनातारतम्यात् उपास्यब्रह्मदर्शनेपि तारतम्यम् ।

3-3-33 **न सामान्यधिकरणं** – रामादिदर्शनमात्रेण मुक्तिः । स्वात्मार्हदर्शनादेव मुक्तिः । महर्लोकादिप्राप्तिमात्रमपि न मुक्तिः ।

3-3-34 **परेणाधिकरणं**–परमात्मनो मुख्यत्वं साधनत्वम्। भक्तेरवान्तरसाधनत्वमेव।

3-3-35 **एकाधिकरणं** – सुग्रीवार्जुनादीनां सूर्येन्द्राद्यशत्वात् अशानामुपासने अनादियोग्यता नास्तीति पूर्वपक्षनिरासनपरम्। अशिनस्तु प्रथक्जाताः अंशास्तस्यैव कर्मणा पुनरैक्य प्रपद्यन्ते नात्र कार्या विचारणा।

3-3-36 **अङ्गावबद्धाधिकरणं** — अङ्गभुताधमदेवतागुणाना उत्तमदेवोपासने उपसहारः शते पञ्चाशन्न्यायात्। न तु विपर्ययः।

3-3-37 **भूमज्यायस्त्वाधिकरणं** – वैश्वानरोपासनं समस्तस्यैव।

3-3 38 **नानाशब्दाधिकरणं**—भूमगुणविशिष्टोपासनं नाना। तारतम्यस्य यथायोग्यं प्रतीतेः।

3-3-39 **विकल्पाधिकरणं**–नृसिंहरामादि बिम्बोपासने व्यवस्थितविकल्पः। विशिष्टफलत्वात् दुरितादिनिवृत्तिरूपविशेषफलवत्वात्।

3-3-40 **काम्याधिकरणं** – काम्यफलसाधनभूता गुणाः अकामैः मुमुक्षुभिः नोपास्याः। फलाभिलाषिविषये तूपास्याः। केवलभगवत् प्रीत्यर्थं मुमुक्षुविषयेप्युपास्यता।

3-3-41 **अङ्गाधिकरणं**—चक्षोस्सूर्यो अजायत इति प्रतिपन्ना विष्णवङ्गभूताः सूर्यादिदेवताः परमेश्वराङ्गत्वेनोपास्याः।

3-3-42 **न वाधिकरणं**–देवतेतरैः मुमुक्षुभि अङ्गदेवतोपसहारः कार्यो न भवति।

चतुर्थः पादः

3-4-1 पुरुषार्थाधिकरण–ज्ञानादेव पुरुषार्थावाप्तिः। ज्ञानादेव स्वर्गः। ज्ञानादेवापवर्गः। ज्ञानिन एव कर्माचरणे अधिक फलम्। धर्मपुत्रादयो हि ज्ञानाधिका कर्म कुर्वाणाः अधिकं फलं लभन्ते स्म।

3-4-2 असार्वत्रकाधिकरणं–ज्ञाने च सर्वेषामधिकारः। वैष्णव स्यैव ज्ञानेऽधिकारः। यथा नवकोटिदेवमध्ये शतसंख्याकदेवगणस्यैव सोमयागेऽधिकारः।

3-4-3 **नाविशेषाधिकरणं**—अर्थे मनुष्याणा धर्मे ऋषीणां विज्ञाने देवावामधिकारः । सर्वत्रतारतम्यनत्वात् ।

3-4-4 **स्तुत्यधिकरणं**—ज्ञानिन· यथेष्टाचरणं तस्य स्तुत्यर्थम् । अनुमतिमात्रं वा भवेत् । कामचाराणां ज्ञाने नाधिकार एव । जैमिनिस्तु कामाचरणं मन्यते ।

3-4-5 **उभयलिङ्गाधिकरणं**—ज्ञानयोग्या एव ज्ञानं प्राप्नुवन्ति । देशकालगुरुपसदनाद्यङ्गोपेत श्रवणमननादिप्रयत्न विपरीतफलक एवा योग्यानाम् । इन्द्रस्य विरोचनस्य च चतुर्मुखोपदेशस्समः संयग्ज्ञानं इन्द्र एव प्राप्तः विरोचनस्तु विपरीत ज्ञानमाप । देवानामेवदैवीसंपत्तिप्राप्तिः असुराणामासुरीसंपत्तिप्राप्तिरेव ।

3-4-6 **आधिकारिकाधिकरण**—ब्रह्माद्यैश्वर्य प्राप्ति परमात्मैश्वर्य प्राप्तिश्च ज्ञानिभिरपि नाशासनीया । तथा चेत् पतेयुः। न देवपदमन्विच्छेत् कुत एव हरेर्गुणान्। इच्छन्पतति पूर्वस्मात् अधस्तात्यत्र नोस्थितिः। स्वकीयमच्छिमात्रं तु राजाद्याः पातयन्ति हि । एवमेव सुराद्याश्च हरिश्च स्वपदेच्छुकम् । अन्यत्र शुभमाकाक्षन् न पतेदविरोधतः इति ।

3-4-7 **फलश्रुत्यधिकरणं**—देवानामेव ब्रह्मवित्व ब्रह्मप्राप्तिः ज्ञानवत्व च इत्यात्रेयमतम् । सन्त्वयागेषु सर्वे यजमाना· सर्वे ऋत्विजः इति न्यायात् प्रजानामपि ज्ञानसत्वात् ब्रह्मप्राप्तिरिति औडुलोमि ।

3-4 8 **कृत्स्नभावाधिकरणं**—गृहस्थानामेव मुक्तिरिति छन्दोग्ये । अत्र मुक्त्युपसहारः कृत्स्नगृहस्थान् देवानपेक्ष्यैव । कृत्स्ना ह्येते गृहिणो देवाः कृत्स्ना ह्येते यतयोत, एतेषा न पुत्रादायमुपयन्ति नचैते विसृजन्तीति श्रुतेः । गृहस्थाना यतीनामेवात्र श्रवणात् नान्याश्रमनिष्ठाना इति चेत् ? देवेषु सर्वाश्रमश्रुतेः सर्वाश्रमिणामेव । देवा एव ब्रह्मचारिणः देवा एव गृहस्था देवा एव वनस्था. इत्यादिश्रुतिः ।

3-4-9 **अनाविष्कराधिकरणं**—सच्छिष्यायैव रहसि ब्रह्मोपदेशः कार्य । सभाया चत्वरादिस्थानेषु गोप्य । विद्या हवै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेऽहमस्मि । अनार्यकायानृजवे शठाय । नमां ब्रया , ऋजवे ब्रूहि नित्यम् ।

3-4-10 ऐहिकाधिकरणं —आत्मा वा अरे द्रष्टव्यः इति ब्रह्म दर्शन प्रारब्धप्रतिबन्धाभावे इहैव जत्मनि। तत्सत्वे जन्मान्तरेपि वा श्रुत्वात्मानं मनिपूर्व ह्युपास्य इहैव दृष्टि परमस्य विन्देत्। यद्यारब्ध कर्व निबन्धक स्यात् प्रेत्यैव पश्येद्योगमेवान्ववेक्ष्य।

3-4-11 मुक्तिफलाधिकरणं–मुक्तिरूपफलमपि प्रारब्धकर्माभावे शरीरपातानन्तरमेव भवति। तत्सत्वे जन्मान्तरेषु इत्यनियमः।

ब्रह्मचर्मशिरः पट्टी दिक्पालोऽर्वागभूषणः।
द्वादशार्कशिरोदामा रुद्रशीर्षैकनूपुर॥
नृसिंहरूपी सर्वेषां भित्वा ताभिरलकृत।
नृत्यते प्रलये देव स्वयं कृष्णादिरूपवान्॥
अदग्ध्वैव तनुं याति नित्यानन्दस्वरूपतः।
लक्ष्मीकान्त समन्ततोपि कलयन् नैवेशितुस्ते समम्।
पश्याम्युत्तमवस्तु दूरतरतोपास्त रसोऽयोऽष्टमः॥
यद्रोषोत्कर दक्षनेत्रकुटिलप्रान्तोत्थिताग्निस्फुरन्-
खद्योतोपम विष्पुलिङ्गभसिता ब्रह्मेशशक्रोत्कराः।

इत्याचार्यवचनम्। पौण्ड्रकवासुदेववत् तन्नामधारिण असुरा एव ते। अत एव श्रीनृसिंहरोषाग्निना दग्धाः। इति।

चतुर्थाध्यायः

4-1-1 आवृत्यधिकरणं – श्रोतव्य इत्यादिना विहितस्य श्रवणादेः ध्यानावृत्तिः कार्या। ऐतदात्म्य इत्यसकृदुपदेशात् भृगुर्वैवारुणिः इति पुनः पुनः गुरूपसत्त्या श्रवणावृत्तिदर्शनात्। नित्यशः श्रवण चैव मनन ध्यानमेव च। कर्तव्यमेव पुरुषैः ब्रह्मदर्शनमिच्छुभिः इति प्रमाणाच्च।

4-1-2 आत्माधिकरणं–उपासकैः आत्मा विष्णुः इति ध्येयः मम स्वामी।

4-1-3 न प्रतीकाधिकरणं — नामादिप्रतीके ब्रह्मदृष्टिः न कार्या। तत्र ब्रह्म वर्तते इति ध्येयम्। नामादिप्राणपर्यन्तं उभयोः

प्रथमात्वतः ऐक्यदृष्टिरिति भ्रान्तिः अबुधानां भविष्यति। नामादि-स्थितिरेवात्र ब्रह्मणो हि विधीयते। सर्वथा प्रथमा यस्मात् सप्त-म्यर्था ततो मता।

4-1-4 ब्रह्मदृष्ट्यधिकरणं–सर्वैः विष्णावेव ब्रह्मदृष्टिः कार्या।

4-1-5 आदित्याधिकरण–आदित्यादिदेवानां विष्णवङ्गभूतचक्षु-रादौ आदित्यादिमतयः कार्याः। यस्य यत उत्पत्तिः तस्य तत्र लयः चक्षोस्सूर्यो अजायत इत्यादि।

4-1-6 आसीनाधिकरणं—उपासन आसीन एव कुर्यात्।

4-1-7 आप्रयाणाधिकरण–मुक्तिपर्यन्त विष्णूपासन कर्तव्यम्।

4-1-8 तदधिगमाधिकरण—उपासकस्य ब्रह्मदर्शने उत्तरपापा-श्लेष. पूर्वपापविनाशश्च। भोगेन प्रारब्ध कर्म क्षपयित्वा अवसाने स्वस्वयोग्या मुक्तिमाप्नुवन्ति ज्ञानिनः।

द्वितीयः पादः

4-2-1 वागधिकरणं – वागभिमान्युमादेवता मनोभिमानिरुद्रे-विलीयते। वाचो मनोवशत्वदर्शनात्।

4-2-2 मन.प्राणाधिकरणं—मनोभिमानी रुद्रः वायौ वायोर्वाव रुद्र. उदेति वायौ विलीयते तस्मादाहुः वायुर्देवाना श्रेष्ठः इति।

4-2-3 अध्यक्षाधिकरणं–प्राण· अध्यक्षे परमात्मनि लीयते। सर्वे प्राणमुपगच्छन्ति प्राण परमुपगच्छति। इति श्रुते।

4-2-4 भूताधिकरण—भूतेषु देवा विलीयन्ते इति प्रमाणात् अन्येषा देवाना भूतेषु लयः।

4-2-5 नैकस्मिन्नधिकरण–सर्वेषा देवानां नैकस्मिन् भूते लयः पृथिव्या ऋषयो लोयन्ते वरुणेऽश्विनौ इत्यादि श्रुतिः।

4-2-6 समानाधिकरणं—लक्ष्मी. विष्णुना समाना देशकाल-व्याप्ते। ससाराभावाच्च। असमो वा एष भवति इति लक्ष्म्याः साम्यनिषेधो नास्ति। जीवस्यैव विष्णुना साम्यनिषेधः। सर्वे ह्येते अणवो जायन्ते म्रियन्ते च छिद्रा ह्येते भवन्ति इति श्रुतिः।

4-2-7 तानि पराधिकरणं—भूतेषु लीयन्ते इत्युक्ता देवा चतुर्मुखद्वारा विष्णौ सपद्यन्ते ।

4-2-8 अविभागाधिकरणं—मुक्तौ जीवस्य सत्यकामत्वादयः श्रुताः विष्णवच्छानुगुण्येन भवन्ति ।

4-2-9 तदेकोधिकरणं—उत्क्रान्तिकाले विष्णुप्रकाशितद्वारः ब्रह्म रन्ध्रेण निष्क्रामति । रात्रावपि रश्मिसबन्धो विद्यते । दक्षिणायनमृतानामपि विष्णुप्राप्ति. ।

4-2-10 योग्यधिकरणं-ज्ञानयोगी गत्यनुस्मरणात् ब्रह्म गच्छति कर्मयोगी गत्यनुस्मरणात् चन्द्रम् । ज्ञानयोगिना कर्मयोगिना च गत्यनुस्मरणे जन्मान्तरे स्मरणं प्राप्य ।

तृतीयः पादः

4-3-1 अर्चिराधिकरणं—ज्ञानी अर्चिरादिना मार्गेण । कर्मी धूमादिना । वायुस्तु आतिवाहक· । न मार्गः ।

4-3-2 वायुशब्दाधिकरणं — देहादुत्क्रान्तस्य ज्ञानिनः अर्चिः प्राप्त्यनन्तरं वायुप्राप्ति. । अर्चिषो वायुं गच्छति इति श्रुतेः ।

4-3-3 तटिदधिकरणं–मासेभ्य संवत्सरं सवत्सरात् वरुणलोक इति कौण्डिन्य श्रुतौ पाठक्रमः । संवत्सरात् तटितमागच्छति तटितः प्रजापतिलोक गौपवनश्रुतौ सवत्सरात् तटित. पाठ । ततः पर प्रजापतिलोकस्य । एवं विरोधेपि तटित उपरि वरुण । तयोरेव संबन्धात् ।

4-3-4 आतिवाहिकाधिकरण—स वायुमागच्छति इति द्वितीयप्राप्यः आतिवाहिको वायुः उक्तः । विद्युत् तत्पति वायुमुपगम्य तेनैव ब्रह्म गच्छति इति अन्तेपि वायुरुक्तः । पूर्वोक्त एवायमपि आतिवाहिको वायुः ।

4-3-5 वैद्युताधिकरण – विद्युत्पतिना वायुनैव ज्ञानिनां ब्रह्म समीपप्रापणम् ।

4-3 6 कार्याधिकरणं — विद्युत्पतिः कार्यं ब्रह्म गमयतीति बादरिमतं कार्य ब्रह्मेति जैमिनिमतम् । अप्रतीकालम्बनान् परं नयतीति बादरायणमतम् ।

चतुर्थः पादः

4-4-1 सपद्याधिकरण—मुक्तः ससारनदी तीर्त्वा ब्रह्म सपद्य अविहाय स्वस्वयोग्यानन्दान् अनुभवति ।

4-4-2 मुक्ताधिकरणं—स तत्र पर्येति इत्यत्र तच्छब्दस्य मुक्त-परत्वात् स एव काममनुभवति ।

4-4-3 आत्माधिकरणं—पर ज्योतिरुपसंपद्य इत्यत्र ज्योति-श्शब्दार्थो विष्णुः । नत्वग्निसूर्यादयः । पर ज्योतिः परं ब्रह्म परमात्मात्मका गिर । सर्वत्र हरिमेवैकं ब्रूयुः नान्य कथञ्चन ।

4-4-4 अविभागाधिकरणं—मुक्तः विष्णुना सह तत्रत्यान् भोगाननुभवति । ये भोगाः परमात्मना भुज्यन्ते ते भोगाः मुक्तानामपि ।

4-4-5 ब्राह्माधिकरणं—मुक्त कर्मप्राप्तदेह परित्यज्य ब्रह्म-शरीरान्तर्गतस्सन् ब्रह्मणा सह भोगान् भुङ्क्ते इति जैमिनिः । चिन्मात्र एव एष भवति इति औडुलोमिमतम् । बादरायण उभयमपि ब्रवीति ।

4-4-6 सङ्कल्पाधिकरणं—पित्रादिभोगप्राप्तौ मुक्तानां निमित्तान्तरापेक्षा न विद्यते ।

4-4-7 अनन्याधिपत्यधिकरणं—मुक्त स्वोत्तमाचार्यादीन् विहाय अनन्याधिपतिः । आचार्यादिभ्यः अन्यः अस्य पति र्न भवति ।

4-4-8 अभावाधिकरण—मुक्तः शरीरं परिगृह्य सुखादिकमनुभवति शरीर च त्यजति दुःख तु नानुभवति । यथा दीपः दीपिकादिषु प्रविष्ट दीपिकास्थं तैलं गृह्णाति तैलादिगत काष्ण्यादि न तथा ।

4-4-9 जगद्व्यापारवर्जाधिकरणं—मुक्तः सर्वान्कामानवाप्नोति अमृतश्च । तथापि सृष्ट्यादिव्यापारव्यतिरिक्तभोगानेवानुभवति ।

4-4-10 स्थित्यधिकरण—मुक्तस्य आनन्दादीनां वृद्धिः ह्रासश्च न विद्यते ।

4 4-11 अनावृत्यधिकरणं–न च पुनरावर्तते न च पुनरावर्तते सर्वान् कामानाप्त्वा अमृतस्समभवत् इति श्रुतिः । स्वाभिमानि देवता परपराद्वारा चतुर्मुखं प्राप्य तदुपदेशेन ज्ञानाधिकस्सन् तेन सह विष्णु प्राप्य नित्यामृतः आनन्दी भवति । पुनस्ससार नाप्नोति ।

मुक्तिर्ज्ञात्वापि विष्णु स्यात् शास्त्र श्रुत्वा ततोधिकम् ।
मुक्तौ सुखं तत्पठत ततोऽप्यधिकमिष्यते ।।
व्याख्यातुस्तु समं मुक्तौ सुख नान्यस्य कस्यचित् ।

ततोऽधिक तु देवाना मुख्या व्याख्याकृतोयत इति मनुष्याणां मुक्तौ तारतम्यमुक्तमिति ।

49. विशिष्टाद्वैतमतानुयायि सूत्रजातम् ।

भगवान् बादरायण विशिष्टाद्वैतमतमनुसृत्यैव सर्वमपि सूत्रमतनोत् इति सूत्रपरामर्शे निश्चीयते । स्वस्वमतमवलम्ब्यैव सूत्रात्मकरोदिति तत्तन्मतस्थाः हठादेव वदेयुः । न तत् श्रद्धेय वचनम् । यतः सूत्रेषु तत्तन्मतखण्डनप्रकारा एव बहुत्र दृश्यन्ते । अतो वेदोपबृहणार्थं पुराणादीनिव वेदान्तविचारात्मकं न्यायनिबन्धनरूप सूत्रजातं विशिष्टाद्वैतमतमवलम्ब्यैव प्रणिनायेति विशिष्टाद्वैतमतानुयायी व्यासः इति सुदृढ वक्तु शक्यते ।

विशिष्टाद्वैतमते इमे अर्थविशेषा प्रधानभूता. ।

1 जगद्ब्रह्मणोः शरीरात्मभावः, 2 ईश्वरचेतनाचेतनरूपतत्त्वत्रयं, 3 प्राप्यस्य ब्रह्मणोरूपमित्याद्युक्तार्थपचकम् । 4 ईश्वरजीवभेदः, 5 शेषशेषिभावः अत्रन्याधिपति । 6 शेषभूतस्य मोक्षे पृथक्स्थित्या कैकर्यकारणम् । 7 जीवब्रह्मणो विशिष्ट वेषेणैवैक्य ब्रह्मणः सगुणात्वमित्यादीनि । एतानि सर्वाण्यपि सूत्रे संयगेवोपपादितानीति बादरायण कृतं सर्वमपि सूत्रं विशिष्टाद्वैतमतस्थापनव्यग्रमेव । एवमभिन्नपादानत्वमपि सूत्रारूढम् ।

1 तथा हि—एकैकस्मिन्नपि तन्त्रे स्वैरङ्गीकृताः इतरसिद्धान्तिभिरनंङ्गीकृताः बहवोऽर्थ विशेषाः विद्यन्ते । एतेषा प्रतितन्त्रमितिनाम।

तत्र विशिष्टाद्वैतमते जगद्ब्रह्मणो शरीरात्मभावः इति यदुच्यते तदिद न सर्वैः सिद्धान्तिभिः अङ्गीकृतम्। केवल विशिष्टाद्वैतमतस्थैरेव। एवं बहवः अर्था एतत्सिद्धान्ते विद्यन्ते। तत्रापि अयमंशः प्रधानभूत इति प्रधानप्रतितन्त्रशब्देन व्यपदिश्यते। एतदेव मनसि कृत्य श्रीमद्वेङ्कटनाथाः रहस्यत्रयसारे प्रधानप्रतितन्त्राधिकारे—आधे यत्वप्रभृतिनियमैरादिकर्तुः शरीरं इति पद्यं रचयामासुः।

इदमेव शरीरात्मभावं प्रधानप्रतितन्त्रमुपजीव्य सर्वमतमपि खण्डयन्ति इति इतरमतखण्डने प्रधानहेतुभूतं च। सर्व श्रुत्यानुगुण्य संपादने प्रधानभूतं च। जीवब्रह्मणो. भेदाभेदबोधक श्रुतीना परस्परविरोधोपि एतदुपजीव्यैव परिहियते। अतः ब्रह्मजगतोः शरीरात्मभावरूपप्रधानप्रतितन्त्रमेकमेव सर्वमतमपि वैदिक अवैदिकं वा सर्वात्मना नाशयितु प्रभवतीति। अत एवोक्तं श्रीमद्भि वेङ्कटनाथैस्तत्रैव यद्येतं यतिसार्वभौमकथितं—इत्यादि।

इद चैतन्मतस्थैः न स्वबुध्या कल्पितं, नापि श्रुत्यन्यथानुपपत्या ऊहित, परंतु स्पष्टतर बहुविधश्रुतिप्रमाणसिद्धमित्यङ्गीकृतम्। यः पृथिव्यां तिष्ठन् यः पृथिव्या अन्तरः य पृथिवी न वेद यस्य पृथिवी शरीरं इत्यादिषु प्रतिवस्तु निर्दिश्य सर्ववस्तूनामपि चेतनाचेतनानां ब्रह्मशरीरत्व प्रतिपादित ह्यस्ति। अत्र प्रतिपर्यायं शरीर शरीरं इति निर्देशादभ्याससिध्या सर्ववस्तूना ब्रह्मशरीरत्वबोधने श्रुतोनामादराति शयोपिसूच्यते।

अत्र लोकव्युत्पत्तिमुपेक्ष्य शरोरशब्दस्य गौणार्थकत्वं योगबलेन अन्यार्थकत्व च न कल्पनार्हम्। एतदुपबृहणस्मृत्यादिषु गौणमर्थमनुक्त्वा साक्षात् शरोरस्यैव बोधनात्। यदम्बुवैष्णवः कायः तत्सर्वं वै हरेस्तनु· इत्यदिभिः शरीररूपार्थबोधककायोतनुप्रभृतिशब्दै प्रतिपादनाच्च। अतो लोके मनुष्यशरीरं देवशरीरं इत्यादौ शरीरशब्दः यदर्थवाचकः तदर्थविशेषमुपजीव्यैव वैदेपि शरीरशब्द· प्रयुक्तः इति निश्चीयते। एतादृशशरीरबोधक श्रुतिरेव घटकश्रुतिरित्यप्यभिधीयते।

जीवपरयोः भेदाभेदबोधक श्रुतीना परस्परविरोधपरिहारमुखेन सामञ्जस्यतया बोधनात् ।

एतादृशः जगद्ब्रह्मणोः शरीरात्मभावः अंशो नाना व्यपदेशादित्यादि सूत्रयता बादरायणेन स्पष्टमेव प्रतिपादितः जगतो ब्रह्मांशत्ववादिना । अत्रांशत्वं शरीरात्मभावरूपं इत्येतत् नानाव्यपदेशाद न्यथाचापि दाशकितवादित्वमधीयते इति सूत्रखण्डेनैव स्पष्टं प्रतिपादितं भवति । तत्र यया सरण्या अशत्वोपपादने भेदाभेदविरोधः परिहृतो भवति तामेव सरणि माश्रित्याशत्वनुपपादनीयम् । साच सरणिः शरीरात्मभावरूपा । अशत्व रामकृष्णा दित्यादि सारावल्या स्पष्टमिद प्रत्यपादि ।

अपीतौ तद्वत्प्रसङ्गादसमञ्जसं न तु दृष्टान्तभावादित्यादावपि शरीरात्मभाव अङ्गीकृतः । ननु जगद्ब्रह्मणोः अत्यन्त विलक्षणयोः सारूप्याभावात्कार्यकारणभाव अनुपपन्नः इत्याशक्य विलक्षणयोरपि कृमिमाक्षिकयोः कार्यकारणभावदर्शनात् अत्राप्युपपन्नमित्युक्तम् । एव चेत् कार्यभूतकुण्डलादिदोषाणा कारणसुवर्णे इव जगद्गतदोषाणा कारणब्रह्मणि प्रसक्तिः इति शंका आपतिता । तत्परिहाराय न तु दृष्टान्तभावात् इति सूत्र प्रवृत्तम्। अनुपपत्तेस्तु न शारीर इति स्वसूत्रे एव शारीरनिर्देशात् स एव शारीरो जीवदृष्टान्तत्वेन विवक्षित इति ज्ञायते । एवं च देवमनुष्यादि शरारविशिष्टजीवे शरीरगतदोषाणा यथा न प्रसक्तिः तथा अत्रापि इत्युक्तौ दृष्टान्तस्वारस्यात् जगच्छरीरकब्रह्मणोपि जगद्गतापुरुषार्था गमत्वासंभवः इति ज्ञायते । अनेन जगतः ब्रह्मशरीरत्वं स्पष्टमेव प्रतिपादितं भवतीति ।

अन्तर्याम्यधिदैव ..इति सूत्रं प्रकुर्वाणो बादरायणः स्पष्टमेव जगतः ब्रह्मशरीरत्वं उक्तवान् । अत्र अधिदैवाधिलोकादिषु इति पदस्वारस्येन तच्छिन्हितवाक्याना परामर्शात् तेषु सर्वजगतां ब्रह्मशरीरत्वप्रतिपादनध्रौ व्यादिति ।

तदनन्यत्वमारभणशब्दादिभ्यः इतीदमपि सूत्र शरीरात्मभावसाधक भवति । अत्र पटवच्च इति सूत्र सर्वात्मना शरीरत्वसूचकम् ।

एव चराचरव्यपाश्रयस्तु...इति सूत्रेपि अयमर्थः स्पष्टः। अत्र हि सर्वशब्दानामपर्यवसानवृत्या ब्रह्मवाचकत्वं ब्रह्मण्येव मुख्यत्वं च प्रतिपादितम्। लोके शरीरातिरिक्तजीवस्य यावता न प्रतिपत्तिः तावत् देवादिशब्दाः शरीरमात्रविश्रान्ताः। अतिरिक्तजीवप्रतिपत्तौ तु त एव शब्दाः देवादिशरीरविशिष्टजीववाचकाः। जीवातिरिक्तपरमात्मनोपि प्रतिपत्तौ त एव शब्दाः देवशरीरकजीवशरीरकपरमात्मपराः इति। अतः देवशरीरस्य जीवस्य च यः संबन्धः स एव सबन्धः जीवस्य परमात्मनोपि इति परमात्मशरीरत्वमवर्जनीयम्। अत एव हन्ताहमिमास्तिस्रो देवताः अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति श्रुतिरुपपद्यते। एवमन्यानि बहूनि सूत्राणि शरीरात्मभावबोधकानि समुल्लसन्ति। विस्तरभयान्नेह प्रस्तूयन्ते। विस्तरस्त्वन्यत्र द्रष्टव्यः।

2. तत्त्वत्रयं—ईश्वरः जीवः अचेतनमिति तत्त्वत्रय विशिष्टाद्वैतिनः अङ्गीकुर्वन्ति। भोक्ता भोग्यं प्रेरितारं च मत्वा इति श्रुतिः इदं तत्त्वत्रयं विभज्य प्रदर्शयति। प्रधान, क्षेत्रज्ञ पतिर्गुणेशः इत्यादि श्रुतिवाक्यान्यपि तत्त्वत्रयविभागे प्रमाणानि भवन्ति। अस्य तत्त्वत्रयस्य विभज्य ज्ञाने एवामृतत्वप्राप्तिः इत्यपि ता एव श्रुतयो वदन्ति। पृथगात्मानं प्रेरितार च मत्वा जुष्टस्ततस्तेनामृतत्वमेति इत्याद्याः श्रुतयोपि। एवं तत्त्वत्रयबिभागकरणात् तत्त्वानां परस्परसाकर्यमनुपपन्नं इति निश्चप्रचम्। परस्परासमीकीर्णधर्मवत्पदार्थप्रदर्शनं हि विभागः। अतो जोवस्य ईश्वरस्य प्रधानस्याचेतनस्य च लक्षणं पृथग्पृथग्भवति। तेन तेन लक्षणेन प्रयोजनविशेषोपि सिध्यति। तदुक्तम्—

प्रकृत्यात्मभ्रान्तिर्गलति... ... ...इति।

अचेतना परार्था च नित्या सततविक्रिया। त्रिगुणा कर्मिणां क्षेत्र प्रकृतेः रूपमुच्यते इति प्रकृतिलक्षणमुक्तम्। अणुत्वेसति चेतनत्वं, स्वतः शेषत्वे सति चेतनत्वं जीवलक्षणं, विभुत्वे सति चेतनत्वं ईश्वरलक्षण इति लक्षणमनुसन्धेयम्। एवं लक्षणप्रतिपन्नानां

त्रयाणा वस्तूनां परस्परं भिन्नत्वात् एतेषामैक्यं न प्रदर्शयितु शक्यते। प्रमाणविरुद्धमपि।

अत ब्रह्मैकमेव सत्यं तदतिरेकि चेतनाचेतन सर्व तस्मिन्परिकल्पितं तदेकतापन्नमिति वचनमितरेषा दुरुपपादम्। सूत्रकारोपि—अधिक तु भेदनिर्देशात्, अश्मादिवच्च तदनुपपत्तिः इति सूत्रद्वयेन अर्थमिमं स्पष्टमेव प्रदर्शयामास। ज्ञाज्ञौ द्वावजावीशनीशौ, द्वासुपर्णा-इति सर्व ज्ञत्व, अल्पज्ञत्व, सुखदु खादिकर्मफलभोक्तृत्व तदभोक्तृत्वादिपरस्पर-भेदकविरुद्धधर्माणामुभयो प्रतिपादनात् भेदः स्फुटप्रतिपन्न एव। तत्व-मसीति सामानाधिकरण्यनिर्देशस्तु ऐतदात्म्यमिद सर्व इत्यादि सामा-नाधिकरण्यनिर्देशवदन्यपर एव। तत्र हि, इदं सर्व इति सर्वपदोक्ताना काष्ठलोष्ठपाषाणादीना ऐतदात्म्य इति श्रुत ब्रह्मतादात्म्य स्वरूपैक्य रूप नोपपद्यत जडाजडयोः स्वरूपैक्ययोगात्। अतः स आत्मा इत्य-नन्तरवाक्यश्रुत शरीरात्मभावरूपमेव तादात्म्य तदिति वक्तव्यम्। एव रूपमेव तत्त्वमसीति श्रुततादात्म्यमपि हेयसंबन्धार्ह तदनर्ह जीव-ब्रह्मणो स्वरूपत ऐक्यासभवात्। अतः जीवब्रह्मणोः स्वरूपैक्य अचेतन ब्रह्मणोरिव न प्रामाणिक भवितुमर्हति। एवमत्र सूत्रकारः स्पष्टमेव तत्त्वत्रयविभाग प्रतिपादयामास।

अथातो ब्रह्मजिज्ञासा इति प्रथममेव सूत्रप्रणेता तापत्रयातुरैर-मृतत्वाय ब्रह्मणोजिज्ञासारूपत्वं ब्रुवन् उपासकोपास्ययोः ब्रह्मजीवयो भेद स्फुट प्रकटोचकार। कर्मकर्तृव्यपदेशाच्च इत्येकमेव सूत्रमत्र पर्याप्त भवति॥ आकाशस्तल्लिङ्गात् अत एव प्राणः ईक्षतेर्नाशब्द कारणत्वेनचाकाशादिषु आकाशोऽर्थान्तरत्वादिव्यपदेशात् अनुपपत्तेस्तु न शारीर नानुमानमतच्छब्दात् प्राणभृच्च इत्यादिभिः जगत्कारणस्य परमात्मन चेतनाचेतनविलक्षणत्व ब्रुवता बादरायणेन तत्त्वत्रय-विभागः सम्यगेव प्रादर्शि॥

यद्यपि नेह नानास्ति किचन, एकधैवानुद्रष्टव्यम् इतिवाक्यम्। अत्राथातत्तो दर्शने ब्रह्मातिरिक्तवस्त्वभावस्य, सर्ववस्तूनां ब्रह्मैक्यस्य च

प्रतिपत्ति र्भवतीव । अथापि एतद्वाक्यानन्तरं सर्वस्याधिपतिः स न साधुना कर्मणा भूयान् नो एवासाधुना कर्मणा कनीयान् एष सर्वेश्वरः एष भूताधिपतिः एष भूतपालः एष सेतुर्विधरणः एषां लोकानामसंभेदाय इति श्रवणात् तै· सर्वलोकपतित्वप्रतिपादनाच्च, सर्ववस्तुसद्भावस्य ब्रह्मणः तदतिरिक्तत्वस्य प्रतीतिरवर्जनीया । अतः अब्रह्मात्मकवस्तुनिषेधपरैव पूर्वोदाहृतश्रुतिरित्यवसेयम् । एतत्सर्वमभिप्रेत्य पत्यादिशब्देभ्यः इत्यसूत्रयत् बादरायणः । अनेन मुक्तजीवापेक्षयापि परमात्मनो भेदः साधित· ।

भेदव्यपदेशाच्चान्यः इत्यन्यशब्दं प्रयुञ्जानः सूत्रकारः जीवेश्वरभेद स्वाभिमतं विशदमेव प्रकटयामास । नेतरोऽनुपपत्तेः इति मुक्तभेदमपि कण्ठत एव प्रोवाच ।

गुहां प्रविष्टात्मानौ हि इति सूत्रयन् द्विवचननिर्देशेन जीवपरयोः भेदं स्वाभिमतमाविष्करोति स्म । जीवपरयोः ऐक्यवादी कथमिव शास्त्रसरणिं सूत्रशैलींचापरित्यजन् सूत्रमिद स्वाभिमतपर व्याकुर्यात् । इदमेकमेव पर्याप्तं मतान्तरखण्डने । व्यावहारिकसत्यत्वमवलम्ब्यैव सर्वेषामेतेषां सूत्राणां प्रवृत्तिरिति कथन अत्यन्तसाहसमेव । तथा सति स्वाभिमतस्थापनार्थतया तैरुदाहृत सूत्राणामपि तथात्वेन स्वेष्टार्थासिद्धेः । अतो जीवेश्वरभेदः तत्त्वत्रयविभागश्च सूत्रकारेण संयक्प्रदर्शित इति विशिष्टाद्वैतमतानुगुण्य सूत्राणाम् ।

3. अर्थपञ्चकं-प्राप्यस्य ब्रह्मणो रूपं प्राप्तुश्च प्रत्यगात्मनः प्राप्त्युपाय फल चैव तथा प्राप्तिविरोधि च । वदन्ति सकला वेदाः सेतिहास पुराणका. इति सर्ववेदेतिहासपुराणानामपि पर्यवसानभूमिः अर्थपञ्चकमेव । एतदर्थपञ्चकमनुसन्दधत एव मोक्षेच्छा तदुपायादिप्रवृत्तिरिति सर्वसंमतम् । श्रीवैष्णवप्रधानभूतेषु मूलमन्त्रद्वयचरमश्लोकेषु एतदर्थपंचक बोधकशब्दा अन्तर्गता इति श्रीमद्भिः वेदान्तगुरुभिरुक्तं-आदौ प्राप्य परममनघं .....सम्मतस्सर्ववेदी इति ।

लक्ष्मीसहायतया अपरिमितज्ञानानन्दरूपतया हेयप्रत्यनीकतया ज्ञानशक्त्याद्यनन्तमङ्गलगुणविशिष्टतया दिव्यमङ्गलविग्रहोपेततया

शरीरभूतविभूतिद्वययुक्ततया जगत्सृष्ट्यादिव्यापारलीलावत्तया च प्राप्य ब्रह्मानुसन्धेयम् । एवंरूपस्य प्राप्यस्य ब्रह्मण. प्रतिपादनं सूत्रकारेणात्र कृतमस्ति । तदत्रसंग्रहेण प्रदर्शयामः—

लिङ्गभूयस्त्वाधिकरणे प्राप्यस्य परस्य लक्ष्मीसहायत्वमुक्तम् । अत्र नारायणानुवाकस्य पूर्वप्रकृत दहरविद्याशेषत्वेन दहरविद्योपास्य-निर्धारणार्थत्वं, उत सर्वपरविद्योपास्यनिर्धारणार्थत्वमिति सन्दिह्य उत्तरपक्षः स्थापितः । अत्र नारायणानुवाके नीलतोयदमध्यस्था इत्युक्ते. विद्युल्लक्ष्मीसहायत्वं उक्तं भवति ।

प्रसङ्गादत्र किंचित् ब्रूमः—ननु किमर्थमिदमधिकरणं ? दहर-विद्यामात्रोपास्यविशेषनिर्धारणार्थत्वनिराकरणेन सर्वविद्योपास्य निर्धा-रणार्थमिति चेत् पूर्वप्रकृतदहरविद्याशेषत्वमात्रमङ्गीकृत्य तन्मात्रो-पास्यनिर्धारणे किं बाधकम् । अतिरिक्तपरविद्यासु शंभुचतुर्मुखवास-वादीना उपास्यत्व स्यात् इति चेत्—न—दहरविद्याया नारायण-स्यैवोपास्यत्वसिद्धौ सर्वासु परविद्यासु नारायणस्यैवोपास्यत्वसिद्धेः सर्वासा परविद्याना विकल्पोऽविशिष्टफलत्वादिति अविशिष्टमोक्ष-रूपफलसाधनत्वोक्तेः उपास्यभेदासंभवात् । नचोपास्यभेदेपि-अविशिष्टफलकत्व शास्त्रबलादङ्गीक्रियते इति इतरपरविद्यासु अन्येषामुपास्यत्व भवत्विति वाच्यं, तथापि कारणं तु ध्येयः इति जगत्कारणवस्तुन एव ध्येयत्वोक्तेः दहरविद्याया नारायणस्य ध्येयत्व-सिद्धौ तस्यैव जगत्कारणत्वसिद्धः सर्वपरविद्यासु तस्यैव नारायणस्य-ध्येयत्वसिद्धरफलापासंभवात् । अन्यथा कारणद्वित्वप्रसङ्गात् । प्रथमा ध्याये हि चेतनाचेतनविलक्षणस्य चतुर्मुखशम्भुमुखामादिव्यतिरिक्तस्य एकस्य एको हवै नारायण आसीत् इत्यादिभि. कारणत्व प्रतिपादित-मितिचेत् सत्यम् । न्यायनिरूपणमन्तरा श्रुत्यैव सर्वपरविद्यावेद्या-निर्धारणं,सभवतीति एतावन्मात्रप्रदर्शनफलकत्वादस्याधिकरणस्य ॥

अत्र नारायणानुवाके नारायणपर ब्रह्म इत्यादौ नारायणात्परं नारायणपर इति पञ्चमीतत्पुरुषमाश्रित्य ब्रह्मनारायणादुत्कृष्ट इत्यर्थमपि केचिद्वर्णयन्ति । इदमुत्तरवाक्यस्वारस्यविरुद्धम् । अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः इत्युत्तरवाक्ये नारायणव्यतिरिक्तेषु सर्वेषु

नारायणस्यान्तः प्रवेशः नियन्तृत्वं चोक्तम् । अन्तर्व्याप्तेः यः पृथिवी-मन्तरो यमयति यः आत्मानमन्तरो यमयतीति नियमनार्थत्वात् नारा-यणस्य सर्वनियन्तृत्वं सर्वस्य नारायणनियाम्यत्व चोक्त भवति । एवं च नास्वनियाम्यस्य स्वस्मादुत्कृष्टत्वासभवात् कथमन्यस्य नारायणा दुत्कृष्टत्वम् । अतः नारायण परं ब्रह्म इत्यत्र नारायणपदोत्तरं सुपां सुलुक् इति सूत्रेण सुविभक्तेर्लोपः इति नारायण एव परं ब्रह्म इत्युक्तं भवतीति ।

अपरिमितज्ञानानन्दादिरूपत्व आनन्दादय. प्रधानस्य, अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्त इत्याद्यधिकरणेषूक्तम् । सत्यत्व, ज्ञानत्व अनन्तत्व आनन्दत्व अमलत्वानि ब्रह्मस्वरूपनिरूपक-धर्मभूतानि । गाम्भीर्यदयापराक्रमैश्वर्यादीनि निरूपितस्वरूपविशेष-णानि, यथा गोः सास्नादिमत्व गोस्वरूपनिरूपकधर्मभूतं, तद्गतनील-त्वादीनि चनिरूपितस्वरूपविशेषणानि । यै धर्मैर्विना स्वरूपप्रतिपत्तिः न संभवति ते धर्माः स्वरूपनिरूपकधर्माः । स्वरूपप्रतिपत्ति विषयता-व्यापकविषयताकत्व स्वरूपनिरूपकधर्मत्वम् । एतैर्धर्मैः स्वरूपे निरूपिते संबद्धानि निरूपितस्वरूपविशेणानि । तत्र पूर्वोक्ताः धर्माः स्वरूप-निरूपकधर्मभूताः तैर्विना ब्रह्मप्रतिपत्यसंभवात् । सत्यं ज्ञानमनन्तं ब्रह्म आनन्दो ब्रह्म अमलं ब्रह्म इत्यादि श्रुतिभिः इमे धर्मा उक्ताः ।

अत्र श्रुतप्रकाशिका भाष्यटीका चन्द्रिकादि द्रष्टव्यम्। वादावलिः न स्थानतोपि परस्योभयलिङ्ग सर्वत्र हि इत्यादिषु हेयप्रत्यनीकत्वं अनन्तकल्याणगुणविशिष्टत्वं च ब्रह्मणः सुविशदमुक्तम् । अर्भकौक-स्त्वात् तद्व्यपदेशाच्चनेति . इत्यत्र, परमात्मन उपासकहृदये वर्तमान-त्वात् उपासकस्य जीवस्येव तत्स्थत्वमात्रेण सुखदुःखभोक्तृत्वं स्यादि-त्याशंक्य. यथा गृहस्वामिन तद्गृहप्रयुक्तसुखदुःखभोक्तृत्वेपि गृहं प्रत्यागतस्य तत्सुहृद. तद्भोक्तृत्व न संभवति, तथा शरीरस्वामिनो जीवस्यैव, नतु तदन्तर्वर्तिनिः परमात्मनोपि इति परिहृतम् । एवमपि सर्वस्य परमात्मशरीरत्वात् शरीरस्वामिप्रयुक्तमेव जीवस्येव सुखदुःख-भोक्तृत्वं भवतु इत्याशंक्य सुखदु.खहेतुभूतकर्मणामभावात् नापादयितुं

शक्यमिति भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् इति सूत्रे परिहृतम्। ननु वस्तुतो यत् वस्तु हेय तत्र संबन्धो हेयावहः खलु। कर्माधीन तत्सम्बन्ध एव दुःखजनकं न तु स्वेच्छाकारितोपि इति न वाच्यम्। राज्ञा स्वेच्छया पूयशोणितादिमज्जनेपि तस्य हेयावहत्वात्। यो रेतसि तिष्ठन् इत्यादिभिः भगवतो हेयवस्तु सबन्धोक्तेः। अतः हेयप्रत्यनीकत्वं न भगवत इत्याशंका अत्राधिकरणे परिह्रियते सर्वस्य भगवद्विभूतित्वेन हेयत्वाभावात् इति। कर्मकृतैव हेयत्वबुद्धिः सर्वत्र। एकमेव वस्तु सुखजनकं दुःखजनक च कालभेदेन देशभेदेन पुरुषभेदेन च। अतो न वस्तुनः तत्वं तात्विकम्। पुण्यपापरूपकर्मानुगुण्येन तत्र तत्र तथा तथा बुद्धिः सर्वेषां तदेव प्रीतये भूत्वा इत्यादि। भगवतश्चकर्मसबन्धाभावात् भगवन्तं प्रति वस्तूनां न हेयत्वमिति।

अन्तस्तद्धर्मोपदेशात् इत्यत्र दिव्यमङ्गलविग्रहः उक्तः। य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते इत्यादिकं हि विषयवाक्यम्। न तस्य प्राकृता मूर्तिः मांसमेदोऽस्थिसंभवा इति। अप्राकृतविलक्षणदिव्यमङ्गलविग्रहवत्तात्रोच्यते। एवं ज्योतिरधिकरणादावपि। ज्योतिश्शब्दस्तु रूढचा प्रथयति पुरुष दिव्यतेजोविशिष्टम् इति सारावलिः।

एव विभूतिद्वयमपि उक्तम्। प्रकृतिमण्डलमेका विभूतिः श्रीवैकुण्ठलोकः अपरा विभूतिः। प्रथमा लीलाविभूतिशब्देनोच्यते, द्वितीया तु भोगविभूतिशब्देन। तत्र चेतनाचेतनरूपवस्तुद्वयमपि भगवतो लोलार्थं भोगार्थमपि भवति। उभयत्रानुकूल्यसाम्येपि रसवैषम्यात् लोलाभोगविभागः यथालोकमनुसन्धेयः। तत्र लोकवत्तु लीलाकैवल्य इत्युक्तेः लीलाविभूतिरुक्ता। भोगमात्रसाम्यलिङ्गाच्च इत्यत्र भोगविभूतिश्च।

जन्माद्यस्य यतः लीला कैवल्य इत्यादिना जगत्सृष्ट्यादिव्यापारलीलावत्ता प्रतिपादिता। एवं प्राप्यस्वरूपमुक्तम्। परमतस्सेतून्मान संबन्धभेदव्यपदेशेभ्यः इत्यनेन जगत्कारणाद् ब्रह्मणोऽन्यस्य प्राप्यत्वमाशक्य सामान्यात्तु इत्यादिभिः अस्यैव प्राप्यत्वं स्थापितम्। अतः प्राप्यं ब्रह्मस्वरूपं सूत्रकारः स्वसूत्रेषु संयक् प्रतिपादयामास॥

एतादृशस्य प्राप्यस्य ब्रह्मणः प्राप्ता जीवः । स च बद्धमुक्तनित्य भेदेन त्रिविधः । तत्रानादिकर्मप्रवाहेणानुवृत्तसंसारः बद्धः । न कर्माविभागादिति चेत् नानादित्वादुपपद्यते चाप्युपलभ्यते च इति सूत्रेण कर्मणां तद्वतांचानादित्वोक्ते बद्धसंसारी सूत्रकारेण स्पष्टमेवोक्तः । तदनन्तरप्रतिपत्ति सन्ध्याधिकरणादिषु जाग्रदादिसर्वावस्थासु दोषोद्भावनेन बन्धप्रकारश्च बहुप्रकारः प्रतिपादितः । शास्त्रचोदितोपायविशेषानुष्ठानजनितभगवत्प्रसादेनात्यन्तनिवृत्तससाराः सङ्कोचरहितभगवदनुभवेन निरतिशयानन्दयुक्ता मुक्ता । संपद्याविर्भावः...मुक्तः प्रतिज्ञानात् ब्राह्मेण जैमिनिः सङ्कल्पादेव तत् श्रुतेः इत्याद्यधिकरणेषु मुक्ततत्स्वभावाः उक्ताः। पराभिध्यानात्तु. बन्धविपर्ययौ इति सूत्रयतः बद्धमुक्तौ विवक्षितौ इति च ज्ञायते ।

कदाचिदप्यस्पृष्टसंसारा ईश्वर इव ज्ञानसङ्कोचरहिताः नित्यकैंकर्यकारिण अनन्तगरुडविष्वक्सेनादयः नित्यजीवाः। सदा पश्यन्ति सूरय. इति श्रुतिप्रतिपन्ना इमे । अत्र सूत्राणि उन्नेयानि—

4. एवं जीवेश्वरविभागं जीवानां परस्परविभाग च ब्रुवन् सूत्रकारः विशिष्टाद्वैतमतमेव स्वमतं प्रकाशयामास ।

5. प्राप्त्युपायः साधनाध्याये प्रतिपन्नः । फलं च फलाध्याये इति । प्राप्तिविरोधिः अविद्याकर्मवासनादिरूप. मोक्षप्रतिबन्धकवर्गः । आज्ञातिलङ्घनरूपकर्मप्रवाह भगवन्निग्रहमुत्पाद्य मोक्ष प्रतिबध्नाति । निग्रहनिवृत्तौ च मोक्षं अनन्तर स भगवान् ददाति । ततोह्यस्य बन्धविपर्ययौ इति सूत्रकारवचनात् भगवन्निग्रहसङ्कल्परूपाभिध्यानात् स्वस्वरूपभगवत्स्वरूपतिरोधानरूपबन्धः तन्निवृत्तौ मोक्षश्च इत्युक्तं भवति ।

उत्तरपूर्वाघयोरश्लेषविनाशौ अनारब्धकार्य एव तु .इत्यादिभिः प्राप्तिविरोधिपापं संयक् सूत्रकारः प्रतिपादयामास । एवं इतिहासपुराणादिषु सुप्रसिद्ध विशिष्टाद्वैतिमतसिद्धं अर्थपञ्चक सूत्रकारो बादरायणः स्वकृतेषु न्यायनिबन्धनात्मकेषु सूत्रेषु तत्तत्स्थले निपुणं प्रदर्श

यामास इत्यब्रूमहि । जीवेश्वरभेदोपि एतावतैव स्फुट इति न तत्र पृथक् यत्न कुर्मः

6 शेषशेषिभावः – जीवपरमात्मनोः शेषशेषिभावसंबन्धोपि-कश्चिदिष्यते विशिष्टाद्वैतवादिभिः । अयं संबन्धः श्रुतिस्मृतीतिहास-पुराणादिप्रसिद्धः । पतिं विश्वस्य क्षेत्रज्ञपतिः दासभूतास्स्वतस्सर्वे-ह्यात्मानः परमात्मनः, स्वत्वमात्मनि संजात स्वामित्वं ब्रह्मणि स्थितम् इत्यादिप्रमाणानि ब्रह्मणः शेषित्वं जीवस्य शेषत्वं च वदन्ति । पर-मात्मनः चेतनाचेतनरूपवस्तुद्वयनिरूपितशेषित्वस्य सामान्यत्वात् चेतननिरूपितशेषित्व स्वामित्वरूप, चेतनगतशेषत्वं च दासत्वरूप-मित्यनुसन्धेयम् । परगतातिशयाधानेच्छयोपादेयत्वमेव यस्य स्वरूपं सः शेषः परश्शेषी इति शेषशेषिलक्षण वेदार्थसंग्रहे उक्तम् । अय च शेषशेषिभाव शरीरात्मभावबोधकसूत्रसमूहैः सिद्धप्रापः । यस्य चेत-नस्य यत् द्रव्य सर्वात्मना स्वार्थे नियन्तुं धारयितु च शक्य शेषतैक-स्वरूपं च तत् तस्य शरीरमिति शरीरलक्षणत्रये शेषतैकस्वरूपत्व-स्यापि एकलक्षणत्वात् । अपि च पत्यादिशब्देभ्यः इति सूत्रयन् बाद-रायणः परस्य पतित्वरूपं शेषित्वं अवरस्य जीवस्य शेषत्वं च व्यनक्ति स्म । आवृत्तिरसकृत् ध्यानाच्च इति ब्रह्मध्यानस्य मोक्षसाधनत्वं ब्रुवाणः सूत्रकारः उपास्यब्रह्मण उपासकजीवात् शेषित्व वदतीव । उत्कृष्टवस्तुविषयकासकृदावृत्तध्यानस्यैवोपासनरूपत्वात् ।

अत एवचानन्याधिपतिः इति सूत्रं मोक्षावस्थायामपि जीव-ब्रह्मणो शेषशेषिभाव बोधयति । तत एव भेदं च । अत्र अनधिपतिः इत्यनुक्त्वा अनन्याधिपति इति सूत्रयामास । ससारदशायां जोवस्य कर्माधिपतिकत्वमप्यासोत् । मुक्तदशाया तु निश्शेषकर्मणां क्षयात् अस्याकर्मवश्यत्वमेव नतु पूर्ववत्कर्मवश्यता, परमात्मवश्यता तु सर्वदा अस्तीति भगवद्व्यतिरिक्तनिरूपितदासत्वं न तदा इति सूत्राभिप्रायः ।

पारतन्त्र्यं परे पुंसि प्राप्य निर्गतबन्धनः स्वातन्त्र्यमतुलं प्राप्य तेनैव सह मोदते इति चोक्तम् ।

सशरीर. अशरीरश्च सन् सर्वकैकर्योक्त्या भगवतः शेषित्वं जीवस्य शेषत्व च स्फुटम् । इदं फलाध्याय सुलभगम्यम् ।

7 शेषभूतस्य मोक्षे पृथक्स्थित्या कैकर्यकरणम् । जीवपरयोः सार्वकालिको भेद इति विशिष्टाद्वैतमतसिद्धोऽर्थः । ससारदशाया भेद· मुक्तौचैक्य इति न वदन्ति इमे । सूत्रकारोपि मोक्षदशायामपि जीव-परयोः भेदमेव ब्रूते स्म । यतः मुक्तविलक्षणत्वं ब्रह्मणः बहुस्थलेषु वदति । जगत्कारणवादिवाक्यप्रतिपन्नस्य ब्रह्मणः मुक्तादन्यत्व वदतः मुक्तपरयोः भेदसिद्धिरभिप्रेता इति निश्चप्रचं हि । जगद्व्यापारवर्ज्य-मिति मुक्तात्मन जगत्कारणता निषेधन् मुक्तपरयोः भेदमभिप्रैत्येव । अतः आधिकारिकमण्डलस्थोक्तेः इति सर्वविधकैकर्यमपि भिन्न एव करोति । स्वशरीरित्वेन परमात्मान पृथग् अननुभवन्नपि । नेतरो-ऽनुपपत्तेः इत्यपि ।

8. जीवब्रह्मणो· विशिष्टवेषेणैक्यम्—ज्ञाज्ञौ द्वौ अजावीश-नीशौ इत्यादीनि जीवात्मपरमात्मनो. ईशत्वानीशत्वादिना भेदं व्यप-दिशन्ति तत्त्वमसीत्यादीनि तयोरभेदम् । तत्र तयोरत्यन्तभेदस्वीकारे अभेदश्रुतीनां, स्वरूपैक्याङ्गीकारे भेदश्रुतीनां च अमुख्यत्वप्रसङ्गः । अभेदश्रुतीना भेदोपचारेण स्तुतिपरतया निर्वाहो प्यनुपपन्नः । निकृष्टैः दाशादिभिस्सममप्यभेदोक्तेः स्तुतिरूपत्वासंभवात् । राजपुरो ..अतः उभयविधव्यवहारमुख्यत्वोपपत्तये जीवब्रह्मणोः विशिष्टवेषणैवैक्यमुप-पादनीयम्। वस्तुतो भिन्नयोरपि विशिष्टवेषेणैक्यमन्यत्राभ्युपगत च । इद अपृथक्सिद्धविशेषणत्वपर्यवसित विशिष्टवस्त्वेकदेशत्वं अपृथक् सिद्धविशेषणभूतगोत्वादिवाचिना शब्दानां गवादिव्यक्तिपर्यन्तवाचित्ववत् परमात्मापृथक्सिद्धविशेषणभूतजीवात्मवाचिनां त्वमादिशब्दानां विशे-ष्यभूतपरमात्मपर्यन्तवाचकताया. आकृत्यधिकरणन्यायसिद्धत्वात् उप-पद्यते । अतः तत्वमसीत्याद्यभेदश्रुतीनां च मुख्यत्वेन निर्वाहः सूपपादः।

असत्वावस्थापन्न ब्रह्म जीवः उपाध्युपहितं ब्रह्मजीव इति पक्षद्वयं तु सूत्रकारेणैव निरस्तम् । उभयव्यपदेशादहिकुण्डलवत् प्रकाशाश्रय-वत्तातेजस्त्वात्, पूर्ववद्वा इत्यादि सूत्रसिद्धाः इमे अंशाः ।

इदं च पक्षद्वय श्रीभाष्यादिषु बहुधा बहुस्थलेषु दूषितमिति नेह प्रपञ्च्यते—व्यामैक स्यात् मायोदन्वत्यपारे-सन्मात्रं ब्रह्म—

9. ब्रह्मण· सगुणत्वं—विशिष्टाद्वैतिनः ब्रह्म सगुणं इति स्वीकुर्वन्ति । मनोमयः यस्सर्वज्ञः सत्यकामः इत्यादीनि गुणबोधकानि श्रुतिवाक्यानि ब्रह्मणः गुणवत्वं बोधयन्ति । यद्यपि निर्गुण निष्क्रियं इत्यादीनि गुणनिषेधकान्यपि वाक्यानि सन्ति । अथापि उभयोरपि श्रुतिवाक्यत्वाविशेषात् उभयोरपि प्रमाण्यमेष्टव्य, नत्वन्यतरबाधेनान्यतरप्रामाण्यम् । अतः अपहतपाप्मा विजरः, इत्यादि हेयगुणनिषेधकवाक्यश्रवणेन गुणनिषेधबोधकानां वाक्यानां हेयगुणनिषेधपरत्व तात्पर्यकत्व निश्चीयते इत्यविरोध ।

दूरे गुणास्तव तु सत्वरजस्तमासि तेन त्रयी प्रथयति त्वयि निर्गुणत्वं इत्यपि कश्चन निर्वाहप्रकार· इत्यलम् । मोक्षरूपपुरुषार्थसाधनभक्तियोगविचारपरसाधनाध्याये तृतीयपादे गुणोपसंहारबोधनात् सगुणब्रह्मोपासनस्यैव मोक्षजनकत्व सूत्रमतमिति ज्ञायते । अन्यथा सूत्रै· गुणोपसहारबोधनस्यायुक्तत्वात् । नहि निर्गुणब्रह्मोपासनस्य कुत्र चित् सूत्रे मोक्षकारणत्व प्रतिपादितमस्ति ।

तल्लिङ्गात् तद्धर्मोपदेशात् विवक्षितगुणोपपत्तेश्च "अदृश्यत्वादि गुणक: इत्यादीनि सूत्राणि हि स्पष्टमेव ब्रह्मणः गुणवत्ता बोधयन्ति । ब्राह्मेण जैमिनिः, एवमप्युपन्यासात् इत्यादिभिश्च ब्रह्मणः सगुणत्व स्फुटप्रतिपन्न च । उभयलिङ्ग सर्वत्र हि इतीदमपि कण्ठ गड्ड निर्गुणत्व वादिनाम् । जन्माद्यस्य यत इत्यादिना यत् ब्रह्मलक्षणमुक्तं तेनैव गुणवत्ता ब्रह्मणः सिद्धयतीत्येव रूपाणि बहूनि सूत्राणि निर्गुणत्वप्रतिक्षेपपराणि ।

नैर्गुण्य निर्गुणोक्तेः गुणवचनमिहाविद्यधर्मार्थवादः
नैर्दोष्यं वस्तुवृत्त्या तदितरदखिलं स्वाप्नभोगादितुल्यम् ।
इत्थं जीवेशभूमापहरणकुहनावादमोमुह्यमानान्
क्षेप्तु न स्थानतोपीत्यधिकरणमथारभ्यतेऽनेकशृगम् ।।

इति सारावल्या निर्गुणवादखण्डनं सगुणवचनस्य विद्याकल्पितधर्मवत्व-बोधनासंभवं च स्पष्टीकृत्य न स्थानतोपीत्याद्यधिकरण परमते अपङ्गत इति स्पष्टमभ्यधायि । अपि चास्मिन् शास्त्रं, अथातो ब्रह्म-जिज्ञासा, इत्यारभ्य, अनावृत्तिः शब्दात् इति आसमाप्ति निर्गुणो-पासनं वा तत्फलमपि वा नैव सूत्रकारेणोक्त न च प्रकल्प्यमुच्छास्त्रं च तृतीयाध्यायतृतीयपादस्य गुणनियमनेन ख्यातिमत्वाच्चासङ्गतत्वमद्वै-तिनां इत्याद्यर्थः सयगेव निरणायि ।

तत्तद्भोगप्रतीतेः गुणघटितपरोपासना भोगहेतुः

मुक्तिश्च स्यात् क्रमादित्यसत् अगुणवचनस्यान्यपर्याभिधानात् ।

शास्त्रेऽस्मिन् आसमाप्तेः क्व फलमभिहितं निर्गुणोपास्तिसाध्य

नोच्छास्त्र च प्रकल्प्य गुणनियमनतः ख्यातिमांश्चैष पादः ।।

आदरादलोप प्रकृतैतावत्व हि प्रतिषेधति ततो ब्रवीति च भूयः इत्यादिषु सूत्रेषु स्पष्टं गुणभूयस्त्वबोधकेषु जागरूकेषु सत्स्वपि पर-गुणासहिष्णवः असूयावन्तश्चाद्वैतिनः ब्रह्मणो निर्गुणत्वं ब्रुवन्तः तदुक्ता-विद्ययैव आच्छादिताः मूढाः आसन् । अहो ।

10· कर्मातिरिक्ताविद्या नाभ्युपगम्यते । न कर्माविभागादिति-चेन्न अनादित्वादुपपद्यते चाप्युपलभ्यते च । वैषम्यनैर्घृण्ये न सापे-क्षत्वात् तथा हि दर्शयति, अविद्यातिरिक्त कर्मण एवानादित्वमभ्युपगतं तेनैव वैषम्यनैर्घृण्यपरिहारश्च कृतः। अकृताभ्यागमकृतविप्रणाशादिभयेन अनादिजीवानां अनादिकर्मप्रवाहस्याभ्युपगमश्च प्रतिपादितः ।

विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथा परा ।
अविद्या कर्मसंज्ञाऽन्या तृतीया शक्तिरिष्यते ।
यथा क्षेत्रज्ञशक्तिस्सा वेष्टिता नृप सर्वगा ।
संसारतापानखिलान् अवाप्नोत्यतिसततान् ।
तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसज्ञिता ।
सर्वभूतेषु भूपाल तारतम्येन वर्तते ।।

इत्यादि पुराणवचनमप्यत्र प्रमाणम् ।

अतः विशिष्टाद्वैतमतसिद्धब्रह्मार्थप्रतिप्रादन सूत्रेषु दृश्यते इति सूत्रं सर्वमपि तन्मतानुगुणं, तत्कर्ता तन्मतानुयायी इति सुदृढं वक्तुं प्रगल्भेम ।

अतः उपनिषदमृताब्धिमथनजनितं सारभूतमर्थं पाराशर्यप्रतिपादितं विशिष्टाद्वैतिमतसिद्धं यतिराजः श्रीभाष्यकारः स्वकीये श्रीभाष्ये अन्यूनानतिरिक्त प्राचीकशत् । तदुक्तं—पाराशर्यः प्रभूतादुपनिषदमृतोदन्वत. इत्यादि ।

11. अभिन्नोपादानत्वमपि सूत्रकारसमत, प्रकृतिश्च परिणामात्, आत्मकृतेः इत्यादिसूत्रमत्र विषये स्पष्टम् । तथा हि—अभिन्ननिमित्तोपादानत्वं विशिष्टाद्वैतवादिनां सिद्धान्तः । एकमेव ब्रह्म जगत्प्रति निमित्तमुपादान च । अत्र ऊर्णनाभिः दृष्टान्तः । यथोर्णनाभि सृजते गृह्णते च इति श्रुतिरप्यत्र प्रमाणम् । यथा ऊर्णनाभि स्वनाभिगतोर्णायाः तन्तुमुत्पादयति यया च सः उपादान तथैव परमात्मापि स्वशरीरभूतप्रकृत्यादेरेव महदादि जगदुत्पादयति । अतः स उपादानम् ।

ननु ऊर्णनाभेः कथमुपादानत्वं स्वनाभिगतोर्णया हि तन्तुं सृजति। ऊर्णा हि तन्तुरूपेण परिणमते। अतः ऊर्णायाः उपादानत्वं स्यात्। नहि ऊर्णाशब्देन वा तन्तुशब्देन वा ऊर्णनाभिरुच्यते। किंचैतत् दृष्टान्तस्वारस्यात् स्वदेहभूतप्रकृतेः जगदुत्पादकत्वं ब्रह्मण सिध्येदिति प्रकृतेरेवोपादनत्वसिद्धि । अत ऊर्णनाभिरिव ब्रह्म निमित्तमात्रं स्यादिति चेत्? अत्र केचित्—प्रकृतेः ब्रह्मणश्च शरीरात्मभावसाधने एवाय दृष्टान्तः। न तु उपादानत्वेपि इति वदन्ति । वस्तुत —ऊर्णनाभिदृष्टान्तस्वारस्यात् जगद्ब्रह्मणो शरीरात्मभावसिद्धौ शरीरवाचकानां शरीरिवाचकत्वावश्यंभावेन सर्वशब्दानां ब्रह्मवाचकत्वात् ब्रह्मणः उपादानत्वादिस्वतः सिध्यति । अतः सृष्टयादिप्रकरणे कारणवाचकाः प्रकृत्यादिशब्दाः ब्रह्मपराः । दृष्टान्ते ऊर्णाशब्द तन्तुशब्दश्च न ऊर्णनाभिवाचक तयोः निष्कर्षकशब्दत्वात् । शरीरशब्दोपि हि निष्कर्षकशब्दः।

अतो नैव शरीरिणं वदति । ऊर्णनाभि दृष्टान्तस्वारस्यात् परस्या-चेतनशरीरकत्व, पृथिवीदृष्टान्तस्वारस्यात् ब्रह्मणः उपादानत्वं च साक्षात सिध्यति । पृथिव्या एवौषधिरूपेण परिणामात् इति ज्ञेयम् ।

एवमभिन्ननिमित्तोपादानत्वे सौभरिदृष्टान्तोपि ज्ञेयः । तत्र हि स्वेनोढानां राजकन्यकानामेकदैव भोगोत्पादार्थी अहं बहुः स्यामिति सङ्कल्प्य नानाशरीरभाक् अभवत् । अह बहु स्यामित्युक्तं बहुत्वं हि न शरीरमात्रे देहविशिष्टात्मनि । अहं बहु शरीरको भवामीति हि शब्द स्वरससिद्धोऽर्थः । एकशरीरकत्वप्रहाणेन बहुशरीरकत्वं हि अत्र बोध्यते । बाल्यविशिष्टशरीरविशिष्टात्मनो यथा यौवनविशिष्टशरीर विशिष्टात्मान प्रति कारणत्वम् ।

अत्र तर्किकाः–एक कार्यं प्रति समवाय्यसमवायिनिमित्तभेदेन कारणत्रितयं वाच्यम् । अवयवोनि किञ्चिदतिरिक्तं द्रव्यमस्ति । अवयवेषु तत् जायते । एवं रूपादिगुणा. क्रियाश्च जायन्ते । अतः स्वगतद्रव्यरूपादिगुणकर्माणि प्रति द्रव्य समवायिकारणम् । घटं प्रति कपालादि समवायि । घटगतरूपं प्रति घटः समवायिकारणम् । घटे पाकवशात् पूर्वरूपध्वसः रूपान्तरं चोत्पद्यते । तदा घटे रूपध्वंसरूप-कार्यमपि जायते । तत्र रूपध्वंसंप्रति न घट समवायिकारणम् । जायमानस्य रूपध्वंसरूपकर्यस्य घटे समवायसबन्धानङ्गीकारात् । अत एव हि समवायिकारणमिति व्यवहारः । यत्समवेत कार्य उत्पद्यते तत्समवायिकारणमित्यपि लक्षणमुच्यते । अवयवद्वयसंयोग विना कार्य-द्रव्योत्पत्तेरभावात् स एव सयोगः असमवायिकारणमित्युच्यते । यथा घटं प्रति कपालद्वयसंयोगः । एतदुभयभिन्नं कारणं निमित्तकारणम् । घटे प्रति बहूनि निमित्तकारणानि सन्ति । दण्ड चक्र कुलाल अदृष्ट ईश्वरादिः । प्रायशः कर्तर्येव निमित्तत्वव्यपदेशः । इति वेदान्ति-नस्तु असमवायिकारणं नेच्छन्ति । अवयविन अतिरिक्तस्य द्रव्यस्या-नङ्गीकारात् । कपालद्वयसंयोगापेक्षयान्यस्य कार्यस्याभावात् । यत् समवायीत्युच्यते तदेवोपादानकारणम् । कारणस्यैव वस्तुनः कार्यरूपेण परिणामात् । उपदानकारणात् भिन्न कारणं निमित्तकारणम् । अयं

भावः—घटगतरूपं प्रति घटस्येव दण्डगतरूप प्रति दण्डस्य समवायि कारणत्वं वाच्यम् । इत्थ च दण्डस्य समवायिकारणत्वात् कथ प्रति तस्य निमित्तत्वम् । समवायिकारणभिन्नस्यैव निमित्तत्वोक्तेः । न च दण्डस्य स्वगतरूपं प्रति समवायित्वेपि न घट प्रति समवायिकारणत्वम् । अतः कार्यभेदान्नैष दोषः इति वाच्यम्। एवमपि पटं प्रति तुरी तन्तुसयोगस्य निमित्तत्वमभ्युपगच्छतः तस्य मते कथं निमित्तत्वोपपादनम् । तन्तुद्वयसंयोगस्य तैः असमवायिकारणत्वाभ्युपगमात् । तुरीतन्तुसयोगस्य तद्भिन्नत्वाभावात् । अतस्तन्मतरीत्यैव एकस्यैव निमित्तत्वं उपादानत्वं च भवति । यदि च तुरीतन्तुसयोगस्य तन्तुद्वयसयोगस्य च परस्परवैलक्षण्यमङ्गीकृत्य निमित्तत्व तस्योपपाद्यते तदापि—स्वज्ञान प्रति जीवस्य उपादानत्वं निमित्तत्वं चेति पूर्वोक्तदोषापरिहार एव । जीवो हि स्वस्मिन् शास्त्रादिना ज्ञानोत्पादक. इति निमित्तम् । स्वस्मिन् समवायसंबन्धेन ज्ञानोत्पादात् समवायाच्च । एव घटेश्वरसयोगे ईश्वरस्योपादानत्व निमित्तत्वं च । अत एकस्यैव उभयविधकरणत्वं संभवति । नचैकस्योभयविधकारणत्वेपि आकारभेदसत्वान्न दोष । समवायिकारणता अन्या निमित्तकारणताचान्या । उपाधेय सांकर्येपि उपाधेरसङ्करवत् उपपादनसंभवः इति वाच्यम् । अत्रापि निमित्तत्वोपादानत्वरूपाकारभेदसत्वेन दोषाभावात्।

ननु घटः स्वगतरूपं प्रति चोपादानकारणम् । अत्र घटोऽन्यः रूपसङ्गादिश्चान्यः । अत कार्यकारणयोरभेदाभावात् कथं घटस्य उपादानत्वम् । तार्किकमते तु समवायिकारणत्व सूपपादं । वेदान्तिमते उपादानोपादेययोः अभेदाङ्गीकारादत्र च तदभावात् इति चेत् घटे रूपं जायते इत्यस्य घटो रूपो(रूपवान्)भवतीत्यर्थः । एवं रूपसंयोगः इत्यस्य च घटो रूपसयुक्तः इत्यर्थः । इत्थं च घटरूपिणोः घट घटसंयुक्तयोश्चाभेदान् न हानिः ।

अपि च उपादानत्व प्रकारद्वयेनोपपाद्यते । यत्र कार्यकारणयोरैक्य यत्र च कार्यकारणयो अपृथक्सिद्धिः तत्रोभयत्र कारणत्वावश्यक

तया तदनुसारेण परिष्कारात्। तादात्म्य अपृथक्सिद्धि अन्यतर-संबन्धावच्छिन्नकार्यतानिरूपित तादात्म्यसंबन्धावच्छिन्नकारणतावत्व-मुपादानत्वमिति। न चैव सति मृदः घट प्रतीव घटत्वावस्था प्रत्यपि उपादानत्वापत्तिः। मृत्पिण्ड घटत्वावस्थयोः अपृथक्सिद्धिसत्वादिति वाच्यम्। इष्टापत्तेः। मनुष्यशरीरं प्रत्यपि जीवात्मनः उपादानत्वं स्वीक्रियते जीवं प्रत्यपि ईश्वरस्योपादानत्वमिष्यते। अपृथक्सिद्धेस्स-त्वात्। न चैवं सति विशिष्टस्योपादानत्वं विशिष्टस्योपादेयत्वं इति निर्बन्धोऽनावश्यकः। एवं शरीरवाचकशब्दानां शरीरिपर्यन्तत्वमित्यपि निर्बन्धः निर्निबन्धनः। जगत् ब्रह्मणोः अपृथक्सिद्धिसत्वेन तेनैव ब्रह्मणः उपादानत्वोपपादनसंभवात्। एतस्माज्जायते प्राणः आकाशात् वायुः इत्यादौ यथा श्रुतरोत्यैव निर्वाह सभवादिति वाच्यम्। वैयधि करण्येन सामानाधिकरण्येन च कार्यकारणभूतजगद्ब्रह्मणोः निर्देश-सत्वात्। तदनुसारेण उपादानत्वे प्रकारद्वयाश्रयणात्। यत्र कार्य-कारणयोः अभेदनिर्देशः तत्र विशिष्टयोः कार्यकारणत्व शरीरवाच-कानां शरीरिपर्यन्तत्व च। यत्र तु वैयधिकरण्येन तत्रापृथक्सिद्धि-सबन्धमादायेति न दोषः। किंच यत्र कार्यवस्तुनः कारणवस्तुनश्च तादात्म्यं तत्रोपादानत्व उपादेयत्वं च सुलभसाध्यम्। विशिष्टमादायैव कार्यत्वकरणत्वयोरुपपादनात्। शरीरात्मभावः स्वतः सिद्ध एव। तस्य शरीरलक्षणत्वात्। अपृथक्सिद्धवस्तुनो हि शरीरत्वं स्वतस्सिद्धम्। शरीरवाचकशब्दानां शरीरिपर्यन्तत्व च बालो युवा जातः इत्यादौ च स्फुटम्। अतो विशिष्टं उपादानं विशिष्टमुपादेयं इति सर्वत्र सिद्ध-मेवेति। रूपस्य घटापृथक्सिद्धत्वेपि द्रव्यत्वाभावात् न शरीरत्वमिति विवेकः।

50. सर्वमतसिद्धान्तसंग्रह।

अथात्र शारीरकशास्त्रे विचारार्थं प्रवृत्ता ये ये विशिष्टाद्वैति अद्वैति द्वैति यादवभास्करादिमताचार्याः यंयमर्थं न्यरूपयन् तत्तदाचार्य-दर्शितं तमर्थं सुखग्रहणाय संग्रहेण प्रवक्ष्ये।

1. अथातो ब्रह्मजिज्ञासा इत्यारभ्य अनावृत्तिः शब्दात् अनावृत्तिः शब्दात् इत्यन्तं ब्रह्ममीमांसा शास्त्रं चतुरध्ययात्मकं पृथक्शास्त्रमिति श्रीशङ्करभगवत्पादादिमतानुयायिनः ।

अथातो धर्मजिज्ञासेत्यारभ्य अनावृत्तिः इति सूत्र पर्यन्तं विंशत्यध्यायात्मकं एकमेव शास्त्रमिति श्रीभवद्रामानुजमतानुयायिनः वदन्ति ।

तत्र भास्कराचार्याः यादवप्रकाशाश्च ज्ञानकर्मसमुच्चयवादिनः भगवद्रामानुजादयः शङ्करभगवत्पादाश्च ज्ञानकर्मसमुच्चय खण्डयन्ति। रामानुजादय समसमुच्चयं निषेधन्ति । कर्मणामङ्गभावं ज्ञानस्याङ्गि भावं च वदन्ति ।

यादवप्रकाशमतानुयायिनस्तु साध्यद्वित्व साधनद्वित्वं चाभ्युपेत्य तत्र कर्मणः प्राप्तिविरोधिकर्मनाशकत्वं ज्ञानस्य ब्रह्मप्राप्तिसाधकत्वमिति वदन्तः समसमुच्चयवादिनः । साध्यद्वित्वे साधनद्वित्वे च विद्या चाविद्या च यस्तद्वेदोभयं सदा । अविद्यया मृत्यु तीर्त्वा विद्ययाऽमृतमश्नुते इति श्रुति च प्रमाणयन्ति । अतस्ते उभयप्राधान्य मन्वते। कुमारिलपादा अपि ज्ञानकर्मसमुच्चयवादिन एव । कुमारिलपादाना, उपनिषदामर्थवादत्वोक्तिः प्रौढिवादमात्र कर्मप्रवणतानिबन्धनं वा । भास्करमते कुमारिलमते च ब्रह्मज्ञान उपासनारूप श्रीरामानुजमत इव । नहि तयोः परस्परविरोधो दरीदृश्यते । अतस्तत्समुच्चयः नासभवदुक्तिकः । उपास्य ब्रह्म कल्पितं वा पारमार्थिक वेत्यन्यदेतत् । सर्वथा ज्ञानकर्म समुच्चयो न विरुद्ध इति तन्मतप्रक्रिया । विज्ञानभिक्षुरपि ज्ञानकर्मसमुच्चयमेवाभिप्रैति । अतोऽयं समुच्चयः पूर्वोत्तरमीमांसयोरैकशास्त्र्ये एव सभवतीति विंशत्यध्यायात्मकं ब्रह्ममीमांसा शास्त्रमेकमिति तदीयो निर्णयः ।

कर्मणामङ्गभावेन समुच्चयपक्षोपि एकशास्त्रत्वाभावे असंभवदुक्तिकः एव इति नैतदर्थ श्रुतिसूत्रविरुद्ध समप्राधान्यं वक्तव्यमिति श्रीभगवद्रामानुजादीनां सिद्धान्तः । अपि च ज्ञानकर्मणोः विरोधो नेति-सत्यमेव । अथापि न समप्राधान्य तयोः वक्तु शक्यते । यथा ज्ञानस्य

मोक्षे उपयोगः न तथा कर्मणां मोक्ष एवोपयोगः । कर्मणां मृत्युतरणे ज्ञानस्यामृतप्राप्तौचोपयोगं श्रुतयो वदन्ति-विद्यांचाविद्यां...अमृत मश्नुत इति । अतो ब्रह्मोपासनमात्रस्य शास्त्रैः मुक्तिसाधनत्वप्रतिपादनात् न कर्मणः प्राधान्यम् । कर्म तु चित्तशुद्धिद्वारा ब्रह्मज्ञानोपकारमात्रं जनयति । कर्मण उपकारकत्व चानुष्ठानद्वारेति तदनुष्ठानं च कर्मविचारं विना न संभवतीति च मीमासाशास्त्र कृत्स्नमेकमेवेति अभिप्रयन्ति भास्करादिवत् भगवद्रामानुजादयः । अपि च—अविद्यानिवृत्तिरूपबन्ध निवृत्तेरेव मोक्षरूपत्वात् साध्यद्वित्वमेव नास्ति । अतस्साधनद्वित्वस्य नैवापेक्षा । ज्ञानसंकोचकरकर्मरूपबन्धनिवृत्तौ धीविकासस्य स्वतस्सिद्धत्वात् । यथा न क्रियते ज्योत्स्ना स ज्ञानमात्मनः क्रियते तथा इति प्रमाणात् । भावान्तराभाववादित्वाच्च न पृथग्भूतं धीविकासरूपं भगवदनुभवात्मकं फलमिति ।

ननु वैराग्यादिवत् कर्मणामपि ज्ञानमात्रसाधनत्वे साधनाध्याय एव पूर्वमीमासायाः समावेशापत्तिः इति चेदिष्टमेवैतत् । तदुक्तं श्रुतप्रकाशिकाया—जैमिनीयपूर्वमीमांसायाः प्रतिपत्तिलक्षणसौकर्यक्रमात्तु पूर्वं निवेशः अर्थक्रमात्तु तृतीयाध्यायचतुर्थपादेनैव सगतिरिति ।

भास्कराचार्यमते भगवद्रामानुजाचार्यमते च मोक्षकारणं ब्रह्मज्ञानमुपासनरूपं साक्षात्कारसमानजातीयम् । अत एव द्रष्टव्यः इत्यादौ द्रष्टव्यपद निदिध्यासितव्य इति पदार्थनिष्कर्षपरम् । नतु ध्यानातिरिक्तार्थान्तरपरम् इति ।

शङ्करभगवत्पादास्तु मोक्षज्ञानं ब्रह्मज्ञानं अविधेयमेव पुरुषपरतन्त्रमुपासनरूप न भवति प्रमाणपरतन्त्र साक्षात्काररूपम्। तत्र कर्मणां न सहभावः नोपकारकत्वमपीति समुच्चयवादं निषेधन्ति । मोक्षाधिकारिणां चित्तशुद्धिमात्रं कर्मोत्पादयति । तावतैव तेषां चारितार्थ्यम् । जन्मान्तरीयानुष्ठानेपि चित्तशुद्धि कर्म जनयति । अतः कर्मविचारात् पूर्वमपि अधीतवेदान्तः ब्रह्मविचारं कुर्यात् । अत एव देवतानां स्वयं प्रतिभातवेदान्तानां कर्मानाधिकरिणामपि ब्रह्मविद्यायमधिकारः संभवति।

अपि च ब्रह्मचर्यादेव सन्न्यस्तानां ब्रह्मविद्याप्रवृत्तिश्च सप्रयोजना भवति। आत्मा वा अरे द्रष्टव्यः इति द्रष्टव्यपद—फलपर सत् निदिध्यासनस्य श्रवणस्य वा विधेयस्योद्देश्यमेवोपक्षिपति। न तु केवलानुवादरूपमिति अभिप्रयन्ति।

शुद्धाद्वैतमतानुयायिन वल्लभाचार्याः द्वैतमतप्रवर्तनमध्वाचार्याश्च शास्त्रभेदमेवाङ्गीकुर्वन्ति। तत्र प्रथममते कर्मज्ञानभक्तीना सर्वेषां साधनानां पुरुषोत्तमज्ञानोत्पत्तावपेक्षास्त्येव। अथापि भक्तिप्राधान्यस्यैव विवक्षितत्वात् न कर्ममात्रस्य ज्ञानेन सह विशिष्टः कश्चन सबन्धो वर्तते इति वदन्ति। द्वितीयमते तु कर्मणः ज्ञानोपकारकत्व सत्यमस्त्येव तथापि शास्त्रैक्य नावश्यकमिति वदन्ति। अतः सर्वथा वेदान्तशास्त्र पृथगेवेति वदन्ति।

अनुबन्धचतुष्टयमिति शास्त्रेषु किञ्चिदुच्यते। तच्च विषय संबन्धः प्रयोजनं, अधिकारीति विषयादि चतुष्कमेव। अत्र ब्रह्मविचारो विषयः निर्णयात्मकं ब्रह्मज्ञानं प्रयोजनम्। प्रतिपाद्यप्रतिपादकभावः सबन्धः। अधिकारी अर्थज्ञानकामः। सर्वत्राधिकारिविशेष सामान्यत एव तत्तदर्थज्ञानकामः इति सिध्यति। इयमेव नीतिः न्यायवैशेषिक सांख्ययोगसूत्रादिषु सर्वत्र समाना इति केचिद्वदन्ति।

भगवद्रामानुजमते विषयादित्रिकस्य ब्रह्मजिज्ञासा इति सूत्रारूढत्ववत् अधिकारिविशेषोपि सूत्रारूढ एव वक्तव्यः। सच अथ शब्दलभ्यः। नहि ब्रह्मज्ञानकामस्सर्वोऽप्यधिकारीति वक्तु शक्यते। नहि ससर्वोपि ब्रह्ममीमांसायामधिकरोति। नहि सर्वोपि विचार्य ब्रह्म जानाति। अतस्सूत्रकृतैवाधिकारिबिशेषः नियमयितव्यः। तत्र सूत्रकारसूत्रस्वारस्यमवलम्ब्यास्माभिः निश्चेतव्यः। सूत्रकारो हि अथ शब्द प्रयुञ्जानः अधिकारिविशेषं सयगेव ब्रवीति,अतश्शब्दशिरस्कं अथ शब्द प्रयुञ्जानस्य सूत्रकृतः, कृतकर्मविचारः पुरुष एवैतच्छास्त्राधिकारीति अभिप्रायः स्पष्टमवगम्यते खलु। नहि निष्प्रयोजनमथशब्दं सूत्रकारः प्रयुङ्क्ते। अतः सूत्रगतमथपदं यथा स्वर संभवेत्तथाऽत्रार्थो वक्तव्यः

इति पूर्वतन्त्रापेक्षमुत्तरं तन्त्रमिति पूर्वोत्तरमीमांसयोरैकशास्त्र्यमवश्यमेष्टव्यम् । केषांचित् कर्मविचाराकरणेपि आचार्योपदेशेन कर्मनिर्णयमुपजीव्य ब्रह्मविचारे प्रवृत्तिः । ब्रह्मचर्यादेव सन्यासाभिलाषिणामपि सन्यासाश्रमोचितकर्मणां विद्यांगत्वात् तज्ज्ञानमन्तरा ब्रह्मविद्याप्रवृत्तिः नोपपद्यते । तेषामपि गुर्वादिमुखेन अपेक्षितकर्माणां ज्ञानसंभवः इति ब्रह्मचर्यादेव सन्यासः ब्रह्मविद्या ब्रह्मप्रवृत्तिश्चोपपद्यत एवेति ।

अत्र अधिकारिविशेषनिश्चयं सूत्रकारः स्वयमेव कथयतीति युक्तमेव। अथशब्दस्यानन्तर्यार्थकत्वमपि युक्तम् । अथापि कर्मविचारानन्तर्यमेवाथशब्दः कथयतीति न युक्तम् । श्रोतव्यादिवाक्यशेषे तदादौ वा कर्मविचारस्य कृत्राप्यनिर्दिष्टत्वात् साधनचतुष्टयानन्तर्यार्थकत्वं तु समीचीनं सूत्रारूढ च । शमदमाद्युपेतः स्यात् इत्यादि सूत्रेषु इदमेव हि संयक्प्रदर्शितम् । अतः ब्रह्मविचारविधीनां संग्रहरूपे सूत्रे तद्विध्यवगतान्येव साधनानि अथ शब्दार्थानन्तर्यप्रतियोगितया विवक्षितानीति स्फुटं विज्ञायते । एवं चाधिकारिविशेषे अवश्यं नियमयितव्ये पूर्वतन्त्रापेक्षामेवोत्तरतन्त्रमपेक्षते इति दुर्वचमिति शङ्करभगवत्पादानुयायिनः । मीमांसाश्रवणानन्तरमेव साधनचतुष्टयप्राप्तेः । अधीतक्रमेण विचारस्य कार्यत्वात् आचार्योपदेशेन कर्मनिर्णयसंभवात्, अर्थस्वाभाव्याच्च कर्ममीमासाया एव पूर्वभावित्वमावश्यकमिति रामानुजमतम् ।

अत्र जिज्ञास्यं ब्रह्म जगत्कारणतयोत्तरसूत्रे लक्ष्यते । ब्रह्मस्वरूप केवलनिमित्तकारणमिति श्रीमदानन्दतीर्थादयः । जगन्निमित्तोपादानमिति द्वैताद्वैत विशिष्टाद्वैत शुद्धाद्वैत केवलाद्वैतवादिनः । एकमेव ब्रह्मोपादानतया निमित्ततया च विवक्ष्यते अभिन्ननिमित्तोपादानत्वावादिमते । निमित्तकारणब्रह्मातिरिक्तमुपादानान्तर उपादानाकारणातिरिक्त निमित्तकारण वा नास्तीति एतन्मतनिष्कर्षः ।

अन्तः करणस्य तत्परिणामात्मकवृत्ति प्रति उपादानत्वस्य निमित्तत्वस्य च सांख्यै स्वीकारात् एकमेवोपादानं निमित्तकारणं च भवितुमर्हति । [१९९ पुटे अन्ते योजिता पंचपंक्तय·]

शुद्धाद्वैतयो. शुद्ध ब्रह्मैव परिणमते निमित्त च। विशिष्टाद्वैतमते तु शुद्धब्रह्मपरिणामे विकार्यतापत्तिः अतः प्रकृति शरीरकब्रह्मणः कारणत्वमुपादानस्वरूपम्। केवलाद्वैतिमतेतु प्रकृतिः परिणाविकारणं ब्रह्मा विवर्तोपादान प्रकृतिः निमित्तकारणमात्रं ब्रह्म तु विवर्तोपादनं निमित्तकारणं चेति वदन्ति।

विक्षेपशक्तिमात्रं प्रकृतेरिति विशिष्टाद्वैतिमतम्। ब्रह्मण एव विक्षेपशक्तिरपीति द्वैताद्वैत-शुद्धाद्वैतमतम्। प्रकृतेः विक्षेपशक्तिः आवरणशक्तिरिति शक्तिद्वयं आवरणशक्तिमात्रं वा। ब्रह्मणस्तु सद् रूपेणावृतस्य भानमात्रमिति तु केवलाद्वैतमतम्। तत्र प्रकृतिविषये धर्मिणि न कस्यापि दर्शनस्य विप्रतिपत्तिः। तस्याः आवरणशाक्तिमात्र विप्रतिपन्नम्।

51. द्वैत, विशिष्टाद्वैतमतयोः विषयवैलक्षण्यप्रदर्शनम्।

विशिष्टाद्वैतिनां द्वैतिनां जीवपरमात्मनोः विषये अत्यन्तभेदवादित्वे समानेपि अर्थविशेषेषु वैलक्षण्यं विद्यते—तद्यथा—

द्वैतमते

1. अण्डात् बहिर्भूतं नित्यविभूतिस्वरूपं नाङ्गीक्रियते।

2. सत्वरजस्तमांसि द्रव्य सांख्यमत इव। अवस्थायोगित्वात्।

3. आनन्दतारतम्य, यतः जीवस्वरूपमेव तरतमभावापन्न तदेवानन्दशब्दाभिधेयम्। आनन्दे तारतम्यम्। तस्मात् आमनुष्य आचतुर्मुखं आनन्दतारतम्योपपत्तिः।

4. नित्यं धर्मभूतज्ञानं न स्वीक्रियते। तत्र प्रमाणाभावात्। आत्मस्वरूपेणैव साक्षात्कारः। ज्ञातृत्वस्यापि स्वरूपत एवोपपत्तिः॥

5. ब्रह्मणो निर्विकारत्वात् न जगदुपादानत्वं निमित्तत्वमात्रमेव।

6. द्रव्याद्रव्यविभागो नाभ्युपगम्यते नीलो घट इति तयोरभेदप्रतीतेः।

7. मुक्तौ अपि आनन्दतारतम्यस्वीकार.।

8. इतिहासपुराणवचनान्यपि ब्रह्मसूत्रविचारविषयाः ।

9. अखण्डकालस्यानभ्युगमः । क्षणलवाहोरात्रादि सूक्ष्मखण्ड-कालस्यैवानुभवविषयत्वात् ।

10. वर्णात्मकशब्द द्रव्यत्वस्वीकारः । सर्वगतत्वात् नित्यत्वात् ब्रह्मशरीरत्वाच्च । एवं अव्याकृताकाशतमसोरपि द्रव्यत्वमेव ।

11. जीवः प्रतिबिम्बरूपः, रूपं रूप प्रतिरूपो बभूव इति वचनात्।

12. उपादेयं उपादानात् अतिरिक्त, प्रत्यक्षादिप्रमाणबलात्तथै-वाङ्गीकार्यम् । अतः उपादानोपादेययो. नानन्यत्वम् ।

13. ब्रह्मगुणाना ब्रह्मणश्च नैव भेदः । सर्वं खल्विदं ब्रह्म इति सर्वगुणात्मकत्वस्य ब्रह्मणि प्रतीते. ।

14. जीवानां सावयवत्वस्वीकारः ।

15. वैलक्षण्यरूपभेदनियामको विशेषः अतिरिक्तः पदार्थः नैया-यिकवत् स्वीक्रियते ।

16. भावरूपाज्ञानस्वीकरणम् ।

17. उपासनानामेव मोक्षोपायत्वं, न तु प्रपत्तेः ।

18. तत्त्वमसीत्यादौ सामानाधिकरण्यं गौणम् । अतत्त्वमसीति यदच्छेदः ।

19. ब्रह्मसूत्रेषु प्रतिसूत्र ओकारपूर्वकत्वनियमः प्रणवस्यापि सूत्रावयवत्वाङ्गीकरणम् ।

20. सर्वस्यापि सूत्रस्य सिद्धान्तसूत्रत्वम् । एवमन्यदप्यूह्यम् ।

विशिष्टाद्वैते

1. अप्राकृत तमसः पातुभूत नित्यविभूतिस्वरूपं तमसः पर-स्तात् तमसस्तुपारे इत्यादिप्रमाणसिद्धं नापलपनार्हम् ।

2. सत्त्वं रजस्तमः इति गुणाः प्रकृतिसंभवाः इति तेषां गुणत्वमेव ।

3. सर्वेषामपि जीवानां अविशेषेण अणुपरिमाण हि श्रूयते । एषोऽणुरात्मा चेतसा वेदितव्यः इति । अतो जीवस्वरूपे न तारतम्यम्।

4. नित्यस्य धर्मभूतज्ञानस्याङ्गीकारः। न विज्ञातुः विज्ञातेः विपरिलोपो विद्यते इति श्रुतेः। अन्यथा संसारस्य मोक्षस्य च वैलक्षण्याभावप्रसङ्गात् धर्मज्ञानसंकोचविकासाभ्यां हि वैलक्षण्यम्। आत्मस्वरूपे संकोचविकासाभावात्। अन्यथा नित्यससारस्य नित्य-मोक्षस्यचापरिहारात्।

5. श्रुतिबलात् निमित्तत्वमुपादानत्व च। तयोः मिथो विरोधा-भावाच्च।

6. तयो द्रव्याद्रव्ययो विशेषणविशेष्यभावप्रतीतेः तस्य च भेद-सम्नियतत्वात् नाभेदसभवः। अन्यथा लोकानुभवस्य शास्त्रस्य विरोधः।

7. तारतम्यापादककर्मणः पुण्यपापरूपस्य मुक्तावभावात् श्रुति-स्मृत्यादि विरोधाच्च मुक्तौ न कदाप्यानन्दतारतम्यम्।

8. उपनिषद्वाक्यान्येव विचारविषयत्वार्हाणि।

9. अखण्डकालस्याभ्युगमः अनादिर्भगवान् कालः नान्तोऽस्य द्विज विद्यते काल स पचते तत्र न कालस्तत्र वै प्रभुः इत्यादिना प्रमाणेन तत् सिद्धेः।

10. ध्वन्यात्मकशब्दवत् वर्णात्मकशब्दोपि अद्रव्यमेव। किञ्चित् प्रत्यनुपादानत्वात् द्रव्यलक्षणस्यावस्थावत्वस्याभावात् अव्याकृता-काशस्य भूताकाशेऽन्तर्भविन द्रव्यत्वमेव। तमस. पृथिव्यामन्तर्भावात् द्रव्यत्वमेव। प्रकृतिः कालः जीव ईश्वरः धर्मभूतज्ञानं नित्यविभूतिश्चेति षट् द्रव्याणि।

11. जीव. न ईश्वरप्रतिबिम्बः नीरूपत्वात् नित्यत्वाच्च। रूप रूपं इत्यादिवचनं सक्रान्तान्तर्यामिविग्रहपरम्।

12. सदेव सौम्येद इत्यादिप्रमाणबलात् अनतिरिक्तत्वमेव तयोः उपादानोपदेययोः।

13. गुणानां गुणिनश्च स्पष्टमेव भेदानुभवात् ब्रह्मतद्गुणयोरपि भेदस्य दृढतरप्रमाणसिद्धत्वाच्च तयोर्भेद एव।

14. अच्छेद्योऽयं इत्यादि दृढतरप्रमाणै· नित्यत्व निरवयवत्वाच्छेद्यत्वादिसिद्धेः न सावयवत्वम् ।

15. गुणगुण्यादिभेदस्य प्रत्यक्षादिसिद्धत्वेन तेनैव विवाहे निष्प्रमाणकविशेषस्वीकारोऽनावश्यकः ।

16. भावरूपाज्ञानस्वीकार· ।

17. ओ इत्यात्मानं युञ्जीत, मामेकं शरणं व्रज इत्यादि प्रमाणेन प्रपत्तेरपि मोक्षोपायत्वम् ।

18. तत्त्वमसीत्यादौ युष्मयमेव सामानाधिकरण्य, अतत्वमसीति पदच्छेदस्यानावश्यकता च ।

19 ओकारपूर्वकत्वनियमाभावः प्रणवस्यानवयवत्वयमेव ।

20. सिद्धान्तसूत्रत्वनियमाभावः ।

वेदनित्यत्वं, तत्स्वत· प्रामाण्य, तदनुयायिस्मृति इतिहासपुराण प्रामाण्यं वेदापौरुषेयत्वं ब्रह्मणः शास्त्रैकगम्यत्व, धर्माधर्मयोः वैदिकगम्यत्वं वेदान्तानां सिद्धार्थेपि तात्पर्यं, लिङर्थस्य इष्टसाधनत्वं शब्दप्रामाण्य बौद्धाद्यागमाप्रामाण्यं पाञ्चरात्रप्रामाण्यं स्फोटवादनिरास हरेरेव सर्वोत्तमत्व भेदसत्यत्व, जीवानां परब्रह्मभूत श्रीहरिदासत्वं इत्यादयः उभयवादिसंप्रतिपन्नाः ।

इत्थ श्रीरङ्गकारिप्रभवयतिपतिप्रेष्ठगुर्वीक्षितोऽय
तत्सेवास्वादलब्ध प्रथितबहुविधप्राच्यवेदान्तवित्तिः ।
व्याकार्षीत् ब्रह्मनीते सहृदयसरस सारविच्चक्रवर्ती
सर्वोत्कुष्टं विमर्श तमथच विबुधाः प्रेक्ष्य सन्वो दयन्ताम् ॥

---

१९५ पुटानुवर्ति

सुखादिक प्रत्यात्मन· आमत्मनःसयोगद्वारा निमित्तत्वोपादानत्वयोः घटेश्वरसंयोगं प्रति ईश्वरस्य निमित्तत्वोपादानत्वयोश्च नैयायिकमतसिद्धत्वाच्च तन्त्रान्तरसिद्धमेवाभिन्ननिमित्तोपादनत्वम् । अत्रोपादानत्वं समवायिकारणत्वं परिणामिकारणत्वं विवर्तकारणत्वमिति तत्तन्मतानुसारेण भिन्नरूपमिति त्वन्यत् । तत्र द्वैताद्वैत—196 .

अद्वैतवादिमतरहस्यप्रदर्शनम्

निर्विशेष ब्रह्मणः सत्यत्व तदतिरिक्तस्य प्रपञ्चस्य च मिथ्यात्व वदता अद्वैतिनामशयोऽत्राविष्क्रियते—ते हि एवमाशेरते—अनृतेन हि प्रत्यूढाः, नीहारेण प्रावृता, मायां तु प्रकृतिं, आनीतवात स्वधया तदेक (स्वधा—माया) तमसा गूढमग्रे प्रकेत, नो सदासोत् .तम आसोत्, तुच्छेनाश्वपिहित इन्द्रो मायाभिः हिरण्मयेन पात्रेण सत्यस्यापिहित मुखं, अज्ञानेनावृतं ज्ञानं, अनादिमायया सुप्त इत्यादि प्रमाणसहस्रैः अविद्यायाः तया ब्रह्मतिरोधानस्य नानारूपत्वस्अ च बोधनात् तस्मिन् जगतः कल्पितत्वं अत एव मिथ्यात्वं च सिध्यति। ज्ञानरूपस्य स्वयप्रकाशस्य ब्रह्मणः अविद्या कथं तिरोधान इति नाशक नोयम्। प्रकाशस्वरूपस्यैव सूर्यस्य तमः पुञ्जेनाच्छादन हि यजुस्संहितायामुक्तम्। अतोऽत्रापि ब्रह्मस्वरूपतिरोधान सभवति। सुवर्भानुरासुरः सूर्यं तमसाऽविध्यत्, तस्मै देवाः प्रायश्चित्तमैच्छन् इति यजुस्संहितायां द्वितीयकाण्डे द्वितीयानुवाके श्रूयते। सुवर्भानु,—स्वर्गस्य भां नुदति इति व्युत्पत्तिः। तमः पुञ्जरूपोऽसुरः स्वकीयतमसा सूर्य छादयामास। ततो जगतः आन्ध्यमभवत्। सूर्यप्रभाच्छादकस्य तमसः प्रायश्चित्तं देवाः किमित्यालोचयामासुः। ततः नानाविधै. प्रकाशरूपैः मण्यादिद्रव्यैः तमोऽपाघ्नन् इति कथा तत्र श्रूयते। तस्मात् प्रकाशस्वरूपस्य तमोनिरासकस्यैव सूर्यस्य तमसा आच्छादनमिव प्रकाशस्वरूपस्य स्वयं ज्योतिषो ब्रह्मणः अविद्यया तिरोधानं सभवत्येव। प्रकाशरूपमण्यादिद्रव्यै तमोऽपहननमिवात्रापि वाक्यजन्यज्ञानात् अविद्यानिरासश्चोपपद्यते। स्वह प्रकाशमपि सूर्य उपरागकाले राहुः भूलोकेपि छादयतीति प्रसिद्धम्।

आश्रयोऽस्याः तिरोधिश्च स्वरूप सदसदन्यता। मावं निवर्तकं चैव निवृत्तिर्नोपपद्यते इति। अविद्याया सप्तविधानुपपत्तिकथनमपि निरस्तमेतेन। परमतेपि हि ब्रह्मणः अवस्थाद्वयमुशन्ति। सूक्ष्मचिदचिद्विशिष्टत्वं स्थूलचिदचिद्विशिष्टत्व चेति। एवमेवाविद्याविशिष्टत्वं, तद्रहितत्वं चेत्यवस्थाद्वयमभ्युपगच्छामः। अविद्याविशिष्ट

त्वावस्थायां सगुणश्रुतीनामुपपत्तिः । राहित्यावस्थायां च निर्गुण-श्रुतीनाम् ।

ज्ञानरूप परं ब्रह्म तन्निवर्त्यं मृषात्मकं । अज्ञाने चेत् तिरस्कुर्यात् क. प्रभुस्तन्निवर्तने इत्युक्तदूषणस्य नास्मन्मते प्रसक्तिः । मृषात्मक प्रपञ्चस्य ज्ञानरूप ब्रह्मबाध्यत्वानभ्युपगमात् । स्वयंप्रकाशस्य सूर्यस्य तमसेव ब्रह्मणः तमोरूपाविद्ययाच्छादनसभवाच्च । ज्ञान ब्रह्मेति चेत् ज्ञानमज्ञानस्य निवर्तकम् । ब्रह्मवत् तत्प्रकाशत्वात् तदपि ह्यनिवर्तकम्। इत्युक्त दोषस्यापि नास्माकं मते अवसरः । ब्रह्मस्वरूप ज्ञानस्य प्रमाण जन्यज्ञानस्य च ज्ञानत्वेनावैलक्षण्येपि आकारान्तरेण वैलक्षण्यसत्वात् । त्वन्मते हि धर्मधर्मिज्ञानयोः ज्ञानत्वरूपेणावैलक्षण्येपि आकारान्तरेण अवैलक्षण्यमिष्यते । धर्मज्ञानं हि संकोचविकासार्हम् । न तथा धर्मि-ज्ञानम् । तथैव ब्रह्मरूप धर्मिज्ञान न निवर्तकम्, प्रमाणजन्यज्ञानं तु निवर्तकमितीष्यते । ततश्च जन्यत्वतदभावाभ्या विशेषणसत्वात् निवर्तकत्व तदभावोपपत्तिरिति न दोषः ।

धर्मिज्ञानं संकोचविकासार्हं ज्ञानत्वात् धर्मज्ञानवदित्यनुमान प्रयोगे भवता किं दूषणं वक्तु शक्यते । श्रुतिबाधश्चेत् ममापि समाधि-स्तुल्यः । प्रमाणजन्यज्ञान न निवर्तक ज्ञानत्वात् स्वरूपप्रकाश ब्रह्म-रूपज्ञानवत् इत्यनुमाने श्रुतिबाधस्य ममापि वक्तु शक्यत्वात् ।

ज्ञान ब्रह्मेति विज्ञानं अस्ति चेत् स्यात्प्रमेयता । ब्रह्मणोऽननुभूति त्व त्वदुक्त्यैव प्रसज्यते ।। इतीदमपि न सगच्छते । शुद्धब्रह्मणो वेद्य-त्वानङ्गीकारात् । अविद्याविषयब्रह्मण एव जिज्ञास्यत्वाभ्युपगमात् । सच्चित् ब्रह्म न संवेद्य संवेद्यमनृतं जडम् । इतिह्यस्मत्सिद्धान्त. । अवचनेन प्रोवाच इत्येवास्माक मतम् । अतः उपदेश्यत्वं शुद्धब्रह्मण. नाङ्गीक्रियते । अविद्यानिष्ठ शिष्य प्रति अविद्यानिष्टो गुरुः अविद्या-श्रयं ब्रह्म अविद्यारहितत्वेनोपदिशति । भागवतश्लोकेनाप्ययमर्थः सिद्धः ।

स वै न देवासुरमर्त्यतिर्यक् न स्त्री न षण्डो न पुमान् न जन्तुः ।
नायं गुण कर्म न सन्नचासन् निषेधशेषो जयतादशेषः ।। इति ।

एवं तत्त्वमसीति ब्रह्मण सामानाधिकरण्येन जीवैक्यमुक्तम्। इदं चाविद्यानभ्युगमेऽनुपपन्नं भवेत्। अतोपि ब्रह्मणः अविद्याश्रयत्वं-अभ्युगमनीयम्। नन्वत्र कथ अनुपपत्तिः। अदुष्टस्य ब्रह्मण दुष्टस्य जोवस्य चैक्यमनुपपन्नमिति चेत् ? न, नात्र तयोरैक्यमुपदिश्यते। भेदः खलुप्रतिपाद्यते। तथा हि—तत् त्वं इति न व्यस्तं पदमिदम्। स आत्मा इति पूर्वं निदेशात् स त्वं इत्येव वक्तव्यत्वात्। अतस्समस्त पदम्। तस्य त्व इति विग्रहः। राजपुरुषवत् शेषशेषिभावोऽत्रोच्यते। तस्य दासत्व-मित्यर्थः। यद्वा तेन त्व, तस्मै त्व, तस्मात् त्व तस्य त्व तस्मिन् त्वं इत्याद्यर्थस्यायि सुलभत्वात्। भेद एवात्र प्रतिपाद्यते। तत्र तत्र सूत्रे षष्ठी पञ्चमी इति योगविभागग्रहणेन, बहुलग्रहणाद्वा समासोपपत्तिश्च। कि च स आत्मा, अतत्त्वमसीति पदच्छेदस्यापि सुलभत्वात् जोवे ब्रह्मभेद. स्फुटतर बोध्यते इति नैक्यप्रसक्तिः। अतस्तदन्यथानुपपत्त्या अविद्याभ्युपगमोपि नावश्यकः इति चेत् उच्यते—विशेषणेन विशेष्यानु गुणलिङ्गेनैव भवितव्यमिति निर्बन्धाभावात्। शैत्यं हि यत्सा प्रकृति-र्जलस्य इति विपर्ययेणापि दर्शनात्। नपुसकलिङ्गस्य पुल्लिङ्गार्थ बोधकत्व न भवतीत्यपि नास्ति। सुप्तिङुपग्रहलिङ्गनराणा काल हलच्स्वरकर्तृयडाच। व्यत्ययमिच्छति शास्त्रकृदेषां सोपि च सिध्यति बाहुलकेन इति वार्तिककारप्रमाणवचनाच्च। अतः तत् इति नपुसक-निर्देशो नानुपपन्नः। अतो व्यस्तत्वे नानुपपत्ति। अपि च तत् इति वत् त्वपदमपि नपुंसकलिङ्गमेव। अलिङ्गे युष्मदस्मदी इति वैयाकरणै-रभ्युपगमात् अतस्समानलिङ्गकत्वं समानविभक्तिकत्वं चेति सामा-नाधिकरण्य सयगुपपद्यते। पदद्वयमपि चैतन्यमेव बोधयतीति मुख्य-वृत्तत्वमेव। तृतीयादि बहुविधसमासाश्रयण तदर्थं योगविभागाद्यंगी-करणं च क्लिष्टगतिरिति समस्तपदत्वाभ्युपगमः न प्रामाणिकश्च।

अपि समस्तपदत्वाश्रयण अस्माकमेवानुकूलम्। तदेव त्वं तत्त्वं तदभिन्नस्त्व इत्यर्थसभवात्। अब्भक्षो वायुभक्षः इति वत् अभेदस्यैव बोधनात्। अपि च स चा सौ त्वं च, तच्च त्व च इत्यपि कर्मधारय

समासाश्रयणं संभवति। युक्तं चैतत्—निषादस्थपति याजयेत् इत्यादि वैदिकवाक्येषु कर्मधारय समासोह्याश्रीयते। षष्ठीतत्पुरुषाद्यभ्युपगमे लक्षणा हि स्यात्। सर्वज्ञत्वादिविशेषण, श्वैतकेतुत्वादिपिण्डरूपविशेषणपरित्यागेन चैतन्यमात्रार्थकत्वस्वीकारे लक्षणा इति उभयोः साम्यमेवेति न मन्तव्यम्। अभिधानवृत्तेरपि तात्पर्यवृत्तेः बलीयस्त्वात्। बलीयसी तात्पर्यवृत्तिमनुरुन्ध्य सर्वपदलक्षणाया शास्त्रज्ञैः स्वीकाराच्च। सोऽयं देवदत्तः विषं भुंक्ष्व इत्यादौ सर्वपदलक्षणायाः अभ्युपगतत्वाच्च।

त्वमिति तदिति कार्ये कारणे सत्युपाधौ द्वितयमितरथैकं सच्चिदानन्दरूपम्। उभयवचनहेतू देशकालौ च हित्वा जगति भवति सोऽयं देवदत्तो यथैकः॥ अन्यच्च—अज्ञानरूपभावार्थसाधने प्रत्यक्षप्रमाणं यदस्माभिरुक्त तत्र दोषकीर्तनमपि भवतां न साधु। अहमज्ञः इत्यत्र भावरूपस्यैव अज्ञानस्य सिद्धेः। अज्ञः इत्यस्याकारोपक्रमत्वमात्रमवलब्य आभावरूपत्वसाधनं अतिसाहसम्। भावरूपार्थवाचकाः अकरोपक्रमशब्दाः कति कति सन्ति। न ते सर्वेपि अभावरूपार्थवाचकाः। यथा—

अथ, अनुनासिक, अइउण्, अधर, अवन, अलौ अट्टि अन्यः अकार, अपीच्यदर्शनं अहिता, अशनि अशन अतिशय, अवधारण अश्मा अहः अन्तरा, अन्तः अम्बा अङ्ग अग्निः अयः अलक अपः असूया अर्च्य अर्चकः इत्यादयः शब्दाः अकारपूर्वकाः। नैते अभावार्थं वाचकाः। एव बहवः शब्दास्सन्ति। अतो अज्ञान—अविद्यादिशब्दा नाभाववाचका भवितुमर्हन्ति। तस्मात् भावमेवार्थं बोधयन्ति। तस्माद्भावरूपाज्ञानसिद्धि। तेन ब्रह्मणः आच्छादन तेन विविधविचित्र जगद्भ्रमश्चेति न कस्यचिदप्यनुपपत्तिरिति।

द्वैतवादिनामाशयस्याविष्करणम्

भावरूपाज्ञाने न किञ्चिदपि प्रमाणमस्ति। अनृतेन होत्यादि तु न भावरूपमज्ञान बोधयति तत्र तत्र यथासंभव, कर्मप्रकृति लक्ष्मीरूपार्थवाचका एव ते ते शब्दाः। प्रकरणपरामर्शे तत्सर्व विदित

भवति । प्रकृतिपदार्थतत्कार्यवस्तुस्वीकारादि सर्वसम्मतम् । विशिष्य भवदुक्तभावरूपाज्ञानं अपि प्रकृत्यादि व्यतिरिक्त भवति नास्त्येवेति ।

अविद्यया ब्रह्मणः तिरोधानमपि न संभवति । भित्याघटस्तिरोहितः इत्युक्ते हि अस्माकं घटज्ञान नास्ति, घटाज्ञानमस्तीत्येवोक्तं भवति । तिरोहितस्य घटस्य तु ज्ञानमज्ञानमुभयमपि न भवति । जडत्वात् । देवदत्त तिरोहितः इत्युक्तौ देवदत्तज्ञानमस्माकं नास्तीति हि प्रतीयेत । तिरोहितस्य तस्य स्वरूपज्ञानं तु न तस्याच्छादितं भवति । अजडत्वात् तत्स्वरूपज्ञानं तस्य तदा भवत्येव । तथैव ब्रह्मणः अविद्यया आच्छादने अस्माकमेव ब्रह्मज्ञानं नास्तीत्युक्त भवेत् यवनिका माया जगन्मोहिनीनिवत् । अजडस्य तस्य ब्रह्मणः ज्ञान तु स्वय प्रकाश तत् सर्वदास्फुरेदेव । अतोऽविद्यया ब्रह्मज्ञानासभव एव । न च ब्रह्मणः ज्ञानरूपत्वेपि ज्ञानरूपधर्मविशेषाभावात् ब्रह्माज्ञानमस्त्येवति वक्तु युक्तम् । तादृशार्थस्य अविद्यानाशानन्तरमपि सत्वेन ब्रह्मज्ञानस्य सार्वकालिकत्वापत्तिरिति अविद्यानाशस्यैवासंभव इति न कदाचिदपि भवन्मते मोक्षसिद्धिः । अपि च वस्तुतिरोधानं नाम वस्तुना इन्द्रियसभिकर्षप्रतिबन्धः । यद्वा, वस्तुविषय ज्ञानरूपप्रकाशप्रतिबन्धो वा स्यात् । ब्रह्म तु भवता ज्ञानाविषयभूतं अतस्सन्निकर्षादिप्रतिबन्धो न शक्यवचन. । तस्मात् ब्रह्मतिरोधानं, प्रकाशभूतब्रह्मतिरोधानमेव । प्रकाशस्वरूपत्वमभ्युपयतस्तव प्रकाशधर्माभावेना तत्तिरोधानासंभवात् प्रकाशनाश एव तिरोधानमिति ब्रह्मनाशे एव पर्यवस्यति अविद्याति·राधनम् । ब्रह्मविषयकवृत्तिज्ञान प्रतिबन्धरूपतिरोधनामपि न युक्तम् । आच्छादनानन्तरभावित्वात् अन्तःकरणादि वृत्तिज्ञानादीनाम् । तत् पूर्वकालिकाच्छादनादीनामेवात्र विचार्यमाणत्वात् । तिरोधानहेतुभूतं एतदज्ञान स्वयमनुभूतं सत् ब्रह्म तिरस्करोति ब्रह्मतिरस्कृत्य स्वयमनुभवविषयो भवतीत्यादि श्रीभाष्यग्रन्थेनोक्तानां दूषणानामपरिहाराच्च अविद्यया ब्रह्मस्वरूपाच्छादन न शक्य वक्तुम् ।

अत्र सूर्य तमःपुजादि दृष्टान्तोपि न समीचीनः । तत्र तम· पुजादिना सूर्यस्याच्छादनेपि सूर्यस्य दर्शनरूपज्ञानमास्माकीनं नास्तीत्येव ।

न तु सूर्यस्यैव तत्स्वरूपज्ञानं नास्तीति। तमेव भान्तमनुभान्ति सर्वं तस्य भासा सर्वमिद विभातीत्युक्तस्य सर्वभासकस्यापि भगवतः यवनिकयाच्छादने तत्स्वरूपज्ञानं तस्यैव नास्तीति। कथं शंक्येत। यवनिकया अस्माकं भगवत्स्वरूप तत् गुणादिज्ञानं नास्तीत्येवोक्तं भवति। भगवत्स्वरूपतिरोधानकरी विपरीतज्ञानजननी इति ह्युच्यते अतोऽज्ञानेन ब्रह्मतिरोधानेपि ब्रह्म नाज्ञानविषयः नाज्ञानाश्रयो वा भवितुमर्हति। अतस्सूर्यादि दृष्टान्तोऽत्रानुपपन्नः। अतोऽविद्यादि सिद्धौ प्रमाणाभावात् अविद्याराहित्य, अविद्यावैशिष्ट्यरूपावस्थाद्वयकल्पनमपि न प्रमाणपदवी मधिरोहित।

धर्मधर्मिज्ञानयोः ज्ञानत्वेनावैलक्षण्येपि संकोचविकासार्हत्व तदभावरूपवैषम्यवत् स्वरूपभूतब्रह्मज्ञान तत्त्वमस्यादिवाक्यजन्यज्ञानयोः ज्ञानत्वेनावैलक्षण्यमस्तीति तु अत्राप्रयोजकम्। घटपटयोः पृथिवीत्वादि, जलपृथिव्यो· द्रव्यत्वादिना राजभृत्ययोः नरत्वादिना साम्येपि अन्याकारेणावैलक्षण्यमस्तीत्युक्तौ तावता विवक्षितार्थस्य नैव सिद्धिः। जन्यत्व तदभावयोः निवर्तकत्वानिवर्तकत्वासाधकत्वात्। न हि तत्त्वमसीति बाक्यावगमित ब्रह्मात्मैकत्वविज्ञान अविद्यानिवर्तने स्वस्यजन्यत्वमपेक्षते। ब्रह्मसद्वितीयं इत्यविद्याभूत तत्कार्यप्रपञ्चादिनिवर्तने ब्रह्मात्मैकत्वविज्ञानमेव हि पर्याप्तम्। जन्यत्वस्य निवर्तकतावच्छेदककोटौ अप्रयोजकत्वात् तद्वत्ताबुद्धि प्रति तदभाववत्तानिश्चयस्यैव प्रतिबन्धकत्वम्। नतु तदभाववत्तानिश्चयस्य प्रत्यक्षस्यैव इति वा अनुमित्यात्मकस्येति वा शाब्दबोधरूपस्येति वा नियन्तु शक्यम्। तथैव जन्यस्यैव ज्ञानस्य निवर्तकत्वं नत्वन्यस्येति नियमनं न संभवति। विपर्ययेणाप्यापादनसभवात्। नित्यस्यैव निवर्तकत्व न तु जन्यज्ञानस्येत्युक्तौ को वा तन्निवारक। जन्यस्यैव निवर्तकत्व इति नियमने जन्यस्य घटज्ञानस्यापि अविद्यानिवर्तकत्वापत्ति। घटज्ञानस्य विपरीताकारत्वं नास्तीति चेत् विपरीताकारस्यैव निवर्तकत्वात् स्वरूपज्ञानेपि तस्याक्षतत्वात् तस्यैव निवर्तकत्वं भवतु इत्याक्षेपस्य दुस्समाधनत्वमिति।

अश्वत्थवृक्षीयं नीलं च दण्डमादाय कुलालेन घटकरणे नीलरूपस्य तद्-वृक्षीयत्वस्य च घटकारणतावच्छेदकत्वं नैव हि स्वीक्रियते । तेषामप्रयोजकत्ववत् जन्यत्वादेरप्यप्रयोजकत्वमेव । ज्ञानस्य अविद्यानिवर्तनाशे यः स्वभावः अपेक्षितः स स्वभावः प्रमाणजन्यज्ञाने इव स्वरूपज्ञानेप्यस्तीति कथं तस्य निवर्तकत्वासभवः । तथा चेत् प्रमाणज्ञानमपि न निवर्तकं भवेत् । एतादृशाशयः उपरि भाष्यवाक्ये एव स्पष्ट. । ननु स्वरूपब्रह्मभूतप्रकाशरूपज्ञानस्य निर्विषयत्वात् निराश्रयत्वाच्च ब्रह्म प्रपञ्चरूपद्वितीयरहितमित्यर्थस्याविषयीकरणात् ब्रह्म सद्वितीयमिति ज्ञानस्य निवर्तकत्वं न सभवति विपरीताकारानवगाहित्वादिति चेत् न। तथा सति प्रपञ्चभ्रमस्यैव ब्रह्मण्यसंभव इति सद्वितीयत्व ज्ञानस्यैवानुदयः इति सर्वोपप्लवप्रसङ्ग. ।

शुद्धब्रह्मणो वेद्यत्वानङ्गीकारोपि न युक्त । ब्रह्म निर्विशेषं इति हि भवन्मतम् । अत्राविद्याविशिष्टब्रह्मणि निर्विशेषत्वोक्तौ बाधः शुद्ध ब्रह्मणि तदुक्तौ वेद्यत्वप्रसङ्ग. । अविद्यारहितत्वेन अविद्याश्रयभूतं ब्रह्म गुरुः उपदिशति इति च व्याहतार्थकम्। माता मे वन्ध्या इतिवत् । अविद्याविशिष्टस्य ब्रह्मणः न हि अविद्यारहितत्वं संभवति । अविद्याविशिष्टत्वेन संप्रति दृश्यमानं पूर्वं वस्तुतः अविद्यारहितं इत्युक्तौ शुद्धस्य तद्रहितत्वमुक्तं भवतीति शुद्धस्य वेद्यत्वमायात इति अवेद्यत्वभंग एव । अपि च, अथातो ब्रह्मजिज्ञासा इत्यत्र अविद्याविशिष्टब्रह्मण एव जिज्ञास्यत्वमिति भवत्सिद्धान्तः । एव चेत् श्रवणमननादिकमपि तस्यैवेति ध्यानसाक्षात्कारादि च तस्यैवेति च हेतोः सविशेषब्रह्मण एवोपास्यत्वं ततः मोक्षश्च इति निर्गुणब्रह्मण एवा सिद्धिः । किं च तत्त्वमसीति वाक्यजन्यज्ञानविषयत्व निर्गुण ब्रह्मणः इष्यते, सगुणब्रह्मणो वा । पूर्वत्र ज्ञानवेद्यत्वं उत्तरत्र बाध । शुद्ध ब्रह्मण एव भवन्मते उपदेश्यत्वानङ्गीकारात् तस्मिन्प्रमाणमेव नास्ति । मानाधीना हि मेयसिद्धिः । प्रमाणाभावेपि तत्सिद्धौ शशशृगस्यापि सद्धिप्रसङ्गः । अतो भवन्मते ब्रह्म शशशृंगायितमेव । अधिष्ठानरज्जु-

याथात्म्यज्ञानेन हि अध्यस्तसर्पनिवृत्तिः एव ब्रह्मयाथात्म्यज्ञानेनैव प्रपञ्च निवृत्तिर्वक्तव्या। अतोऽपि वेद्यत्वमङ्गीकार्यम्।

स वै न देवासुर इत्यादिभागवतश्लोकः न ब्रह्मणोऽवेद्यत्व बोधयति। न वा अविद्याश्रयत्वम्। पर लोकदृष्टविसजातीयं ब्रह्म वस्तु इति सर्वोत्कृष्टत्व बोधयति।

तत्त्वमसीति वा अतत्त्वमसीति वा पदच्छेदोऽस्तु। समस्तं वा व्यस्तं वा तत् भवतु। तथापि लक्षणादोषः भवतामधिकः। सोयं देवदत्तः इत्यादौ लक्षणागन्धोपि नास्तीति श्रीभाष्यादिषु संयगुपपादितम्। विषं भुक्ष्व इत्यादावपि न सर्वपदलक्षणा। द्वितीयाया आख्यातस्य च लक्षणाभावात्।

अपि च भावरूपाज्ञाने प्रत्यक्षं न प्रमाण, अहमज्ञः इत्यत्र अज्ञ इति अकारोपक्रमत्व पुरस्कृत्य अभावरूपत्व न साधयाम.। परं तु अहमज्ञः इति विवरणमनुसृत्य। मामन्यं च न जानामीति हि विवरण भवद्भिराश्रीयते। न जानामीत्यस्य कोऽर्थः। न जानामीत्यस्य अज्ञानाश्रय इत्यर्थः इति चेत् मा अन्यं च इत्यस्य कुत्रान्वयः। सविषयकत्व ज्ञानस्य हि। जडभूतस्य भावरूपस्य अज्ञानस्य कथं सविषयकत्वम्। जडभूतमपि अज्ञानं सविषयक चेत् घटोपि सविषयकः स्यात्। ननु ज्ञानाज्ञानयो. विरोधकविरोध्यभावः निवर्त्यनिवर्तकभावश्च सर्वसमतः। स च विषयद्वारा ह्युपपादनीयः। इत्थं च ज्ञानस्येव अज्ञानस्यापि सविषयकत्वमाश्रयणीयम्। एव आकाशस्य घटपटावच्छिन्नत्वमिव अज्ञानस्यापि घटपटाद्यवच्छिन्नत्वमस्ति। मदवच्छिन्नाज्ञानं अन्यावच्छिन्नं चाज्ञानमिति बोध्रः इति। न जानामि—भावरूपाज्ञानवानहं इति बोधेपि मां, अन्यं इत्यस्य अन्वयः सूपपाद इति चेत्? अस्तु वा घटादीनां अज्ञानावच्छेदकत्वं अज्ञानविषयत्व वा, तथापि नेदं भावरूपाज्ञानसाधनं भवति। अभावपदार्थस्य भावताप्यभ्युपगतत्वेन तेनैव निर्वाहोपपत्तेः भावरूपत्वाङ्गीकारानावश्यकत्वात्।

ननु अहमज्ञ. इत्यस्य ज्ञानाभाववानह मित्यर्थस्वीकारे प्रतियोगि-भूतज्ञानस्य ज्ञानमावश्यकम् । घटाभावबुद्धौ प्रतियोगिनो घटस्य ज्ञान-मिव । घटस्य जडत्वेन सविषयकत्वाभावात् स्वरूपत एव घटस्य स्मरणं पर्याप्तम् । ज्ञानस्य सविषयकत्वात् किञ्चिद्विषयकज्ञानस्यैव प्रतियोगि त्वात् किञ्चिद्विषयक ज्ञानस्य ज्ञानमवश्यकमिति तत्सत्वे कथ ज्ञाना भाव' । अपि च—प्रतीयमाने घटादिज्ञानाभावे अवच्छेदकतया-(विषयतया) व्यावर्तकतया च घटादीना भानमावश्यकमिति घटाद्य-वच्छिन्नज्ञानाभाव' इति वक्तव्यम् । अन्यथा सविषयकत्वव्याघातः । एव चावच्छेदकघटादिभाने सति तज्ज्ञानस्यैव सत्वेन तज्ज्ञानाभावः कथं सेत्स्यति । अतोऽत्राज्ञानस्य भावरूपत्वमकामेनापि स्वीकार्यमिति चेत् उच्यते—भावरूपाज्ञानवादिनस्तव मतेपि कथमत्र निर्वाह । अज्ञान-स्यापि सविषयकत्वेन अवच्छिन्नत्वेन तावच्छेदकघटादीना भानावश्य-कत्वात् । तज्ज्ञाने सति भावरूप तदज्ञान वा कथ सिध्येत् । अस्मन्मते घटादीनां ज्ञानविशेषणत्व स्वीक्रियते । भवता मतेपि घटादीनामज्ञान विशेषणत्व स्वीक्रियते । विषयोल्लेखाभावे अज्ञानस्वरूपस्यैवासिद्धे । नचाज्ञानविशेषणत्वेन घटादीना भानेपि तद्वैशद्यं न ज्ञातमिति घटादि-विषयकाज्ञानसंभवः इति वाच्य । एवमपि घटादिवैशद्यविषयकाज्ञान-मिति फलितमिति घटादेरिव तद्वैशद्यस्य विषयत्वावश्यंभावात् वैश-द्यावच्छिन्नाज्ञाने वैशद्यभानमवच्छेदकतया जातमिति तद्भाने नाज्ञान सभवः पूर्वोक्तदोषापरिहारात् । ज्ञानस्य सविषयकत्वेन विषयनिर्देशा-वश्यकत्वात् विषयभाने विषयज्ञानाभावो न सभवतीत्येतत् भावरूपा-ज्ञानस्वीकारेपि समानम् ।

अपि च—अज्ञानस्य ज्ञानविषयावरणरूपत्वाङ्गीकारात् घटा-ज्ञानमित्यस्य घटाऽऽवारकं घटाच्छादकमज्ञानमित्यर्थ. स्वीकार्यः । तथाचावच्छेदकभूतस्य घटादिविषयस्यापि ज्ञानावश्यकत्वात् तज्ज्ञाने सति तदाच्छादकमज्ञानं कथ तिष्ठेत् । अवच्छेदकघटाद्यपगमे तदज्ञान पटस्याप्याच्छादकं भवेत् । न कस्यचिदपि वा । एतावान् दोषः अन्यं

न जानामीत्यत्र । मा न जानामीत्यत्र अस्मदर्थस्य स्वयप्रकाशत्वात् तत्प्रयुक्तमधिकं दूषण च ।

वस्तुतः अहमज्ञ. इत्यवभास. कदा भवतीति विमर्शनीयम् । केषाचित् विषयाणा ज्ञाने अन्येषांचाज्ञाने सति अहमज्ञः इत्युच्यते न सर्वविषयकज्ञानाभावे । तथाविधपुरुषस्यैव लोकेऽभावात् । सर्वस्यापि यत्किञ्चिन्ज्ञानावश्यंभावध्रौव्यात् । अज्ञः इत्यस्य ज्ञानसामान्याभाव-परत्वं च न संभवति । यतस्स्वस्य तथाऽनुसन्धानरूपज्ञानवत्वम् । स्वाज्ञत्वापनोदनार्थं हि आचार्यस्य ज्ञानवत्वमनुसन्धाय तदुपसदनं करोति । वेदान्तश्रवणात् पूर्वं सोऽहं भगवः शोचामि, नात्मवित् । अज्ञः इत्युक्ते वेदान्तशास्त्रप्रोक्तात्मविषयकस्य तद्गतनित्यत्वाणुत्व निरव-यवत्वशेषत्वविषयकस्य परमात्मतदासाधारणधर्मादिविषयकस्य च ज्ञानस्याभावः इत्यर्थः पर्यवस्यति । एवमेव लौकिकविषयेपि अज्ञः इत्य-स्यार्थो वर्णनीय । एव च आत्मा कश्चिदस्ति, स देहो वा अन्यो वा अणुर्वा अन्यादृशो वा, नाहं जानामि तं, इत्यर्थे एव अहमज्ञः इति प्रयोगः । सामान्यज्ञानमेवास्ति न विशेषज्ञानमित्यभिप्रायेण अहमज्ञः इत्यनुपन्धत्ते । अत्र ज्ञानाभावविवक्षण ज्ञानस्य सविषयकत्वात् विशेषविषयकज्ञानस्यावश्यकतेति तत्सत्वे कथं ज्ञानाभावः इति शङ्कां मन्दबुद्धिरेव कुर्यात् । विशेषज्ञानाभावाद्धि अहमज्ञः इति वदति । एव सति कस्यचिदपि ज्ञानाभाव बुद्धिरेव नोदियात् । सर्वस्यापि प्रति-योगिभूतज्ञाने सविषयके विषयावश्यंभावस्यावश्यकत्वेनाभावबुद्धेरे-वानुदयप्रसङ्गः । यो यः स्वात्मानं अज्ञं मन्यते स सर्वोपि सर्वज्ञः प्रसज्येत । ज्ञानवत इवाज्ञस्यापि सर्वज्ञत्वप्रसङ्गश्च । भावरूपाज्ञान-वादिनामपि तस्य सविषयकत्वमेवेति निरुक्तदूषणस्यापरिहार एव । विशेषतो मम ज्ञानं नास्तीत्युक्तौ तादृशज्ञाने विशेषविषयकत्वमान-मनावश्यक चेति । अतो भावरूपत्व साधनं न सभवतीति ।

इदमत्रावधेयम्—अथातो ब्रह्मजिज्ञासा इत्यारभ्य अनावृत्तिश्शब्दात् अनावृत्तिश्शब्दात् इत्येतावत्पर्यन्तानि ब्रह्मसूत्राणि बादरायणेन एकेनैव मुनिना प्रणीतानि । एतानि च वेदान्तभागोपबृंहणरूपाणि । एकस्मिन्नेवार्थविशेषे तत्पराणि एकाभिप्रायकाणि । एकस्यैवमतस्य प्रदर्शकानि इति नात्र पण्डितानां विवादः । पर तु पश्चात्तनैः पण्डितैः पदच्छेदस्यान्यथाकरणात् एकसूत्रशेषस्य पदस्य अन्यसूत्रशेषत्वोपपादनानुगुणपाठभेदस्वीकाराच्च तैः तैः वादिभिः स्वोत्प्रेक्षितार्थनयन क्रियते। अतः अनेकमतानां प्रवृत्तिः । तत्स्थापनप्रवृत्तैः तदनुयायिभिः साग्रहैः अन्यथाऽन्यथार्थवर्णनं क्रियते—अद्यतना अपि सूत्राणां पदविभाग अन्यथा रचयन्तः अन्यमर्थं सर्वे अश्रुतपूर्वं वर्णयन्ति—तद्यथा—अथातो ब्रह्मजिज्ञासा इत्यत्र अब्रह्मजिज्ञासा इत्यपि च्छेदं कुर्वन्ति । ब्रह्मविचारस्येव अब्रह्मभूतोद्गीथाद्युपासनानामपि विचारस्यात्र क्रियमाणत्वादेव पदच्छेदः युक्तः इति च वदन्ति। ब्रह्मण इव अब्रह्मणोपि प्रणववेद प्रधानादेः ज्ञानस्यावश्यकत्व च । व्यक्त अव्यक्त ज्ञाने त्रयाणामपि ज्ञातव्यत्वं हि शास्त्रसिद्धम् । अथातो धर्म जिज्ञासा इत्यत्रापि अधर्मजिज्ञासा इति पदच्छेदः । धर्मस्यानुष्ठेयस्येव त्याज्यस्याधर्मादेरपि ज्ञातव्यत्वावश्यकत्वात् ।। धर्मज्ञश्च कृतज्ञश्च इत्यत्र हि धर्मज्ञत्वं अधर्मज्ञत्वं च विवक्षित, उपकारज्ञत्वं अपकाराज्ञत्व च । न स्मरत्यपकारणां शतमप्यात्मवत्तया कथचिदुपकारेण कृतेनैकेन तुष्यति इति इत्युपरि वक्ष्यते रामगुण । एवमेवात्रापीति। जन्म आद्यस्य यतः इति पदच्छेदं कृत्वा आद्यस्य—चतुर्मुखस्य यत —परस्मात्पुरुषात् जन्म इति वर्णयन्त्यर्थम् । यो ब्रह्माण विदधाति पूर्वं इति श्रुतिः । शास्त्रयोनित्वात् इत्यत्रापि शास्त्रयोनि तु आत् इति पदच्छेदः । आत् इति पञ्चमी । पूर्वसूत्रेणैककण्ठ्यं अंगीकृत्य यतः—यस्मात् आत्—अकारार्थात् ब्रह्मणः अस्य जगतः जन्मादि भवति तत् ब्रह्म शास्त्रयोनि इति वर्णयन्ति । ब्रह्मण अकारार्थत्वोक्त्या विष्णुत्व साक्षात् सिध्यति ।

न शिवत्वासिद्धि । ईक्षतेर्नाशब्द इत्यत्र ईक्षते ना शब्द इति पदच्छेदः। सदादिशब्दवाच्यः ना—नरः—जन्तुर्नारायणो नर इत्युक्तः चेतनः परमात्मा शब्दमनुसृत्य इति वाक्यार्थं वर्णयन्ति । आकाशस्तल्लिगात् अन्तस्तद्धर्मोपदेशात् इत्यादौ तत् इति पृथक्पदं ब्रह्मवाचकम् । आकाशः इत्यपि काशृ दीप्तौ इति धातुनिष्पन्नम् । आङ इत्युपसर्ग । आ—समन्तात्काशते इति व्युत्पत्ति. । सर्वत्र प्रकाशते इत्यर्थः । सर्वत्र प्रकाशमानत्वं परमात्मन एव । अयमाकाशशब्दः आङ इत्युपसर्गपूर्वक काशृदीप्ताविति धातुनिष्पन्न इत्यत्र कि प्रमाणमिति चेत् ? लिंगात् इति समाधानम् । परायणत्वादिलिगबलात् अयमर्थो ज्ञायते इति तात्पर्यम् । तदनन्यत्वमारभणशब्दादिभ्यः इत्यत्र आरम्भणशब्दात् इत्यस्यैव पर्याप्तत्वात् आरम्भणशब्दात् इभ्यः इति विभाग कार्य. । इभ्य स्वामी-इभ्य आढ्या धनी स्वामो ईश्वरः पतिरौशिता इत्यमर.। तत् अनन्यत्वं इति च्छेदः । अनन्य इति श्वेतकेतुसबोधनम् । तत् त्वमसीति प्रत्यभिज्ञापनम् । त्व तदसीत्यन्वयः । दहर उत्तरेभ्यः इत्यत्रापि इभ्यः इति प्रथमान्तम् । अचेतनात् उत्कृष्ट बद्धः उत् । तस्मात् उत्कृष्टः मुक्तः तस्य स्वामीत्यर्थः । अनेन अचेतन बद्ध मुक्त वैलक्षण्य दहराकाशस्योक्तं भवति ।। एव तत्र तत्र बुद्धिसामर्थ्यात् पदच्छेदमन्वय चान्यथा वर्णयन्तः अपूर्वमपूर्वं अर्थं कथयन्ति । अत एव सूत्राणां तात्पर्यभेदः अर्थभेदश्च सुलभो भवति । अतः बहूनि मतानि प्रवृत्तानि । अभिवृद्धानि च । अतो बुद्धिमता श्रुतिस्मृति इतिहास-पुराणादि परामर्शेन अर्थनिश्चयः कार्यः । तत्रापि अनुग्राहक तर्कः पुरस्कार्यः । लोकानुसरणमपि रक्षणीयम् । निखिलवेदान्तवाक्याना-मप्यर्थवारस्यं पर्यालोचनोयम् । सर्वेषामादरणमपि सपाद्यम् । सर्व-जीवानामपि समरसभावस्संपाद्यः। एवमादि सर्वगुणोपेतं मतं श्रीरामा-नुजमतमेवेति सर्वेरपि निरणायि । एवमत्र श्रीभगवद्रामानुजमत प्रशंसन्ति । यथा—

प्रायो लोकानुसारात् निखिलनिगमवाक्यानुगुण्यात् परैर-
प्यादर्तव्याखिलार्थात् अखिलतनुभृतां रूपमुक्त्यादिसाम्यात् ।
भूतेष्वीशागतोक्तेः शरणवरणतः सर्वमोक्षार्हतोक्त्या
मुक्तावानन्दसाम्यात् यतिपतिकथितं सर्वसमाननार्हम् । इति ।

स्खालित्यमत्र मम मन्दमतेः ध्रुव स्यात्
प्राज्ञै हि तीक्ष्णमतिभि. नितरामुपेक्ष्यम् ।
सर्वे हि सर्वविषयं न विदन्ति लोके
स्खालित्यमत्र सहजं खलु गच्छता हि ।।

गम्भीररूपे परमात्मसूत्रे नि.शेषमर्थं गदितु क्षम. क ।
रत्नाकरे किञ्चिदनर्घरत्नप्राप्त्यापि मोद लभते प्रजा हि ।।

न दृश्यतेऽशुभ्रपटे मलं यथा सिते पटे स्वल्पमपोह लक्ष्यते ।
तथैव दोषो गुणवज्जने स्फुटः सुदुर्गुणे नैव निरीक्ष्यते हि सः ।।

वाचां शुद्धि पुरस्कृत्य विमर्शो रचितो मया ।
नूतनोऽयं सदास्वाद्यः पण्डितैः हृदयालुभिः ।।

मतत्रयप्रसिद्धार्थसूत्राधिकृतिभेदकः
पदच्छेदाधिकरणविषयादिविभागकः ।
श्रीनृसिंहपदद्वन्द्वचित्तेनाद्य मया कृतः
ब्रह्मसूत्रविमर्शाख्यग्रन्थोऽयं भुवि राजताम् ।।

व्यासार्यसूत्रं यतिराजसूक्तिः सर्वे च वेदान्तगुरोः प्रबन्धाः ।
विमर्श एषो नवनीतरूपः समानयोग्या विलसन्तु भूमौ ।।

श्रीशङ्करः श्रीयतिराजसूरिः मध्वार्यवर्यो गुरुसन्ततिर्मे ।
श्रीवण् शठारिः गुरुराद्ययोगी तृप्ता भवन्त्वद्य गुरुर्ममीयः ।।

इत्थं श्रीरङ्गकारिप्रभवयतिपति श्रेष्ठगुर्वीक्षितोऽय
तत्सेवास्वादलब्धप्रथितबहुविधप्राच्यवेदान्तवित्ति. ।
व्याकार्षीत् ब्रह्मनीतेः सहृदयसरसं सारविच्चक्रवर्ती
सर्वोत्कृष्टं विमर्शं तमथच विबुधा प्रेक्ष्य सन्तो दयन्ताम् ।।

नमः श्रीरङ्गशठजिद्योगिवर्याय धीमते ।
यत्पादपद्मविभवः सिद्धि दिशति संपदः ।।

श्रीरङ्गशठकोपार्यचरणौ शरणं भजे ।
यदीयकरुणालेशः सूते श्रीभाष्यवेदनम् ।।

इत्थं श्रीमद्वेदमार्गेत्यादिबिरुदभूषित अहोबिलमठास्थानाभिषिक्त
श्रीवण्शठकोपश्री श्रीरङ्गशठकोपयतीन्द्रमहादेशिकचरणारविन्दसेवा
समासादितसकलरहस्यविज्ञानस्य
सारसारज्ञेत्यादिनानाविधबिरुदावलीभूषितस्य
श्रीचक्रवर्त्याचार्यस्य
कृतिषु
श्रीब्रह्मसूत्रविमर्शरूपाकृतिः
समाप्ता ।

शुभम् शुभम् शुभम्

श्रीः

श्रीब्रह्मसूत्रविमर्शानुबन्धः

[ब्रह्मसूत्राधिकरणविचाररूपः]

श्रीवीरराघवशठारियतीशलब्धवेदान्तयुग्ममनघं गुरुराजमीडचम् ।
श्रीकृष्णसूरिमधिगम्य विराजमानं श्रीरंगकारिजयतीश्वरमानतोऽस्मि।।

आनम्य सर्वगुरुमाश्रितवत्सलं तं संसेव्यचाब्धितनयासहित नृसिंहम् ।
श्रीबादरायणवचोऽमृतमग्नचेता. कर्तुं प्रवर्त इह हर्षकरानुबन्धम् ।।

श्रीमद्रंगशठारातियतीट्दृष्टचा वितन्यते ।
बादरायणसूत्रार्थविमर्शस्यानुबन्धनम् ।।

अत्र सूत्रार्थभाष्यार्थविचाराः हृदयङ्गमाः ।
रत्नानीव प्रदर्श्यन्ते विबुधैः बहुमानिताः ।।

उत्प्रेक्षितं महार्घं श्रीबादरायणसमतम् ।
अर्थतत्व दुरारोहं अल्पज्ञानां प्रदर्श्यते ।।

ये सामरस्य हृदये वहन्ति तेषामसूयारहितात्मनां हि ।
अयं विमर्शो विपुल समग्र सम्मानयोग्यो भविता ध्रुवं मे ।।

—0:—

ब्रह्मसूत्राधिकरण विचाराः (ब्रह्मसूत्रविमर्शन्तर्गता)

1 जिज्ञासाधिकरणे—

1. भाष्ये–विनतविविधभूतव्रातरक्षैकदीक्षे इति उक्तम् । अत्र आचार्यनिष्ठयापि वत्सवृश्चिकादीना विनतत्वं नास्तीति तेषां विषये भगवत· मोक्षप्रदत्वं नास्ति उतास्ति ? उच्यते—भूतसंबन्धी व्रातः भूतव्रातः । भगवज्ज्ञानेन लब्धसत्ताकाः भूतशब्दवाच्याः । अस्ति ब्रह्मेति चेत् वेद सन्तमेनं ततो विदुः इति श्रुतेः । इत्थं च भगवज्ज्ञान लब्धसत्ताकानां भूतानां ये संबन्धिनः तेषामपि रक्षणैकदीक्षो भगवान् ।

संश्रितसंबन्धिनामपि तत एवकारणात् भगवता रक्ष्यत्व हि प्रमाण-सिद्धम् ।। पशुर्मनुष्यः पक्षी वा ये च वैष्णवसंश्रयाः। तेनैव ते प्रया-स्यन्ति तद्विष्णो. परम पदम् ।' इति हि श्रूयते । मदीयत्वेनाभिमान-विषयत्वमेव संबन्ध । अयमेव 'तेनैव' इत्युक्त । तेनैव-इति तेन वैष्णवेन सह इति नार्थः बाधात्। एवं च स्वगृहस्थानां गोवत्सवृश्चिक-प्रभृतीनामपि अभिमानात् गृहस्वामिकारुण्यविषयत्वे तदनुष्ठीयमाना-चार्यप्रपत्तिविषयत्व सभवतीति तेषु मोक्षप्रदत्वं देवस्येति । तदुक्तं—

அளவுடையார அடைந்தார்க்கும், அதன் உரையே கொண்டவாககும, வளவுரை தந்தவன்அருளே மன்னியமாத வத் தோற்கும. களவு ஒழிவார் எமர் என்ன இசைநதவர்க்கும். காவலராம், துளவு முடி அருளவரதர் துவக்கில் எளிவைததேனே.

इति । अत्र प्रथमपादेन स्वनिष्ठया न्यस्तभराः। द्वितीयेन ज्ञान-गर्भोक्तिनिष्ठया न्यस्तभराः तृतीयेन प्रभावयुक्तरहस्यवाक्यमुपदिष्टवतः आचार्यस्य कृपाया स्थितः आचार्यनिष्ठा· चतुर्थेन, आत्मापहारचौर्य-विहीन भागवताना मदीयत्वेनाभिमानविषयाः ये ते भागवतनिष्ठाश्च विवक्षिताः। अनेनाधिकारिचतुष्टयमुक्तं भवति रहस्यार्थमुपादिष्टवन्त-माचार्यमेवाश्रित्यानुष्ठितोपाया. आचार्यनिष्ठाः । मन्त्राद्युपदेष्ट्राचार्ये कारणबिशेषेणोपायानुष्ठानासभवे अन्यत्र भागवते उपायानुष्ठानेनानु-ष्ठितोपायाः भागवतनिष्ठाः इति तृतीयचतुर्थयोः भेदः इति केचित् । अन्ये तु आचार्येण स्वार्थ स्वयमनुष्ठीयमान शरणागतौ मदीयत्वेनाभि-मानविषयः कश्चित् । पूर्वमनुष्ठितोपायस्य आचार्यस्य पश्चादनुष्ठीय-मानशरणागतौ मदीयत्वेनाभिमानविषयः आचार्यनिष्ठः कश्चित् इति आचार्यनिष्ठे एव द्वैविध्यं अस्तीति तृतीयचतुर्थ वैलक्षण्यमिति । अस्मिन्पक्षे भागवतनिष्ठेति कश्चिन्नास्ति । भागवतेनापि अन्यस्य प्रपत्यनुष्ठानेन प्राथम्याचार्यत्वस्य युक्तत्वात्। एतन्मते आचार्यनिष्ठेति भाविनी वृत्तिमाश्रित्येति वक्तव्यम् । पूर्वं तस्यानाचार्यत्वात् । एतन्मत-रीत्या प्रपत्त्यनुष्ठानानन्तरमेव स्वाचार्यत्वोपादानात् ।

இதை தாம் அனுஷ்டிக்கவுமாம், தனக்காக ஆசார்யாதிகள் அநுஷ்டிப்பிக்கவுமாம்.

इति रहस्यरत्नावल्यां आचार्यपदं निर्दिश्य आदिपदमपि अधिक प्रयुक्तम् । आदिपदं आचार्यव्यरिक्तमेव बोधयेत् । स्वविषये पश्चादनुष्ठीयमानप्रपत्तिमुपजीव्य तस्य स्व प्रत्याचार्यत्वोपपादने आचार्य पदमेक पर्याप्तं आदिशब्दः व्यर्थः स्यात् । भाविनी वृत्तिमाश्रित्याचार्यत्वोपपादनस्य तन्मतस्थेन कृतत्वात् । मन्त्रतदर्थाद्युपदेशं विना केवलप्रपत्तिकरणमात्रेणाचार्यत्वा सभवाच्च पितर हिरण्यकशिपुमुद्दिश्य प्रपत्तिकर्तुः प्रह्लादस्य, स्वभर्तुपञ्चपाण्डवादीनुद्दिश्य प्रपत्तिकृत्द्रौपाद्यश्च पितर प्रति भर्तृन् प्रतिचाचार्यत्वप्रसक्तेश्च ।। अपथगामिन देवतान्तरभजननिमग्नं स्वाचार्य उद्दिश्य भगवन्निकटे प्रपत्तिकर्तुः शिष्यस्याप्याचार्यत्वप्रसङ्गच्च इति केचिद्वदन्ति । संप्रदायज्ञाः प्रमाणम् ।। मदीयत्वेनाभिमानविषयणां प्रपत्यनुष्ठाने लोके कस्यचित् मदीयत्वाभिमानेनानुष्ठीयमान प्रपत्तिविषयत्वं सर्वेषु अपि संभवति । कारुण्यात् सर्वे इमे जनाः मुक्ता भवन्तु इत्यभिमाने केनचित् क्रियमाणे तदभिमानविषयाः सर्वेपि तदाचार्यनिष्टा भवेयुः इति एक एव सर्वेषां आचार्योभवेत् इति चेत् ? न । एतच्छंकानिवृत्त्यर्थमेव இசைந்தவற்கும் காவலனும் इत्युक्तम् । कस्यचित्पुरुषस्याभिमानविषयत्वेनानुष्ठीयमानविषयत्वस्य कस्मिंश्चित् सभवेपि । अनेन त्वत्कृतोपायानुष्ठानं नाभ्युपगच्छा इति स्वानभ्युपगमप्रदर्शने न सा प्रपत्तिः सफला भवति । अतः तं प्रति न स आचार्यो भवितुमर्हति इति ।

2. स्मृतेः दर्शनसमानाकारकत्वं प्रथमस्मारणदशायामप्यस्ति, उत नास्तीति विचारे नास्तीति सिद्धान्तः । भवति च स्मृतेः भावनाप्रकर्षाद्दर्शनरूपता । इति श्रीभाष्यसूक्तिः । दर्शनरूपत्व भावनाप्रकर्षाधीनमित्युक्तत्वात् प्रथमस्मरणदशायां तादृशस्मृतेः भावनाप्रकर्षाधीनत्वं नास्तीति ज्ञायते । यदि तु कस्यचित् न भवान्तरे प्रकृष्टभावना आसीत् । एतज्जन्मनि पुराणश्रवणादिना स्मरण जातं चेत् तत्स्मरणं

दर्शनसमानाकारं भवेदेव । अस्मद्दृष्टया प्रथमस्मरणमिदम्। वस्तुत. भवान्तरप्रमोषाधीनमिति न प्रथमस्मरणमिति सिद्धान्तः। केषांचित् अदृष्टवशाज्जायमान अकाण्डे दर्शनसमानाकारत्वादि एतत्तुल्यमिति ज्ञेयम् ।

3. कालक्षेपाक्षमत्वात्कतिचन कृतिनः शीघ्रमन्ते रमन्ते इति सारावल्यामुक्तम् । कर्मविचारे अप्रवृत्तोऽपि ब्रह्मविचारे प्रवर्तत इति कथ पूर्ववृत्तत्वमिति चेन्न । आचार्योपदेशाद्वा कर्मविचारोक्तसकलार्थ ज्ञानेन कृतप्रायत्वात्। न तावता पूर्ववृत्तत्वहानि. वेद उपनिषदध्ययना भावेऽपि ब्रह्मविचारे प्रवृत्तिदर्शनात् तेषामपि पूर्ववृत्तत्वापगमप्रसङ्गात्।

यत्तु क्रमेण प्राज्ञपुरुषविषये एव कर्मविचारस्य पूर्ववृत्तत्व, नान्यविषये इति, तन्न—तथासति तस्य भाष्यादिषु पूर्ववृत्तत्वसाधन प्रयासवैयर्थ्यापत्तेः । एकाधिकारिविषये पूर्ववृत्तत्वाभावे अद्वैतविजय प्रसङ्गश्च । अतः आचार्यमूलं तदर्थज्ञानात् कर्मविचारः कृत एव इति वक्तव्यम् ।

4. अथातो ब्रह्मजिज्ञासा – वक्तव्यविचारशब्दानुक्तिः विविदिषन्तो'ति श्रुतिपर्यालोचनाया। तत्रापि तथोक्तिः ब्रह्मज्ञानस्य प्रीतिरूपत्वेन इच्छाविषयत्वद्योतनाय । कर्माऽनुष्ठीयमान हि दुःखरूप, न तथाऽज्ञेति । न चैव सति धर्मजिज्ञासेति कथं निर्देशः ? इति वाच्यम्। ऐकशास्त्र्यवादिनामस्माकं सिद्धस्यापि धर्मत्वात् सिद्धब्रह्मजिज्ञासापि विवक्षितेति द्योतनाय तथा निर्देशः । तेन धर्मस्य अङ्गत्वमपि सिद्धम् ।

यद्वा–साङ्ग वेदाध्ययन कुर्वतः आपातप्रतीतिसत्वात् निर्णयार्थं कर्मविचारे इच्छा प्रवर्तते इति द्योतनायं धर्मजिज्ञासेति पदम् । कर्मनिर्णयानन्तरं पूर्वोक्तापातप्रतीतिबलादेव ब्रह्मविचारे इच्छा जायते इति सूचनार्थं ब्रह्मजिज्ञासेति ।

ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासा । ब्रह्मण इति कर्मणि षष्ठी । कर्तृकर्मणोः कृति इति विशेषविधानात् इति श्रीभाष्यम् । ननु जिज्ञासाशब्दः टाबन्तः, न तु कृदन्तः । ज्ञानशब्दो हि कृदन्तः । अत्र

जिज्ञासाशब्द एव श्रूयते । अतः कथ कर्तृकर्मणोः कृति इति कर्मणि षष्ट्याश्रयणं ? उच्यते–जिज्ञास् इति सनन्तात् 'अ प्रत्ययात्' इति सूत्रेण अकारे कृत्प्रत्यये जाते अदन्तात् जिज्ञासशब्दात् 'अजाद्यतष्टाप्' इति सूत्रेण टापि जिज्ञास आ इति जाते अकः सवर्णे दीर्घः इति सवर्ण दीर्घे च जिज्ञासा इति निष्पद्यते । अयमेकादेशः अन्तादिवच्च इति सूत्रेण पूर्वस्य शब्दस्य अन्ततां भजन् तन्निष्ठं कृदन्तत्वादिकं च भजते। अतो जिज्ञासाशब्द. कृदन्तः इति कृद्योगे च षष्ठी स्वरसत एवात्र प्रवर्तते । नैष दोषः ।

2. जन्माद्यधिकरणे–3. शास्त्रयोनित्वाधिकरणे च

1. क्षित्यङ्कुरादिकं सकर्तृकं, कार्यत्वात् घटवत् इत्यत्र घटस्य ईश्वरकर्तृकत्वासिद्धे. सर्वजगत्कारणत्वं कथं ब्रह्मणः नैयायिकमते ?।

उपदानत्व निमित्तत्व सामानाधिकरण्याभावे कथ घटेश्वरसंयोगे ईश्वरस्योपादानत्व इति पूर्वः पक्षः ।

ईश्वरानुमानविचारः

अनुमानेनेश्वरसिद्धिमभ्युगच्छन्ति नैयायिका । तथाहि — क्षित्यङ्कुरादिकं सकर्तृकं कार्यत्वात् घटवत् इत्यनुमानप्रयोगः तेषां मते । घटादिषु सावयवत्वादिना कार्यत्वदर्शनेन कुलालकर्तृकत्वं दृष्टम् । तद्वदेव सावयवत्वादिना क्षित्यङ्कुरादीनां कार्यत्वात् तद्वत्त्वेन तेषु कर्ता कश्चन सिध्यति । अतः पक्षधर्मताबलेन उपादानोपकरणाभिज्ञः विलक्षणः सर्वज्ञः सर्वशक्तिः ईश्वरस्सिध्यतीति ते अभिप्रयन्ति ।

ननु सर्वकर्तुः ईश्वरस्य कथमनेनानुमानेन सिद्धिः ? सपक्षे घटादौ कुलाल कुविन्दादेः कर्तृत्वेन क्षित्यादि कतिपयविषय एव कर्तृत्वेन ईश्वरसिद्धेः कतिपयकार्यनिरूपितकर्तृत्वस्यैव ईश्वरे सभवात् इति । अतः सर्वजगत्कार्यनिर्माणचतुरस्यासिद्धिप्रसङ्गः । यदि घटपटादीनामपि पक्षे अन्तर्भावः इष्यते, तर्हि दृष्टान्तासिद्धि । वस्तुतः घटादिकर्तृत्वस्य कुलालादौ दृष्टत्वेन पक्षान्तर्भावः अनुपपन्नश्च । घटादिकार्यनिरूपितकर्तृत्वस्य ईश्वरे असंभवश्च । न च ईश्वरसिद्धिः केवलं

आवश्यकी। घटपटादिषु अन्यस्य कर्तृत्वेपि क्षित्यादिषु कर्तृत्वेन सिध्यतः ईश्वरत्वमिति तावन्मात्रेणेश्वरसिद्धेः इति वाच्यम्। कार्यत्व बलेन क्षित्यादिषु सकर्तृकत्वसाधनेन ईश्वरसिद्धावपि तस्य सर्वजगत् कारणत्वासिध्या पूर्वोक्तदोषानपायात्। जन्माद्यस्य यत. इत्यनेन हि सर्वजगत्कारणत्व ब्रह्मणः स्थापितम्। न तु कतिपयकार्यनिरूपित-कारणत्वम्। अतस्तत्खण्डनाय प्रवृत्तेऽस्मिन् अधिकरणे सर्वजगत्कारण-त्वाश्रयस्यैवानुमानगम्यत्वकथनेन शास्त्रस्य अर्थवत्त्वाभावप्रतिपाद-नावश्यकत्वात्।

न च सर्वजगत्कारणस्य वा कतिपयकार्यनिरूपितकारणस्य वा सिद्धिरस्तु, तावतापि ईश्वरसिद्धेः शास्त्रस्यार्थवत्त्वं निराकृतमेव भव-तीति वाच्यं; तथा सति अखिलजगन्निर्माणकर्तु....इत्यादि पूर्वपक्षोप-संहार-श्रीभाष्य सूक्त्यस्वारस्यापत्तेः। तत्र सर्वजगत्कारणत्वेनैव ईश्वरस्य अनुमानसिध्यभिप्रायात्। न च साध्यभूत सकर्तृकत्व हि कर्तृ-विशिष्टत्वम्। तत्र कर्तृत्व निमित्तत्वरूप तच्च संङ्कल्पाश्रयत्व, एतादृशकर्तृवैशिष्ट्य क्षित्यादाविव घटादिष्वपि ईश्वरमादायैवोपपद्यते, ईश्वरस्य सर्वकार्येष्वपि निमित्तत्वात्। अतस्सर्वकार्यनिमित्तत्वरूपं कारणत्वं ईश्वरे सभवत्येवेति न दोष इति वाच्यम्। तथासति कुला-लादिकमादाय सकर्तृकत्वं घटादौ नास्तीति दृष्टान्तस्य साध्यविकलता स्यात्। तत्रापि ईश्वरस्यैव निमित्तत्वाभ्युपगमात्।

न च कार्यसामान्यं प्रति ईश्वरस्य कालस्य अदृष्टस्य च निमित्त-त्वरूपकारणत्वं, घटादिकार्यविशेष प्रति कुलालादे निमित्तत्वञ्चेत्युप-गमात् न दृष्टान्तस्य साध्यविकलता इति वाच्यम्। घटादिषु कुल-लादेः यादृशं निमित्तकारणत्वं तादृशस्य कारणत्वस्य ईश्वरेऽसिद्धि प्रसङ्गात्। ईश्वरनिमित्तकारणकेऽपि घटादौ ईश्वरव्यतिरिक्तस्य कुला-लादे. कारणत्ववत् क्षित्यादावपि अन्यस्य निमित्तकारणस्यावश्यकत्वात् तमादाय सकर्तृकत्वोपपत्या सिद्धसाधनात्। न हि घटादौ कुलालादि-रिव क्षित्यादौ निमित्तकारणत्वेन ईश्वरान्यः नास्तीति वक्तु शक्यते इति चेत्, उच्यते—

कारणं त्रिविधं भवति—समवायिकारण, असमवायिकारणं, निमित्तकारणमिति । यत्समवेतं कार्यमुत्पद्यते तत् समवायिकारणम् । समवायिकारणे प्रत्यासन्न कारणं असमवायिकारणम् । एतदुभयभिन्नं कारण निमित्तकारणमिति तत्तल्लक्षणं बोध्यम् । तत्रैकस्मिन् कार्ये एकं भवति, द्वे त्रीणि वेति न तत्र नियमः । घटादिषु अनेकस्य दर्शनात् । (एकस्यैव निमित्तत्वं द्वयोरेव त्रयाणामेव इति नियमो नास्ति ।) यथासम्भवं कारणत्वस्य वक्तव्यत्वात् । समवायिकारणभिन्नस्य असमवायिकारणभिन्नस्य निमित्तत्वमित्युक्तत्वात् तत्तत्कार्यस्वभावपर्यालोचनया कारणसमवधानपर्यालोचनया च निमित्तकारणत्वे संख्यानियमो नास्ति । अदृष्टस्य कालस्य ईश्वरस्य च सर्वत्र निमित्तकारणत्वं कार्यत्वावच्छिन्न कार्यतानिरूपित कारणताश्रयत्वरूपं निमित्तत्वं एतेषां त्रयाणां अविशिष्टम् । तत्र चेतनस्य निमित्तत्वे तत्सङ्कल्पाश्रयत्वरूपं, अन्यत्र हेतुत्वमात्र । जगत्सृष्टिदशायां परमाणौ प्रथमत. क्रिया, ततो विभागः ततः पूर्वसंयोगनाश , ततः उत्तरसयोगोत्पत्तिरिति क्रमेण द्व्यणुकोत्पत्ति ततः क्रमेण जगदुत्पत्तिः । अत्र प्रथमतः क्रियोत्पत्तौ, अदृष्टस्य कालस्य ईश्वरस्यैव हेतुत्व, ईश्वर· जगदुत्पत्यर्थं प्रथमतः परमाणौ क्रिया जायतामिति सङ्कल्पयति । घटादौ कुलालादिरिव नात्र ईश्वरान्य. कश्चित् सङ्कल्पयति । अतस्तत्र एकस्यैव निमित्तत्वम्। सृष्ट्यादावन्यस्याभावात् । अतः एकेन निमित्तकारणेन वा द्वाभ्यां कारणाभ्या वा त्रिभिर्निमित्तकारणैर्वा यथासंभव कार्योत्पत्तिः अङ्गीकरणीयेति सिध्यति । अतः क्षित्यादिपक्षे ईश्वरान्यस्य, घटादौ कुलालादेरिवाभावात् न तमादाय सिद्धसाधनम् ।

ननु तदुभयभिन्न कारण निमित्तकारणमिति लक्षणं न संभवति । घटेश्वरसंयोगे ईश्वरस्यापि समवायिकारणत्वात् । सयोगस्य द्विनिष्ठत्वेन ईश्वरगतत्वात् । कथ तत्र तस्य निमित्तत्व इति चेत् । ब्रूमः—समवायिकारणत्व, असमवायिकारणत्व एतदुभयभिन्ना या कारणता तदाश्रयत्वं निमित्तत्वमिति लक्षणपरिष्कारात्। यद्यपि ईश्वरे समवायि

कारणता निमित्तकारणता चास्ति, तथापि तयोः नैकरूपता। तन्निष्ठ समवायिकारणत्वं अन्यत्, तन्निष्ठं निमित्तत्वं चान्यत्। एकस्मिन्नेव फले रूपरसयो. विद्यमानत्वेऽपि रूपनिष्ठाधेयतानिरूपिताधिकरणता अन्या। रसनिष्ठाधेयतानिरूपिताधिकरणता अन्या। तद्वदेवात्रापि न निमित्तकारणलक्षणस्य ईश्वरेऽसंभव इति।

7. अन्तराधिकरणे–

हिरण्मय पुरषो दृश्यते—सूक्ष्मचेतनाचेतनशरीरकस्यैव कारणत्वादस्य कथं कारणत्वं ? अत्र हि हिरण्यश्मश्रुःहिरण्यकेशः इत्यादिना अप्राकृतदिव्यमङ्गलविग्रहविशिष्टतोच्यते। एव चाप्राकृतशरीरकत्वमुक्त भवति। सूक्ष्माचेतनशरीरकब्रह्मणः कारणत्वोक्तौ सूक्ष्मप्राकृतशरीरकस्य ब्रह्मणः कारणत्वं लभ्यते। अतो विरोधः इति चेत् मैव। सर्वस्यापि वस्तुनः ब्रह्मशरोरत्वमस्मत्सिद्धान्तः। एवं च सर्ववस्तुनः ब्रह्मणश्च सर्वदा सर्वथाचापृथक्सिद्धेः सर्वविशिष्टत्वमायाति। ब्रह्मण. सूक्ष्मचेतनाचेतनाविशिष्टत्वोक्तिमात्रेण कि भोगविभूतिशरीरकत्वमपसरति ? कारणभूत सूक्ष्मशरीरकं ब्रह्मैव अप्राकृतदिव्यविग्रहविशिष्ट च भवति। न तावता तस्य कारणत्वहानिः। नहि ब्रह्मणो देवदत्तशरीरकत्वे यज्ञदत्तशरीरकत्वस्यविरोधः। अतः सूक्ष्मशरीरकमेव ब्रह्म वस्तुतः अप्राकृतविग्रहविशिष्ट चेति नात्र विरोधप्रसक्तिः। एकगुणविशिष्टं ब्रह्म अपरगुणविशिष्टमपि भवतीत्युक्तौ कथं विरोधशङ्का।

11. इन्द्रप्राणाधिकरणे

'प्राणस्तथाऽनुगमात्।' सूत्रे इन्द्रशब्दाभावेपि 'प्राणोऽस्मि'... इति इन्द्रेणोक्तत्वात् अस्मीत्यनेन अहमर्थस्य इन्द्रस्य लाभात् इन्द्रप्राणशब्दनिर्दिष्टः इत्युक्तम्। यद्यपि प्राणाधिकरणे प्राणशब्दस्य परमात्मपरत्वं निर्णीतमिति प्राणशब्दमात्रे सशयो न भवति, तथापि अस्मीतिलब्धाहमर्थेन्द्रसामानाधिकरण्यात् प्राणोपकरणकः इन्द्रः अत्र प्रतीयते इति पूर्वपक्षाशयः। 'जीवमुख्यप्राणलिङ्गात्' इत्यत्र जोवस्यापि कीर्तनात् 'प्राणोऽस्मि प्रज्ञात्मा' इति विषयवाक्यमुपादाय जीवविषयकपूर्वपक्षः कृत·।

ननु जीवलिङ्गात् जीवत्वशङ्का युक्ता, मुख्यप्राणलिङ्गं कथं जीवत्वसाधकं प्राणत्वसाधकं हि तत् ! न हि जीवलिङ्गसद्भावात् परमात्मैवेति कश्चिद्ब्रूयात् इति चेत् प्राणलिङ्गसद्भावात् प्राणप्रतीतेः प्राणवतो जीवस्यैवात्र प्रकरणवाच्यत्वमित्याशयात् । यद्वा—अध्यात्म सबन्धभूयस्त्वसत्वेन परमात्मपरत्वमिति कथं निश्चयः ? जीवलिङ्ग प्राणलिङ्गाना सत्वादित्यत्रैव पूर्वपक्षप्रवृत्तिः न तु जीवत्वसाधनेऽपि इति । अत एव भाष्ये अवतरणे, 'जीववाचिशब्दैः परमात्माभिधानं किमर्थं ? इत्यत्राह' इति भाषितम् ।

12. सर्वत्रप्रसिद्धयधिकरणे—

'सर्वं खल्विदं ब्रह्म'...। ननु सर्वस्य ब्रह्माभिन्नत्वे तज्जत्व तल्लत्वयोः उपपादकत्वेऽपि तदनत्वस्य कथमुपपादकत्वम् ? विशिष्ट ब्रह्मणः विशिष्टस्य जातत्वात्, तत्रैव लयाच्च, मृतो जातस्य घटस्य मृदि लीयमानत्वादभेदः उपपद्यते, न तु तदनत्वस्य । न च तदधीनत्वस्य तदधीनजीवनवत्वस्यान्तर्यामित्वं विनाऽसंभवात् चेतनाचेतनयोः अन्तर्यामित्वं ब्रह्मणः सेत्स्यति । तच्चापृथक्सिद्धिरूपवैशिष्टच तेन च कार्यकारणभावः इति तज्जत्वतल्लत्वयोरपि तदनत्वमुपपादकमिति वाच्यम् । एवं परम्परोपपादकत्वेऽपि साक्षादभेदस्थापने अहेतुत्वस्यानपायात् । तज्जत्वतल्लत्वोपपादनसमये सर्वं ब्रह्म इत्यस्य विशिष्टपरत्वं, तदनत्वोपपादने विशेष्यगात्रपरत्वमित्यस्यास्वारस्यात् । अतः शरीरेष्विव य प्रजाना प्रत्यादिदेशाविनय विनेता' इतिवत् अन्तर्यामित्व विनाऽपि तदनत्वसंभवात् । तस्यान्तर्यामित्वाक्षेपकत्वमपि नैव भवति । अपि च तज्जत्व तल्लत्वोक्त्यैव यादवप्रकाशादि मत इव स्वरूप परिणामा संभवसिद्धे विशिष्टकरणत्वप्रतिपादनावश्यकत्वात् अपृथक्सिद्धिरूपवैशिष्टचान्तर्यामित्वादिसिद्धेश्च तदनत्वस्यानावश्यकत्वमित्यपि । अत्रोच्यते—विशिष्टस्य कारणत्वं तत्रैव लयः इति च निर्विवादम् । रक्षणमपि विशिष्टस्यैव । 'यतो वा इमानि' इत्यादि वाक्ये, येन जातानि जीवन्ति' इति वाक्यपरमपि विशिष्टपरमेव

किल । एवं च विशिष्टानत्वं नाम रक्षणम् । तच्चोत्तरकालानुवृत्तिः। सा च स्वस्यैवेति अभिन्नत्व सुतरां उपपद्यते । सूक्ष्मब्रह्म स्थूलमासीत्, तदा, एवमेव किञ्चित्कालपर्यन्त स्थास्यामिति सङ्कल्पितवत् । स्वस्योत्तरकालानुवृत्तेः स्वस्यैव कारणत्वात् तदनत्वस्योपपादकत्वमपि । अत एव स्मृतिवचनमपि उपपन्नम्—एवं हि पुराणवचनम् ।

स एव सृज्य स च सर्गकर्ता स एव पात्यत्ति च पाल्यते च ।
ब्रह्माद्यवस्थाभिरशेषमूर्तिः विष्णुर्वरिष्ठः वरदो वरेण्य ॥ इति ।

प्रथमयोजनाया — 'मनोमयः प्राणशरीरनेता,' 'मनोभयः । अमृतो हिरण्मय. ।' इति वाक्यद्वयस्योपादानोपपत्तावपि, मनसा तु विशुद्धेन' 'मनोऽभिकल्पतः' इति वाक्यद्वयोपादानं न शोभनम् । मनोमयपदघटितवाक्योपादानस्यैव युक्तत्वात् । न हि मनोमयपदस्य विशुद्धमनोग्राह्यत्वमित्यर्थं पूर्वपक्षी अङ्गीकरोति । सामान्यतः मनोमयपदबोधितस्य कस्यचिदर्थस्य परमात्मसाधारण्येनान्यत्र श्रुतत्वात् इदमपि प्रकरणं ब्रह्मपरमित्येतदनन्तर मन उपकरणकत्वरूप मनोमयत्वं कथं परस्मिन्निति शङ्कायां विशुद्धमनोग्राह्यत्वरूपस्य परमात्मन्युपपत्तिरित्येव वक्तव्यत्वात् इति । तत्रोच्यते—मनोमयत्व विशुद्ध मनोग्राह्यत्वरूपमेवेति अर्थविवरणार्थं एतादृशमनोमयत्वं ब्रह्मण्यन्यत्र श्रुतमिति बोधनार्थं च तद्वाक्योपादानमिति मन्तव्यम् ।

जीव सुखादि भोक्ता, कर्मसम्बन्धवत्त्वादिति, हेतु वैशेष्यादिति सूत्रविवक्षिते शरीरस्वामित्व उपाधिः सिद्धान्तेऽपि इति पूर्वपक्षी । सिद्धान्ती पुनः शरीरस्वामित्वरूपहेतो. कर्मसबन्धवत्त्वेन सोपाधिकत्वं इति वदति । अतः कर्मजन्य शरीरस्वामित्वमेव हेतुः इति वक्तव्यम् ।

28. आनुमानिकाधिकरणे

आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्त गृहीतेर्दर्शयति च । गृहीतेः इति न धातुनिर्देशः, ईक्षतेर्नाशब्दामित्यत्रैव । तथा सति 'गृह्यतेः' इति वक्तव्यम् । रूपकविन्यस्त—रूपितमित्यर्थः । रूपकं दृष्टान्तः, रूप्यतेऽनेनेति रूपकम् । स्वेन रूपवत् अन्यत् क्रियते ।

यत् अन्यत्र स्वगतरूपापादकं तत् रूपकं, दृष्टान्त इत्यर्थः। चन्द्र इव मुख इत्यादौ चन्द्रः स्वगताह्लादकरत्वरूप रूपवत्त्वं मुखे स्वयमुत्पादयतीति रूपकश्चन्द्रः। अत्र रथो रूपकः। रूपके—रूपकस्थाने (रथस्थाने), विन्यस्तं—शरीरं रूपकविन्यस्तम्। रूपकत्वेन रथत्वेन शरीरं इति वाऽर्थ ।

38. विलक्षणत्वाधिकरणे–

किं ब्रह्मस्वरूपस्यैवोपादानत्वं, उत विशिष्टस्य ? प्रथमे जगतः ब्रह्मस्वरूपस्य चात्यन्तविलक्षणत्वात् कथमुपादानत्वं ? द्वितीये विशेषाणांशं प्रति विशेषणांशस्य विशेष्याश प्रति विशेष्यस्य कारणत्वमित्युच्यते, उत विशेषणाशं प्रति विशेष्यांशस्यापि कारणत्वमिति। प्रथमे विशिष्टकारणत्वमनुपयुक्त तत्तदशेनैव तत्तत्कार्योत्पत्तेः। विशेष्यांशं प्रति विशेष्याशस्य कारणत्वस्यानावश्यकत्वात्। द्वितीये अत्यन्त विलक्षणत्वात् कथं कारणत्वमिति पूर्वपक्ष्याशयः। अत एव सिद्धान्ते विलक्षणयोः कार्यकरणभावप्रदर्शनपरं 'दृश्यते तु' इति सूत्रं सङ्गच्छते।

ननु विशिष्टं प्रति विशिष्टस्य कारणत्वं तदा भवति यदा विशेष्यान्वयिविधेयस्य विशेषणान्वयित्वमुच्यते। विशेष्यान्वयि कारणत्वस्य यदि विशेषणान्वयित्व चाभ्युगम्यते तदा विशिष्टं प्रति कारणत्वमनुपपन्नमेव, तदा उपलक्षणत्वमेव न तु विशेषणत्वं विशेषणत्वेनाभिमतस्य। श्रीमन्नारायणचरणौ...इति मन्त्रे श्रियः विशेषणत्वमुच्यते श्रीविशिष्टस्योपायत्व च। विशेष्यान्वयिनः उपायत्वस्य साक्षात् विशेष्ये नारायणे अन्वयः, तस्यैव विशेषणभूतश्रियां धर्मिपारतन्त्र्येण (स्वाश्रयाश्रितत्वसम्बन्धेन) अन्वयो वाच्यः। नो चेत् श्रियः उपलक्षणत्वमेव स्यात्। अतः सूक्ष्मचिदचिद्विशिष्टब्रह्मण· स्थूलचेतनाचेतनविशिष्टब्रह्मनिरूपितकारणत्वोक्तौ तादृशकारणत्वस्य साक्षात् ब्रह्मणि अन्वय इव धर्मिपारतन्त्र्येण सूक्ष्मचेतनाचेतनरूपविशेषणेऽप्यन्वयः एष्टव्यः। एव च विशिष्ट प्रति विशिष्टं कारणं, विशेषणं प्रति विशेषणं कारण विशेषण प्रति विशिष्टं विशेष्य च कारणमिति फलति। स्थूल

चिदचिद्विशिष्टब्रह्मनिरूपितकारणत्वस्य सूक्ष्मतादृशब्रह्मणि उक्तौ विशेष्यान्वयिनः कारणत्वस्य विशेषान्वयित्वनियमात् ब्रह्मनिरूपितकारणत्वस्य सूक्ष्मचेतनाचेतनयोरपि वाच्यतया तत्प्रति तयोः उपादानत्वप्रसङ्गः इति चेन्न—भाव्यवस्थावत प्रागवस्थायोगित्वमात्रं नोपादानत्वं तथासति आगामि प्रलयावस्था प्रति पूर्वभाविसृष्ट्यवस्थायाः पूर्वभावित्वेन तादृशावस्थाद्वयमादाय प्रलयावस्थापन्नब्रह्म प्रति सृष्ट्यवस्थापन्नब्रह्मण. उपादानत्वोपपत्तेः। किन्तु—भाव्यवस्थावतः प्रागवस्थायोगित्वे सति कारणत्वं उपदानत्वमिति कारणत्वघटित तत्। साक्षात् धर्मिपारतन्त्र्येण वा कार्यतावच्छेदककोटि घटकब्रह्मणि कारणतावच्छेदककोटिघटकचेतनाचेतनयो अवस्थायाद्वन्वयेन भाव्यवस्थावतः प्रागवस्थयोणित्वोपपादनेऽपि तत्प्रति तयोः कारणत्वस्याभावान्नोपादानत्वप्रसङ्गः। विशेषणांश प्रति विशेष्याशस्यकारणत्वं धर्मिग्राहकमानसिद्धामित्युपादानत्वमित्यदोषात् ।

ननु विशेष्याशस्य कारणत्वबोधक धर्मिग्राहकप्रमाणं कि ? तत्र सर्वस्यापि शब्दस्य विशिष्टपरत्वेन विशिष्टयो कार्यकारणभावप्रदर्शन तात्पर्यकत्वात् । अपि च, विशिष्टनिरूपितोपादानत्वस्य विशिष्टे हि भवद्भिरुच्यते । तच्च कारणत्वघटितमेव । विशिष्टस्थले विशिष्टान्वयिनो विशेषणान्वये सत्येव विशेषणत्वमिति निर्बन्धात् विशिष्टनिरूपितोपादानत्वस्यैव सूक्ष्मचेतनाचेतनायोर्भवतु इत्यापाद्यमानाया एवं समाधानस्यानुपपन्नत्वात् इति चेत् ? उच्यते—विशिष्टान्वयिनो विशेषणेऽप्यन्वय इति निर्बन्धाभावात् । तथापि विशेषणत्वस्यानुपपत्त्यभावात् । नीलमुत्पलमित्यादौ उत्पलविशिष्टे नीलत्ववैशिष्टचोक्तौ नहि नैल्यस्य नीलत्वविशिष्टत्वात्मकस्य विशेषणे उत्पलत्वेऽप्यन्वयः इष्यते । एव सोऽय देवदत्त इत्यत्रापि तत्कालवृत्तित्वविशिष्टदेवदत्ते एतत्कालवैशिष्टचोक्तौ तत्कालवृत्तित्वेऽप्यस्यान्वयः न होष्यते इति ।

शरीरवादः

यस्य चेतनस्येति शरीरलक्षणे नियाम्यत्वस्य शरीरे उक्त्वा नियमनकर्तृः चेतनत्वं सिद्धम् । नहि चैतन्याभाववान् शक्नोति ।

अतश्चेतनस्येति पद व्यर्थं इति चेत्–तथा सति धर्मज्ञानस्यापि जीव शरीरपरत्वापत्तिः । तस्य जीवनियाम्यत्वात् । न च चेतनस्येति पदोपादानेपि जीवस्य चेतनत्वात् चेतननियाम्यत्वं तस्यास्तीति वाच्यम् । ज्ञानस्य चेतननियाम्यत्वानङ्गीकारात् । चैतन्य विशिष्टस्य जीवस्य कथ चैतन्यनियमाकत्वं ? चैतन्यस्य चैतन्यविशिष्टनिरूपितनियाम्यत्वायोगात् । न हि घटस्य भूतलनिरूपितवृत्तित्वमिष्यते । अतः चेतनस्येति पदनिवेशात्—चैतन्यावच्छिन्नानुयोगिताकसम्बन्धप्रतियोगित्वमिति लक्षणे निविष्टं भवति । ज्ञानप्रतियोगिकसम्बन्धश्च न ज्ञानावच्छिन्नानुयोगिकः । न चैवं परमात्मान प्रति ज्ञानस्य शरीरत्वं न स्यादिति वाच्यं तदीयधर्मभूतज्ञानस्य तच्छरीरत्वानाङ्गीकारात् । जीवधर्मज्ञानस्य तु तच्छरीरत्वमिष्यते । परमात्मीयज्ञानविशिष्टनिरूपितनियाम्यत्वस्य जीवज्ञाने सत्वात् । स्वविशिष्टनिरूपितनियाम्यत्वस्यैव स्वस्मिन्नसंभवात् ।

प्रधानप्रतितन्त्रविचारः

यस्य चेतनस्येति प्रथमलक्षणे गुणक्रियादिषु अतिव्याप्तिपरिहाराय द्रव्यपदनिक्षेप इति ।। तदिदमनुपपन्न—

1 नियन्तु शक्य इत्यस्य सङ्कल्पाधीनव्यापारवत्तया कर्तुमित्यर्थात् तादृशव्यापारस्य प्रवृत्तिनिवृत्तिरूपक्रियारूपत्वात् द्रव्यस्यैव क्रियावत्त्वेन गुणस्य क्रियायाश्च तदभावेन च अतिव्याप्त्यभावात् ।

2 चेतनस्येति पदमपि व्यर्थम् । ज्ञानस्य सङ्कल्परूवज्ञानाधीनव्यापारवत्त्वाभावात् । न हि स्वस्यैव स्वाधीनव्यापारवत्वम् । प्रयोज्यव्यापारवतः प्रयोजकस्यचाभिन्नत्वात् । अतो नातिव्याप्तिः ज्ञाने ।

3 जीवं प्रति जीवस्यैव शरीरत्वापत्तिः । देवदत्तः खलु अकृत्यकरणे प्रवृत्तः अदृष्टवशात् सञ्जातमतिः स्वात्मान ततो निवर्तयति । स्वसङ्कल्पाधीनव्यापारवत्त्वस्य स्वस्मिन्नेव सभव इति ।

4 एव परमात्मान प्रति परमात्मनः शरीरत्वापत्तिश्च । यतो विशिष्टस्य विशिष्टं प्रति कारणत्वम् । 'बहुस्यां प्रजायेय' इति बहु-

भवनकारणात् स्वनिरूपितनियमनविषयत्वस्य स्वस्मिन्नेव सम्भवात्। 'यथोर्णनाभिः सृजते गृह्णते च...' इत्युक्त्या ऊर्णनाभि प्रति तस्यैव शरीरत्वापत्तिश्च। 'स एव सृज्य . स च पाति' इति नियमनाश्रयत्व-नियमनकर्तृत्वयो प्रतीतेः। अन्यथा उपादानत्वानुपपत्तिः।

5 प्राणेन्द्रियाणामपि जीवं प्रति शरीरत्वापत्ति। जीवस्येद शरीरमितिवत् प्राणः जीवस्य शरीरमिति न व्यवह्रियते। तेषामपि जीवनियाम्यत्वात्। न च जीवमुक्त्यनन्तर तेषां जीवेन परित्यागात् यावत्सत्तं न नियाम्यत्व इति वाच्यम्। एककल्पमुक्तस्य यावत्सत्त तन्नियाम्यत्वानपायात् त प्रति शरीरत्वापत्तेः दुर्निवारात्। न च जीवस्य देहसृष्टेः पूर्वमेव समष्टिदशायां सत्वात् न यावत्सत्तं नियाम्यत्वं तेषा सभवतीति वाच्यम्। तथासति शरीरे लक्षणसमन्वयस्यैवासभवात्। देह खलु चतुर्विंशतितत्त्वमय। अवयवातिरिक्तावयवोति नास्माभिः अङ्गीक्रियते। एव च देहस्य भूतप्राणेन्द्रियसमुदायरूपत्वेन यावत्सत्त इन्द्रियादीना जीवेनानियाम्यत्वमेवेति लक्षणस्यैवासंभव इति।

6 स्थावरादौ जीवनियाम्यत्वाभावेन अव्याप्तिश्च। न च तत्रापि सूक्ष्मतया नियमनादेः अस्माभिः दुर्ग्रहस्य सत्त्वमेवेति वाच्यम्। तथापि पाषाणादौ तद्भावस्य सर्वथानुपपत्तेः तत्राव्याप्तेः।

7 अपि च देहशब्दवत् शरीरशब्दस्यापि अवयवव्युत्पत्त्या विशरणस्वभावार्थकत्वेन, 'यस्य पृथिवी शरीर' इत्यादौ विशरणस्वभाववती इत्यर्थात् सर्वेषामपि भगवदधीनविशरणस्वभावत्वमेव बोध्यते लोकसिद्धशरीरत्वाबोधनात् चेतनाचेतनवस्तुजातस्य भगवच्छरीरत्वासिद्धि। 'यत्यात्माशरीर' मित्यादावपि भगवत्सङ्कल्पेन जीवज्ञानस्य विशरणमिति विवक्षयाऽदोषात्।

8. भूतसङ्घातलक्षणस्य प्रसिद्धस्य जीवशरीरत्वमिव भगवत् शरीरत्वमपि (परम्परयेव) साक्षात् अङ्गीकुर्वता भवतां 'न भूतसङ्घसंस्थानो देहोऽस्य परमात्मनः' इति श्रुत्युपपत्तिः कथ ? अप्राकृत-

देहस्येवास्यापि भगवच्छरीरत्वाङ्गीकारात् । अन्यथासर्वशरीरत्वासिद्धि ।

9 सर्ववस्तुशरीरकत्वं वदतां भवता कुतो गुणादिशरीरकत्वानभ्युपगमः? प्राणेन्द्रियपृथिव्यादिवत्तेषामपि तथात्वे किं बाधकम्? घटरूपस्यापि घटशरीरत्वापत्तिस्तु न भवति, चेतनस्येति विशेषितत्वात् । जीव प्रति घटरूपस्य शरीरत्वापत्तिश्च न । जीवेन सार्वकालिक नियमनाभावात् । शरीरगतरूपस्य (गुणादेः) जीवशरीरत्व स्यादिति चेत् चेतनस्येति पदानुसारण्येन चेतननिष्ठविशेष्यतानिरूपित प्रकारताकत्वलाभेन वारणात् इति चेत्, जीववदुपपत्तेः । लोकमर्यादां विहाय वेदोक्तार्थस्पर्धालुभिः निमित्तोपादानत्वादि स्वीकारवत् एतेषामप्यङ्गीकारसभवादिति ।

अत्रोच्यते—

1 गुणक्रियादिष्वतिव्याप्तिपरिहाराय द्रव्यत्वस्य लक्षणघटकत्वे तस्य चेतनाचेतनसाधारण्यात् नियाम्यत्वस्य चेतने एव संभवात् अचतने द्रव्ये घटादौ नियाम्यत्वस्याभावात् तत्र शरीरलक्षणस्याव्याप्ति । देवदत्तनियाम्यो यज्ञदत्त इति व्यवहारवत् घटो देवदत्तनियाम्य· इति न हि व्यवह्रियते । चेतनगतत्वान्नियाम्यत्वस्य । प्रधानादेश्चेतनस्य नियाम्यत्वाभावादेव हि कर्तृत्व निषिध्यते । सति च नियाम्यत्वे भोक्तृत्वमपि स्वीकर्तुं शक्यते 'स्वर्गमोक्षादि फलस्य भोक्तारमेव कर्तृत्वे नियुञ्जते । न ह्यचेतनस्य कर्तृत्वेऽन्यो नियुज्यते' इति श्रीभाष्यम् । अतः अचेतनेषु शरीरलक्षणस्याव्याप्तिः । यदि च चेतनैकान्तस्य नियाम्यत्वस्य नात्र विवक्षण परं तु चेतनाचेतनसाधारणस्यैव नियाम्यत्वस्य । स्वाधीनत्रिविधचेतनाचेतनस्वरूपस्थिति प्रवृत्तिभेदत्वस्य ब्रह्मणि स्वीकारात् चेतनस्वरूपस्थितिप्रवृत्तिभेदस्य भगवदधीनत्ववत् अचेतनस्वरूपस्थितिप्रवृत्तिभेदस्यापि भगवदधीनत्वात् अचेतनस्यापि प्रवृत्त्यादिसत्वात् तत्प्रयुक्तं नियाम्यत्वं सङ्कल्पाधीनव्यापारत्वरूपं संभवतीति नाव्याप्तिः । अचेतन धर्मभूतज्ञानस्य

प्रवृत्तिः विषयप्रकाशकत्व, शरीरादिप्रेरकत्व, सङ्कोचविकासवत्व, आनुकूल्यप्रातिकूल्यप्रकाशमुखद्वारकभोगरूपावस्थावत्वादिः । एवं त्रिगुणद्रव्यस्य प्रवृत्तिः । समविषमरूपेण परिणामसन्तत्याश्रयत्व देहेन्द्रियादिरूपेण तत्तद्व्यापारजनकत्व बद्धानां रजस्तमोद्वारा तत्त्वाच्छादकत्वं सत्वविवृद्धया यथावदर्थप्रकाशकत्वादि । एता. सर्वा अपि ईश्वरसङ्कल्पानुरूप विचित्रपरिणामादिरूपाः इति तासा भगवदधीनत्वं इति न दोषः इति मन्यसे, तर्हि गुणादीना प्रवृत्तिरपि चेतनसङ्कल्पाधीना भवितुमर्हन्तीति न दोष. । आम्रफलादिषु विद्यमान रूपरसादिकं हि आम्रफलभक्षणे भोक्तारं प्रवर्तयति । एतादृशप्रवृत्तिप्रयोजकत्वरूप प्रवृत्तिस्तस्य । एव स्त्र्यादिविषये तच्चेष्टा कामुक स्ववश करोति इति चेष्टाया अपि तत्तदनुगुणा प्रवृत्ति. विद्यत एव । वस्तुतः सर्वस्यापि ईश्वरसङ्कल्पानुरूप स्वभावत्वात् सर्वमपि भगवदधीनम् । चेतनद्रव्यगतप्रवृत्तेरिव जडद्रव्यस्यापि स्वानुगुणप्रवृत्तेस्संभवात् । तत् तत्पदार्थगत स्वभावस्यैव तत्तत्पदार्थ प्रवृत्तिरूपत्वमिति ।

2 चेतनस्येति पदमपि न व्यर्थम् । जानाति इच्छति यतते करोति इति हि क्रमः । ज्ञानेच्छाप्रयत्नकृतीना सर्वासामपि ज्ञानरूपत्वमेव । तथापि इच्छारूप ज्ञानाद्योना इच्छारूपज्ञानाधीनप्रयत्नज्ञानं, तदधीना च कृतिः । अत एकमेव ज्ञान तत्तदवस्थाविशेषापन्नं कार्यकारणरूपं भवति । अतस्सङ्कल्पाधीनव्यापारवत्व ज्ञाने सुवचमिति । अत एव हि स्वसङ्कल्पाधीनव्यापारवत्वस्य स्वस्मिन् सभवः इति हेतुमुपजीव्य जीव प्रति जीवस्य शरीरत्वापत्तिः आशकिता ।

3 स्वभिन्नत्वविवक्षणात् न स्वंप्रति स्वस्य शरीरत्व, एतेन ।

4 चतुर्थाशङ्कापि अपोदिता । ज्ञाने शरीरलक्षणव्यावृत्त्यर्थं ज्ञानभिन्नत्व प्रतिनिधि चेतनपदप्रयोगः ।

5 भूतेन्द्रियप्राणसमुदायरूपदेहस्य यावत्सत्तं जीवेनानियाम्यत्वमिति लक्षणासंभवोपपादनमयुक्तम् । शरीरात् जीवस्योत्क्रान्त्यनन्तरं

तस्य न जीवशरीरत्वम् । मृतशरीरं च चेतनवियोगसमय एव विशरितुमारब्धम् । क्षणान्तरे च विशीर्यते । पूर्वशरीरतया परिकल्पितसङ्घातैकदेशत्वेन च तत्र शरीरत्वव्यवहारः इति श्रीभाष्ये अनुगृहीतम्। एवमेव जीवस्य भूतप्राणेन्द्रियसमुदायरूप शरीरसबन्धात्मरूपकव्याकरणसमये एव तत्र शरीरत्वव्यवहारः ततः पूर्वं न तत्र जीवशरीरत्वव्यवहारः । भूतप्राण इन्द्रियादीनां पृथक् पृथक् अवस्थितेः । यदा च शरीरत्वव्यव्यवहारः तदा प्रभृति यावत्सत्तं नियमेन धार्यत्वमस्तीति न कस्यचिदपि दोषस्यावकाशः ।

6 पाषाणदावपि नियाम्यत्व सुदुर्ग्रहमस्ति । यथा रुग्णशरीरे-नियाम्यत्वं प्रतिबद्ध कर्मवशात् । तथैव प्रबलकर्माधीनः तत्प्रतिबन्धः ।

7 शरीरशब्दस्य विशरणार्थकत्वमभ्युगम्य 'यस्य पृथिवी शरीर' इत्यादिषु निर्वाह न युक्तः । न केवलं शरीरशब्दमात्रप्रयोगो दृश्यते तनुकायप्रभृतिशब्दैरपि अस्यार्थस्य बोधनात् । यदम्बुवैष्णवःकायः तत्सर्व वै हरेस्तनुः इत्यादि हि स्मर्यते । अस्यार्थस्यान्यथानयन माभूदित्यर्थं तत्वस्थितिज्ञापनाय च हि पर्यायशब्दप्रयोगः कृतः ।

8 यो रेतसि तिष्ठन् इत्यादिना सर्वत्र स्थितस्य परस्य सर्वात्मतस्थापन्नाचेतनशरीरकत्व नैव निषिध्यते । उभयविभूतिशरीरकत्वात्तस्य । अतो जीवशरीरभूतसङ्घसंस्थान प्रत्यपि ईश्वरस्य शरीरित्वरूपमात्रमस्त्येव । परं तु परस्य यो देहः अप्राकृतरूपः न सः भूतसङ्घसंस्थानरूपः इत्येवात्र प्रतिपाद्यते । अपि च कर्मजन्य सुखदुःखादिहेतुभूतदेह एवात्र भूतसङ्घसंस्थानशब्देन व्यपदिश्यते, स देहोऽस्य अपहतपाप्मनो नास्तीति तात्पर्यम् ।

9 गुणादीनां ब्रह्मशरीरत्वमस्य निषेध्यं इत्यत्र नास्माकमाग्रहः । प्राणेन्द्रियपृथिव्यादिवत्तैरपि अपराधाकरणात् । पर तु लोकमर्यादामभ्युपगम्य सर्वं स्थापनीयम् । लोकव्यवहारश्च कथमस्तीति पर्यालोचने सर्वापि व्यवस्था हृदयं भवतीति । अतो लोकानुसारस्य अवश्याङ्गीकार्यत्वात् यत्र शरीरव्यवहारः तत्रैव तन्निर्वहणमावश्यकं अत्यन्त-

विलक्षणाकारेषु गजसर्पवृश्चिकपिपीलिकादेवमनुष्य जङ्गमस्थावरादिषु शरीरशब्दप्रयोगदर्शनात् सर्वत्रमुख्यतया निर्वाहार्थं हि कस्यचित् शरीरशब्दप्रवृत्तिनिमित्तत्वमास्थेयमिति श्रीभाष्यकाराः शरीरलक्षणं प्रोचुः । लोके च शरीरशब्दः घटादिशब्दवत् एकाकारद्रव्यनियतवृत्तिमनासादित क्रिमिकीटपतङ्गसर्पनर पशुप्रभृतिषु अत्यन्तविलक्षणाकारेषु द्रव्यष्वगौणः प्रयुज्यमानो दृश्यते । तेन तस्य प्रवृत्तिनिमित्तव्यवस्थापन सर्वप्रयोगानुगुण्येनैव कार्यम् इति श्रीभाष्यसूक्तिः । अत्र द्रव्येषु इति पदप्रयोगात् द्रव्यस्यैव शरीरत्व लोकव्यवहारसिद्धमित्यवगम्यते । लोके च गुणादि कस्यचित्प्रति शरीरमिति व्यवहारो न दृश्यते । दृश्यते च द्रव्ये शरीरत्वव्यवहार । अतः औचित्यमनुसृत्य गुणादिव्यावृत्तये द्रव्यत्वस्य लक्षणे निवेशः । अतो निरवयवे रूपे कथमन्तःप्रवेशः इति चोद्य जीववदुपपद्यते इति समाधानं च नात्र प्रसरति । लोक प्रसिद्धं च एकस्यैवनिमित्तोपादानत्वादि । यथोर्णनाभिः सृजते इत्यादि लोकप्रसिद्धिः श्रुत्यैव सूचिता । अतो लोक तदनुमान श्रुति प्रसिद्धमर्थं न परित्यजाम विरुद्धं च नाङ्गीकुर्मः । अचेतनानां स्वसमुचितकार्यकरणे कर्त्रधीनत्वमभ्युपयद्भिरेवास्माभिः सकर्तृकत्वसाधकेश्वरानुमाननिषेधः कृतः । सर्वकृत् नानुमातु नापह्नोतुं च शक्यः तदुभयनियमादर्शनात् इति सारावल्यां प्रदर्शितरीत्या अनुमानेन परमात्मस्थापनं वा निषेधो वा न सिध्यति । अत उक्तदूषणानामप्रसरात् प्रधानप्रतितन्त्रवादो नानुपपन्नः इति ।

(न विलक्षणत्वाधिकरण)

अभिमानिव्यपदेशस्तु ... ...अत्र पृथिव्यादिषु चैतन्याभ्युपगमे **किमत्र पूर्वपक्षिणः साधकम् ? साजात्योपपादनायेतिचेत्**—ज्ञानवत्वेन कारणब्रह्म कार्यचेतनाचेतनयोः साजात्येऽपि अल्पज्ञत्व दुःखमिश्रत्व स्वरूपविकारसर्वज्ञत्वादि वैषम्यस्यानिवारणात् इति चेत्, सत्यम् । ज्ञानवत्त्वमात्रमुपजीव्य साजात्योपपादन कथञ्चित् सुशकमित्यभिप्रायेण पूर्वपक्ष्यवतारात् ।

तादात्म्य अपृथक्सिद्धयन्यतरसम्बन्धावच्छिन्न कार्यतानिरूपित तादात्म्यसम्बन्धावच्छिन्नकारणताश्रयत्वं उपादानत्व विशिष्टस्य कारणत्वोक्तेः। विशेषणयोरिव विशेषणं प्रति विशेष्यस्यापि कारणत्व वाच्यम्। तत्र विशिष्टयोः कारणत्वप्रतिपादक, आरम्भणाधिकरण। विशेषणयोः कारणत्वप्रतिपादनपर चमसाधिकरणम्। विशेषणं प्रति विशेष्यस्य कारणत्वप्रतिपादनपर विलक्षणत्वाधिकरणम्। विशेष्यभूतजगतः विशेष्यब्रह्मणश्च वैलक्षण्यात् कथ कारणत्वमिति मा वोचः। वृश्चिकादौ व्यभिचारात्। अतः वैलक्षण्येऽपि कारणत्वदर्शनात् जगत् प्रति ब्रह्मणः उपादानत्व सिद्धमेव। ननु तादात्म्यसम्बन्धावच्छिन्नकार्यतानिरूपित्त तादात्म्यसम्बन्धावच्छिन्नकारणत्वरूपोपादानत्वं तदा न समन्वित भवतीति चेत्—न, तदर्थमेव कार्यतायां अपृथक्सिद्धिसम्बन्धनिवेशात्। अपृथक्सिद्धिसम्बन्धेन कार्यं ब्रह्मणि तत्र कारण ब्रह्मापि तादात्म्यसम्बन्धेन वर्तत इति। अपिचापृथक्सिद्धिसम्बन्धस्य कार्यतावच्छेदकसम्बन्धत्वमवश्यमेषितव्यम्। धर्मज्ञानविकासं प्रति जीवस्य धर्मिणः कारणत्वावश्यकत्वात्।

43 उपसंहारदर्शनाधिकरणे

उपसंहारदर्शनान्नेति...। सहकारिनिरपेक्षं ब्रह्मण उपादानत्वं न सम्भवतीत्यत्र कुलालदृष्टान्तः कथं सङ्गच्छते। मृदादिदृष्टान्तो हि वाच्यः? न च निमित्तत्वेपि सहकार्यपेक्षासत्त्वात् तत्रैव पूर्वपक्षः इति वाच्यम्। तथा सतिक्षीरदृष्टान्तेन समाधानकथनस्यायुक्तत्वापत्तः। नच उभयवधिकारणत्वे एव सशयात् उभयत्र पूर्वपक्षः, अत एवोपादानत्वे क्षीरदृष्टान्तः। निमित्तत्वे देवादि दृष्टान्तः उत्तरसूत्रोक्त इति वाच्यं, समाधानानुगुण्येन (उभयदृष्टान्तप्रदर्श रूपेण) प्रश्नस्य उभयत्र युक्तत्वे अपि, कुलालकुविन्दादौ इति भाष्यास्वारस्यापत्तेः। न च आदिशब्देन मृदादिग्रहणं युज्यते, निमित्तसजातीयस्यैवादिपदग्राह्यत्वौचित्यात्। न च विजातीयस्यादिपदग्राह्यत्वे औचित्यम्। न च कुलालादिपद उपादानवस्तूपलक्षणपरं इति वक्तु शक्य, प्रमाणाभावात्, न हि पूर्वपक्षोप-

पत्यर्थं तथा स्वीकरण योयुज्यते । अपि च देवादिवदपि इत्यपिशब्द-स्वारस्यात् उपादानकारणत्वे एव अस्य सूत्रस्यापि स्वारस्यमिति न निमित्तकारणत्वपर उत्तरसूत्रयमपि । न च देवादीना उपादानत्वं कथं इति वाच्यं, 'देवादाविव' इत्यर्थात् देवादिविषये इति तात्पर्याच्च । देवादिकृतवस्तुसृष्टौ यथा न सहकार्यपेक्षा तथेत्यर्थसंभवात् । यथा केशादीनादाय भूतादिसृष्टि क्रियते दुर्वाग्मिसा । न हि केशापेक्षा तत्रा स्तीति वाच्यम्, तस्योपादानत्वेनादोषात् । दध्यादौ क्षीरस्येवात्रैव तदपेक्षाया अदोषत्वात् । अत्राहुः—कार्यकारणस्थले उपादान निमित्त-सहकार्यंतत्त्रितयवस्त्वपेक्षा अस्तीति सिद्धम् । क्षीरस्योपादानत्वं दध्यादौ कालादृष्टादिस्सहकारी । निमित्त तु स्वयमेव । जगत ब्रह्म-वत्सङ्कल्पाश्रयत्वमेव निमित्तत्वं इति न निर्बन्धः । न च दध्यादौ ईश्वरः निमित्त, तत्रैव सन्देहात् । सांख्ये ईश्वरानभ्युपगमात् । जीवस्य निर्लेपत्वेन चैतन्याभावात्। इत्थं च क्षीरवद्धि इत्यपि निमित्तविषयमेव अत· सर्वं समञ्जसम् ।

41. कृत्स्नप्रसक्त्यधिकरणे

कृत्स्नप्रसक्तिः...। निरवयवस्य ब्रह्मणः कृत्स्नजगद्रूपेण परि-णामः सिद्धान्ततः । अत्र निरवयवस्य कथ बहुभाबित्वं तत्र सावयव-त्वदर्शनात् । न च विशिष्टकार्यकारणवादे कथमिय शंकेति वाच्य-तदापि विशेष्याशस्यापि कार्यत्वाभ्युपगमात् विकार्यत्वावश्यकत्वात् । अन्यथा हि विशेषणाशयोरेव कार्यकारणभावे विशिष्टकारणत्वावश्य-कत्व भवेत्, तेनैव सर्वोपपत्तेः । न च देवदत्तो जातः; बाल युवा जातः इत्यादौ विशिष्टस्यैव कारणत्वं दृश्यते तत्र विशेष्यांशस्यापि कार्यत्वमादायैव जातः इत्यादि व्यवहारोपपादनं कार्यम् । अथापि तस्य विशेष्यस्य जीवस्य कार्यत्वेपि न विकार्यत्वं स्वरूपस्य परिणामा-भावात् स्वभावपरिणामत एवोपपत्तेः । तथा प्रकृतेपि विशिष्टब्रह्मण एव कारणत्वेन स्वरूपपरिणामाभावात् न विकार्यत्वमिति कथ पूर्व-पक्षोदयः इति वाच्यम् । एवमपि कृत्स्नप्रसक्त्याद्युपपादनसंभवात् ।

तथा हि । चेतनाचेतनवैशिष्ट्य हि ब्रह्मणि भवद्भिरभ्युपगम्यते । तत्र भगवतः निरवयवस्य चेतनाचेतनसंबन्धे किं कात्स्न्येन तत्र भगवतस्सबन्धः । अत एकदेशेन । नाद्य.। तथासति अन्यवस्तुसम्बन्धस्य दुर्घटत्वापत्तिः । न द्वितीय· सावयवत्वप्रसङ्गात् । एवमुपपादनमभिप्रेत्यैव 'तस्य निरवयवस्य बहुभवनं नोपपद्यते, कार्यत्वानुपयुक्तांशास्थितिश्च नोपपद्यते' इति भाषितं इति । अत्रोच्यते—कृत्स्नैकदेशविकल्प सर्वमतेऽप्यस्ति । (1) जातिवादे किमेकैकमपि जाति· कात्स्न्येन वर्तते उतैकदेशेन ? न प्रथमः अन्यगव्यवर्तमानत्वप्रसङ्गात् । न द्वितीयः सावयवत्त्वप्रसङ्गात् । (2) धर्मभूतज्ञानस्य विषयेण सम्बन्धे, एकदेशेन उत कात्स्न्येनेति विकल्पे सावयवत्वापत्ति, अन्यविषयासंबन्धत्वापत्तिपरिहारासंभवात् । (3) निरवयवाकाशे शब्दोत्पत्ति वदतः एवमाक्षेपसंभवात् । (4) परमाणुद्वयसयोगात् जगदुत्पत्ति वदतो नैयायिकस्य मतेऽप्येवमाक्षेपात् । (5) निरवयवस्य प्रधानस्य जगत्कारणत्वं वदतः सांख्यस्य मतेऽपि पुरुषप्रधानसम्बन्धे एव विकल्पापत्तेः । (6) विभुद्वयसंयोगमिष्यतो मतेप्येवमेव । (7) अविद्यायाः ब्रह्मणश्च सबन्धात् जगद्भ्रम वदतः अद्वैतिनः मतेऽपि अविद्यायाः निरवयवत्वकथनादेवमाक्षेपात् ।

अतः भगवतः पूर्णत्वं नामद्वित्वादिवत् न व्यासज्यवृत्ति । द्वित्वादिकं हि धर्म्यन्तरनैरपेक्ष्येण न विद्यते । न तथा धर्म्यन्तरसापेक्षं भगवतः घटे पूर्णत्वम् । अतः धर्म्यन्तरनैरपेक्ष्येण प्रतीयमानत्वमेव भगवतः तद्वस्तुनि पूर्णत्वम् । गोत्वमिव पर्याप्य वर्तते । न ह्येकस्यां गवि विद्यमानस्य गोत्वस्य गवान्तरसापेक्षस्थितिकत्व विद्यते, इयं गौः इति प्रतीतेः । अन्यत्वे सापेक्षता । या यां गां पश्यति तदा तदा तां तां गौरिति व्यपदिशत्येवेति । यदा घटे भगवतः पूर्णत्वं नाम कृत्स्नघटप्रदेशावच्छिन्नः सयोगः एव, यद्वा, सर्वकार्यजननशक्तिमद्भगवत्सबन्धः।

47 महद्दीर्घाधिकरणे

आदौ द्व्यणुकोत्पत्ति· । तत्र त्रिभिः द्व्यणुकैः त्र्यणुकोत्पत्तिः । चतुर्भिः त्र्यणुकैः चतुरणुकोत्पत्तिरिति क्रमः किमर्थमयं कृतः ?—तत्र

तत्र स्थितेषु अणुगणेषु क्रिया, क्रियातो विभागः इति रीत्या सयोगोत्पत्तिः। तत्र त्र्यणुकोत्पत्तिरिति कथं न स्यात् इति चेत्–कथं वा अनेकतन्तूनामेकदैव सयोगोत्पत्त्या पटोत्पत्तिर्निवार्यते ? दर्शनादिति चेत् कल्पनमपि दर्शनानुगुण्येनैव भाव्यमिति।

जातिवादः

ननु नैयायिकमते जात्याकृतिव्यक्तीनां परस्परवैलक्षण्यं स्वीकृतम्। अत एव जात्याकृतिव्यक्तयः पदार्थः इत्युच्यते। व्यक्तीनां परस्परं भिन्नत्वात् अय घट–अय घट–इत्यनुगतप्रतीतिव्यवहारनिर्वाहकत्व न संभवति। सस्थानरूपाकृतेरपि तत्तद्व्यक्तिमात्रगतत्वेन भिन्नत्वात् तस्या अपि नानुगतप्रतीतिहेतुत्वम्। अतो जायमानानुगतप्रतीतिव्यवहारनिर्वहणार्थं गोत्वादिरूपा काचिज्जातिः सस्थानव्यक्तिविलक्षणा अवश्याभ्युपेया। विशिष्टाद्वैतमतेपि संस्थानातिरिक्तजातेरनभ्युपगमात् तथाप्रतीतिव्यवहारौ दुर्घटावेव। संस्थानस्य तु तत्तद्व्यक्तिमात्रविश्रान्तेः। 'सस्थानं नाम स्वासाधारण रूप' इति श्रीभाष्यसूक्त्यापि गोत्वरूपसंस्थानस्य तत्तन्मात्रगतत्वमेवेप्सितमिति—

अत्रोच्यते — सस्थानस्य तत्तदसाधारणत्वेऽपि सौसादृश्यस्य अनुगतप्रतीतिव्यवहारहेतुत्वाभ्युपगमात्। अय गौः अयमपि गौरिति हि व्यवहारः। अतः एतद्गोव्यक्तिनिष्ठसस्थानसौसादृश्यस्य अन्यगोव्यक्तावपि सत्त्वेन अनुगतप्रतीत्युपपत्तेः। एवमेव घटिदिषु सर्वत्र। संस्थानव्यतिरिक्त जात्यनभ्युपगपगमेऽपि घटादिषु सौसादृश्यमवलम्ब्य अनुगतव्यवहारोपपादन तथा शरीरे उपपादनं न सम्भवति, मनुष्य शरीरसौसादृश्याभावात् कृमिशरीरादिषु। अत एव भाष्ये, 'कृमिकीटपतङ्गसरीसृप–इत्यादि भाषितम्'। अतो घटादि वैलक्षण्य शरीरे इति न शरीरत्व जातिरिति।

ननु अतिरिक्तजात्यनङ्गीकारे कथमात्मसु अनुगतप्रतीतिनिर्वाहः आत्मनां निरवयवत्वेन संस्थानस्य दुर्वचत्वात्। अत एव सौसादृश्यावलम्बनमपि दुर्घटमिनि चेत्...उच्यते। संस्थानं नाम स्वासाधारणं

रूपमिति यथावस्तु संस्थानं अनुसन्धेयम्। श्रीभाष्ये—'यथावस्तु—इत्याद्यपरामर्शकृत चोद्यम्। तत्रापि चैतन्यधर्मवत्त्वे सति अणुत्वं आत्मसाधारणाकारः तेनानुगतप्रतीतिव्यवहारनिर्वाहसंभव इति। ननु रूपादिगुणेषु कथं इति चेत्—तत्राप्यसाधारणाकारस्य स्वरूपनिरूपक धर्मविशेषस्य सत्त्वात् तेन निर्वाहात्। ब्राह्मणक्षत्रियादिष्वपि सत्त्वादि गुणतारतम्यादि धर्मसत्त्वेन निर्वाहः इत्यन्यत्र विस्तरः।

55. तेजोऽधिकरणे

तेजोऽतस्तथाह्याह। अत्र भगवतः सूत्रकारस्य बादरायणस्य सूत्रप्रणयनशैली पश्यामः। अधिकाक्षरासंकलनपूर्वकं यावद्भिरक्षरैः सूत्रग्रथने लाघव सिध्येत् तत्रैव दत्तदृष्टिः सूत्राणि रचयति सूत्रकारः। 'आप.' 'पृथिवी' इत्यादि सूत्रं तु अतिलघुभूतम्। द्वित्र्यक्षरैरेवात्र-सूत्रग्रथनम्। अर्थेऽपि लाघवं पश्यन् एवं प्रणिनाय। पूर्वसूत्रात् 'अतस्तथाह्याह' इत्यनुषज्यात्र सूत्रद्वयेऽपि अथं वर्णयति। सूत्रे अतः शब्दो वायुपरः। 'आप' इति सूत्रे अनुषक्तस्य अतः इत्यस्याग्निरर्थः। 'पृथिवी' इत्यत्रानुषक्तस्य तच्छब्दस्य जलमर्थः। प्रथमसूत्रे वायुपरामर्शार्थमेव 'एतेन मातरिश्वा व्याख्यातः इति पूर्वाधिकरणे वायुप्रस्तावः कृत.।

यद्यपि एतेन मातरिश्वा व्याख्यातः इति सूत्रमनपेक्षितम्। अधिकशङ्काभावात्। 'तेजो वायोस्तथाह्याह' इति अतश्शब्दं विना सूत्रप्रणयनमपि युक्तम्। अथापि 'आप.' 'पृथिवी' इत्यनयोः अत. शब्दानुषङ्गः न सेत्स्यति पूर्वसूत्रे अतश्शब्दस्यानुक्तत्वे। अत्र 'आपः अग्नेस्तथाह्याह,' 'पृथिवी अद्भ्य तथाह्याह' इति सूत्रयितव्यं स्यात्। एवं सत्यतिगौरवं भवेदिति मत्वा सूत्रकारः 'एतेन मातरिश्वा व्याख्यात' इति पृथक् योग चकार। अत्र सूत्रे वायुशब्दमनुक्त्वा मातरिश्वशब्दप्रयोगस्तु श्रुतिपर्यालोचनया।

अन्यदपि किञ्चिदत्र विमृशामः—अत्र पूर्वपूर्वतत्त्वादेवोत्तरोत्तर-तत्त्वानामुत्पत्तिः उत तत्तत्तत्त्वशरीरकाद् ब्रह्मणः उत्तरतत्त्वोत्पत्तिरिति

सशय· उत्तरपक्षः सिद्धान्तितः । पूर्वपक्षे ब्रह्मकारणत्वबोधकश्रुतय परम्परया ब्रह्मणः कारणत्वबोधनतत्पराः । द्वितीयपक्षे तु साक्षात् कारणत्वबोधकाः । अत्र महदादि सर्वतत्वविषयेऽपि इमामाशङ्कामुद्भाव्य परिहार कार्यः । अत एव श्रीमति भाष्ये, 'उदाहृताः तेज. प्रभृतयः प्रदर्शनार्थाः इति भाषितम् । श्रुतप्रकाशिकायामपि 'महदादीनां तत्वाना कि केवलात् पूर्वपूर्वनत्वमात्रादुत्पत्ति. उत तत्तद्रूपात् ब्रह्मण इति सशयकोटिः निक्षिप्ता । एवं च सति सूत्रकार; महदादि तत्वविषये इमामाशङ्का अप्रदर्श्य तेज आदि विषये शङ्कामिमा किमिति प्रदर्शयति ।

अत्र केचिदेवमभिप्रयन्ति—सूत्रकारः छान्दोग्यश्रुतौ बहुलं दत्तदृष्टिस्सन् तामेवोपनिषद अधिकं विमृशति । अत एवादौ 'ईक्षतेर्नाशब्द'मिति शास्त्रारम्भकाले छान्दोग्यश्रुतिः विचार्यते । अतोऽत्रापि छान्दोग्यश्रुतिं मनसि निधाय सूत्रं प्रणिनाय । तैत्तिरीयश्रुतौ अग्निशब्दो हि श्रूयते । छान्दोग्ये तु 'तत्तेज ऐक्षत' इति तेजश्शब्द एव । 'तेजोऽतस्तथाह्याह' इति तेजश्शब्दं प्रयुञ्जानस्य सूत्रकारस्य छान्दोग्य श्रुतिरेव मनसि विपरिवर्तमानाऽभूदिति निश्चप्रचम् । एव च छान्दोग्ये सृष्टिप्रकरणे तेज· प्राथम्यदृष्टेः तेज प्रभृति विचारं चकार व्यासः । 'अधिकाररूपशब्दान्तरेभ्यः' इति सूत्रं छान्दोग्यश्रुतिविषयवाक्यक इत्यपि निर्विवाद इति । अन्ये तु छान्दोग्यश्रुतिविचारस्य सूत्रकारेण बहुल कृतत्वेऽपि छान्दोग्यश्रुतिप्रत्यभिज्ञापक तेज पदस्यात्र श्रवणेपि इद सूत्र तैत्तिरीयश्रुति प्रधानोकृत्यैव प्रयुक्तम् । अन्यथा 'अतः' इति पञ्चम्यन्त पद अनुपपन्नं भवेत् । न हि वायोः तेजसः उत्पत्तिबोधकं श्रुतिवाक्यं छान्दोग्ये श्रूयते । 'वायोरग्नि ' इति तैत्तिरीये तु श्रूयते । 'तत्तेजोऽसृजत' इति सच्छब्दार्थभूतपरामर्शितच्छब्दः परमेव बोधयतीति तस्मात् ब्रह्मणः तेजसः उत्पत्तिरेवात्र बोध्यते इति प्रत्युत बिरुद्धं च । 'पृथिवी' इति सूत्र, 'अद्भ्यः पृथिवी' इति तैत्तिरीयश्रुतिमेव च प्रत्यभिज्ञापयति । अतः तैत्तिरीयश्रुतिकटाक्षेणैवेदमधिकरणं

प्रवृत्तं, अत एव प्रथमसूत्रे 'वायोरग्निः' इति तैत्तिरीयश्रुतिरेवोदाहृता। छान्दोग्ये वायोः अग्न्युत्पत्तिबोधकश्रुतेरभावात्। अनन्तसूत्रद्वये तु 'तदपोऽसृजत' 'ता अन्नमसृजन्त' इति छान्दोग्यश्रुतिरपि विषयीकृता अप्रधानेनेति। अत्रेद तत्त्वम्—सूत्रकारशैलीपरामर्शे व्यासः उभयोमपि श्रुतिमत्राभिप्रैतीति वक्तव्यमेव। परं तु सर्वतत्त्वविषये इमामाशङ्का-मनुद्भाव्य तेज. प्रभृतिविषये केवलं एतादृशशङ्कोद्भावनं किमर्थं कृत-वानिति तु विमर्शनीयमेव। एतस्माज्जायते प्राणः मनः सर्वेन्द्रियाणि च। खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी, 'तत्तेजोऽसृजतं' आत्मन आकाशस्सम्भूत' इति तत्त्वानां परमात्मजन्यत्व उक्तमिति तत्त्वानि प्रति परमात्मनः कारणत्व सिध्यति। 'आकाशाद्वायुः', 'वायोरग्निः', 'अग्नेरापः', 'अद्भ्यः पृथिवी', 'तदपोऽसृजत', 'ता अन्नमसृजन्त' इति केषाञ्चित्तत्त्वानां पूर्वपूर्वतत्वकारणत्वं श्रुतम्। अतः उभय श्रुत्यविरोधाय पुत्रपौत्रादिनोत्या कारणत्वबोधनपरा ब्रह्म-कारणकत्वबोधकश्रुतिः। साक्षात्कारणबोधनपरा पूर्वपूर्वतत्वात् उत्त-रोत्तरतत्वोत्पत्तिबोधकश्रुति इति वक्तव्यम्। तत्रापि अग्निजलपृथिवी रूपतत्वानां वाय्वग्निजलरूपतत्वेभ्यः उत्पत्तेरुक्तत्वात् तदरिक्ततत्वानां साक्षादेव ब्रह्मणः उत्पत्तिः, एषां तु पूर्वतत्वादेवेति निश्चयः कार्यः इत्येवमालोच्य पूर्वपक्षी, तेजोऽतस्तथाह्याह, आपः, पृथिवी इति पूर्व-पक्षं चकार। यद्यपि आकाशस्य 'आत्मन आकाशस्सम्भूतः' इत्या-त्मनः सभवोक्त्या साक्षात् त प्रति कारणत्वनिश्चयेऽपि वायुं प्रति साक्षात्कारणत्व न निश्चेतुं शक्यम्।

'आकाशाद्वायु' रिति आकाशस्यैव साक्षात्कारणत्वोक्तेः। अतः तेजः प्रभृतिष्विव वायुविषयेऽपि एतादृशशङ्कोद्भावन युक्तम्। अथापि 'आकाशाद्वायु' इत्यत्राकाशशब्दस्य आसमन्तात् काशते इति व्युत्पत्त्या परमात्मपरत्वसम्भवेन वायोः साक्षात् ब्रह्मजन्यत्व निश्चेतुं शक्यत इति पूर्वपक्ष्यभिप्रायात्। आकाशस्य परमात्मपरत्वं तु आकाशस्त-ल्लिङ्गादित्यत्रैव सिद्धम्। ज्योतिः प्राणादि शब्दानां परमात्मपरत्व-

मिव वायुशब्दस्य परमात्मपरत्वं तु न कुत्रापि सूत्रेण साधितम् । अतो वायोरग्निः इत्यत्र वायुशब्दः प्रसिद्धवायुपर एवेति तस्मादेवाग्नेरुत्पत्युक्त्या साक्षादेव अग्न्यादेः वाटवाद्युपन्नत्वमिति पूर्वपक्षी मन्यते । अतः तेज आदिष्वेव शङ्का सभवतीति तेजोऽतस्तथाह्याह, आप, पृथिवी इत्यसूत्रि । केचित्तु, तदभिध्यानादेव तु तल्लिङ्गात्सः इति सिद्धान्तसूत्र परामृश्य ईक्षणादिसङ्कल्पस्य तेज आदिष्वेव श्रवणात् तस्यैव समाधानत्वेन वक्ष्यमाणत्वाच्च सिद्धान्तं सौकर्यार्थं तेज आदिष्वेवं शङ्कन कृत इति वदन्ति । वस्तुतः वाखादिषु एवं शङ्काया कृतायामपि तेज आदिषु ईक्षणश्रवणेन वाखादिष्वप्यनुमायेक्षण समाधानं वक्तु शक्य, परन्तु साक्षात्तत्रेक्षणस्य तेज आदिष्वेव श्रवणात् तत्रैव शङ्कायुक्तेत्यभिप्रायः ।

अधिकाररूपशब्दान्तरेभ्यः । ता अन्नमसृजन्त इत्यत्र अन्नशब्दः पृथिवीवाचक इत्यत्र हेतुत्रयमनेन सूत्रेणोच्यते । तत्तेजोऽसृजत, तदपो असृजत इति भूतद्वयसृष्ट्युक्तेः तदन्तरोक्तान्नसृष्टिरपि पृथिवीरूपभूत सृष्टिरेवेति निश्चीयते इति अधिकाररूप प्रस्तावः एको हेतुः । रूपसंशब्दनं द्वितीयो हेतु 'यदग्ने रोहित यत्कृष्णं तदन्नस्य' इत्यत्र अन्नशब्दः पृथिवीपरः इत्यकामेनापि स्वीकर्तव्यम् । त्रिवृत्कृतैरेवाण्डैः पदार्थसृष्टि इत्यत्र श्रुतीः प्रमाणत्वेन प्रदर्श्य अण्डान्तर्गताग्निदर्शनेऽपि त्रिवृत्करणमस्तीति ज्ञायते । अन्यथा त्रिरूपत्वं नोपलभ्येत । तत्र रोहितरूप तेजोगत, शुक्लरूप जलगतं, कृष्णरूप पृथिवीगतं, रूपत्रयस्याप्यग्नौ दर्शनात् अग्नेः त्र्यशत्वमस्तीति त्रिवृत्कृतत्वमग्नेः प्रतीयते । त्रिवृत्करणं च भूतत्रयस्यैवेति अन्नशब्देनोक्तं भूत पृथिवीति निश्चीयत इति । यद्यपि त्रिवृत्करण देवतात्रयाणा इति निर्विवाद, तासा त्रिवृत त्रिवृत एकैकां करवाणि इति श्रुतेः । पर तु पृथिवी भूतमप्यन्तर्भाव्य त्रिवृत्करणं कृतमिति न वक्तु शक्यते तत्र पृथिव्यनुक्तेः । तासां त्रिवृतं त्रिवृतं इत्यत्र पृथिवीवाचकपदाभावात् पूर्ववाक्ये 'ता अन्नमसृजन्त' इति अन्नशब्दस्यैव श्रवणात् अन्नतेजोजलानामेव त्रयाणा त्रिवृत्करणप्रतीतेः । अत्रत्यान्नशब्दस्यैव पृथिवीवाचकत्वे सप्रति

सन्दिह्यमानत्वात् । तथापि 'अधिकार शब्दान्तर' रूपहेतुद्वयेन अन्न-शब्दस्य पृथिवीवाचकत्वे सिद्धे रूपसंशब्दनमपि अभ्युच्चायकं भवति इत्यत्र तात्पर्यमिति निश्चीयते ।

56. आत्माधिकरणे

1. 'नात्मा श्रुतेः ।' उत्पत्तिविनाशोभयप्रतिषेधकश्रुतेः इत्यर्थः। न जायते, न म्रियते इति श्रुतेः प्रमाणीकरणात् संप्रति विद्यमानाः जाताः जीवाः एवंभूता भवन्तु। नूतनजीवानामुत्पत्त्यादिकमस्तु इत्यत्राह नाय भूत्वा भविता वा न भूयः' इति । ननु शुद्धजीवस्वरूपं अनादि अनन्तं च भवति अथापि शरीरसम्बन्धे जाते विशेषणस्येव विशेष्य-स्यापि नाशादिकं भवतु, गुणिनोऽपि दुष्टसम्बन्धेन दुष्टत्ववत्—इत्यत्राह 'न हन्यते हन्यमाने शरीरे' इति । ननु उत्पत्तिप्रतिपादकश्रुत्या सर्व विज्ञानप्रतिज्ञारूप श्रुत्यर्थापत्त्या च उत्पत्त्यादिकं स्थापित, न जायते इत्यादि श्रुत्या तदभावः स्थाप्यते । उभयोः श्रुतित्वाविशेषात् न किमपि साधयितु शक्येत, सत्प्रतिपक्षितत्वमेव स्यात् । अस्मच्छ्रुते-रन्यथाकरणे युष्मत् श्रुतेरप्यन्यथाकरण न स्यात् कि, इत्यत्रनित्य-त्वाच्चेति हेत्वन्तरम् । अस्मत् श्रुतेः अनुग्राहकतर्कोऽप्यस्तीति तात्पर्यम्।

2. 'न जायते म्रियते वा विपश्चित्' इति श्रुतिः, 'नात्मा श्रुतेः . इत्यत्र विवक्षिता । अत्र 'विपश्चित्' इत्युक्त्या 'ब्रह्मणा विप-श्चिता' इति पर्यालोचनया च इय श्रुतिः न जीवपरा इति यदि कश्चित् मन्येत तदा जीवस्य नोत्पत्त्यभावः प्रतिपादयितुं शक्यते इति मत्वा 'नित्यत्वाच्च' इत्यधिकं उक्तम् । अत्र च 'नित्योनित्यानां..' इति श्रुतिः विवक्षिता । यद्वा—आत्मा प्रागभावशून्यः न जायते इति श्रुते । प्रागभावशून्यत्वेऽपि ध्वसो भवतु इत्यत्र नित्यत्वाच्चेत्युक्तम् । अनेन ध्वंसशून्यत्वरूपनित्यत्वं मनसि सिद्धवत्कृत्य पूर्वसाध्य प्रागभावशून्यत्वं स्थापितं, तत्रैव हि सन्देहः शङ्कितः इत्यत्र 'ताभ्यः' इत्यधिकं उक्तम् । अत्र ध्वसभिन्नत्वे सति ध्वंसशून्यत्वं हेतुः । भावत्वे सतीतिवा । 'न जायते' इति प्रागभावनिषेध । 'न म्रियते' इति ध्वंसनिषेधः । 'नाय .'इति देवादिरूपेण जननात् कुतो न प्रागभावः इति शङ्कां

द्यति । 'अजः नित्यः' इति पूर्वोक्तानुवादः । स्थायित्वेन नित्यत्वं इति निवारणाय 'शाश्वतः' इति ।

नात्मा श्रुतेः—ननु श्रुतेः आत्मा नोत्पद्यते इत्युक्तं तु सङ्गतं नित्यत्वाच्च नोत्पद्यते इति तु कथ ? उत्पत्त्यभावो हि प्रागभावप्रतियोगित्वरूपः । नित्यत्वं च हेतुभूत तदेव, अतस्तस्याविशिष्टत्व हेतोः । न च नित्यत्व ध्वसाप्रतियोगित्व इति वैलक्षण्यमिति वाच्यम् । ध्वसे व्यभिचारात् । ध्वसस्य हि प्रागभावप्रतियोगित्वमस्ति । प्रतियोग्युन्मज्जनप्रसङ्गेन ध्वंसो नास्ति । न च हेतौ भावत्वे सतीति विशेषान्न दोषः इति वाच्यम् । अभावस्य भावरूपत्वमङ्गीकुर्वतां अस्माक मते तेनावारणात् । घटध्वसो हि कपालत्वरूप । अपि च 'श्रूतेः' इत्यत्रैव 'न जायते म्रियते वा विपश्चित्' इति श्रुत्युपादानात् तयैव ध्वसप्रागभावोभयाप्रतियोगित्वस्य सिद्धत्वेन 'नित्यत्वाच्चे'ति सूत्रखण्डेन साधनीयं न किमप्यस्तीति साध्याविशिष्टत्वं वैयर्थ्यं चापरिहार्यमेव । न च न जायते इत्यादि श्रुत्या उत्पत्त्यभावसाधनेऽपि न वस्तुसद्भावसिद्धिः शशशृङ्गवत् तुच्छत्वमपि स्यात् । शशशृङ्गमपि न जायते न म्रियते च, अतः सद्भावबोधनार्थं नित्यत्वहेतुः इति वाच्यम् । वस्तुसद्भावमङ्गीकृत्य तस्योत्पत्तिरस्ति वा नवेति विचारस्यैव प्रवृत्तत्वेन शशशृङ्गतुल्यत्वापादानसंभवात् । न हि आत्मस्वरूपमेव नास्तीति शङ्का प्रवृत्ता, परन्तु तस्य सत्यत्वं अङ्गीकृत्य वियदादिवदुत्पत्तिरस्तु इति शङ्कैव प्रवृत्ता । अतो नेदं समाधानं भवितुमर्हति । अपि च नित्यत्वबोधक श्रुत्युपादानेपि शशशृङ्गवत्तुच्छत्वापादनस्य परिहारासभव एव । 'अजः नित्यः' इत्युक्तावपि ध्वंसप्रागभावाप्रतियोगित्वरूपत्वान्नित्यत्वस्य, न जायते म्रियते वा इति श्रुति समानार्थकत्वमेवेति । मैवं—न जायते म्रियते वा इत्यादि श्रुतेः (कठोपनिषत्) भगवद्गीतायाश्चैवमर्थो वाच्यः ।—केचिदात्मनः आकल्पस्थायित्वमुशन्ति । तन्मते आकल्प न म्रियते एव । तन्निवृत्तये नित्यत्वोक्तिः । इदं च सार्वकालिकध्वंसाप्रतियोगित्वमिति ।

अपि च—अभावस्य भावरूपत्वे तस्य ध्वंसाङ्गीकारात् विशेष्यस्य हेतोरसत्त्वमिति न व्यभिचारः। भावरूपत्वानङ्गीकारे भावत्वे सतीति विशेषणासत्त्वान्न हेतुसत्त्वं इति न व्यभिचारः इत्यपि बोध्यम्।

57. ज्ञाधिकरणे

ज्ञोऽत एव। सिद्धान्ते चेतनः ईश्वरः अचेतनमिति बस्तुत्रितयमभ्युपगम्यते। तत्राचेतनस्य स्वरूपरिणाम चेतने ज्ञान (स्वभाव) परिणामः। ईश्वरे तु जीववत् स्वभावतोऽपि परिणामो नास्तीति। स्वरूपत एवाचितः परिणामात् कार्यत्वं, ज्ञानद्वारा परिणामात् जीवस्य कार्यत्वं सूक्ष्मस्थूल वैशिष्ट्यद्वारा ईश्वरस्य परिणामः इति तस्यापि कार्यत्वमङ्गीक्रियते।

अत्र जीवस्य चैतन्यमभ्युपगम्य तद्द्वारा कार्यत्वसमर्थनं किमर्थं? चैतन्यानभ्युपगमेऽपि कार्यत्व समर्थनसभवात्। ननु नित्यस्य तस्य कथं कार्यत्वं? न च प्रकृतेः नित्यत्वेऽपि महदादिना परिणाममभ्युपगम्यकार्यत्वमिष्यत एवेति वाच्यम्। प्रकृतेः नित्यत्वेऽपि सावयवत्वात् स्वरूपपरिणामोपपादनसभवः। इह तु जीवस्य अत्यन्ताणुत्वेन स्वरूपतः उपपादनासंभवात्। न च कालस्य विभुत्वेन निरवयवत्वेपिक्षणदिवसादि परिणामवत्तनिरवयवस्थायिजीवस्य परिणामः कथं न संभवतीतिवाच्यं। क्षणत्व दिवसत्वादीनां तु व्यवहारनिर्वाहार्थं बुध्या परिकल्पनेऽमि वस्तुतः परिणामसभवात्। अन्यथा विभुभूतपरमात्मन एव चेतनाचेतनादि परिणामोपपत्तेः भास्करयादवादिमतखण्डनानौचित्यात्। न च विभोः परिणामासभवरूपहेतुबलात् तन्मतखण्डनं इति न मन्तव्यं परन्तु तथा परिणामे चेतनाचेतनेश्वरादिविभागो न भवेदिति। अतो न दोषः इति वाच्यम्। विभोः कालस्य परिणामे क्षणत्वदिवसत्वादि विभागवत् जीवेश्वरादि विभागस्यापि कल्पनोपपत्तेः। अतः विभोर्वा अणोर्वा निरवयवस्य स्वरूपतः परिणामो नोपपद्यत एवेति जीवस्य कथं कार्यत्वमिति चेत्—विभोः ब्रह्मणः चेतनाचेतनशरीरमादाय कार्यत्वोपपादनवत् जीवस्याप्यणोः प्रकृतिसम्बन्धमादाय देवदत्तो जातः इति कार्यत्वोपपादनसभवात्। जीवस्य कार्यत्वं नाम शरीरसम्बन्ध एवेति

कार्यत्वोपपादनाय ज्ञानवत्त्वाभ्युगमः तस्य परिणामः इत्याद्यर्थकल्पन न शोभनमिति । अत्र ब्रूमः । जीवस्य कार्यत्वोपपादनाय नहि ज्ञानवत्त्वमभ्युपगम्यते । 'विज्ञातारं' इत्यादि श्रुतिबलाद्धि तथाभ्युपगमः । शरीरसम्बन्धसत्वात् ज्ञानस्य स्वभावस्य सङ्कोचविकासौ इति न काप्यनुपपत्तिः ।

प्रलयदशायामपि जीवस्य ज्ञातृत्वमस्ति। ज्ञानस्य स्वाभाविक धर्मत्वात् । विषयग्रहणं तु नास्ति । सुषुप्तिदशायामिव । ननु ज्ञानत्वस्य स्वरूपनिरूपकधर्मत्वात् तस्य च विषयग्राहकत्वरूपत्वेन तद्दशायां तदभावे कथ ज्ञानस्य स्थिति स्वरूपनिरूपकधर्ममन्तरा विषयस्य सद्भावानौचित्यात् इति चेत् उच्यते ज्ञानत्वं हि स्वयंप्रकाशत्वरूपम् । तच्च ज्ञानस्यास्त्येव । सुषुप्तिप्रलयादिदशायां कर्मणा प्रतिबद्धम् । यद्वा घटवादिकमिव इतरभेदरूपम् ।

59. परायत्ताधिकरणे

परात्तु तत् श्रुतेः । प्रथमप्रवृत्तौ यदि ईश्वरस्य नियामकत्वरूपं प्रवर्तकत्वं नास्ति तदा यस्य चेतनस्य.....सर्वात्मना स्वार्थे नियन्तु यत् शक्य तत् शरीरं इति शरीरलक्षणमव्याप्तमिति सर्वकालिक शरीरित्व ब्रह्मणो नोपपद्यते इति चेत् । अनादिससारे प्रथमप्रवृत्तिरिय इति वक्तु अशक्यत्वात् सर्वप्रवृत्तावपि नियमकत्वाद्यङ्गीकारात् । तदा उदासीनत्वं न नियामकत्वं निरुन्धे । समानां सर्वेषा जीवानां प्रवृत्तिवैषम्ये कर्मणः हेतुत्वस्य त्वयापि वाच्यतया कर्मणश्च ईश्वरनिग्रहानुग्रहरूपत्वात् कर्माधीनत्वं वदता ईश्वराधीनत्वमेवोक्तमिति नियामकत्वमभ्युपेतमेवेति ।

60. अंशाधिकरणे

ननु 'अपि स्मर्यते' 'स्मरन्ति चे'ति सूत्रद्वयं निरर्थकम् । एकेन उभयस्मृत्युदाहरणसंभवात् इति चेन्न । अंशत्वमात्रबोधकस्मृतेः प्रकारत्रयेण अंशत्वोदपपाकस्मृतेश्च विभिन्नत्वेनांशभेदात् । न च स्मरन्ति चेति सूत्रमेव पर्याप्तम् । तेनैवोभयांशप्रतिपादनादिति वाच्यं, तत्र-

प्रकारत्रयोपपादनेपि साक्षादंशत्वाबोधनात् । 'अपि स्मर्यते' इत्यत्र 'ममैवांशो जीवलोके' इति साक्षादंशत्ववाचकशब्दश्रवणात् । ननु स्मृतेश्च इति हि सूत्रम् ? स्मृतित्वाविशेषात् उभयी श्रुतिरपि उदाहरणं भवितुमर्हतीति चेत्सत्यम् । अंशो नाना...मन्त्रवर्णात्, इति सूत्रानन्तर अपि स्मर्यते इति सूत्रम् । पूर्वत्र अंशत्वमात्रबोधनं, अतः अपि स्मर्यते इति सूत्रम् । तेन अंशत्वबोधनस्मृतिरेव स्मृतिपथमायात् । 'प्रकाशादिवत्तु नैवं परः' इति सूत्रानन्तरं स्थितस्य 'स्मरन्ति च' इति सूत्रस्यांशत्वोपपादनापेक्षकस्मृतिरेव च स्मृतिपथमागच्छतीति विशेषात् । पूर्वं भगवदुक्तस्मृतिः अपरत्रान्या च ।

अंशो नाना ..। यो यः अपृथक्सिद्धविशेषणभूतः सः अंशः इत्युक्तौ रूपस्यापि घटांशत्वप्रसङ्गः । द्रव्यत्वे सतीति विशेषणे जीवात्मानं प्रति तदीयधर्मभूतज्ञानस्यापि अंशत्वापत्तिः । न चेष्टापत्तिः देहः जीवांशः इति यथा व्यवहारः तथा ज्ञानं जीवांशः इति व्यवहाराभावात् । यदि यथा प्रभाबद्द्रव्यगुणभूतस्य प्रभारूपद्रव्यस्य प्रभावतो अंशत्वमिष्यते, अत एव 'एकदेशस्थितस्याग्नेः ज्योत्स्ना विस्तारिणी यथा' इत्यादिना सर्वस्य वस्तुनः भगवदंशत्वे ज्योत्स्नादृष्टान्तः सङ्गच्छते । तथैव ज्ञानस्यापि जीवांशत्वव्यवहारः युक्त एवेति विभाव्यते तर्हि गवादीन्प्रतिगोत्वादीनां अंशत्वं न स्यात् गोत्वादेः द्रव्यत्वाभावात् द्रव्यत्वघटितलक्षणसमन्वयासंभवात् । न च गोत्वादीनामंशत्वं नेष्टमेवेति वाच्यम्, तथा सति 'यथा गोत्वादयः गवाद्यंशभूताः' इति श्रीभाष्यविरोधात् । अत्र ब्रूमः—

गोत्वादीनामंशत्वमिष्टमेव । न च गोत्वादीनां जातिरूपत्वेन द्रव्यघटितांशलक्षणसमन्वयः कथमिति शङ्क्यम् । अस्मत् सिद्धान्ते जातेः आकृतिव्यतिरिक्तरूपत्वाभावेन आकृतेश्च संस्थानरूपत्वात् तस्य द्रव्यत्वात्। अतः गोत्वादीनां द्रव्यत्वरूपत्वमेवेति अंशत्वोपपादनसम्भवः इति ।

61. प्राणोत्पत्त्यधिकरणे

तत्पूर्वकत्वाद्वाचः । अत्र प्रलये वागादिकार्यभूतव्यवहारस्य व्यवहर्तव्यवस्त्वभावेन कारणभूतवागादिसद्भाव इत्यर्थं न रमणीयः। आत्मादिव्यवहारस्याप्यभावेन आत्मादीनामोऽपि अभावप्रसङ्गात्। अतः एवमर्थः—यथा आत्मतत्कर्मणोः प्रलयकाले सद्भावः, तत्कार्यसृष्टि, वैषम्य, नैर्घृण्याद्यर्थं, तथाविधप्रयोजनाभावेन वागादीन्द्रियसद्भावः अनपेक्षित इति । अथवा—वाचः—वागीन्द्रियस्य (इद सर्वेन्द्रियोपलक्षणं) वागादीन्द्रियाणां ब्रह्मसृष्टिपूर्वकत्वात्, महदहङ्कारसृष्टेः इन्द्रियसृष्टिः इति श्रुतौ प्रथितत्वात् अनन्तरमेव व्यष्टिसृष्टिः नामरूपव्याकरणञ्चेति ।

62. सप्तगत्यधिकरणे

हस्तादयस्तु स्थितेऽतो नैवम् । अत्र तु शब्देनैव पक्षव्यावृत्तिसंभवे पुनरपि नैवमित्यधिकम् । शरीरे स्थिते जीवे चक्षुरादीनामिव हस्तादीनामपि उपकारकत्वविशेषात् तान्यपीन्द्रियाणि इति हि समाधिः ?। नैवं—नैतावन्मात्रं शरीर विहाय गच्छतोऽपि उपकारकाणीति विशेषबोधनात् यादवप्रकाशमतखण्डनं तेन क्रियते । अतो नैवमित्यधिकोक्तिः ।

66. ज्योतिराद्यधिष्ठानाधिकरणे

ज्योतिराद्यधिष्ठान—कथमेकेन्द्रियेषु जीव, आदित्यादि जीवोभयाधिष्ठेयत्वमिति ? यदि एकमेवेन्द्रियमुभयाधिष्ठेयं स्यात् तर्हि अधिष्ठातृचेतनद्वयस्याभिप्रायभेदे कार्यकरत्व न स्यात् । विपरीताचरणं वा स्यात् इति चेत् नात्र विरोधः । अस्मदाद्येकमेव शरीर जीवपरोभयाधिष्ठेयमिति अत्र निरुक्तदूषणे कः परिहारः । परमपुरुषाभिप्रायभेदेन जीवस्याभिप्रायः नोदियादिति चेदत्रापि तथैव भगवत्सङ्कल्पः इति विरोधपरिहारसंभवात् । तत्तदिन्द्रियेषु तत्तदभिमानिदेवताः तत्तत्कार्यकरत्वशक्तिं ददति । तदाहितशक्तिकानि इन्द्रियाणि जीवेच्छानुगुणं कार्यं कुर्वते । अतो नात्र कश्चनविरोधः इति ॥

68. संज्ञामूर्तिक्लृप्त्यधिकरणे

सज्ञामूर्ति .. .. अनेन जीवेनात्मना इति श्रुतेरयमर्थः। इमाः देवता· अनुप्रविश्य अनेन जीवेनात्मना नामरूपे व्याकरवाणीति। साध्रकतमत्वरूपकरणत्वविवक्षामात्रं कर्तृरेव। जीवशब्दः चतुर्मुख-पित्रादि जीवपरः। तथा च, अहं देवताः अनुप्रविश्य चतुर्मुखादि-शरीरकस्सन् नामरूपव्याकर्ता भवामि। चतुर्मुखकर्मकब्रह्मकर्तृकसृष्टौ नेदं वाक्य प्रमाणं, परन्तु चतुर्मुखकर्तृकदेवादिसृष्टौ इदं प्रमाणम्। तथा च चतुर्मुखद्वारा अहं नामरूपे करवाणीति। अनेन जोवेनेत्यस्य देवताः अनुप्रविश्येत्यत्र नान्वयः। तथासति सर्वत्र स्वस्येव चतुर्मुख-स्यापि अनुप्रवेशसिध्या तस्यापि सर्वशरीरत्वापत्तेः। यद्वा चतुर्मुख-शरीरकत्वविशिष्टस्वस्यानुप्रवेशेन तात्पर्यं, तस्योपलक्षणत्वमात्रत्वात्। अथवा, 'अन्न· शरीरेष्विव यः प्रजानां प्रत्यादिदेशाविनयं विनेता' इत्यत्र कार्तवीर्यार्जुनस्येव अन्तः प्रवेशोऽस्तु। न तावता तस्येवास्यापि शरीरित्वसिद्धिः।

ननु पूर्वोक्तार्थे अस्मिन्नर्थे वा कर्मभोक्तृजीवे अनुप्रवेशो न सिध्यति इति कथं देवादिसृष्टिः इति चेत्-नामरूपे व्याकरवाणीत्युक्त-त्वादेव तत्सिद्धेः। नामरूपव्याकरण हि देवादिजीवानाम्। अतो भग-वान् तत्तज्जीवं देवादिकं कर्तुमिच्छन् तत्तज्जीवद्वारा भूतादिषु प्रविश्य देवादिनाम करोति। नामरूपे अचेतनस्यैवेति न भ्रमितव्यं। आकाश· अर्थान्तरत्वादिव्यपदेशादिति सूत्रे नामरूपभाक् जीवः यत्र भवतु इति पूर्वपक्षकरणानुपपत्तेः। 'अरूपवदेव हि तत्प्रधानत्वा'दित्यत्र भगवत एवारूपत्वमुक्तं, जीवस्यत्वङ्गीकृतम्।

अण्डान्तर्भावि पृथिव्यादिकं किं पञ्चीकृतभूतादि, उत पञ्ची-कृतैकभूतविकारः अथवा पञ्चीकृतपञ्चभूतविकारः इति। भूतादि सृष्ट्यनन्तर भूतेषु किञ्चित्किञ्चिभाग पृथक्कृत्य अवशिष्टभूतेषु पञ्ची-करण, अथवा, कृत्स्नभूतानामेव पञ्चीकरणम्। तथा च, अपञ्चीकृत-भागोऽप्यस्ति न वेति सदेहः। अण्डावरणानि भूतानि पञ्चीकृतानि अथवा अपञ्चीकृतानि? शुद्धजलशुद्धपृथिव्यादीनि आवरणान्युच्यन्ते।

तत्र किं नाम शुद्धत्वम् ? पञ्चीकृतभूतान्तरामिश्रितत्व वा अपञ्चीकृतत्व वा ? एतच्छङ्कापरिहारः अस्मदीयचन्द्रिकाया द्रष्टव्यः ।

'व्यपदेशबदेकस्मिन् बुध्या नानात्वकल्पना' इति न्यायेन घटः स्वेन रूपेण इतरव्यावृत्ति करोति (आत्मानं आत्मना वेत्सि) यदि करणे तृतीया अत्रोच्यते तदा अत्रापि, 'तेनेशस्तद्विशिष्टः स्वकरणकतयाऽनुप्रवेशेऽपि कर्ता ..।' यद्वा—'जीवेनात्मना-मदात्मकजीवेनात्मतया अनुप्रविश्य एतत् विचित्रनामरूपभाक् करवाणीत्यर्थः' इति भाषितत्वात् जीवशब्दस्य परमात्मपर्यन्तत्वाभावस्यापि दर्शितत्वात् आत्मना-शरीरेण । शरीरभूतेनानेन जीवेनानुप्रविश्य । आत्मतयेति हेतौ तृतीया । हेतुत्वं च प्रयोजनत्वेन विवक्षितम् । आत्मत्वार्थमनुप्रविश्येत्यर्थ । अन्तः प्रविश्य नियन्तृत्वभावे आत्मत्वासम्भवात् ।

अनेन जीवेनात्मनेति श्रुत्यर्थविचार.

हन्ताहमिमा तिस्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि इत्यस्याः श्रुतेः अर्थवर्णने बहवो विद्वांसः विप्रतिपद्यन्ते । अस्याः श्रुते. यथावदर्थज्ञानं यावन्नास्ति तावत् भगवदीय सृष्टिविषये तत्वविवेकः दुर्ज्ञेय एव । अतोऽत्र वास्तवार्थं प्रदर्शयामः ।

अत्र केचिदेव वदन्ति—'इमाः देवताः' इति पृथिव्यप्तेजोरूपभूतानि विवक्ष्यन्ते प्रकरणात् । इदञ्च सर्वभूतानामप्युपलक्षणम्। भगवता सृष्टस्य अस्मच्छरीरस्य सर्वभूतमयत्वात् । भूतानां देवतात्वनिर्देशः उपचारात् । नहि भूताना अचेतनाना देवतारूपत्व योयुज्यते । यद्यपि 'त पृथिव्यब्रवीत्' इत्यादिषु पृथिव्यादीना वचनसामर्थ्योक्त्या अचेतनेषु तदसभवात् पृथिव्यभिमानिदेवता अब्रवीदिति अर्थवर्णनमावश्यकमिति पृथिव्यादिभूतानामपि अभिमानिदेवतास्सन्त्येव । अथापि अत्र प्रकरणे औचित्यात् अचेतनमात्रविवक्षाया आवश्यकत्वेन पृथिव्यादिभूताना देवतात्वप्रयोगः औपचारिक इत्येवाङ्गीकरणीयम् । देवादिव्यष्टिसृष्टौ सृज्यमानदेवमनुष्यादिशरीरेषु देवताद्वयजीवद्वयसंभवेन तदनुप्रवेशस्यायुक्तत्वात् । देवादिशरीरेषु हि भगवदनुप्रवेशः सृज्यजीवस्यचानुप्रवेशः । नह्यस्मच्छरीरेपि सृज्यमानजीवसम्बन्धादृते

अन्यस्याः अभिमानिदेवतायाः प्रवेशोऽस्ति। देवशब्दो हि देवशरीरक-जीवतच्छरीरक परमात्मपर्यन्तमभिधत्ते। नत्वभिमानिदेवतामपि।

यद्वा भविष्यद्देवताभिमानविषयभूतानि तत्त्वानीत्यर्थः। अतः पूज्यत्वाय देवतात्वेन निर्देशः। यद्वा अभिमानिदेवताशरीरभूताः इमाःइत्यर्थं विवक्षापि संभवति। 'सेयं देवतैक्षत हन्ताहमिमाः' इत्यारं भात्। सर्वथापि भूतानामेव देवतात्वविवक्षणं न युक्तम्। इदं च भगवद्वाक्यम्।

एवं च जीवशरीरकेण मया भूतादि अनुप्रविश्य नामरूप व्याकरण करोमि इति विशिष्टवाक्यार्थः। नामरूपव्याकरणं चतुर्मुखादिषु सर्वत्रास्ति। ब्रह्मणः सृज्यत्वे देवादीनां सृज्यत्वेपि वा अस्याः श्रुतेः आनुगुण्य वक्तव्यम्। अत्र यदि जीवशब्दः चतुर्मुखजीवपरः तर्हि तच्छरीरकेण मया भूतादिषु अनुप्रविश्य नामरूपे करोमीत्युक्तं स्यात्। तथा सति चतुर्मुखकर्मकभगवत्कर्तृकसृष्टिमात्र उपपन्नं भवेत्। देव-मनुष्यादिसृष्टिषु उपपत्तिः न स्यात्। तत्र तत्र शरीरे तत्तज्जीवाना-मनुप्रवेशाकथनात्। सर्वदेवादिसृष्टिष्वपि भगवत इव चतुर्मुखस्या-प्यनुप्रवेशापत्त्या तस्यापि सर्वशरीरकत्वप्रसक्तेश्च। यदि देवादि जीव-सामान्यपर. जीवशब्दः तदा सर्वेषां सृज्यत्वोपपत्तावपि चतुर्मुखसृष्टि-रत्रानुक्ता स्यात्। अपि च देवादिसृष्टिषु चतुर्मुखस्य संबन्धाभाव-प्रसक्तिश्चापद्यते। चतुर्मुखद्वारा हि भगवान् व्यष्टिपदार्थं जातं सृजति। 'नामरूप च भूतानां कृत्यानां च प्रपञ्चनम्। वेदशब्देभ्य एवादौ देवा दीनां चकार स' इति हि स्मृतिः।

अथोच्येत—अत्र जीवशब्दः सृज्यमानजीवपरः। भगवत्कर्तृक चतुर्मुखकर्मकसृष्टौ चतुर्मुखस्य सृज्यत्वात् तत्परो जीवशब्दः। व्यष्टि सृष्टौ चतुर्मुखस्यैव सृष्टिकर्तृकत्वं देवादीनां सृष्टिकर्मत्वमिति तदा जीवशब्दः देवादिजीवपरः। एवं च चतुर्मुखसृष्टिरप्युक्ता भवति। चतुर्मुखशरीरकेण भगवता चतुर्मुखशरीरोपादानभूतभूतादिषु अनु-प्रविश्य चतुर्मुखनामरूप व्याकर्तृकत्वस्य भगवति प्रतिपन्नत्वात्। चतु र्मुखकर्तृकदेवादिसृष्टिषु देवादीनां सृज्यमानत्वात् तादृशजीवशरीर-

कस्य भगवतः नच्छरीरोपादानभूतभूतादिषु अनुप्रवेशपूर्वक तदीयनाम-रूपव्याकर्तृत्वस्य च प्रतिपन्नत्वात् । अत्र देवादिरूपसृष्ट्यनन्तर हि सृज्यमानजीवशरीरकत्वविशिष्टस्य भगवतः तेषु अनुप्रवेश , न तु पूर्वं सभवति । कथमत्रानुप्रविश्येति सृष्टिपूर्वभावित्वोक्तिरिति न शक्यम् । 'मुखं व्यादाय स्वपिति' इति समानकालिकत्वविवक्षया 'क्त्वा' प्रत्ययोपपत्तेः । तथा च देवादिसृष्टि यदा तदैव सृज्यमान देवादि शरीरकत्वाकारेण भगवत अनुप्रवेशः इति न काऽप्यनुपपत्तिः इति ।

मैव—एवमपि देवादिकर्मक चतुर्मुखकर्तृकव्यष्टिसृष्टावपि सृज्यमानदेवादिशरीरकस्य ब्रह्मणः भूतादिषु अनुप्रवेशपूर्वक नामरूपव्याकरणकर्तृत्वोक्तेः तत्रापि परमात्मनः एव संज्ञामूर्तिक्लृप्तित्वं स्यात् । न तु चतुर्मुखस्य । चतुर्मुखवाचकपदाभावात् । नचेष्टापत्तिः स्मृतिविरोधात् । सर्वत्र व्यष्टिसृष्टौ चतुर्मुखद्वारा हि सर्व सृजति ।

अथोच्येत—नामरूपव्याकरणश्रुतेरयमर्थः । जीवेनेति जीवशब्दः सृज्यमानजीवपरः । आत्मशब्द स्ववाची सन् चतुर्मुखजीवविशिष्टभगवत्परः । एवञ्च सृज्यमानजीवशरीरकत्वविशिष्ट चतुर्मुखशरीरकत्वविशिष्टश्च सन् भूतादिष्वनुप्रविश्य देवादि नामरूपे व्याकरवाणीति फलितोऽर्थ । तथा च भगवतः चतुर्मुखद्वारा व्यष्टिसृष्टौ नामरूपव्याकर्तृत्वसिद्धिरिति चतुर्मुखस्य नामरूपव्याकर्तृत्वोपपत्तिरिति ।

इदमपि न सम्यक्—चतुर्मुखकर्मक भगवत्कर्तृसृष्टौ अर्थद्वयस्यानुपयोगात् । पौनरुक्त्यापत्तेश्च । व्यष्टिसृष्टौ चतुर्मुखस्य कर्तृत्वोपपत्तावपि चतुर्मुखशरीरकत्वविशिष्टस्य भगवतः सर्वत्रानुप्रवेशात् भगवत इव चतुर्मुखस्यापि सर्वशरीरित्वापत्तिरूपदोषस्यानुद्धारात् ।

अपि च अस्माकमपि अस्मत्पुत्रादीन्प्रति नामरूपव्याकर्तृत्वमस्ति। 'एकादशेऽह्नि पिता नाम कुर्यात्' इति हि धर्मशास्त्रम् ? अत्रापि देवदत्तो भगवच्छरीरभूतस्सन् स्वपुत्रान् सृजति । भगवान् देवदत्तादिद्वारा तत्पुत्रानुत्पादयतीति हि लोकसिद्धम् । अतः कुलालादेरपि घटादि नाम रूपव्याकरणकर्तृत्वस्य वक्तव्यतया सर्वस्थलसाधारणतया नामरूपव्याकरणश्रुत्यानुगुण्यं वाच्यम् । न हि पितृकुलालादिजीववाचकशब्दा.

सन्त्यत्र । सृज्यमानजीवादिशरीरकत्वमात्रमेवोक्तं, न तु स्रष्टृपितृकुलालादिशरीरकत्वं परब्रह्मण. अत्र प्रकरणे श्राव्यते । येन कुलालादि शरीरक. पित्रादि शरीरकश्च सन् भगवान् घटपुत्रादि सृजतीति वक्तुं शक्यम् ।

किञ्च भगवान् भूतादीनुत्पाद्य पञ्चीकरणं कृत्वा अण्डं तत्र ब्रह्माणं च सृष्ट्वा सृज्यमानजीवराशिं पञ्चीकृतभूतादि च चतुर्मुखाय प्रदाय व्यष्टिसृष्टिं कुरु इति वदति । सोऽपि तदादर्शितमार्गः तदाहितशक्तिश्च सन् जीवस्य प्रथम शरीरादि ददाति । एव प्रथमसृष्टौ जीवाना नामरूपव्याकरणे ब्रह्मणः कर्तृत्वेऽपि द्वितीयादिसृष्टौ तस्य चतुर्मुखस्य कथ कर्तृत्वम्? धूमादिमार्गेण अन्येन वा मार्गेण गतागतशालस्य सूक्ष्मशरीरेण गतस्य 'रेतस्सिग्योगोऽथ', 'योनेश्शरीरं' इति पित्रादीनामेवोपयोगात्, न चतुर्मुखस्य कर्तृत्वं युज्यते । तस्य तत्र प्रसक्त्यभावात् । अतस्सर्वत्र चतुर्मुखस्य व्याकर्तृत्वं नास्ति । अतः दोषलेशं विना अस्याः श्रुतेरर्थवर्णनं क्लिष्टमेवेति ।

अत्रैव समाधानमाहु·—व्याकरणश्रुतेः पूर्वोक्त एवार्थः । परन्तु आत्मना इत्यस्य चतुर्मुखशरीरकत्वोपलक्षितेन मयेत्यर्थः । एवं च विशिष्टवेषेण ब्रह्मणः भूतादिषु अनुप्रवेशानुक्तेः चतुर्मुखब्रह्मणः सर्वशरीरित्वव्यावृत्तिः सुलभा भवति। उपलक्षणकोटौ चतुर्मुखस्य निवेशात् चतुर्मुखोपलक्षितपरब्रह्मणः नामरूपव्याकर्तृत्वोक्तेः चतुर्मुखस्यापि तद्व्याकर्तृत्वं फलितं भवति । यद्वा आत्मशब्दः स्वमात्रवाची, जीवशब्दश्च सृज्यमानजीवशरीरकब्रह्मवाचो । अहं व्याकरवाणीत्युक्त्या अस्मच्छब्दार्थः चतुर्मुखशरीरकब्रह्मपरः । एवञ्च सृज्यमानजीवशरीरकत्वविशिष्टेन मया भूतादिष्वनुप्रविश्य चतुर्मुखशरीरकस्सन् नामरूपे व्याकरवाणीति वाक्यार्थ. । एतेन चतुर्मुखस्य सर्वशरीरकत्वव्यावृत्तिः भगवदनुप्रविष्टस्य तस्य नामरूपव्याकृतिकर्तृत्वनिष्पत्तिश्च सुलभा भवति । एवमेव पुत्रनिष्पादकपित्रादिशरीरकत्वं घटादिनिर्मातृकुलालादिशरीरकत्व चास्मच्छब्दार्थे विवक्षणीयम् । एवं विवक्षणे न काप्यनुपपत्तिः । तत्रापि चतुर्मुखाधीनपितृकुलालादिशरीरकत्वं अस्मत्

शब्दार्थे विवक्षणीयम्। तेन प्रथमसृष्टाविव द्वितीयादि सृष्टावपि नामरूपव्याकर्तृत्व चतुर्मुखस्य सिध्यति। प्रथमसृष्टौ परब्रह्माधीन-व्याकर्तृत्वं चतुर्मुखस्य। न हि तेन परब्रह्मणः नामरूपव्याकर्तृत्वमपलप्यते। एवमेव द्वितीयादिसृष्टौ पित्रादीनां व्याकर्तृत्वेऽपि पित्रादीनां चतुर्मुखाधीनतयैव तत्सिद्धिरिति प्रमाणबलेनाभ्युपेत्यत्वात् चतुर्मुखस्य नामरूपव्याकर्तृत्वं सुलभोपपादनं भवति। एव च सर्वं समञ्जस इति।

वय तत्र ब्रूम.—नामरूपव्याकरणश्रुतेः चतुर्मुखकर्मकसृष्टिपरत्वमपि वक्तव्यमिति तु न सम्यक्। प्रथम समष्टिसृष्टिः ततः पञ्चीकरण ततः अण्डसृष्टि ततो ब्रह्मसृष्टिः अनन्तर स्वशरीरभूतचतुर्मुखद्वारा देवादिसृष्टिरितिक्रमः। तत्र देवादिसृष्टिरेवव्यष्टिसृष्टि। अत्र व्यष्टिसृष्टौ। 'नामरूप च भूतानां' इति स्मृत्यनुसारेण चतुर्मुखस्यैव नामरूपव्याकर्तृत्व इति ब्रह्मणः परस्य सर्वजगत्कारणत्वं न सभवतीति पूर्वपक्षे प्राप्ते सञ्जामूर्तिक्लृप्त्यधिकरण प्रवृत्तम्। 'नामरूपे व्याकरवाणि' तदर्थं 'तासा त्रिवृत्त त्रिवृत्त एकैकां करवाणि' इति पर्यालोचनया त्रिवृत्करण कर्तृरेव नामरूपव्याकर्तृत्वप्रीतीते. नामरूपव्याकरणकालपूर्वभाविवृत्करणकाले च चतुर्मुखस्यैवाभावात् कथं चतुर्मुखकर्तृकत्वं नामरूपव्याकरणस्य स्यादिति अत्राधिकरणे सिद्धान्तितम्। एतेन त्रिवृत्करण काले चतुर्मुखस्याभावेऽपि नामरूपव्याकरणकाले चतुर्मुखसद्भावः अवगम्यत इति कथमस्याः श्रुतेः चतुर्मुखकर्मकसृष्टिविषयत्वं अपि शक्येत। अन्यथा नामरूपव्याकरणकाले चतुर्मुखस्यैवाभावात् कथ तत्कर्तृकत्वशङ्कन इति सिद्धान्तित स्यात्।

अथोच्येत--चतुर्मुख इति नाम्नः आननचतुष्टयादिरूपस्यास्मिन् सत्त्वेन नामरूपभाक्त्वस्य सिद्धेः तस्य च भगवदधीनत्वस्य वाच्यतया अस्याः श्रुतेः तद्विषयकत्वमपि वक्तव्यमिति। तन्न। समष्टिसृष्टौ पृथिवी, आपः तेजः. .अहङ्कारः महान्, अण्डमित्यादीनां तत्तद्रूपादीनामपि सत्त्वेन तेषामपि नामरूपभाक्त्वसिद्धे तत्तद्विषयकस्यापि अस्याः श्रुतेः वक्तव्यत्वापात्तात्। यदि समष्टिसृष्ट्यनन्तर भाव्यर्थविषयकत्वमेवेति परिह्रियते तर्हि तथैव चतुर्मुखसृष्ट्यनन्तरभावि देवादि सृष्टि-

विषयकत्वमेवेति विभावय । अतः चतुर्मुखसृष्टिविषये अस्याः श्रुतेः नयन न कार्यमिति द्रष्टव्यम् ।

जीवानां प्रथमसृष्टौ पञ्चीकृतमयदेहादौ तेषां निक्षेपस्य चतुर्मुख कर्तृकत्वेन तदा तस्य नामरूपव्याकरणकर्तृत्वसिद्धावपि, द्वितीयादि-सृष्टौ तत्तत्स्थूलदेहस्यैव सूक्ष्मतया परिणामः तस्यैव स्थूलतया च परि-णामः इति स्थितेः चतुर्मुखस्य तत्रोपयोगाभावात् द्वितीयादिसृष्टौ कथं तस्य नामरूपव्याकर्तृत्वमिति यदुक्तं तत्र किञ्चित्परिशीलयामः— 'अकार्यचिन्तासमकालमेव प्रादुर्भवन् चापधरः पुरस्तात् । अन्तः शरीरेष्वि यः प्रजानां प्रत्यादिदेशाविनय विनेता । इति तत्तज्जीवशरी-रान्तरावस्थिति समानाकार परिस्थितिमत्वरूपवैभवशालिनां कार्त-वीर्यार्जुनप्रभृतीना महतां दर्शनेन ततोऽप्यधिकवैभवशालिनः 'युग-कोटिसहस्राणि . शुश्रुम' इति महापुण्यसम्पादितपदव्यामभिषिक्तस्य चतुर्मुखस्य कथं द्वितीयादिसृष्टौ नामरूपव्याकर्तृत्वमिति शङ्कनं अतीव परिहास्यं भवति । स्थूलस्य सूक्ष्मीकरणं सूक्ष्मस्य स्थूलीकरणमित्यादि स्वतपस्सन्तुष्टभगवत्प्रसादलब्धवरस्य चतुर्मुखस्य कार्य हि । भग-वान् हि अण्डादीन् सृष्ट्वा तत्र ब्रह्माणं च प्रसृज्य पञ्चीकृतभूतादीन् इन्द्रियाणि कर्मानुगुणस्रष्टव्य जीवराशि च चतुर्मुखवशं करोति । सर्व मपि तत्तत्पुण्यपापानुगुण सृजस्वेत्यप्यादिशति । तदृत्तशक्तिकः ब्रह्मा तथैव सृजति ।

परस्येव स्वस्य सर्वान्तर्गमनशक्त्यभावेऽपि धर्मभूतज्ञानद्वारा सर्वत्र प्रवेशशक्त्या सर्वमपि विदित्वा तत्तद्वस्तु नियमयति । स्वयञ्च पार्श्वस्थैरविदितशासितृत्वस्सन् वर्तते । चतुर्मुखाभिप्रायं विना स्थूलं न सूक्ष्मं भवितुमर्हति । सूक्ष्मं वा न स्थूलम् । भगवत्प्रसादेन विदित तत्तत्पुण्यपापस्वरूपः तेषां जीवाना तत्तच्छरीर च ददाति । एतत्सर्वं परब्रह्मदत्तशक्तिकः तदन्तर्यामिकश्चसन् ब्रह्मैव करोति । एवमेव हि प्रथमसृष्टावपि नामरूपव्याकर्तृत्व तस्योपपादनीय । ब्रह्मा स्वसहा-यार्थं प्रथमं रुद्रमसृजत् । सचानुपयुक्तः आसीत् । स्वमानससृष्टा सनकादयश्च स्वयमागतविज्ञानाः निवृत्ति धर्ममास्थिताः अनुपकारकाः

आसन् । ततः नवप्रजापतीन्ससर्ज । तेच सृष्टिमकुर्वन् । अतः प्रथम-सृष्टिः जीवानां शरीरप्रदानरूपा नवप्रजापतिकृतैवेति कथमादिसृष्टौ चतुर्मुखस्योपयोगः । कथ वा प्रथमसृष्टि व्याकर्तृत्वसिद्धि ।

यदि तु देवादिसृष्टौ स्वनियाम्यचतुर्मुखस्य नामरूपव्याकरण-कर्तृत्वेऽपि नियामकस्य परस्य ब्रह्मणः तत्कर्तृत्वसिद्धिर्यथा, तथैव चतु-र्मुखनियाम्य नव प्रजापतीनां व्याकर्तृत्वेऽपि नियामकस्य चतुर्मुखस्य व्याकर्तृत्वसिद्धिरिति उच्यते, तथासति जीवाना द्वितीयादिसृष्टावपि चतुर्मुखनियाम्यपित्रादीनामिव पुत्रादिनामरूपव्याकरणकर्तृत्वेन निया-मकचतुर्मुखस्यापि तत्कर्तृत्वमक्षतमेव । ननु 'रमणीयचरणाः रमणीयां योनिं' 'कपूयचरणाः कपूयां (कुत्सितां) योनिं' इति प्रमाणबलेन कर्म णैव परिणामसंभवात् चतुर्मुखस्य कुत्रोपयोग इति चेत् तर्हि परमा-त्मनोऽपि नैवोपयोगः । कर्मणैव सिद्धेः कृतमीश्वरेण । नच पुण्यापुण्य-कर्मणः भगवन्निग्रहानुग्रहरूपत्वेन कथमीश्वरस्यानुपयोगकथनमिति वाच्यम्, स्वनिग्रहानुग्रहरूपपुण्यापुण्यकर्मणः चतुर्मुखाधीनत्वस्य ब्रह्मणैव करणात् । इन्द्रियादि भूतराशि जीवराशिमिव तत्तज्जीवकृत पुण्यापुण्यात्मककर्मपरिपाककरणादि सर्वं चतुर्मुखाधीनं हि भगवान् चकार । अतो ब्रह्मा तत्तत्समये तत्तत्परिपाकदशां विदित्वा तत्तदनु-सारेण स्थूलसूक्ष्मपरिणामं जनयति । एतत्सर्वं भगवतः सर्वान्तर्यामि-त्वादिकमिव प्रमाणबलपरिकल्प्यम्। न हि भगवतः स्वरूप तत्स्वभावादि प्रत्यक्षादिना अवगम्यते । तथैव चतुर्मुखस्यापि तदा तदा सृष्टौ नाम रूपव्याकर्तृत्वादि न प्रत्यक्षेणावगन्तुं शक्यम् । तस्मात् अस्मदविदित-शासितृत्वादिस्वभावः अस्मत्कर्मानुगुणं शरीरादि ददाति चतुर्मुख इति तस्य सर्वदा नामरूपव्याकर्तृत्वसिद्धिः ।

वस्तुत पुत्रादीन्प्रति पित्रादीनां न नामरूपव्याकर्तृत्वम् । 'एकादशेऽहनि पिता नाम कुर्यात्' इति नामकरणस्य दृष्टत्वमात्रेण न नामरूपव्याकर्तृत्वसंभवः । शरीरसस्थानप्रदानरूपकार्ये पित्रादीनाम-समर्थत्वात् । न हि 'रेतस्सिग्योगोऽथ', 'योनेश्शरीरं' इत्यनुसारेण-

रेतस्सिक्पुरुषस्य तत्तन्मर्थता । तथासति गर्भाधानकृतां सर्वेषामेव पुत्राद्युत्पत्तिप्रसङ्गात् । न हि योनिविशेषे रेतस्सेचनमपि एतत्साध्यं भवति । प्रयत्नेन कृतेऽपि योनेः बहिः स्थलेऽपि रेतस्सेचनदर्शनात् । स्त्रीणां कथञ्चित् गर्भवत्त्वेऽपि रेतसा सह सूक्ष्मशरीरविशिष्टस्यास्य अन्तस्थत्वेऽपि मासक्रमेण कललबुद्बुदकरचरणादिसाहित्यपूर्णशरीरवत्त्वादीना पित्रादिना कर्तुमशक्यत्वाच्च । एतदेव हि रूपादिकर्तृत्वम्। यदि पित्रादीनामेव एतत्सामर्थ्यं तदा स्वमनोरथप्रकारेण रूपादि दद्युः पित्रादयः । अन्धपंग्वादीनां उत्पत्त्यभावप्रसङ्गश्च । सर्वेऽपि राजशरीरिणः सर्वा अपि अप्सरसश्च भवेयुः । मशकमत्कुणादिकुत्सितशरीरिणश्च न भवेयु. । को वा पिता स्वस्याशुभपुत्रादिरूपं जनयितुं अभीप्सति । स्वाप्नपदार्थस्य जीवकर्तृकत्वे अशुभसूचकस्वप्नं यथा न सृजेत्, शुभसूचकमेव स्वप्नं सृष्ट्वा पश्येत्, तथाऽत्रापि रमणीय पुत्रादिरूपमेव दद्यात् । सर्वनियामको भगवानेवान्तः स्थित्वा एतत्सर्वं करोतीति सर्वमुपपद्यते इति यदि मन्यसे, तर्हि भगवत· कृत्यं एतत्सर्वं न प्रत्यक्षदृश्य, शास्त्रप्रमाणेनेति चेत्, तदेव शास्त्रं चतुर्मुखद्वारा परमात्मा सर्वं करोति इति ब्रवीति । तस्मादस्मद्दृष्ट एव चतुर्मुखः भगवद्दत्तशक्तिकः धर्मभूतज्ञानद्वारा सर्वत्र व्याप्तः सर्वं जनयति । अतः न पित्रादीनां व्याकर्तृत्व चतुर्मुखस्य च न नामरूपव्याकर्तृत्वासिद्धिः ।

एतेन कुलालादीनां घटादीन्प्रति नामरूपव्याकर्तृत्वमित्यपि परास्तम् । कुलालादयो हि घटादिकमुत्पादयन्ति, मृद्द्रव्यमादाय घटादिसस्थानविशेषविशिष्टतया वस्तु जनयन्त्येव । नैतावता तेषां रूपव्याकर्तृत्वम्। न हि संस्थानविशेषविशिष्टकरणमेव रूपव्याकरणम्। किन्तु घटादिशरीरविशिष्टतया जन्मप्राप्तियोग्यस्य कर्मपरिपाकवशेन तत्प्राप्तिरेव रूपम् । 'अनेन जीवेनात्मनाऽनुप्रविश्य' इत्युक्तेः तादृशकर्मवज्जीवशरीरकपरमात्मनः तच्छरीरेऽनुप्रवेशस्य आवश्यकत्वात्। तत एव हि घट इति नाम । घटादिशब्दो हि घटशरीरकजीवशरीरकब्रह्मवाची । अपर्यवसानवृत्त्या देवादिना जन्मयोग्यस्य जीवस्य घटादिसंस्थानसबन्धप्रदान रूपव्याकरणम । इत्थं च जीवस्यानुप्रवेशं

विना केवलमस्थानकरण न रूपव्याकरणम्। एतादृशं च रूपाव्याकर्तृत्व न कुलालादेः। किन्तु परस्यैव। सोऽपि चतुर्मुखशरीरकः करोतीति शास्त्रसिद्धम्।

अनेन जीवेनेत्यादिश्रुतेरयमर्थः। जीवशब्दः सृज्यमान तत्तज्जीवपर। आत्मशब्दः भगवद्वाची। सामनाधिकरण्यबलेन तत्तच्छरीरकत्वं विवक्षितम्। अह शब्दः चतुर्मुखशरीरक ब्रह्मवाची। एवञ्च सृज्यमानतत्तज्जीवशरीरकेण मया भूतादिष्वनुप्रविश्य तत्तत्कर्मानुगुण तत्तज्जोवानां चतुर्मुखशरीरकस्सन् नामरूपे व्याकरवाणीत्यर्थं।

यद्वा—'सेयं देवतैक्षत हन्ताहमिमाः—व्याकरवाणी'ति श्रुतेरयमर्थः। 'तदैक्षत बहु स्या' इत्यत्र बहुभवनसङ्कल्पाश्रयतया यत्विवक्षितं तदेव पर ब्रह्म 'सेय देवते' त्यनेनापि परामृश्यते। तच्च चेतनाचेतनविशिष्ट पर ब्रह्म। तदेव ब्रह्म अह शब्दार्थोऽपि। अह—चेतनाचेतनशरीरकत्वविशिष्ट ब्रह्माहं, इमाः तिस्रो देवताः—पृथिव्यप्तेजोरूपभूतानि अनुप्रविश्य, अनेन जीवेनात्मना-हिरण्यगर्भशरीरकेण तत्तद्देहप्रवेक्ष्यमाण तत्तज्जीवसमुदायाश्रय चतुर्मुखशरीरकेण मया, नामरूपे व्याकरवाणि. जीवानां तत्तद्देहेन्द्रियादि संयोगरूप तत्तन्नामधेयं च करोमीति। अत्राहमर्थे चेतनाचेतनशरीरकत्वविशिष्टब्रह्मणि अचेतनशरीरकत्व न विवक्ष्यते परन्तु चेतनशरीरकत्वमेव, तच्च सृज्यमान तत्तच्चेतनशरीरकत्वं, तादृशब्रह्मणः भुतादिष्वनुप्रवेशोक्ते। सृज्यमानदेवादीनां जीववाचकत्वम्। चतुर्मुखशरीरकेण मया व्याकरवाणीत्युक्त्या हिरण्यगर्भद्वारा परमात्मनः व्याकरणकर्तृत्वमप्युपपद्यते। एवं विवक्षणात् न काऽप्यनुपपत्ति.।

एतेन—अत्र जीवशब्दस्य चतुर्मुखपरत्वे अनुप्रविश्येत्यत्रान्वयो दुर्घटः चतुर्मुखस्य सर्वशरीरित्वाभावात्। अन्यसृज्यमानजीवपरत्वे व्याकरणकर्तृत्वमसंभवि, परस्य चतुर्मुखस्यैव वा व्याकरणकर्तृत्वात्। जीवेनेति पदमावर्त्य एकस्य जीवपदस्य सृज्यमानजीवपरत्वमभ्युपगम्य अनुप्रविश्येत्यत्रान्वय, अन्यस्य जीवपदस्य हिरण्यगर्भपरत्वमभ्युपगम्य

व्याकरवाणीत्यत्रान्वय च स्वीकृत्यार्थवर्णन च क्लिष्टम्। इत्याद्याशङ्काः निरस्ता।

केचित्तु—जीवेनेत्यस्यावृत्तिमकृत्वैव सृज्यमानतत्तज्जीवसमुदायाश्रयसमष्टिभूतहिरण्यगर्भशरीरकेण मया अनुप्रविश्य इत्यर्थमेव वर्णयन्ति। अनुप्रविश्य—बुद्धिविषयीकृत्येत्यर्थ। हिरण्यगर्भस्य न सर्वशरीरित्वापत्ति.। न च 'इमास्तिस्रो देवताः' इति विवक्षितभूतेषु सृज्यमानजीवस्य कथं अनुप्रवेशः इति वाच्यम्। नामरूपे व्याकरवाणीत्युक्त्यैव तत्सिद्धेः। जीवानां तत्तदिन्द्रियदेहादिसम्बन्धकरणमेव हि रूपकर्तृत्वम्। अनुप्रविशतेर्धातोः बुद्धिविषयीकरणाद्यर्थेलाक्षणिकत्वमवश्यमेष्टव्यम्। मुख्यार्थस्वीकारे नित्यव्याप्तस्य परमात्मनः अनुप्रवेशकर्तृत्वाभावेन साक्षणिकस्य वक्तव्यत्वात् इति वदन्ति।

ननु जीवस्य देहेन्द्रियादिसंयोगप्रदानमेव व्यष्टिसृष्टिः। भगवतः हिरण्यगर्भस्यापि इयं क्रियते। अण्डसृष्ट्यनन्तरं तत्करणात्। तथा च हिरण्यगर्भसृष्टिरपि व्यष्टिसृष्टिरेवेति हिरण्यगर्भस्यापि व्याकरणकर्मत्वमेवेति कथं तत्कर्तृत्वम्? एवंचैनद्वाक्यस्य हिरण्यगर्भविषयकत्वं वाच्यं इति चेन्न—इन्द्रियादि संयोगप्रदातृत्वादिना हिरण्यगर्भसृष्टेः व्यष्टिरूपत्वेऽपि एतद्वाक्यविवक्षितव्यष्टिरूपत्वं नास्ति। समष्टिविषयभूततत्त्वानां नामरूपभाक्त्वेऽपि यथा एतद्वाक्यविवक्षितत्व नास्ति। जीवैनात्मनानुप्रविश्येत्यनन्वयात्। तथैव ब्रह्मविषयकत्वमप्यस्य न संभवति। समष्टि, अण्ड, ब्रह्मसृष्ट्यनन्तरमस्य वाक्यस्य प्रवृत्तेः। अन्यथा संज्ञामूर्तिक्लृप्त्यधिकरणपूर्वपक्षानुत्थितेः।

अत्र चतुर्मुखशरीरकस्सन् नामरूपे व्याकरवाणीति श्रुत्यर्थपर्यालोचनायां चतुर्मुखस्यापि व्याकरणकर्तृत्वप्रतीतेः सोऽपि व्याकरणसङ्कल्पं करोतीति प्रतीयते। तत्र देवादिजीवस्य व्यष्टिरूपत्वमात्र प्रयोजकत्वं चतुर्मुखसङ्कल्पस्य। 'बहुस्या प्रजायेये'ति श्रुत्यर्थपर्यालोचने परस्यैव बहुभवनरूपत्वावश्यकत्वात् स्वस्यैव कार्यत्वमिति स्वात्मपर्यन्तनामरूप सम्पादनमिति विज्ञायते। अतः स्वसङ्कल्पेनैवैतत् सर्वं निर्वहति परः।

अतः अत्र चतुर्मुखसङ्कल्पस्य न आवश्यकतेति ध्येयम् । 'सदेव', 'तदैक्षत' इति निर्दिष्टं पर ब्रह्म 'सेयं देवतैक्षत' इति देवताशब्देन निर्दिश्यते । तथा निर्देशस्येद प्रयोजन सद्रूपं ब्रह्मैव व्यूहरूपेणावतरति । तत्र स्वनाभिस्थानात् ब्रह्माण्ड तत्र ब्रह्माण चोत्पादयति । तत तच्छरीरकस्सन् देवादिनामरूपव्याकरणं करोती । विस्तरस्त्वन्यत्र द्रष्टव्य । त्रिवृत्कुर्वतः इति न समस्तं पदम् । त्रिवृतं कुर्वतः इति समासे सामर्थ्याभावात् समासानुपपत्ते । न हि घट कुर्वतः इति विगृह्य घटकुर्वतः इति समस्तपदप्रयोगः उपपद्यते। अत. त्रिवृत् इति भिन्नं पद द्वितौयान्तं नपुसकालङ्गम् । यद्वा–अत्रिवृतं त्रिवृतं कुर्वन् इति त्रिवृत्कुर्वन् च्विप्रत्ययान्तः । तकारान्तत्वात् ईकारभावः इति ज्ञेयम् ।

69. तदन्तरप्रतिपत्यधिकरणे

तदन्तरप्रतिपत्तौ ..। भूतसूक्ष्माणा सुलभत्वात्–किमत्र भूतसूक्ष्मशब्देन तन्मात्रा उत मूलप्रकृतौ अपरिणतभागः यद्वा नैयायिकमत इव भूतपरमाणुसमुदायः । न प्रथम· तन्मात्रायाः भूताद्युपादानत्वमेव । न तु साक्षात् शरीरारम्भकत्वम् । न द्वितीय., अपरिणतभागस्य कार्यानारम्भकत्वात् । न तृतीयः जालकरन्ध्रनिष्क्रान्ताणुसमुदायवत् स्वर्गे सञ्चरतामणूनां कार्योपयोगित्वासभवात् । न ह्यत्र स्थितैरणुभिः अस्मच्छरीरमारभ्यते । अत्रोच्यते—भूतसूक्ष्मं नाम स्थूलदेहारम्भकपञ्चभूतसूक्ष्मसमुदायरूप किञ्चित् वस्तु । तस्याप्रत्यक्षत्वात् सूक्ष्मशब्देनोच्यते तत् । भगवता हि सृष्टिकाले एतादृशानि सूक्ष्माणि बहूनि सृष्टानि तत्र तत्र सञ्चरन्ति, लिङ्गाख्यं भस्त्रिकान्तः परुवदवस्थितमिति साख्या. । स्वर्गलोक गच्छतः तत्र देहान्तरपरिग्रहसमये स्वसृष्टं सूक्ष्मशरीर भगवान् तेन गतेन जीवेन सबन्धयति । न तदर्थं अन्नादाय गन्तव्यमिति । अथवा उपासकाः विरजानदीतरणकाले स्वस्वभूतसूक्ष्मं परित्यज्य गच्छन्तीति संप्रदायः । तादृशभूतसूक्ष्माणा सुलभत्वमित्याशयः ।

75. सन्ध्याधिकरणे

सन्ध्ये सृष्टिराह हि । इदं सिद्धान्तसूत्रतयाऽपि नेतु शक्यम् । 'अथापि मायामात्रं तु' इति तु शब्दस्य पक्षव्यावर्तकस्योत्तरत्रोक्ते पूर्वं पक्षसूत्रमिद द्वितीयसूत्रमपि ।

मध्वमते सर्वमपि सूत्रजात सिद्धान्तपरमेव । अद्वैतिमते विशिष्टाद्वैतिमते एव च कानिचित् पूर्वपक्षपराणि कानिचिच्च सिद्धान्तपराणि इति विभागः । पूर्वपक्षपरत्वे सिद्धान्तपरत्वे च औचित्य आलोचनीयम् । तु इत्यादि पक्षान्तरसूचकशब्दश्रवणे पक्षव्यावृत्तिलाभात् पूर्वोक्तस्य पूर्वपक्षपरत्व स्वीकार्यम् । एव च इत्यादिश्रवणेपि पूर्वोत्तरसदर्भमनुसृत्य पूर्वपक्षसिद्धान्तपरत्वादि एषितव्यम् । क्वचित् क्वचित् अधिकरणे पूर्वसूत्रस्य सिद्धान्तपरत्वं, उत्तरस्य पूर्वपक्षपरत्वं ततोप्युत्तरस्य सिद्धान्तपरत्व इष्यते । सर्वत्र पूर्वसूत्रस्य पूर्वपक्षपरत्वमिति न्यायः प्रायिक एव । तस्मात् सन्दर्भाद्यनुसृत्यैव पूर्वपक्षपरत्वादि वाच्यम् । अत्र सन्ध्याधिकरणे सन्ध्ये सृष्टिः परमात्मकर्तृकैव, आह हि—स हि कर्ता, परमात्मैव श्रुतिप्रसिद्धः कर्ता इति श्रुतिरेवाह इत्यपि वक्तु शक्यम् । अथापि 'माया मात्र तु' इति पक्षव्यावृत्ति सूचकशब्दश्रवणात् अस्य पूर्वपक्षपरत्वं स्वीक्रियते । निर्मातारचैके पुत्रादयश्च इति सूत्रमपि पूर्वपक्षद्योतकत्वं सूत्रद्वयस्य सूचयति । सिद्धान्ते हि 'कामं कामं इति णमुलन्तः कामयित्वा कामयिवेतति पूर्वपक्षे काम्यमानपुत्रादिवाचक । अत्र 'पुत्रादयश्च' इति स्वारस्यात् पूर्वपक्षपरत्वमवगम्यते । यद्यपि 'सन्ध्ये सृष्टिराह हि' इति सिद्धान्तसूत्रं, निर्मातार च इति पूर्वपक्षसूत्रम् । 'मायामात्र तु' इति सिद्धान्तसूत्रमित्यपि निर्वोढु शक्यते । अथापि 'निर्मातारं च' इति पूर्वपक्षसूत्रत्वात् । अत्र समुच्चयबोधक च शब्दश्रवणेन पूर्वसूत्रस्यापि पूर्वपक्षसूत्रत्वमुन्नीयते । एवं तत्रतत्राधिकरणेषु सूत्रस्वारस्यमवलंब्य तत्तत्पक्षपरत्व अङ्गीकार्यमिति।

76. तदभावाधिकरणे

अतः प्रबोधोऽस्मात् । अत्र 'अतः' इत्यस्य स्वप्नाभावरूपसुषुप्तेः इत्यर्थवर्णन कृत्वा सुषुप्तितो जीवस्म प्रबोधः इति भावं वर्णयन्ति ।

स्वप्नस्थानमूननाडचा स्थितः कश्चित्, स्वप्न पश्यति दैववशात् तस्य सुषुप्त्यभावे स्वप्नादेव जागरण, यथा तथा सुषुप्तस्य नास्ति। सुषुप्तेरेव (स्वप्नं विना) साक्षात् प्रबोधरूपजागरणम् इति केचित् वदन्ति। तथार्थवर्णने अस्मादिति पदमधिकम्। भगवदधीनत्वबोधनार्थमितिचेत् सर्वस्यापि कार्यस्य स्वप्नस्य सुषुप्त्यादेश्च तदधीनत्वदर्शनात् विशेष्योक्तेः प्रयोजनाभावः। अपि च सर्वस्यापि सुषुप्तेरेव साक्षाज्जागरण इत्यपि नास्ति। सुषुप्तिनाडीगमनदशायामिव आगमनदशायामपि स्वप्ननाडीसम्बन्धस्य स्वप्नानुभवस्य च दर्शनात्। केषाञ्चित् आगमनदशाया स्वप्नो नानुभूतः इति चेत्, केषाञ्चिदनुभूतत्वस्यापि दर्शनात्। अतः सुषुप्तेरेव जागरणमिति बोधनार्थसूत्रस्याप्रामाणिकत्वमेव स्यात्।

79. उभयलिङ्गाधिकरणे

भेदादिति चेन्न .। ननु जीवस्योभयलिङ्गत्व दोषवत्वं (च) दशाभेदेन। तद्वत् परमात्मनः कथं? सर्वदा परमात्मन चिदचिच्छरीरकत्वात्। वैकुण्ठस्थत्वेऽपि परस्य तत्तच्छरीरकत्वानपायात्। उच्यते—'जाग्रतः सुषुप्तस्य तत्तदवस्थशरीरेऽवस्थानात्' इति श्रीभाष्य श्रीसूक्ति पर्यालोचनाया, नात्र प्रलयदशा उक्तेति प्रतीयते। तथा च सृष्टिदशापन्न तत्तदवस्थ शरीरे विद्यमानस्य परस्य ये दोषा उद्भाविताः तेन प्रलयदशायामिति तदानी उभयलिङ्गत्व इति। यद्वा—नित्यसंसार्यनभ्युपगमपपक्षे सर्वे मुक्ता एव। तदा प्रलयदशापि जीवस्य नास्ति। बद्धानामभावात्। तद्दशाया परस्य उभयलिङ्गत्वम्।

सर्वमपि वस्तु स्वाभाविकानुकूलत्ववदेव। कर्मकृतं तु सुखरूपत्व दुःखरूपत्वज्ञानं इति सिद्धान्तः अनुपपन्नः। तथा सति परस्य कर्मसंबन्धाभावेन सर्वस्मिन्नपि जीवे अनुकूलत्वप्रतिभासावश्यकत्वेन पापकर्मकृत्स्वपि निग्रहानुदयप्रसङ्गः। यदि परमात्मव्यतिरिक्त जीवविषये एव सिद्धान्तः इत्युच्यते तदा परमात्मान प्रति वस्तुन. दुष्टत्वादुष्टत्व सभवेन पूयशोणितादिमज्जनं स्वेच्छाकृतमपि अपुरुषार्थ एवेति पूर्वपक्षस्य तथैव स्थितेः इति चेदुच्यते परस्य हेयवस्तु संबंधमात्रेण नापुरुषार्थगधः।

घृतयुक्तान्नस्य करेण स्पर्शे हस्तस्य तल्लेपः (பிசுபிசுக்கு) जायते। रसनायास्तु न। तदर्थं हस्तस्यैव लेपनिवारणवस्त्वपेक्षा (கீயக்காய வெளி। एवं अमेध्यसंबन्धः कस्यचित्कृमिविशेषस्य वर्तते। न तावता तच्छरीरे अपुरुषार्थसबन्धः। मनुष्याणां तु अस्ति तद्वत्। परस्यापि रेतसि सत्त्वेऽपि ॥

81. पराधिकरणे

परमतस्सेतून्मान । अत्र व्यपदेशादित्येकवचनान्तत्वेन निर्देशौचित्येऽपि बहुवचनान्ततयानिर्देश एकैकमेव हेतुत्वे पर्याप्तमित्यभिप्रेत्य।

82. फलाधिकरणे

'यस्मात्परिमित फल' इति देवतान्तराणां असेव्यत्वोक्तेः 'भृगुर्वै वारुणिः' इति कथं वरुणस्य सेव्यत्वं उपदेष्टृत्वं चेति पूर्वपक्षनिरासः। आचार्याद्धैव विद्या विदिता साधिष्ठ प्रापत्। स गुरुमेवाभिगच्छेदिति ब्रह्मविद्यासपादनाय आचार्योपसदनोक्तेः परम्परया अपरिमितफलसिद्धेश्चेति कार्य ।

'धर्मं जैमिनिरत एव। भगवतः फलप्रदत्व बादरायणो मन्यते। जैमिनिस्तु धर्मस्यैव। न तु कर्म हि पापपुण्यभेदात् द्विविध भवति। तत्र पुण्यस्य धर्मस्यानुष्ठाने तदेव वा तत्तुष्टः परमात्मा वा फलं दिशतीति शक्यकथनम्। पापस्याधर्मस्यानुष्ठाने क· फल दिशतीति शङ्कायां पुण्यवत् पापस्वरूपमेव फलप्रदमिति जैमिनिमतमिति वक्तव्यम्। तत्र धर्मं जैमिनिरित्युक्तत्वात् पापस्य धर्मशब्दवाच्यत्वाभावात् कथ पापस्य ग्रहणं; वेदबोधितेष्टसाधनाताकत्वस्यैव धर्मत्वात् पापस्य धर्मशब्देनोपादानासंभवात्। इति चेत्—अत्र केचित्—धर्मशब्दः पापस्याप्युपलक्षकः। धर्मं जैमिनिः इत्युक्तौ धर्माधर्मावेव फलप्रदावित्यर्थ इत्यदोषः। उपासन विवक्षन्नत्र सूत्रकारः उपासनस्य यागादेः सर्वस्यापि फलप्रदः भगवानेवेत्यकथयत्। धर्ममात्रविचारेण झटिति जैमिनिः धर्मः एव फलप्रदः इत्याह। अतोऽत्र अधर्मप्रस्तावाभावादेवमुक्तिः।

86. आनन्दाद्यधिकरणे

1 इतरे त्वर्थसामान्यात् । स्वरूपनिरूपकधर्माः कति ? सत्यत्व अनन्तत्वमपि अभावरूपमेवेति अमलत्वमात्रे कथ शङ्का? वस्तुतः भावान्तराभाववादिनामस्माकं मते सर्वस्यापि भावरूपत्वात्शङ्कैव नोत्पद्यते ।

2 स्वरूपनिरूपकधर्माणामिव निरूपितस्वरूपविशेषणगुणानामपि सर्वविद्यानुयायित्वमावश्यकम् । कुत· ? 'ब्रह्मशब्देन च ..अनवधिकातिशायासख्येकल्याण ..अभिधीयते' इति श्रीसूक्त्या सर्वगुणानामपि ब्रह्मपदशक्यतावच्छेदकत्वसिद्धेः तेषामपि अवश्यानुसन्धेयत्वप्राप्ते इत्यादि ।

3 सत्यत्वादि स्वरूपनिरूपकधर्माणा तथात्वमस्ति नवेति विचार । 'इतरे त्वर्थसामान्यात्' सूत्रनिर्दिष्टाः सर्वविद्यानुयायित्वेन सप्रतिपन्ना गुणाः स्वरूपनिरूपकधर्माः 'सत्य ज्ञान अनन्तं, ब्रह्म, आनन्द ब्रह्म 'अस्थूलमनणु' इत्याद्युक्ताः सत्यत्व ज्ञानत्व अनन्तत्व आनन्दत्व अमलत्वरूपाः पञ्च । आनन्दाद्यधिकरणे इतरे त्वर्थसामान्यात् इति सूत्रभाष्ये 'ते च गुणाः सत्यज्ञानानन्दामलत्वानन्तत्वानि इति स्पष्ट भाषितत्वात्। अत एतेषां पञ्चाना सर्वविद्यानुयायित्वं स्वरूपनिरूपकधर्मत्वात् । केचित्तत्र 'सत्यज्ञानमनन्तं' इति वाक्यप्रतिपन्न सत्यत्वज्ञानत्वानन्तत्वरूपाणां त्रयाणामेव स्वरूपनिरूपकधर्मत्वमुशन्ति। तेषामयमाशयः--ब्रह्म स्वेतराचेतनादिवस्तुभ्यो भिन्न सत्यत्वात् ज्ञानत्वात् अनन्तत्वात् इति एतेषां त्रयाणामेव इतरभेदानुमिति जनकत्वम् । अत्र सत्यत्वोक्त्या अचेतन तत्संसृष्टबद्धचेतनव्यावृत्तेः, ज्ञान पदेन नित्यासकुचितज्ञानैकाकारवाचकेन मुक्तव्यावृत्तेः अनन्तपदेन नित्यव्यावृत्तेश्च एतेषां त्रयाणामेव इतरभेदानुमितिजनकत्वम् । एव च ब्रह्मविशेष्यकाचेतनत्वाद्यवच्छिन्नभेदकूटविधेयकानुमितिजनकतावच्छेदकप्रकारताश्रया. इमे एव गुणाः इति एतेषामेव सर्वोपासनविषयत्वं नान्यस्य । अचेतनबद्धमुक्तनित्यव्यावृत्तिरूपव्यावृत्ते. सिद्धत्वात् इतोऽप्यन्यव्यावृत्तेरभावात् । इति । न चैवं सति, आनन्दादयः प्रधानस्य इति सूत्रे आनन्दस्य स्वरूपनिरूपकधर्मत्वोक्तिः कथ? तत्र हि आनन्द

ग्रहणमनुपपन्नं भवेत् त्वन्मते, एवं अक्षरध्यधिकरणे अस्थूलत्वादिरहितत्वरूपामलत्वस्य स्वरूपकत्वस्थापनमपि विरुध्यते इति वाच्यम्। अनुकूलत्वप्रकारकज्ञानस्यैव आनन्दरूपत्वेन आनन्दस्य ज्ञानावस्थाविशेषरूपत्वमिति सत्य ज्ञानं इति लक्षणघटकज्ञानस्यैव आनन्दपदेन सूत्रे उपादानमित्यदोषात्। ज्ञानमेवह्यनुकूलमानन्दः इत्युच्यते इति जिज्ञासाधिकरणश्रीभाष्यमपि अस्मन्मतोपष्टंभकम्। एव सत्यत्वस्य विकारसामान्याभावरूपत्वेन अभावरूपस्य तस्य कथं स्वरूपनिरूपकत्वमित्याक्षेपेण अक्षरध्यधिकरणप्रवृत्तेः। अक्षरत्वादिक विशेषाभावः सत्यत्व विकारसामान्याभावरूपम्। एवं च विशेषाभावकूटस्यैव सामान्याभावरूपत्वात्सत्यत्वविषयकविचार एव तत्राधिकरणे इत्यदोषाच्च। एतत्त्रयमेव स्वरूपनिरूपकधर्मः। अयमेव इतरेत्वर्थ सामान्यात् इत्यत्र विवक्षित। न चैवं सति ते च गुणा सत्यज्ञानानन्दमलत्वानन्तत्वानि इति श्रीभाष्यविरोधः शङ्कनीयः। ज्ञानाभिन्न आनन्दः ज्ञानानन्दः इत्यर्थस्वीकारेणाविरोधात्। ज्ञानानन्दयोरभेदस्य सूत्रसूचितस्य स्पष्टीकरणार्थमेव एवविधनिर्देशोपपत्तेश्च। अमलत्वनिर्देशस्य कथमुपपत्तिरिति चेत्? सत्यत्वामलत्वयोः वस्तुतो भेदाभावात् सत्यपदतात्पर्यविषयभूतमेवामलत्वमिति सिद्धे. एकस्य सामान्या भावरूपता अन्यस्य विशेषाभावरूपता इति वैलक्षण्यद्योतनार्थं पृथङ्निर्देशोपपत्तिः इत्यनुपपत्त्यभावात्। इति।

पञ्चानां स्वरूपनिरूपकत्वं वदतामयमाशयः। श्रीभाष्यस्वारस्यात् प्रसिद्धिप्राचुर्यात्। आनन्दस्य ज्ञानावस्थाविशेषरूपत्वाभ्युपगमे अनुपपत्तेश्च पञ्चापि स्वरूपनिरूपकधर्माः सर्वविद्यानुयायिनः इति धर्मत्रयेणैवब्रह्मस्वरूपे इतरव्यावृत्तिसिद्धे तदतिरक्तानपेक्षा इति तु न युक्त। अनन्तपदघटकवस्तुपरिच्छेदरहितत्वरूपसर्ववस्तुसामानाधिकरण्येनैव सर्वेतरवस्तु व्यावृत्तिसिद्धेः तदिरसत्यत्वाद्यनपेक्षाया अपि सुलभत्वेन तेषामपि स्वरूपनिरूपकत्वापगमप्रसङ्गात् स्वरूपस्वभावविकारशून्यत्वं बोधयता सत्यपदेन स्वरूपविकारवच्चेतनव्यावृत्ति स्वभावविकारवच्चेतनव्यावृत्तिरूपार्थद्वयं प्रदर्शितम्। एवमपि मतान्तरवत् आकाशवत्

स्थूल स्यात् परमाणुवत् अणु स्यात् तयोरपि विकारशून्यत्वात् इति कस्यचित् शङ्काया तन्निवृत्त्यर्थ अस्थूलमित्यादेः आवश्यकत्वात्। अलोहितं अच्छाय इत्याद्युक्तेरपि लोहितच्छायादिनिषेधावश्यकत्वात् । अत· अस्थूलत्वाद्युक्तामलत्वस्य निर्विकारत्वरूपसत्यत्वे नान्तर्भावः शङ्कचशङ्कः इति । एव ज्ञानानन्दयोरभेदकथनमप्यनुपपन्नम् । यदि आनन्दस्य ज्ञानावस्थाविशेषरूपता तर्हि ब्रह्मस्वरूपे सविकारत्वमभ्युपगत भवेत् । ब्रह्मस्वरूपस्य हि आनन्दरूपत्वम् । ज्ञानस्वरूपं ब्रह्म आनन्दस्वरूपमभवत् इत्युक्तं भवेत् । अतः स्वरूपस्यैव परिणामः इति यादवप्रकाशमतस्य विजयप्रसङ्गः । अपसिद्धान्तश्च । ननु ज्ञानमेवह्यनुकूलमानन्दः इत्युच्यते इति श्रीभाष्यसूक्तेः कथं निर्वाह इति चेत्–स्थविष्टमिदं चोद्यम् । अत्र हि स्वरूपभूतज्ञानं नोच्यते धर्मभूतज्ञानमेवात्र विषयः । धर्मज्ञानभूतस्यावस्थाविशेष एवानन्दः । अस्माकं चन्दनादिलेपेन जायमानोह्यानन्दः धर्मभूतज्ञानविशेष एव । नह्यत्र विवदनीयमस्ति । ब्रह्मणो निर्गुणत्वं वदता अद्वैतिनां मत निरसितु प्रवृत्ता तत्र श्रीभाष्यसूक्तिः । अस्माभिः ज्ञातृत्वादिगुणवत्व उक्त, तत्र तत उपरि अद्वैतिना एवमाशङ्कचते–आनन्दो ब्रह्म इति आनन्दमात्रस्य ब्रह्मस्वरूपत्वमुक्तं, नतु अनन्दगुणकत्वमिति । तत्रोत्तरं ज्ञानाश्रयस्य ब्रह्मणः ज्ञान स्वरूपं इति वदतीति परिहृतम् । ज्ञानमेव ह्यनुकूलमानन्दः इत्युच्यते इति। ब्रह्मणः आनन्दरूपता नात्रोच्यते । पर नु आनन्दगुणकत्वमेवेति सगुणत्वमेव ब्रह्मण इति। अन्यथा आनन्द ब्रह्मेति नपुंसकलिङ्गेन भाव्यम् । अत एव विज्ञानमानन्द ब्रह्म इति नपुसकलिङ्गनिर्देशवाक्यमुपरि उपात्तम् । तत्र हि उभयं स्वरूपपरम् । आनन्दस्य ज्ञानावस्थाविशेषरूपत्वे पौनरुक्त्य स्यात् इति शङ्कितुरभिप्रायः । इद च वाक्य स्वरूपपरम् । अत्र स्वयप्रकाशत्व ज्ञानत्व, अनुकूलत्वरूपं आनन्दत्वं च विवक्षितम्। नत्ववस्थाविशेषाद्यश्रित्य इति समाधातुरभिप्रायः । अत एवोपरि—आनन्दं ब्रह्मणो विद्वान् इति व्यतिरिक्तनिर्देशाच्च नानन्दमात्र ब्रह्म अपि त्वानन्दि इति भाषितम् । अतः आनन्दगणकत्वाभिप्रायकं पूर्वभाष्यमिति स्पष्ट विज्ञायते । अत्रापि ज्ञातृत्व-

मेवह्यानन्दित्व इति च भाषितम्। एतेनापि धर्मभूतज्ञानस्यैवावस्था-विशेषः अधर्मानन्द इति विज्ञायते। ज्ञानाश्रयस्य इति भाष्यस्वार-स्यादपि धर्मभूतज्ञानविषयकमिति ज्ञायते—ज्ञानं स्वरूपं इत्यत्र स्वरूप-पद स्वभावपर इति च न विरोधः। अतः पञ्चापि स्वरूपनिरूपक-धर्माः इति।

स्वरूपतो धर्मतश्चैकरूपत्वं सत्यपदेन बाध्यमिति सत्यत्वं भाव-रूप अनन्दपद गुणैः निरतिशयप्रकर्षबोधकमिति अनन्तत्वमपि भाव-रूपम्। यद्यपि भावान्तराभाववादिनामस्थूलत्वादिकमपि भावरूपमेव तथापि अभावस्य स्थूलत्वादिनिषेधाभावे ब्रह्मस्वरूपं स्थूलत्ववत् स्यात् अणुत्ववत् स्यात् इति शङ्कापरिहारो न संभवति। अतः स्थूलत्व-निषेधावश्यकतया तदाऽभावरूपत्वेन लब्धरूपे क्वचित् किञ्चित् तादृ-शेव निषिध्यते इति न्यायेन कथ अभावरूपस्य स्वरूपनिरूपकत्वमिति शङ्का आसीत्। तत्परिहारः तदधिकरणे कृतः।

औदार्यादीनां निरूपितस्वरूपविशेषणत्वादेव न सर्वविद्यानुया-यित्वम्। ब्रह्मशब्देन च इत्यादिना न तेषां शक्यतावच्छेदकत्व उक्तम्। असाधारणधर्मत्वाभावात्। न हि पुरुषोत्तमत्वं शक्यतावच्छेदकम्। बृहत्वं च स्वरूपेण गुणैश्च मुख्यार्थः इत्युक्त्या बृहत्वबृंहणत्वयोरेव शक्यतावच्छेदकत्वम्। अयं ब्रह्मशब्दः तादृशगुणविशिष्टपुरुषोत्तम-वाची इत्येवोक्तम्। सास्नादीनामिव सत्यत्वादीनां शक्यतावच्छेद-कत्वमस्त्येव।

93. हायधिकरणे

'तस्य प्रिया ज्ञातयः सुकृतं'...अत्र ज्ञातिपदं निरर्थकमनर्थक च।

हानौ तूपायनशब्दशेषत्वात्।। 'तस्य प्रिया ज्ञातयस्सुकृतमुप-यन्ति अप्रियाः दुष्कृत'—ननु तस्य पुत्रा दायमुपयन्ति इति दायसम-कालं सुकृतदुष्कृतयोः प्रियाप्रियप्राप्तिकथनं कथ? क्वचित्पितुः दायस्यै वासभवात्। दायसत्त्वेऽपि पुत्राद्यभावस्यापि संभवात्। दायस्य पुत्रा-देस्सत्त्वेऽपि पुत्रस्य देशान्तरगमने पितुश्च तदा मरणे दायस्वीकारा-संभवात्। पितुः दशरथस्य मरणकाले क्वचिदपि पुत्रेषु दायासंक्रमण-

दर्शनाच्चेति चेत् । औचित्यमात्रप्रदर्शनपरत्वादस्या श्रुतेः । सभवत्स्थलाभिप्रायेण दृष्टान्तत्वसभवाच्च । पुत्रासन्निधौ पितुर्मरणेऽपि दायस्वत्त्वार्हत्वस्यानपगमात् ।

ननु प्रिया ज्ञातयस्सुकृतमिति विशेषितत्वात् अप्रिया इत्यत्रापि ज्ञातयः इति संबध्यते इति ज्ञायते । एवं च प्रियेषु ज्ञातिषु सुकृतप्राप्ति अप्रियज्ञातिषु दुष्कृतप्राप्तिरिति सिध्यति । अत 'सुहृदः साधुकृत्यां द्विषन्त पापकृत्या'मिति ज्ञात्यज्ञात्युभयसाधारण्येन 'पुण्यपापविधूननमुक्तं कथ सङ्गच्छते । न च प्रियाः ज्ञातयश्च इति चकारयोजनेन प्रियेषु ज्ञातिषु च उभयत्र सक्रमणमुच्यते इति न विरोध इति वाच्यम् । एवमर्थस्वीकारे प्रिया इति पदस्वारस्यात् ज्ञातय इत्यत्र तस्यानन्वयाच्च अप्रियज्ञातिषु सुकृतसक्रमणापत्तेरवारणात् । न च 'सुहृदस्साधुकृत्या' इति श्रुत्यन्तरबलात् सुहृदयो ज्ञातय इत्यथस्वीकारावश्यकत्वात् अप्रियज्ञातिषु न पुण्यसक्रमणापत्तिरिति वाच्यम् । प्रिया इत्यनेनैव एतादृशार्थसंभवेन ज्ञातिपदस्य व्यर्थत्वापत्तेः । प्रिया इत्यनेनैव सुहृत् ज्ञातिग्रहणसंभवेन पौनरुक्त्यापत्तेश्च । अतः विशेषणविशेष्यभावापन्नत्वेनैवार्थस्य वाच्यत्वात् अज्ञातिषु प्रियेषु सुकृतसक्रमण न सेत्यति सामान्यत ज्ञातिषु सुकृतसक्रमणोक्तौ शत्रुभूतपुत्रादिष्वपि सुकृतसंक्रमणापत्ते । यदि पितुः पुत्रादि शत्रुर्भवति तर्हि पुत्रे तादृशे न सुकृतप्राप्ति, यदि मित्र, तदा तत्र न दुष्कृतप्राप्तिः । अतो विशेषणविशेष्यभावेन अन्यथावाऽन्वयेऽपि अर्थे सामञ्जस्य नास्तीति चेत् ज्ञातय इति औचित्यमात्रप्रदर्शनपरमिति मन्तव्यम् । प्रायशः ज्ञातयः प्रिया एव भवेयुरिति । अतः प्रियेष्वेव सुकृतप्राप्तिः, अप्रियेषु दुष्कृतप्राप्तिरिति श्रुत्यन्तरानुगुण्य च । अत एव अप्रिया इत्यत्र ज्ञातिपदं न प्रयुक्तम् ।

ननु यत्र हानिमात्रश्रवणं तत्र निराश्रयस्य स्थित्यनुपपत्तेः उपायनमपि ग्राह्यमित्युक्त न संभवति । पुण्यपापस्य भगवन्निग्रहानुग्रहरूपत्वेन अस्मत्सिद्धान्तसिद्धत्वात् तद्धानिः निवृत्तिरेव । कूश्माण्डहोमादिप्रायश्चित्तादिना पापपरिहारे कथ निराश्रयस्य स्थितिरिति चेत्-

98. अक्षरध्यधिकरणे

अक्षरधियां त्ववरोधः: । अस्थूलत्वादीनां स्वरूपनिरूपकत्वं न सभवति । निषेधरूपत्वेन 'लब्धरूपे क्वचित्किञ्चित्तादृगेव निषिध्यते' इति न्यायेन स्वरूपनिरूपकत्वासंभवात् । अभावज्ञानं प्रतिप्रतियोगिज्ञान अधिकरणज्ञानं च कारणम्। 'ब्रह्म स्थूलत्वाद्यभाववत्' इत्युक्ते हि पूर्वप्रतिपन्ने ब्रह्मणि स्थूलत्वादीनां निषेधात् पूर्वमेव ब्रह्म प्रतिपन्नमिति कथमेषां स्वरूपनिरूपकत्वमिति पूर्वपक्ष्याशयः। सिद्धान्ते—ब्रह्म सत्यत्वाश्रयः इत्युक्ते पूर्वप्रतिपन्ने एव ब्रह्मणि सत्यत्वान्वयात् सत्यत्वादीनामपि स्वरूपनिरूपकत्वं न भवति । यदि तु 'यद्ब्रह्म तत् सत्यं' उद्देश्यविधेयभावो नोपपद्यते यत् सत्यत्वाश्रयः तदेव ब्रह्मेति, 'या गौः सा सास्नादिमती' इति गो स्वरूप अजानन प्रति वचनव्यक्ति. नैव भवति, या सास्नादिमती सा गौः इत्येव । अतस्सत्यत्वादीना स्वरूपनिरूपकत्वं युज्यत एवेति । तर्हि हेयप्रत्यनीकानन्दादीनामेव स्वरूपत्वात् यत् ब्रह्म तत् अस्थूलं इति वचनस्यानुपपन्नत्वात् यत् अस्थूलं आनन्दरूपं तत् ब्रह्मेत्येव प्रयोक्तव्यत्वात् अनन्दादीनामिवास्थूलत्वादीनामपि स्वरूपनिरूपकत्वसंभव इति ।

97. अन्तरत्वाधिकरणे

1 अन्तरा भूतग्रामवत् अन्तरत्ववाचक· अन्तराशब्दोऽयं तृतीयार्थे डाल् प्रत्ययः । अन्तरत्वेनेत्यर्थः ।

2 अन्तराभूतग्रामवत्स्वात्मन अत्रायं विचारः । उषस्तेन द्विवार पृष्टः याज्ञवल्क्यः क्रमेण 'यः प्राणेन' 'न दृष्टेः' इति समाधान माह । प्रथमसमाधौ उक्तधर्मस्य जीवसाधारण्यं मत्वा पुनः प्रश्ने 'न दृष्टेः' इति जीवमेवोक्तवानिति न मन्यस्व इत्याह । अत्र निरुपाधिकं उच्छ्वासनिःश्वासरूपक्रियानुकूलप्रयत्नाश्रयत्वं उक्तमिति नास्य जीवसाधारण्य इति विरराम उषस्तः । इममर्थमजानन् कहोळः पृच्छति यदेवेत्यादिना । अत्र यताक्षासत्, यदेव साक्षात्इति द्विवारं प्रश्नेन अन्यश्य प्रश्ने अन्यस्य समाधानोक्तौ न प्रयोजनमिति कथनेन च जीवभिन्नपरमात्मैव पृष्ट· इत्यत्र नैव विवादः । मनस्समाधानेनोपरमाच्च

पार्श्वस्थस्य कहोलस्यापि 'य प्राणेन' इत्यत्र निरुपाधिक प्राणनत्वमेव विवक्षितमिति ज्ञानं जायत एव । एवं च कहोलप्रश्नस्य कथमुत्थितिः प्राणनत्वस्य जीवसाधारण्येन कथञ्चित् नेयत्वात् सर्वात्मनाऽसभावित धर्मोक्त्या जीवव्यावृत्तिः कार्या इत्याशयेन कहोलप्रश्नः इत्यपि न मभवति । अशनायाद्यतीतत्वस्यापि जीवसाधारण्यात् । अत्र निरूपाधिकत्वविवक्षणे पूर्वमपि तद्विवक्षासंभवात् । कहोलोपरि अन्यस्त्र कस्यचित् 'यदेव साक्षात्' इत्यादि प्रश्नाभावात् अत्रैव निरूपाधिकत्वविवक्षणमिति च न वाच्यम् । द्विवार पृष्टवता उषस्तेन तृतीयवार प्रश्नाकरणादपि तत्रैव निरूपाधिकत्वविवक्षणसंभवात् । अतः उषस्तस्य पूर्वोक्तार्थज्ञानासामर्थ्यकल्पनं न युक्तमिति ।

सत्यमिदम् । 'यत्साक्षादपरोक्षात् ब्रह्म', ब्रह्मस्वरूपावगमार्थं उषस्तेन प्रश्ने ब्रह्मासाधारणनिरूपितस्वरूपविशेषणकथने न प्रयोजनमिति मन्यमानेन कहोलेन प्रश्नकरणात् अशनायाद्यतीतत्वस्य अमलत्वरूपस्य स्वरूपनिरूपकधर्मत्वात् तदुक्तौ अयं विररामेति ।

भूतग्रामवत्स्वात्मनः इत्यत्र स्वशब्दः भूतग्रामवतः आत्मा इति वैयधिकरण्य परिहाराय । भूतग्रामवत्स्वस्य आत्मेति विग्रहकरणं 'व्यर्थं सत् किञ्चित्' इति न्यायेन निवारयति । अपि च एष ते आत्मा इति श्रुतिवाक्ये राहोः शिरः इतिवत् त्वदभिन्न आत्मा इत्यर्थं विवरण ज्ञापनाय, स्वात्मेति स्वशब्दप्रयोग चकार ।

98 कामाद्यधिकरणे

कामादि इतरत्र...। कामस्य आदिः इति विग्रहे नपुसकत्वमनुपपन्नम् । कामस्य–सत्यकामत्वस्य ग्रहणामपि न सभवति । अतः कामः आदिः यस्येति तद्गुणसविज्ञानबहुव्रीहिः । अपहतपाप्मा विजर इति श्रवणेपि कामस्य आद्यत्वं वैबक्षिकम् ।।

100. प्रदानाधिकरणे

'त्रिधातुः त्रैधातवीयञ्च' इति शीर्षकेण कश्चित् व्यासः मया (सावत्पाकं श्रीदेवनाथताताचार्यैः मीमांसाशिरोमणिभिः) लिखितः । देहलीनगरविराजमानराष्ट्रीयसंस्कृतसंस्थानस्य षाण्मासिक्यां 'सस्कृत-

विमर्शः' इत्यस्यां पत्रिकायां, 1985 तमेवर्षे त्रयोदशे खण्डे, प्रथमद्वितीयभागात्मके प्रकाशने 21-पुटेषु मुद्रापितोऽय वर्तते । तस्य सारांशः संक्षेपेण अत्र तत्सूक्तिभिरेव प्रदर्श्यते ।

'प्रदानवदेव तदुक्तम्' इतीदं भगवता बादरायणेनानुगृहीतेषु ब्रह्मसूत्रेषु, तृतीयाध्याये तृतीयपादे द्विचत्वारिंशम् । एकमेवेदं सूत्रं सिद्धान्तरूपमस्याधिकरणस्य ।

'प्रदानवत्—हविः प्रदानवत् इति पूर्वतन्त्रे संकर्षकाण्डे निर्णीतं विषयं अतिदिशन् सूत्रकार', 'तदुक्त' इति तत्रत्यन्यायं स्वपक्षाधारत्वेन निर्दिशति ।

सकर्षकाण्डे द्वितीयाध्याये, द्वितीयपादे, 'अवदानपाद' नामके अय विचारः कृतो वरीवर्ति । तत्र द्वे अधिकरणे अस्मिन्विषये स्तः । तयोः प्रथम—'तेषां पृथक्कृतानां निरवदानं यथान्येषां हविः पृथक्त्वात्' (संकर्षकाण्डे 2-2-33)

'वचनात्सर्वेषां सहावदीयेत न हि वचनं किञ्चिद् बुभूषति' (संकर्षकाण्डे 2-2-34) इति सूत्रद्वयात्मकम् । आद्यं पूर्वपक्षसूत्रम् । समनन्तरं सिद्धान्तसूत्रम् ।

'त्रिधातु' नामकेष्टौ हविषामवदानविषये अत्र विचारः । 'प्रत्येकं अवदानं कर्तव्यं' इति पूर्वपक्षः। 'सहैवावदान' इति सिद्धान्तः। इत्थं—हविरवदानविषयोऽत्र निर्णीतः ।

द्वितीयं तस्यामेवेष्टौ हवि प्रदानविषयकं विचारं वर्तयति। सूत्र त्रयात्मकमिदमधिकरणम् ।

'तेषा सहप्रदानमवदानैकत्वात्' (स. का. 2-2-35)

'नाना वा देवतापृथक्त्वात्' (स.का. 2-2-36)

'अन्यार्थदर्शनाच्च' (स.का. 2-2-37)

आद्य पूर्वपक्षसूत्रम् । समनन्तरं सिद्धान्तसूत्रम् । तृतीयं गुण सूत्रम् ।

पूर्वोक्तायामेव त्रिधात्विष्टौ हविषां प्रदानविषयः अस्मिन्नधिकरणे बिचार्य निर्णीयते । तिसृभ्यो देवताभ्यः कर्तव्यं हविः प्रदानं

सकृदेव कार्य, न पृथक् पृथक् इति पूर्वपक्षः पृथक्पृथगेव कार्य—अतो-नानात्वमेव हविः प्रदानस्य नैकत्वं—इति सिद्धान्तः अयमेव न्यायः तदुक्त इति भगवता बादरायणेन निर्दिष्टः। सकर्षकाण्डः देवस्वामि-विरचित भाष्यसहितः मद्रनगरविश्वविद्यालयेन 1965 तमे संवत्सरे मुद्राप्य प्रकाश्य नीत । तत्र 86-87 पुटयोरय विषयः वर्तते ।

इय त्रिधातुनामिका इष्टिः कृष्णयजुर्वेद तैत्तिरीय सहितायां द्वितीयकाण्डे तृतीय प्रश्ने षष्ठेऽनुवाके विहिता । 'यं कामयेतान्नाद-स्यादिति तस्मा एत त्रिधातुं निर्वपेदिन्द्राय राज्ञे पुरोडाशमेकादशक पालमिन्द्रायाधिराजायेन्द्राय स्वराज्ञे ..... ' इति तस्या विधायकं वाक्यम् (तै.सं. 2-3-6) अस्याः तिस्रो देवताः—(1) इन्द्रोराजा (2) इन्द्रोऽधिराजः (3) इन्द्रस्स्वराट्—इति ।

अत्र विशेष्यभूतस्य इन्द्रस्य एकत्वेऽपि—राजा अधिराजः स्वराट् इति विशेषणानां भिन्नत्वात् देवतानां परस्पर भेद एव अत एव च परस्परं भिन्ना इमास्तिस्र इष्टयः । आसामेव प्रदानाधिकरणे ब्रह्म-सूत्रकारेण निर्देश कृतोऽस्ति ।

त्रैधातवीयेष्टिरिति अन्या काचित् काम्येष्टि, कृष्णयजुर्वेद तैत्तिरीयसहिताया द्वितीयकाण्डे चतुर्थे प्रश्ने एकादशेऽनवाके विहिता । तस्यां देवतापृथक्त्वं नास्ति । इन्द्राविष्णू तस्याः देवता ! इन्द्रे विष्णौ च व्यासज्यवृत्ति देवतात्वमेकमेव । अतः हविः प्रदान सकृदे वास्यामिष्टौ, न नाना ।

ब्रह्मसूत्रभाष्य तद्व्याख्या ग्रन्थेषु प्राचीनेषु विस्पष्टतया प्रदा-नाधिकरणे त्रिधात्विष्टेरेवोदाहरणत्वं प्रतिपादितमस्ति अर्वाचीन-व्याख्याग्रन्थेषु तु महान् प्रमादोऽत्र प्रसरं लब्धवान् । 'त्रैधातवीयेष्टि' अस्मिन्नधिकरणे ते उदाहृतवन्तः क्रमशस्तान् निर्दिशामः ।

1. ब्रह्मसूत्रशाङ्करभाष्यं—व्याख्यानपरम्परया सह मुम्बईनगरे निर्णयसागरमुद्रणालये प्रकाशित 1938-A D. वत्सरे जगद्विख्यात-कीर्तयः ब्रह्मश्री. अनन्तकृष्णशास्त्रिमहोदयाः अस्य मुद्रणस्य संपादकाः।

मीमांसकमूर्धन्य श्रीमदप्पय्यदीक्षितेन्द्रविरचितं कल्पतरुव्याख्यानात्मकं परिमलमप्यत्र संयोजितमस्ति। तत्र प्रकृतसूत्रव्याख्यानावसरे, 'अस्याः त्रिपुरोडाशायाः त्रैधातवीयाख्यायाः इष्टेः' इति मुद्रितमस्ति।

2. पूर्वमीमांसाकोशः इति ग्रन्थः श्रीयुतकेवलानन्दसरस्वती स्वामिभिः सङ्कलितः 'प्राच्यकाठशालमण्डलग्रन्थमाला' प्रकाशितः चतुर्थभागे 1979 तमे पुटे—

'त्रैधातवीयायां पुरोडाशश्रेदेशिषो सकृदेवावदानम्' इति मुद्रितं विराजते।

3. 'नयमयूखमालिका' इति ग्रथः विशिष्टाद्वैतमताणेनुसारी श्रीदीक्षितेन्द्रैरेव विरचितः। 1915-तमे क्रिस्ताब्दे कंभघोणे अयं मुद्रापितः। तत्र 100-तमेपुटे—

'त्रैधातवीयेष्टिः—सा इन्द्रायराज्ञे इति वचनविहितत्रिपुरोडाशा' इति मुद्रितमस्ति।

4. दशानामप्युपनिषदां विशिष्टाद्वैतमतानुसारिभाष्य श्रीमद्रङ्गरामानुजमुनि प्रणीतं विराजते। एतदेव भावप्रकाशिका नाम्नी श्रुत-प्रकाशिकाव्याख्या—'शारीरकशास्त्रार्थदीपिका' नामा स्वतन्त्र ग्रन्थश्च व्यलिख्येताम्।

तत्र भावप्रकाशिकायां प्रकृतसूत्र व्याख्यानावसरे—

'नानावा देवतापृथक्त्वाद्रि'ति। तत् नानाप्रदानाधिकरणमित्थम्-अस्ति त्रैधातवीयेष्टिः इन्द्रायराज्ञे इत्यादिवचनविहिता।.....परेत्विन्-त्यादि। यथा इन्द्रायराज्ञे इति त्रिपुरोडाशायां त्रैधातवीयेष्टौ' इति मुद्रितमस्ति।

तथा शारीरकशास्त्रार्थदीपिकायामपि 268 तमेपुटे, प्रदानवदेव तदुक्तम्।—त्रैधातवीयेष्टिः इन्द्रायराज्ञे.....इति त्रिपुरोडाशा इति मुद्रितमस्ति। सुगृहीतनामधेयानां उत्तमूर. वीरराघवाचार्याणां संपादने भावप्रकाशिकामुद्रणे एवमस्ति।

5. केवलमेतावदेव तैरेव विद्वद्वरेण्यैः 'भाष्यार्थदर्पणानाम्न्या व्याख्यया सह मुद्रापित श्रीभाष्य 1964 **A.D.** वत्सरे। तत्र 733 तमेपुटे

'धर्मानुसधानावृत्तौ दृष्टान्त सूचित विवृणोति यथेति । अस्ति त्रैधातवीयेष्टिः । . . ' इति मुद्रितमस्ति । पुनरपि 734-तमेपुटे 'अभाप्यत्र त्रैधातवीयेष्टौ' इति मुद्रितमस्ति । एवं अतिप्रौढानां विद्वद्वरेण्यानां प्रकृतकाम्येष्टिविषये नाम व्यत्यास केन कारणेन समजायत? उभयोर पीष्टचोः त्रिपुरोडाशत्व – अन्यानि च कानिचित् । एतद्विरतरः अस्मदीये लेखे एतद्वचासोपक्रमनिर्दिष्टेसु निपुण निरूपितो वर्तते । प्राशाणिकै वस्तुतत्त्वसंरक्षणतत्परै विद्वद्भिः पूर्वोपदर्शितेषु ग्रन्थेषु विद्यमानः अनुपपन्न पाठ शोधयितव्य एव । अय प्रमाद इतोऽप्युत्तरकाले मानुवर्ततामिति अस्मदीया प्रार्थना । इति विदुषामनुचरः

11-6-1990 नावल्पाक श्री देवनाथताताचार्यः

101. लिङ्गभूयस्त्वाधिकरणे

नारायणानुवाके यद्यद्विद्याप्रत्यभिज्ञापकशब्दास्सन्ति तस्य तत्तद्विद्याशेषत्वमेव युक्त नतु सर्वविद्याशेषत्वमपि तत्प्रत्यभिज्ञापकशब्दाभावात् इति पूर्वपक्षोऽत्र यद्यपि संजायेत । अथापि—बह्वीषु विद्यासु तत्तत्प्रत्यभिज्ञापयशब्दवलेन जगत्कारणस्य नारायणस्य ध्येयत्वसिद्धौ प्रत्यभिज्ञापकशब्दाभावस्थलेपि कारणत्वमोक्षप्रदत्वादिसाम्यात् तस्यैव ध्येयत्वमर्थात्सिध्यति । नहि कारणत्वादि नारायणादिव्यतिरिक्तनिष्ठ। बहुनिष्ठ च न भवति । अन्तस्तद्धर्मोपदेशात् इति बहुनिष्ठत्वस्य निषिद्धत्वात् । तत्र हि कल्पभेदेन अतिशयितशक्तीना बहूना कारणत्व माक्षिप्य परिहृतम् । एतद्विस्तरस्तु अस्मदीय श्रीभाष्यव्याख्यायां चन्द्रिकाया द्रष्टव्यः ।

103. शरीरेभावाधिकरणे

व्यतिरेकस्तद्भावमावित्वात् । अपहतपाप्मत्वादिगुणविशिष्ट एव जीवः उपास्यः कुतः तद्भावभावित्त्वात् हेतुः । अत्र भाष्यं—तद्भावभावित्वात् तद्रूपापत्तेः इति भाष्यप् । अपहतपाप्मत्वादिरूपस्य मोक्षदशायां आपत्ति –प्राप्तिः अपहतपाप्मत्वादीनां उपासभावे एव भाविनी । अतः तत्प्राप्ते उपासनभाव भावित्वमिति । एव च अपहतपाप्मत्वादीनां उपास्यत्वे एव मोक्षदशायां प्राप्तिः स्यात् । आवश्यकी

च एतेषां मोक्षदशायां इति एतद्गुणविशिष्ट एवोपास्यः इति भावः। विहितगुणविशिष्टोपासनेपि सर्वगुणविशिष्टब्रह्मप्राप्तिरूपमोक्षः सिद्धांत सिद्धः। अतः अपहतपाप्मत्वादिकमनन्तर्भाव्योपासनेपि तत्प्राप्तिः वक्तव्या, तथैव भवति इत्यादौ एवकारस्यान्ययोगव्यवच्छेदार्थकत्वं पराकृतम्। एवं च तद्भावभावित्वात् इति हेतुः कथं घटताम्। इत्थम्—उपासितगुणादेर्या प्राप्तावप्यबहिष्क्रिया सा तत्क्रतुनयग्राह्या-नाकारान्तरवर्जनमिति प्रमाणबलेन एवकारस्यायोगव्यवच्छेदार्थकत्व स्वीकारणीयम्। तथा च कर्तृत्वभोक्तृत्वादिविशिष्टोपासने मोक्षेपि तत्प्राप्तिरनिवार्या। एवं च मोक्षस्यापि संसारतापत्तिः इत्यत्र तात्पर्यात्। ततश्च तद्भावभावित्वात् कर्तृत्वभोक्तृत्वादीनां उपासनभावे मोक्षदशायामपि भावित्वमिति सूत्रतात्पर्यम्। एवं चायोगव्यवच्छेद-रूपार्थोपि तद्भावभावित्वादिति खण्डेनैव सूचितः इति बोध्यम्।

ननु तु इत्यनेनैव सूत्रस्य सिद्धान्तपरत्वं सिद्धम्। यद्वा न इत्यने नैव वा सिद्धान्तपरत्वम्। एवं च न तु इत्युभयोपादानं किमर्थमिति चेत् पूर्वपक्षव्युदासं कृत्वा 'एवमेव वाच्यं नत्वेवं' इति व्यवहार। प्रायशः शास्त्रेषु दृश्यते। तत्र स्वारस्यातिशयं मत्वा न तु इति व्यवहारं रच यन्ति। अत्रापि अपहतपाप्मत्वादीनामुपास्यत्वे एवस्वारस्यम्। मोक्षस्य निरतिशयसुखरूपत्वात् तद्भाविस्वरूपानुसन्धाने हि स्वारस्यम्। भाविनः अर्चिरादिमार्गस्य यथा अनुसन्धाने स्वारस्य रसवत्ता च। कामिन्यपिहि लोके स्वभर्तृगृहगमन तद्भाविसुखादीनां रसवत्तांचानु सन्धत्ते। यद्वा नतूपलब्धिवत्-यथोपलब्धि जीवः उपास्य इति पूर्वपक्षः। कर्तृत्वभोक्तृत्व इहामुत्रसंचारक्षमत्वादिविशिष्ट एवोपलभ्यते जीवः। अतस्तथैवोपास्यः इति पूर्वपक्षः। तत्खण्डनार्थं प्रवृत्तः अयं खण्डः न तूपलब्धिवत् इति। यथोपलब्धि नोपास्य इति तात्पर्यम्। अस्मिन् पक्षे 'ब्रह्मोपलब्धिवत्' इति न दृष्टान्तप्रदर्शनमिति ध्येयम्।

107. विकल्पाधिकरणे

विकल्पोऽविशिष्टफलत्वात्। कथमविलक्षणफलत्व विद्यानां? इन्द्रप्राणमधुविद्यादिषु विलक्षणफलदर्शनात्। न हि मधुविद्यानिष्ठस्य

वमुपदप्राप्तिः कर्मफलम् । विद्याफलमेव हि तत् । ब्रह्मप्राप्तिरूप-फलमात्रे तु अवैलक्षण्यमुपपादयितु शक्यते तावन्मात्रस्य फलत्वाभावात् तथासति सद्विद्यानिष्ठस्यापि वस्वादि फलप्राप्त्यापत्तेः । ननु मधु-विद्यादिव्यतिरिक्त ब्रह्ममात्रफलकविद्यानामेव विकल्पोऽत्रोच्यते, न तु सर्वासाम् । न च तावता मधुविद्यायाः सद्विद्यायाश्च समुच्चया-पादनं शक्यशङ्कम् । मधुविद्यानुष्ठानानन्तर तयैव ब्रह्मप्राप्तिसभवेन पुनः सद्विद्यानुष्ठानस्यानावश्यकत्वात् । अतो न दोषः इति चेन्न-सद्विद्यानुष्ठानानन्तरं मधुविद्यानुष्ठानापत्तेरवारणात् । अवान्तरफलस्य अधिकस्य सत्वात् । मधुविद्यानुष्ठानानन्तरमपि इन्द्रप्राणविद्यानुष्ठाना पत्तेश्च । उत्तरयोरपि विलक्षणावान्तरफलकत्वात् । न चोपासनस्य ब्रह्मप्राप्तिफलकस्य आप्रयाणादनुवर्तनीयत्वेन कथमुभयानुष्ठान घटते इति वाच्यम् । अनयैव युक्त्या वारणसभवे अविशिष्टफलस्य शङ्का-वारणहेतुत्वोक्ते. अप्रयोजकत्वप्रसङ्गात् ।

ननु प्रपत्तिविद्यायाः अत्यन्त सग्राह्यतया कथमविशिष्ट फलत्वं । प्रपत्तेः अनभ्युपगतप्रारब्धखण्डनाशक्त्वस्य भक्तेस्तदभावस्य च अभ्युपगमेन फलवैषम्यम् । न चात्र व्यस्थितकल्पेन परिहारः क्रियते मधुविद्यादिष्वप्येवमेव । अतस्सर्वदोष परिहारः 'मुमुक्षुत्वं . विकल्प्येत' आचार्यपाद श्रीसूक्तिरप्युपपद्यत इति वाच्यम् । तावतापि अविशिष्ट-फलत्वोपपादनस्यासंभवात् । व्यवस्थितविकल्पे अविलक्षणफलकत्व कथम् ?

अपि च वह्नि प्रति तृणारणिमणिष्वन्यतमस्य कारणत्वे अन्य-तमाभावेपि कार्योत्पत्त्या व्यभिचारपरिहारायाव्यावहितोत्तरत्वनिवेश इवात्रापि सद्विद्याव्यवहितोत्तरजायमानमोक्षं प्रति सद्विद्याकारणम्। दहर विद्याव्यवहितोत्तरजायमानमोक्षं प्रतिदहरविद्याकरणं इति स्वीक्रियते । अतः परस्परव्यभिचारपरिहारः। एवञ्चाविलक्षणफलत्वाभावेन विकल्पो पपादनमेव न संभवति । अतोऽस्य सूत्रस्य सर्वथाऽनुपपन्नतैवेति चेत्—

विद्यायाः आप्रयाणादनुवर्तनीयत्वसिद्धेः एकेन विद्याद्वयानुष्ठान न सभवति । तावतैव पूर्वपक्षशङ्कावारणसंभवेपि अविद्यानिवृत्तिपूर्वक ब्रह्मप्राप्तिफलस्य सर्वविद्यास्वपि वैषम्यं नास्तीति सूचनार्थं सूत्रप्रवृत्ति.।

विकल्पोऽविशिष्टफलत्वात् । अत्र विशिष्टफत्वादित्यपि पदच्छेद वर्तु शक्यते । सर्वासां ब्रह्मविद्याना अविद्यानिवृत्तिपूर्वकत्वविशिष्टब्रह्मप्राप्ते फलत्वाद्विकल्प इत्यर्थः । यद्वा 'शिष्टं स्पष्टं' इत्यादा विवशिष्टपदस्य शेषवत्परतया विगत शिष्टफलं याभ्यः इति व्युत्पत्त्या एकविद्यापेक्षया अन्यविद्यायाः शिष्टफलकत्वभावासिद्धेः सर्वविद्यानामपि कृत्स्नफलजनकत्वं सिध्यतीति विकल्पसिद्धिरिति ।

115. सर्वान्नानुमत्यधिकरणे

अत्र चशब्दोऽवधारणे इति श्रीभाष्यं, पूर्वपक्षव्यावर्तकत्वमावश्यक इत्येतावन्मात्रमवलम्ब्य च शब्दस्य अवधारणार्थकत्वं स्वीकृतं इति न । अवधारणार्थकत्वे स्वारस्यं चावलम्ब्य । त्रिष्वप्पयमन्वेति सर्वान्नानुमतिरेव न तु तद्विधिः । प्राणात्यये एव न तु सर्वदा तद्दर्शनादेव, न तु विशेषानुपादानात् इति । नन्वत्र सिद्धान्ते—उषस्तिः साक्षात्कारावस्योपासनवान् न वा ? पूर्वत्र न वा अजीविष्य इति हेतु र्न भवति । मरणेपि मोक्षोपपत्तेः आप्रयाणात् इति हि सूत्रं, अन्त्ये नास्यानुष्ठान प्रमाणमिति चेत्—उच्यते । अयं हि भागवतोत्तमः ब्रह्म विच्छ्रेष्ठः मोक्षोपायब्रह्मविद्यायां गाढमवतीर्णश्च । स्वस्य मुमुक्षुत्वात् स्वोपासनस्य साक्षात्कारावस्थत्वं अवश्यं सम्पादनीयमेव । अतस्तन्निष्पत्यर्थं स्वमरणमनाकाक्षमाणः न वा अजीविष्यमित्याद्युवाच । अतः साक्षात्कारावस्थोपासनाभावेपि ब्रह्मवित्वप्रयुक्तगौरवातिशयवत्वात् अस्यानुष्ठान अतिप्रमाणमेव । श्रोतव्यः मन्तव्यः निदिध्यासितव्य इति एतावत्पर्यन्तमागतस्यास्य ऋषिप्रायस्योषस्तेः अनुष्ठान कथमप्रमाण भवेत् । यद्वा पूर्वकल्पोपि युक्त एव । आधिकारिकपुरुषा अपि वसिष्ठानन्तर तपःप्रभृतयः पुत्रनाशजन्मादिविपत्तिभाजो भवन्ति । कुतः स्वायुषः अपरिसमाप्तत्वात् । चरमशरीरावसाने एव अन्तिमस्मृति निष्पत्त्या उपायपूर्ति ततो मोक्षः इति ज्ञानवन्तस्ते स्वमरणं ते मध्ये

नाकाक्षन्ति । एवमेवायं साक्षात्कारावस्थोपासनवानपि अन्तिमस्मृतिमपेक्षमाणः न वा अजीविष्य इत्याद्युवाच इति मन्तव्यम् ।

124. आवृत्त्यधिकरणे

आवृत्तिरसकृदुपदेशात् । यद्यपि 'मामुपास्व' इत्यादि पूर्वाधिकरणेष्वेव उपासनस्योपायत्वोक्तेः ध्यानरूपत्वोक्तेश्च 'ध्यै चिन्तायां' इति चिन्तनरूपत्वात् चिन्तायाश्च स्मृतिसन्ततिरूपत्वमित्यावृत्तिः सिद्धैव । तथापि विद्युपास्त्यो व्यतिकरेणोपदेशस्तत्र नास्ति पर्यायत्वा सिद्धिश्च । अपि च सर्वत्र ज्ञानस्यैव मोक्षहेतुत्वं उपासनस्य भेदवासना निरासहेतुत्वमेवेति साक्षान्मोक्षसाधनत्व 'ब्रह्मविदाप्नोति पर' इति श्रुतस्यवेदन स्यैवेत्रि पूर्वपक्ष्यभिप्रायः ।

125. आत्मत्वोपासनविचारः

तत्तद्विद्योदितगुणविशिष्टस्य सत्यत्वज्ञानत्वादि स्वरूपनिरूपकधर्मविशिष्टस्य जगत्कारणस्य ब्रह्मणः उपासन मोक्षजनकमिति वेदान्त सिद्धान्तः । अत्रचोपासने उपासकस्य जीवस्य शरीरभूत ब्रह्मेति शरीरात्मभावसबन्धमप्यवगाह्य उपासन कार्यम् । इदञ्च आत्मेतितूपगच्छन्ति ग्राहयन्ति च इति सूत्रसिद्धम् । सर्वशरीरकस्य ब्रह्मणः उपासनवेलायां ब्रह्म स्वात्मा इत्यनुसन्धानं कार्यम् । 'आत्मेत्येवोपासीत' इति श्रुतिवाक्यपर्यालोचनायां ब्रह्मणः स्वस्य च शरीरात्मभावसंबन्ध सत्त्वात् स्वस्यात्मत्वं ब्रह्मणोऽस्तीति तथानुसंधानं युक्त भवति । न चात्मत्वेनोपासने विधीयमाने तृतीयायाः प्रकारत्वार्थकत्वात् आत्मत्वप्रकारकब्रह्मविशेष्यकोपासनं इति फलति । इद च रजतत्वप्रकारक शुक्तिविशेष्यक ज्ञानमिवभ्रमरूपमेव भवेत् । ब्रह्मणः जीवत्वरूपस्वात्मत्वाभावात् इति वाच्यम् । अत्रात्मत्वस्य शरीरात्मभावरूपत्वेनादोषात् । स्वनिरूपितात्मत्वप्रकारक ब्रह्मविशेष्यकोपासनस्य भ्रमरूपत्वाभावात् । न हि जीवब्रह्मणोः अभेदमवगाह्य इदमुपासनं प्रवृत्तम्। येन भ्रमरूपता आपद्येत । तदुपासनप्रकारश्च सत्यत्वादिविशिष्टं तत्तद्गुण विशिष्टं अह ब्रह्मेति । अत्राहमर्थः उपासकजीवस्यात्मेत्यर्थः । प्रकारवाचिनां शब्दानां प्रकारिपर्यन्तत्वस्य चराचरव्यपाश्रयस्तु...इति सूत्र-

सिद्धत्वात्। जीवस्य ब्रह्मशरीरत्वेन ब्रह्मप्रकारत्वात् इद जीवप्रकारक ब्रह्मविशेष्यकोपासनमिति फलितम्। पञ्चाग्निविद्यायां तु ब्रह्मशरीरभूतोऽहं इत्युपासनरूपत्वात्। ब्रह्मविशेष्यक जोवप्रकारकत्वं विज्ञाय जीवविशेष्यक ब्रह्मप्रकारकत्वावगाहनेनोपासनं कार्यम्। उभयत्र अहं ब्रह्मेत्येवोपासनप्रकारः। विशेषणविशेष्यभावे पर व्यत्यासः। अहमर्थोपासकशरीरिभूत ब्रह्मेत्यर्थ। पञ्चाग्निविद्यायां तु ब्रह्मशरीरभूतो अह इत्यर्थः। सर्वविद्यासु अनुसन्धीयमानत्वेनोक्तस्यात्मत्व विषयकत्वस्य पञ्चाग्निविद्याव्यतिरिक्तबिद्यास्वेवेति ज्ञेयम्। पञ्चाग्निविद्यायां हि जीवविशेष्यकत्व ब्रह्मणप्रकारकत्वयोरवगाहनेन तद्विपर्ययानुसंधानासंभवात्।

ननु आत्मत्वानुसन्धान किमर्थं?—जीवपरयोः शरीरात्मभावसबन्धस्य वास्तविकत्वेपि तथानुसन्धाने उपासनवेलायां प्रयोजनाभावात्। नचात्मत्वानुसन्धानाभावेषि मोक्षदशायां तत्प्राप्ति र्न संभवतीति वाच्यम्। अननुसन्धानेऽपि तत्प्राप्तिसभवात्। अन्यथा मोक्षस्य अविशिष्टफलत्वं न सिध्येत्। तत्तद्गुणमात्रविशिष्टब्रह्मणः उपासने तदन्यगुणाना मोक्षदशायामप्राप्तौ कथमविशिष्टफलत्वम्? न च यथा क्रतुन्यायविरोधः शङ्क्यः 'त यथा यथोपासते तथैव भवति' इति एवकारश्रवणात्।

उपासितगुणव्यतिरिक्त गुणाना प्राप्तौ असभवस्योक्तत्वादिति वाच्यम्। अत्रत्यैवकारस्य अन्ययोगव्यवच्छेदकत्वरूपार्थाभावात्। अन्यथा द्वात्रिशद्विद्यासु उदिततत्तद्गुणविशिष्टब्रह्मणः उपासने तत्तद्गुणविशिष्ट ब्रह्मानुभवरूपफलस्यैव संभवात् तदरिक्तगुणानामामनुभवाभावप्रसङ्गाच्च स्वर्गादिवत् मोक्षस्यापि भिन्नरूपत्वापत्तेः। तद्गुणानामननुभवेन मुक्तस्यासर्वज्ञत्वापत्तिश्च। 'सर्वं ह पश्य· पश्यनि' इत्यादि विरोधश्च प्रसज्यते। अतः उपासितगुणादेर्या प्राप्तावप्यबहिष्क्रिया। सा तत्क्रतुनयग्राह्या नाकारान्तरबर्जन'मिति न्यायेन उपासित गुणाव्यतिरिक्तगुणानामपि मोक्षदशायां तत्क्रतुन्यायेन निवारणाभावात् मोक्षोपासने आत्मत्वस्यानुपास्यत्वेऽपि फलदशायां

तदनुसभवः इति आत्मत्वानुसन्धान किमर्थ कार्य? 'सर्व ह पश्यः' इति मुक्तस्य सर्वज्ञत्वात् 'य पृथिव्या तिष्ठन्' 'यः आत्मनि तिष्ठन्' इत्याद्युक्तस्य स्वशरीरकब्रह्मणोऽपि अनुभवात् स्वपरगतशरीरात्मभावानुभवस्य स्वतः प्राप्तेः। उच्यते—

फलदशायां आत्मत्वानुसन्धानं भविष्यतीति हेतोः नात्र आत्मत्वानुसन्धानस्यावश्यकर्तव्यतोच्यते। येन पूर्वोक्तचोद्यस्यावकाशः स्यात्। परन्तु 'आत्मेत्येवोपासीत' इति आत्मत्वोपासनस्य विहितत्वात्तथोपासन कार्यमित्युच्यते। अविहितस्यानुष्ठाने वा विहितस्य परित्यागे वा अयथावदनुष्ठित भवतीति फलस्यैवाप्रसक्तेः। न हि ज्योतिष्टोमादि कर्मसु अविहितस्यान्यस्य सग्रहे विहितस्यागादेः परित्यागे वा फल सेत्स्यति। नापि मन्त्रोच्चरणादिष्वपि अग्नये स्वाहा इति स्थाने 'वैश्वानराय स्वाहा' 'अनलाय स्वाहा' इत्याद्युच्चार्य अग्नौ हवि प्रक्षेपे फलसिद्धिः दृष्टा। अतः शास्त्र यथायथोपासनं कार्य विदधाति तथा अनुष्ठाने एव कर्मपूर्ति अन्यथा न भवतीति अवश्यस्वीकार्यत्वात्। अन्यथा तत्तद्विद्यासु उदितगुणाना सर्वेषामेव कथमुपसंहारावश्यकता। तत्रापि हि कतिपयगुणपरित्यागेन केषाञ्चिदेव अनुसन्धानेऽपि अनुपासितगुणस्य प्रान्तावबहिष्कारात्। तत्कनुन्यायविरोधोपपत्तेः। अष्टगुणोपजुष्टस्य दहराकाशस्य यत्रोपास्यत्वं विहित तत्रापि केषाञ्चिद्गुणानां परित्याग संभवाच्च। उपासनवेलाया तेषामनुसन्धानाभावेपि प्राप्तिदशायां अनुभवोपपत्तेः। अतो यथाविहितमनुष्ठाने एव फलसभवात् अत्र आत्मेत्येवोपासीत इति आत्मत्वोपासनस्य विहितत्वात् 'त्वं वा अहमस्मि भगवो देवते, अह वै त्वमसि...' इति उपासकानामनुष्ठानदर्शनाच्च अहंग्रहोपासनमवश्य कार्यमेव। एतत्सर्वमभिप्रेत्यैव 'उपगच्छन्ति च' इति सूत्रखण्डं व्यरचयत्।

ननु यथाविहितमनुष्ठाने एव फलमिति नियमो नोपपद्यते। कथमन्यथा एक आत्मनः शरीरे भावादित्यत्र शरीरे विद्यमानस्योपासकस्य यादृशं भोक्तृत्वादिरूप तद्विशिष्टतया स्वस्योपास्यत्वाक्षेपः सङ्गच्छते? तत्र परमात्मोपासन परमात्मविशेषणतया स्वस्यापि

उपासनस्य आध्यात्मयोगाधिगमेन लब्ध्वा इति श्रुत्या 'त्रयाणामेव चैवमुपन्यास प्रश्नश्च' इति सूत्रेण च सिद्धत्वात् स्वस्यानुसन्धान-दशाया शरीरे विद्यमानदशास्थभोक्तृत्व इहामुत्र ससारक्षमत्वादि विशिष्टतयैव अनुसन्धानस्यौचित्यमिति पूर्वपक्ष कृत्वा तादृग्रूपतया जीवानुसन्धाने अयोगव्यवच्छेदपरैवकारघटित तत्कतुन्यायेन मोक्ष-दशायामपि भोक्तृत्वाद्यापत्तिः प्रसज्यत इति सिद्धान्तितम् । अत. यथाविहितमनुष्ठानाभावेऽपि फलसिद्धिमभ्युगम्य भोक्तृत्वाद्यापत्तिः प्रसञ्जिता इति चेन्मैवं, तत्र फलसिद्धेरेवानभ्युपगमात् । तत्र भोक्तृत्वादिविशिष्टजीवविशिष्ट ब्रह्मोपासनेमोक्षो भवतीत्यभ्युपगम्य भोक्तृत्वाद्यापत्तिश्च भवतीति न प्रसञ्जितम् । मोक्षो न भवतीत्यत्रैव तात्पर्यात् । अन्यथा वशनस्य व्याहतत्वापत्तेः । न हि सर्वकर्म निवृत्ति रूपस्य मोक्षस्य कर्मजन्यफलभोक्तृत्वरूपत्वमुपपद्यते । अतः फलदशायां भोक्तृत्वाद्यापादन तस्य मोक्षरूपत्वमेव न भवतीत्यत्रैव तात्पर्यम् । अत आत्मत्वाद्यनुसन्धानाभावे विहितपरित्यागः भोक्तृत्वाद्यनुसन्धाने अविहितस्वीकारश्च । न च भोक्तृत्वाद्यनुसन्धानस्याविहितत्वादेव न कार्य इति कुतो नोक्तमिति वाच्यम् । यथावस्थितोपासन यथा विहितोपासन यथावस्थितफलजनकोपासनमिति प्रकारत्रयं वर्तते । अनुसन्धानदशायां स्वस्य भोक्तृत्वादिविशिष्टतया यथावस्थितविषय-कत्वेऽपि स्वगत भोक्तृत्वाद्यनुसन्धानस्य यथाविहितत्वमपि नास्ति यथा-वस्थितफलजनकत्वमपि नास्ति इत्यत्यन्त जघन्यत्वसूचनाय भोक्तृ-त्वाद्यापत्तिवर्णनेन समाधानोक्तेः । ज्योतिष्टोमादिकर्मकर्तुः भावि-स्वर्गगत स्वस्वरूपानुसन्धानं विना देहातिरिक्तात्मास्तित्वज्ञानमात्रा-पेक्षणवत् भाविमोक्षगतस्वरूपानुसन्धानाभावेऽपि तात्कालिकदशास्थ स्वरूपानुसन्धानस्यैव पर्याप्तत्वमित्यभिप्रेत्य पूर्वपक्षोदयात् । अत. आत्मत्वानुसन्धानपरित्यागः भोक्तृत्वाद्यनुसन्धानस्वीकारश्च अनुपपन्न ।

ननु आत्मत्वोपासनस्य पञ्चाग्निविद्याव्यतिरिक्तब्रह्मविद्यास्वे-वावरोध , न तु पञ्चाग्निविद्यायामपीति कुतः सकोचः क्रियते? स्वात्म-शरीरकं ब्रह्म, ब्रह्मशरीरभूत स्वमित्युभयविधानुसन्धानेपि अर्थाबाधेन

उपासनोपपत्तेः। मैवं—अर्थस्याबाधेऽपि उभयप्रकारेणानुष्ठानानौचित्यात्। उपासनं हि ज्ञानरूपं, तच्चविशेषणविशेष्योभयावगाहि। जानातीत्यादि ज्ञानार्थकधातुप्रयोगस्थले धात्वर्थे ज्ञाने एव विशेषणविशेष्ययोरन्वय.। नीलं घटं जानामीत्यादौ नैल्यनिष्ठप्रकारताकं घटनिष्ठ विशेष्यताक ज्ञान इति बोधात्। उपासनस्यापि ज्ञानरूपत्वेन उपासनरूपज्ञाने जीवस्य प्रकारतया ब्रह्मणश्च विशेष्यतयाऽन्वयः। तथा च जीवप्रकारक ब्रह्मविशेष्यक उपासनमिति फलितम्। इत्थ च सर्वत्र ब्रह्मोपासनेषु ब्रह्मणो विशेष्यत्व जीवस्य प्रकारत्वञ्चेति आत्मत्वानुसन्धानबलेन ज्ञापितम्। पञ्चाग्निविद्यायां तत्तद्गुणविशिष्टब्रह्मणः प्रकारत्व जीवस्य विशेष्यत्वं च। अतोऽस्मिन् उपासने ब्रह्मणः विशेष्यत्वं इति कथं तस्य प्रकारत्वम्। अतः ब्रह्मप्रकारक जीवविशेष्यकोपासनभूतायां पञ्चाग्निविद्यायां नात्मत्वासुन्धानस्य प्रसक्तिरित्यलं विस्तरेण।

130. तदधिगमाधिकरणे

तदधिगमे.....। अत्र स्मृत्या श्रुतिबाधः कथमिति शङ्का। प्रायश्चित्तादिना पापविनाशस्य संप्रतिपन्नत्वात् प्रायश्चित्तेतरनाश्यत्वनिषेधस्य स्वीकार्यत्वात् ब्रह्मविद्यायाः काम्यफलसाधकत्वे प्रायश्चित्तत्व नास्तीति पूर्वपक्ष्याशयः। सिद्धान्ते प्रायश्चित्तत्वमेव, न काम्यत्वं, पापनिवृत्यर्थमेव क्रियमाणत्वात्। धीविकासस्य स्वतस्सिद्धत्वादिति।

श्रुतिस्मृत्योः परस्परविरोधे विरुद्धार्थबोधकस्मृतेरनादरणीयत्व पूर्वमीमांसास्मृत्यधिकरणेनिर्णीतम्। अथापि केवलश्रुतिविरुद्धत्व अनादरणीयत्व न प्रयोजकम्। यतः 'औदुम्बरी सर्वा वेष्टयितव्या' इति स्मृतिः लोभमूलत्वेन प्रवृत्ता इति। अतः लोभमूलकत्वविशिष्ट वेदविरुद्धत्वमेव अप्रामाण्ये प्रयोजकम्। अत एवात्र स्मृत्यधिकरणप्रसक्तिः। यतः सांख्यस्मृतिः वेदविरुद्धापि न लोभमूलकत्वविशिष्टा अनया स्मृत्या वेदान्तार्थोपबृंहणं कार्यमिति सांख्यस्मृत्यवलम्बनेन पूर्वपक्षोत्थानम्। तस्मात् नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि इति ब्रह्मवर्तीयस्मृतेः अश्लेषविनाशश्रुतिविरोधेपि लोभमूलकत्वविशिष्टश्रुति

विरुद्धत्वाभावात् प्रामाण्यमस्त्विति पूर्वपक्षिणः आशयः। अनुपासक-विषयत्व उपासकविषयत्वरूपभेदमादाय व्यक्तिभेदेन परिहारात् अविरोधस्थापनम्।

141. अविभागाधिकरणे

अविभागोवचनात्। अत्र अवचनादित्यपि पदच्छेदः कर्तुं शक्यते। 'पुनस्तत्राव्यक्तादि सृष्ट्यवचनाच्च' इति श्रीभाष्यम्।

146. अर्चिराद्यधिकरणे

अर्चिरादिना...। ननु नानाशाखाम्नातानां अर्चिरादीनां एकमार्गत्वाश्रयणे कि बीजम्? प्रत्यभिज्ञानं न बीजं भवति। परविद्यासु ब्रह्मप्रत्यभिज्ञानेऽपि भिन्नविद्यात्वाभ्युपमात्। न च सर्वासामेकविद्यात्वाभ्युपगमे गुणानन्त्यादुपसहारो न शक्यः। अत्र तु मार्गान्वयिनां पदार्थानां द्वादशसंख्यान्तर्भूतत्वात् चिन्तनयोग्यतेति प्रत्यभिज्ञानं ऐक्यसाधक भवेदिति वाच्यम्। एवमपि, अर्चिर्दिनपूर्वपक्ष...' इत्युक्तरीत्या विदुषां एकैकमप्यनपहाय गत्युक्त्यनुपपत्तेः। चतुर्मुखलोकात्ब्रह्मप्रपित्सोः पूर्वतनार्चिराद्यसंभवात्। न च चतुर्मुखलोकाद्गच्छतः अर्चिषा आतिवाहिकेन नयनाभावेऽपि एतदन्तर्गतेनान्तिमेन नयनात् अर्चिः आदिः यस्येति व्युत्पत्त्या नेतुस्तस्यापि अर्चिरादित्वमस्तीति न दोषः। मदरास् मार्ग इति व्यवहारवदत्रापि अर्चिरादिमार्ग इति व्यवहारोपपत्तेरिति वाच्यम्। तथापि उपासकानां तत्र तत्र संभवदातिवाहिकनयनस्यैव तावता सिद्धत्वात् नेत्रादिवाहिकभेद एवाश्रित इति मार्गानेकत्वेऽपि दोषाभावात् इति चेत्—यत्र यत्र देशे ये ये उपासकाः तेषां सभवन्तः आतिवाहिका एव तान् नयन्तीत्यविवादम्। परन्तु आतिवाहिकेषु क्रमक्रमि भेदः नाश्रयणीयः इत्येव सूत्रतात्पर्यमिति न दोषः।

150. कार्याधिकरणे

'कार्यं बादरिः...' इति सूत्रे ब्रह्मोपासनस्य मोक्षप्रापकत्व अस्य मते अङ्गीक्रियते न वा? न चेत्, अविद्यानिवृत्तिरेव न स्यात्। अङ्गीकारे अविद्यानिवर्तक ब्रह्मोपासनविधान कुत्र? अक्षरसदादि अर्चिरादि गत्युक्ते. तेषां सर्वेषामपि कार्यब्रह्मोपासनरूपत्वाभ्युपगमावश्यकत्वात्। इति चेत्—

कार्याधिकरणे इन्द्रप्राणविद्यायामिव हिरण्यगर्भशरीरकपरमात्मोपासन विषयत्वेन पूर्वपक्षिणोऽभिप्रायो वर्णनीयः इति केचित् ।

151. संपद्याविर्भावाधिकरणे

अपहतपाप्मत्वादीनां कथ स्वाभाविकत्वम् । जीवो हि अनादिपापपुण्यसंबन्धवान् । 'अनादित्वादुपपद्यते चोपलभ्यते च' इति सूत्रेण एतत्पापादीनां अनादित्व हि सूत्रारूढम्। पापादिक भगवन्निग्रहादिरूप पराभिध्यानात्तु तिरोहितं इति सत्यसङ्कल्पत्वादिकंच तिरोहितमित्यपि सूत्रसिद्धम् । पापपुण्यवशाद्धि जीवाना जन्मपरपरा तत्प्रयुक्तसुखदुःखादि च । पापसबन्धाद्यभावस्य स्वाभाविकत्वे सर्वमिदमनुपपन्नं एवमादिचोद्यानां परिहारः अस्मदीयमतत्रयसारग्रन्थे दृष्टव्यः । उभयाविर्भावः उत विशेषणाविर्भावः इत्यादिकमपि तत्रैव द्रष्टव्यम् ।

153. ब्राह्माधिकरणे

ब्राह्मेण जैमिनिरित्यत्र अपहतपाप्मत्वादीना ब्रह्मगुणसाम्योक्ति कुतः ? उच्यते–ब्राह्मेण–ब्रह्मसंबन्ध्यपहतपाप्मत्वादिगुणसदृशापहतपाप्मत्वादिगुणेनाविर्भावः इत्युक्त भवति । अन्यथाऽर्थस्यैवबाधः । न हि ब्रह्मसम्बन्धिगुणानामेतेषां जीवे सद्भावः तत्तद्गुणानां तत्तन्मात्रविश्रान्तत्वात् नह्यन्यदीयगुणानामन्यत्र संक्रमः सभवति । अतः गुणानां सादृश्य विवक्षित्वैवार्थो वर्णनीयः । एतावत्परिश्रमं विना 'नैजेन' इत्युक्तौ न कोपि विरोधश्च । एवमनुवत्ता सादृश्यं च विवक्षित्वा ब्राह्मेणेत्युक्तौ तात्पर्यं पर्यालोचनीयम्। दहरविद्याया एते गुणाः ब्रह्मसंबन्धितया निर्दिष्टाः । प्रजापतिवाक्ये एते जीवसबन्धितयोपदिष्टाः । अतः एते उभयसंबन्धिन एव । एवं तत्त्वस्थितौ सत्यां ब्रह्म संबन्धिभूतैतद्गुण सदृशैतद्गुणविशिष्टतया आविर्भावोक्तौ स्वारस्यमस्ति । स्वाभाविकानामप्येतेषां संसारदशायां कर्मणातिरोधानमिति नाविर्भावः। परमात्मनस्तु न तथा तिरोधानमनाविर्भावश्च इति वैषम्य मस्ति । कर्मबन्धनिवृत्तिपूर्वकब्रह्मप्राप्तौ सत्यां पूर्ववदुत्तरत्र विरोधानाविर्भावादि नास्ति । यतः इतः परं मुक्तनिष्ठानामेतेषां ब्रह्मगतगुणसादृश्यमस्ति । तिरोधान अनाविर्भावार्हा अपि एते गुणाः इतः पर

न तथा विधा भवन्ति विरोधानाविर्भावाभवात्। इति विशेषणज्ञप्त्यै सादृश्योक्तिरिति । एतादृशाभिप्रायेणैव तद्भावभावमापन्नः तदाऽसौ परमात्मना । भवत्यभेदो भेदश्च तस्याज्ञानाकृतो भवेत् । इति पुराणवचनमपि प्रवृत्तम् । अत्रार्थत्रयं सभवति । ब्रह्मभावेन ब्रह्मस्वभावेन भाव सत्तामापन्नः ब्रह्मस्वभावप्रपोज्यसत्ताकः मुक्तः इत्यर्थः । यद्वा ब्रह्मणः भावः स्वभावः यस्य मुक्तस्य, स ब्रह्मा: तस्य भावः तत्त्वमापन्नः मुक्तत्वमापन्नः इत्यर्थः । अथवा ब्रह्मगतभावाभिन्नभावमापन्नः इत्यर्थः ब्रह्मसंबन्धिस्वभूतापहतपाप्मत्वसदृशापहतपाप्मत्वमापन्नः इति फलति । ब्राह्मेण जैमिनिरित्यत्रायमेवार्थो विवक्षितः ।

जीवगतापहतपाप्मत्वादीना ब्रह्मगतगुणसाम्योक्तिः इत्यादिकमपि अस्मदीयमतत्रयसारग्रन्थे एव निरीक्ष्यम् ।

154. सङ्कल्पाधिकरणे

'अत एव चानन्याधिपतिः—अनेन मुक्तस्य अकर्मवश्यत्वमुच्यते । यद्यपि साम्पराय, तदधिगमाधिकरणादिषु कर्मनाशः बहुप्रकारः उक्तः इति अत्र पुनर्वचनमनपेक्षितमेव । तथापि स्वस्वरूपाविर्भावानन्तरवक्तव्यत्वं कस्यचित्कर्मनाशस्याभिधाय 'अत एव चानन्याधिपतिः' इति सूत्रितम् । सर्वेषां स्थूलकर्मणां नाशेऽपि स्वस्वरूपाविर्भावप्रतिबन्धक सूक्ष्मभूतकिञ्चित्कर्मणः ब्रह्मसंपत्तेः पूर्वं सत्वात् । तदनन्तरं च तन्नाशात् । अत एव 'सम्पद्याविर्भावः' 'ब्राह्मेण जैमिनिः' इत्यधिकरणानन्तरं एवं सूत्रितम् ।

155. अभावाधिकरणे

'स एकधा भवति'...अभावाधिकरणे, अशरीरं वाव सन्तं...इति श्रुतेः कर्मनिमित्तशरीराभाव परत्वेन ऐच्छिकशरीराभाव बोधकश्रुत्यभावेन शरीराभावे श्रुतिप्रमाणमेव नास्ति । 'स एकधा भवती'त्यादेः एकानेक शरीरसद्भावमात्र बोधकत्वेन शरीरसत्त्वावगमप्रमाणत्वात् । मुक्तस्य विदेहावस्थायां श्रुत्यन्तराभावाच्च । अतः 'उभयविधं बादरायणः' इति कथं सङ्गच्छते ? उच्यते—अशरीरं वावसन्तं इति मुक्तस्य शरीरभावः उक्तः शरीरे प्रयोजक कर्म इत्यनुभवसिद्धं मुक्तस्य कर्माभावात् तत्प्रयोज्यशरीरस्या सद्भावः अवश्यमङ्गीकरणीयः । मुक्त-

दशाया शरीरोत्पादकस्यान्यस्य चाभावात् न शरीरसद्भाव । स एकधा भवतीत्यादौ धाल्प्रत्ययः शरीरभेदमादायैव इत्यत्र त्रिलिङ्ग-मुक्तमपि नास्ति । इति बादर्याभिप्राय । जैमिनेस्त्वय अभिप्रायः— शरीरहेतुभूतकर्मणोऽभावेपि भगवत इवास्यापि सङ्कल्पमात्रेण शरीरोत्पत्तिसंभवात् सशरीरत्वस्य प्रकारान्तरासंभवात् स एकधा इत्यादिक शरीरभेदमादयैवे इति । अतोऽत्र बादरायणः उभयविध प्राह इति । सर्वमपिसुसङ्गतम् । मुक्तस्य ऐच्छिकशरीराभाव. न कयापि श्रुत्या बोध्यते । परं तु स एकधाभवति त्रिधाभवति इत्यादि श्रुतिबलादेव शरीराभावेपि आक्षिप्यते इति वक्तव्यम् । त्रिधाभवति इत्यादिना शरीरत्रितयसद्भावोऽवगम्यते । शरीरत्रियविशिष्टः मुक्तः स्वात्मान एकशरीरविशिष्टं सङ्कल्पयति चेत् एकशरीरविशिष्टोभवति। तदा शरीरद्वयपरित्यागः अवश्यको भवति एवं शरीरपरित्यागे सङ्कल्प्य एवकारणभूत इति एक शरीरपरित्यागेपि सङ्कल्पवान् चेत् तस्यापि परित्यागः सिद्ध एवेति ऐच्छिकशरीराभावोपि स्वतः सिध्यतीति बोध्यम् ।।

तोषायचात्तगुरुवर्यमहाविभूतेः
शास्त्रानुसारिसरणिं प्रतिपद्य जातम् ।
सार प्रबन्धमिह बुद्धिमतामपेक्ष्य
निन्दन्तु शास्त्रनिपुणाः यदि वा स्तुवन्तु ।। 1

विश्वस्य मुख्यगुरुरेव मयि प्रविष्टः
श्रीमान् दयाजलनिधिः व्यतनोत् प्रबन्धम् ।
मैव क्षति मम नृणामिह दोषवाचा
नाप्यस्ति मोद इह सर्वजनैः स्तुतौ वा ।। 2

अनुबन्धः सतां सद्यः हृदयाकर्षकस्सदा ।
रचितः श्रीनृसिंहस्य पदयोरर्पितो मया ।।
विमत्सराः जना लोके सर्वत्र विलसन्ति हि ।
तेषामेवोपकाराय ग्रन्थोऽयं बोभवीतु नः ।।

शुभमस्तु ।

शोधनिका

शुद्धं	पुटं	पंक्ति	शुद्ध	पुट	पंक्तिः
अस्मर्यमाणकर्तृक.			ब्रह्मासिद्धि-	48	16
अनन्तः	4	8	यस्य यादृक्	49	13
स्वरवर्णानुपूर्वी	5	27	द्विष्टसाधन-	49	22
वेदराशि स्थितः	5	27	द्विष्टसाधन-	49	23
स वाग्वज्रो-	8	18	साधनत्वरूपो-	49	26
समाधिकरणं	13	10	पाचरात्राप्रामा-	53	1
व्यवह्रियमाणाः	17	4	अभेदे उपसं	54	23
अफाल-	19	25	स्वर्गादिसाधनविल-	55	16
मित्थमनु	20	10	प्रथमे पादे इति स्थल		
ज्ञानपर	23	1	चतुष्टये अधिकं	56-57	पुटयोः
निबबन्धेति	25	2	बाह्यत्वेन जघन्यत्व	62	15
जैमिनिना	25	18	सर्वावस्थासु दोषवत्व-	63	10
दिव्यसूरय.	29	4	श्रीमद्भाष्य–'कुतःबचनात् तेजः		
द्वयात्मकत्वं	30	1	परस्यां...पुनस्तत्रा व्यक्तादि		
ब्रह्मशब्देन च स्व-	40	9	सृष्टयबचनाच्च' इति	65	12
अन्य.। स एव	42	9	काष्ठा दश, षष्ठे		
रूपाव्याप्ते प्रकृते			द्विरदाः	68	10-11
उपपादना	44	28	30-पादभेद अधिकरण-	71	8
दन्यः परमात्मा			तु न जानीमः	72	7
उत स	47	3	अद्वैतिमते द्वैतिमते-	74	13
प्रवृत्ता इति ।	47	8	अथद्वैतिमते इदम-		
ब्रह्माभ्युपग	47	24	शुद्ध	74	15
पन्नमिति । अगत्या			एवं मतत्रयेपि इत्याद्य		
अपिशब्दस्य	47	25	शुद्धं	76	22
शङ्कापरिहार-	48	5	भ्यः इति सूत्र	81	23
अत्यन्तास्पष्टजीवादि	48	8	मुद्रणाशुद्धिर्वा-	82	11
अस्पष्टस्पष्टरूप	48	12	इत्यत्र आति	82	26

शुद्धं	पुट	पक्तिः	शुद्धं	पुटं	पंक्तिः
संपद्याविहाय	83	1	माणिकः इति न	106	9
विकारावर्ति-	83	5	हिसारूपाविशुद्धिः	107	25
प्रायशो न व्र-	83	12	नाशादिरूपाविशुद्धि	107	26
विषयवाक्यस्थपदं	85	3	दर्शनात् इति		
विभाग. शतवत् इ-	86	4	सिद्धान्त उच्यते	124	9
सूत्रकृतः शैलीपरामर्शे			ब्रह्म च न निषेधति		
सूत्रकारोऽयं लाघवैकदृष्टि			पर तु	125	16
इति विज्ञायते अयमंश			विद्यानानात्व-	131	25
अस्मदीयानुबन्धे दृष्टव्यः	86	17	गोथोपसा-	132	19
विचारश्चानुबन्धे			इति सर्वयोषिदप-	133	14
एव द्रष्टव्यः	86	18	अव्यक्तलिङ्गकाचारः	134	21
क्वचिदेव तु प्रथमसूत्रे			वाय्वधिकरणं	138	26
सिद्धान्तः पश्चात्	87	4	ताभ्यो बुद्धिः सर-	147	15
मालायां बिशेष			करणैः कारण	155	19
विषयो द्रष्टव्यः।	90	26	पश्यत्येव प्रभु-	157	26
खण्डनमत्र क्रियते इति			कर्मनिबन्धक	170	4
पूर्वमेव सविस्तरमुक्तम्	90	27	निमित्तोपादनत्व	174	25
शारीरकशास्त्र-	93	27	कायवपुस्तनु	175	24
मनसो नार्चि-	98	3	जगद्गता		
परमात्माविषय-	98	9	पुरुषार्थाश्रयत्वा	176	21
फलस्योपसनाऽविष-	101	5	पाषाणादीनां श्रुतं	178	11
कोटावन्तर्भावेऽपि	101	13	ब्रह्मणो जिज्ञास्यत्व	178	19
कारणावस्थादित्यशरी	101	17	शंभुसुत्रामादि	180	22
सनस्याङ्गीकारवत्	102	8	परविद्यावैद्य	180	24
संभवः। अतो	102	11	च स्वनियाम्य-	181	4
मानाभावः इति	102	11	वादावलिश्च	181	19
वस्वादि सर्व	105	22	वर्त्तिनः	181	26

शुद्ध	पुट	पक्तिः	शुद्ध	पुटं	पंक्तिः
स्वामित्वप्र	181	27	अपि च	202	25
तद्वत्तानां च	183	4	अहि अशनि	203	17
सिद्धप्रायः	184	12	विशिष्टाद्वैत	203	23
सर्वकैङ्कर्यकारी,			व्यतिरिक्तं नास्त्येवेति	294	2
इत्युक्त्या	185	1	ब्रह्मज्ञानासंभव	204	11
रूपत्वासंभवात् ।			ब्रह्माज्ञानस्य	204	16
अतः	185	18	तिरोधान	294	24
ब्रह्म इत्यादि-			नावैलक्षण्येपि आका-		
सारावल्या च	186	2	रान्तरेण वैलक्षण्य	205	12
अविद्यानतिरिक्त	187	1	पृथिवीत्वादिना	205	13
भोगोत्पादनार्थं	189	5	अन्याकारेण वैलक्षण्य	205	14
मात्रे परं तु	189	7	ज्ञान प्रति	206	9
कथ घट प्रति	190	2	संभव इति	208	20
पादात् समवायि-			ज्ञानां त्रयाणामपि	210	14
कारणं च	190	13	शिवत्वसिद्धि.	211	1
ज्योत्स्ना ; न ज्ञान	193	10	कस्यचित् भवान्तरे	217	26
विद्यायामधि	193	27	उपादानत्वनिमित्त-		
प्रवर्तक	194	5	त्वयोः सामा	219	12
परिणामिकार	196	3	चेतनाचेतनाविशिष्ट	222	14
ब्रह्म विवर्तोपादान।	196	4	सर्वस्य ब्रह्माभिन्नत्वे	223	10
नमः श्रीरंग	199	22	मृदो जातस्य	223	12
अविद्यया कथं	200	10	अन्तः	223	19
प्रकाशस्वरू	200	19	गृह्णातेः इति		
आकारान्तरेण			वक्तव्यम् ।	224	26
वैलक्षण्यं	201	11	नाभ्युपगम्यते	225	17
विशेषसत्वात्	201	13	उपादानत्वापत्ते.	226	7
मुख्यवृत्तमेव	202	23	उत्पलत्व	226	22

शुद्ध	पुटं	पंक्ति	शुद्ध	पुटं	पंक्तिः
उक्त्या	226	27	अत्र भवतु	247	20
नियन्तु शक्नोति	226	28	द्वया	248	26
घटवद्भूतल			लाक्षणिकत्वस्य	257	11
निरूपित	227	6	ईकाराभावः	258	10
कस्य च भिन्नत्वात्	227	22	ते न प्रलय	260	19
वारणात् । कथं रूपादिषु			धर्मस्यैव । कर्म हि	261	16
अन्तःप्रवेशपूर्वक नियमनं			प्रश्नाः अत्र संभवन्ति ।		
इति चेत् ?	229	9	अत्रोत्तरम्—	262	9
वेदोक्तार्थस्पृहालुभिः	229	10	धर्मानन्द.	265	2
शरीरित्वमात्र	231	19	अनन्तपदं	265	7
शरारत्वमत्र	231	23	पंक्तिरिय अधिका-	265	22
हृदयङ्गमा	231	26	चेत्? ब्रह्मवित्कर्मस्वरूपविषये		
त्वप्रसङ्गात्	234	18	एवायं नियम		
णत्वस्यानाव	234	20	इत्यदोषात्	266	27
कत्रापि जातिः	235	7	उपासलभावे	272	26
यद्वा घटे	235	24	व्यवस्थितविकल्पेन	274	16
ऽपि यथा घटादिषु	236	20	शिष्टफलकत्वा		
ध्येयं' इति श्रीभाष्ये	237	1	भावसिद्धे·	275	8
भूत ब्रह्म परा	238	24	विरोधानुपपत्तेः	278	17
पादनासभवात्	242	18	अनादरणीयत्वे	280	23
उभयी स्मृति	245	3	स ब्रह्मभावः	283	6
वेन अभावात् न	246	3	शरीराभावोऽपि	284	9
धिकमुक्तं । कुत.?	246	13	चाद्य	284	17
नुप्रवेशे न	247	11			